SRI AUROBINDO LIBRARY
PONDICHERRY, INDIA

Fumigated OCT 1993

But thought nor word can seize eternal truth

श्यामारहस्यम् ।

श्रीपूर्णानन्दगिरिपरमहंसपरिव्राजक-
विरचितम् ।

पण्डितकुलपतिना
वि, ए, उपाधिधारिणा
श्रीजीवानन्दविद्यासागरभट्टाचार्य्येण
संस्कृतं प्रकाशितञ्च ।

द्वितीयसंस्करणम् ।

कलिकातानगरे
कलिकाता यन्त्रे
मुद्रितम् ।

ई १८९६ ।

पण्डितकुलपतिः

श्रीजीवानन्दविद्यासागर बि, ए,

PANDIT KULAPATI

JIBANANDA VIDYASAGARA, B. A.

Superintendent, Free Sanskrit College, Calcutta.

श्यामारहस्यम् ।

प्रथमः परिच्छेदः ।

ओं नमः परदेवतायै ।

देवीं दानवदैत्यदर्पनिवहानुन्मूलयन्तीं शिवां
ब्रह्मानन्दमहेशमौलिमणिभिः संसेविताङ्घ्रिद्वयाम् ।
नत्वा श्रीगुरुपादपद्मपरमामोदामृतप्लावितः
पूर्णानन्दगिरिस्तनोति विमलां श्यामारहस्याभिधाम् ॥
स्वतन्त्रं वीरतन्त्रञ्च तन्त्रं फेत्कारिणीं तथा ।
कालिकाकुलसर्वस्वं कालीतन्त्रञ्च यामलम् ॥
कुलचूड़ामणिञ्चैव कुमारीतन्त्रमेव च ।
कुलार्णवं तथा कालीकल्पं भैरवतन्त्रकम् ॥
कालिकाकुलसद्भावं तथा चोत्तरतन्त्रकम् ।
गुरूणाञ्च मतं ज्ञात्वा साधकानां तथा मतम् ॥
शुद्धबुद्धिस्वभावार्थं वक्ष्यामि मोक्षकारिणीम् ॥

तदुक्तं स्वतन्त्रे ।

क्रोधीशं बिन्दुयुक् कान्ते ! त्रिमूर्त्त्यग्निसमायुतम् ।
त्रिर्लिखेत् परतो देवि ! हुंकारद्वयमेव च ।
मायाद्वयं समालिख्य अत्रिसंवर्त्तसूक्ष्मयुक् ॥
त्रैकालिके सप्तवर्णान् पूर्ववत् परमेश्वरि ! ।
स्वाहान्तेयं महाविद्या द्वाविंशत्यक्षरा परा ॥

अनया सदृशी विद्या नास्ति ज्ञाने तु मामके ॥

कुमारीतन्त्रेऽपि। भैरव उवाच।

अतिगुह्यतरं ह्येतत् ज्ञानात्मकं सनातनम्।
अतीव च सुगोप्यञ्च कथितुं नैव शक्यते॥
अतीव च प्रियासीति कथयामि तव प्रिये!।
रूपाणि बहुसंख्यानि प्रकृतेः सन्ति भाविनि!॥
तेषां मध्ये महेशानि! कालीरूपं मनोहरम्।
विशेषतः कलियुगे नराणां भुक्तिमुक्तिदम्॥
तस्यास्तूपासकाश्चैव ब्रह्मविष्णुशिवादयः।
चन्द्रः सूर्य्यश्च वरुणः कुवेरोऽग्निस्तथापरः॥
दुर्वासाश्च वशिष्ठश्च दत्तात्रेयो बृहस्पतिः।
बहुना किमिहोक्तेन सर्वे देवा-उपासकाः॥
कालिकायाः प्रसादेन भुक्तिमुक्तिः करे स्थिता॥
तस्या मन्त्रं प्रवक्ष्यामि यतो रक्षेद्युगत्रयम्।
ककारं वह्निसंयुक्तं रतिविन्दुसमन्वितम्॥
त्रिगुणञ्च ततः कूर्चयुग्मं लज्जायुगं तथा।
दक्षिणे कालिके चेति पूर्ववीजानि वेष्टयेत्॥
वह्निजायावधिः प्रोक्तः कालिकाया मनुर्मतः।
न सुसिध्याद्यपेक्षास्ति नारिमित्रादिदूषणम्॥

श्रुतिरपि।—अथहैनां ब्रह्मरन्ध्रे ब्रह्मस्वरूपिणीमाप्नोति सुभगां त्रिगुणयुक्तां कामरेफेन्दिरां विन्दुमेलनरूपां एतत्त्रिगुणितामादौ तदनु कूर्चद्वयम्। कूर्चवीजञ्च—व्योमषष्ठस्वरविन्दुमेलनरूपम्। तदेव द्विरुच्चार्य्य भुवनां द्वयम्। भुवना तु व्योमज्वलनेन्दिरा शून्यमेलनरूपा। तदुक्तं—दक्षिणे कालिके तवाभिमुख्यता। तदनु वीजसप्तकमुच्चार्य्य वह्निजानुजायामुच्चरेत्। मत्वा शिवमयो भवेत्। सर्वसिद्धीश्वरो

भवेत् । गतिस्तस्यास्ति नान्यस्य स तु नारीश्वरः स तु दैत्ये-श्वरः स तु सर्वेश्वर इति ।

भैरव उवाच ।

नात्र चिन्ताविशुद्धिर्वा नारिमित्रादिदूषणम् ।
न वा प्रयासबाहुल्यं समयासमयादिकम् ॥
देवैर्देवत्वविषये सिद्धैः खेचरसिद्धये ।
पन्नगैराक्षसैर्वन्यैर्मुनिभिश्च मुमुक्षुभिः ॥
कामिभिर्धर्मिभिश्चार्थलिप्सुभिः सेवितां पराम् ।
न चित्तव्ययबाहुल्यं कायक्लेशकरं न च ।
तत्र यश्चिन्तयेन्मन्त्रो सर्वसिद्धिसमृद्धिदाम् ॥
तस्य हस्ते सदैवास्ति सर्वसिद्धिर्न संशयः ।
गद्यपद्यमयी वाणी सभायां तस्य जायते ॥
तस्य दर्शनमात्रेण वादिनो निष्प्रभां गताः ।
राजानोऽपि च दासत्वं भजन्ते किं परे जनाः ।
वह्नेः शैत्यं जलस्तम्भं गतिस्तम्भं विवस्वतः ॥
दिवारात्रिव्यत्ययश्च वशीकर्त्तुं क्षमो भवेत् ।
सर्वस्यैव जनस्यैव वल्लभः कीर्त्तिवर्द्धनः ॥
अन्ते च भजते देव्या गणत्वं दुर्लभं नरैः ।
चन्द्रसूर्य्यसमो भूत्वा वसेत् कल्पायुतं दिवि ।
न तस्य दुर्लभं किञ्चिद् यः स्मरेत् घोरदक्षिणाम् ॥

अथास्याः सपर्य्याविधिर्लिख्यते । ब्राह्मे मुहूर्त्ते उत्थाय बद्धपद्मासनः शिरःस्थाधोमुखशुक्लवर्ण-सहस्रदलकमलकर्णि-कास्थ-शशहीनशरदिन्दुसुन्दर-चन्द्रमण्डलान्तर्गतहंसपीठे निज-गुरुं ध्यायेत् । यथा ।

शुद्धस्फटिकसङ्काशं शुद्धक्षौमविराजितम् ।
गन्धानुलेपनं शान्तं वराभयकराम्बुजम् ॥

मन्दस्मितं निजगुरुं कारुण्येनावलोकिनम् ।
वामोरुशक्तिसंयुक्तं शुक्लाभरणभूषितम् ॥
स्वशक्त्या दक्षहस्तेन धृतचारुकलेवरम् ।
वामे धृतोत्पलायाश्च सुरक्ताया: सुशोभनम् ॥
परानन्दरसोल्लासलोचनद्वयपङ्कजम् ॥

इति ध्यात्वा दिव्याभिषेकेण गुरुणा संप्रदायानुगतकृत-नामपूर्वकं मानसैरुपचारैराराध्य ऐं क्लीं श्रौं हसखफ्रें हस-क्षमलवरयुं हसखफ्रें श्रीअमुकानन्दार्थाय श्रीअमुकदेवशर्मा श्रीगुरुपादुकां पूजयामि। इति गुरुपादुकां नत्वा दशधा जपसमर्पणं कृत्वा प्रणमेद् यथा—

अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया ।
चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नम: ॥

अथ सारदाटीकाकारश्रीराघवभट्टमतेन तु शक्तिविषये गुरोर्ध्यानम्। शुक्लवर्णमेव न गौरम्। तदितरविषये शुक्ल-मेवेति निश्चितं वचनद्वयदर्शनात्। तद्यथा—

श्वेताम्बरधरं गौरं श्वेताभरणभूषितम् ।
अपिच—रक्तमाल्याम्बरधरं सुरक्तं पद्मविस्तरम् ॥

इति तु असमीचीनम्। श्वेतवर्णं गुरोर्ध्यानान्तरं भवति शक्तिविषये तु तथा दर्शनात्। यथा ज्ञानार्णवे।

ब्रह्मरन्ध्रे सहस्रारे कर्पूरधवलो गुरु: ।
तस्मात् सम्प्रदायानुगत्या गुरोर्ध्यानं कुर्यात् ॥ इति शेष: ।

अथ गुरोराज्ञां गृहीत्वा मूलाधारपद्मकर्णिकास्थत्रि-कोणान्तर्गत-स्वयम्भूलिङ्गवेष्टनीं प्रसुप्तभुजगाकारां सार्द्ध-त्रिवलयां विद्युत्पुञ्जप्रभां नीवारशूकतन्वीं कुलकुण्डलिनीं
प इष्टदेवतास्वरूपां हुंकारेण हंस इति मनुना वधे/वनदहन-योगात् सचैतन्यां विधाय ब्रह्मवर्त्मना परमशिवे नीत्वा

चन्द्रमण्डले कुलगुरून् ध्यायेत्। तदुक्तं कालिकास्मृतौ।

मूलाधारे स्मरेद्दिव्यं त्रिकोणं तेजसां निधिम्।
तस्याग्निरेखामानीय अध-ऊर्द्ध व्यवस्थिताम्॥
नीलतोयदमध्यस्थतड़िल्लेखेव भासुराम्।
नीवारशूकतन्वीञ्च सुपीतां भास्करोपमाम्॥
तस्याः शिखाया मध्ये च परमोर्द्ध व्यवस्थिताम्।
स ब्रह्मा स स्वरः शान्तः स शिवः परमस्वराट्।
स एव विष्णुः स प्राणः स कालाग्निः स चन्द्रमाः॥
इति कुण्डलिनीं ध्यात्वा सर्वपापैः प्रमुच्यते।
स महापातकेभ्यश्च पूतो भवति।
सर्वसिद्धिं कृत्वा भैरवो भवति।

अथ कुलगुरून् ध्यायेत् यथा—कुलचूड़ामणौ।

मूलादिब्रह्मरन्ध्रान्तं गुणं ध्यात्वा गुरुं स्मरेत्।
प्रह्लादानन्दनाथाख्यं सकलानन्दमेव च॥
कुमारानन्दनाथाख्यं वशिष्ठानन्दनाथकम्।
क्रोधानन्दसुखानन्दौ ध्यानानन्दं ततः परम्॥
बोधानन्दं ततश्चैव ध्यायेत् कुलमुखोपरि।
महारसरसोल्लासहृदया घूर्णलोचनाः॥
कुलालिङ्गनसंभिन्ना घूर्णिताशेषमानसाः।
कुलशिष्टैः परिवृताः पूर्णान्तःकरणोद्यताः॥
वराभययुताः सर्वे कुलतन्त्रार्थवादिनः।
एवं कुलगुरून्नत्वा विसृज्य कुलमातृकाम्॥
कुलस्थाने समानीय स्नानार्थं तीर्थमाश्रयेत्।
शाक्तं कुलगुरुं वत्स! स्मृतं कुलसुखावहम्॥
रहस्यमद्भुतं प्रोक्तं गोप्तव्यं पशुशङ्कटे।
कुलनाथं परित्यज्य ये शाक्ताः परसेविनः।

तेषां शिक्षा च यागश्च अभिचाराय कल्पते ।
तस्मात् सर्वप्रयत्नेन कुलीनं गुरुमाश्रयेत् ॥
कुलीनः सर्वविद्यानामधिकारीति गीयते ।
दीक्षागुरुः स एवात्मा सर्वमन्त्रस्य नापरः ॥

अन्यच्च श्रुतौ ।

प्रकाशमानां प्रथमे प्रयाणे प्रतिप्रयाणेऽप्यमृतायमानाम् ।
अन्तःपदव्यामनुसञ्चरन्तीमानन्दरूपामबलां प्रपद्ये ॥ इति ।

अहं देवो न चान्योऽस्मि ब्रह्मैवाहं न शोकभाक् ।
सच्चिदानन्दरूपोऽहमात्मानमिति भावयेत् ॥
प्रातःकृत्यमवश्यमेव नित्यं करणीयम् ।
प्रातःकृत्यमकृत्वा तु यो देवीं भक्तितोऽर्चयेत् ।
तस्य पूजा च विफला शौचहीना यथा क्रिया ॥

अथ नद्यादौ गत्वा कालिकारूपं सर्वं विभाव्य सुवर्ण-रजतात्मकं कुलगर्भमनामातर्जनीषु धृत्वा आचम्य मूलं स्मरन् मलापकर्षं कृत्वा आचम्य ओं अद्येत्यादि कुलदेवताप्रीति-कामो मन्त्रस्नानमहं करिष्ये । इति सङ्कल्प्य जले त्रिकोणचक्रं कृत्वा सूर्यमण्डलादङ्कुशमुद्रया तीर्थमावाह्य मूलान्ते ओं आत्मतत्त्वाय स्वाहा विद्यातत्त्वाय स्वाहा । शिवतत्त्वाय स्वाहा । इति आचामेत् । अथवा ओं क्रीं स्वाहा इत्यनेन त्रिराचम्यात्मानं त्रिः संप्रोक्ष्य मूलेन मृत्तिकया अङ्गलेपनं कृत्वा मूलं पठन् कुम्भमुद्रया स्वमूर्ध्नि त्रिजलमभिषिच्याङ्गुलीभिः श्रवणादीनि सप्तच्छिद्राणि संरुध्य त्रिर्निमज्जेत् । तदुक्तं कुमारीतन्त्रे—

वेदाद्यश्च तथा माया स्वाहेत्याचमनं मतम् ।

नीलतन्त्रेऽपि—

मलमूत्रानपि संत्यज्य गत्वा जलान्तिकं ततः ॥

मलापकर्षकं कृत्वा मन्त्रस्नानं समाचरेत् ।
विद्यया त्रिर्निमज्ज्यैव आचामेत् पयसा पुनः ॥

कुलचूड़ामणौ—

कृष्णरक्तहरिन्नीला विविधा मम मूर्त्तयः ।
तत्र यत्कुलशिष्यश्च स तद्रूपं परामृशन् ॥
दिवं सर्वामथोर्वीञ्च पातालभूतसम्भवाम् ।
आचान्तः कुलदर्भेण स दर्भः कुलपुस्तकः ॥
कुलपात्रे तु दूर्वाञ्च सतिलं सजलं ततः ।
गृहीत्वा कुलदेवस्य प्रीतये स्नानमाचरेत् ॥
कृतसङ्कल्प एवादौ कुलचक्रं जले न्यसेत् ।
जलस्थानात् समानीय कुलमुद्राङ्कुशेन च ॥
कुलतीर्थानि तत्रैव समावाह्य शिवात्मकम् ।
तत्तोयञ्च त्रिधा पीत्वा त्रिधा च प्रोक्षणं मनोः ॥

अथ अङ्कुशमुद्रा । यथा ज्ञानार्णवे—

दक्षमुष्टिं विधायाथ तर्जन्यङ्कुशरूपिणी ।
अङ्कुशाख्या महामुद्रा त्रैलोक्याकर्षणक्षमा ॥

तीर्थावाहनमन्त्रो यथा । श्रीक्रमसंहितायां—

गङ्गे च यमुने चैव गोदावरि सरस्वति ।
नर्मदे सिन्धु कावेरि जलेऽस्मिन् सन्निधिं कुरु ।

अथ स्वतन्त्रेऽपि ।

मूलं पठन् मूर्ध्नि तोयं मुद्रया कुम्भसंज्ञया ।
क्षिप्त्वा वारत्रयं देवि ! आचामेत् साधकाग्रणीः ।
आत्मविद्याशिवैस्तत्त्वैस्ततो यागगृहं विशेत् ॥

कुम्भमुद्रा यथा गुप्तार्णवे—

दत्वाङ्गुष्ठे पराङ्गुष्ठं क्षिप्त्वा हस्तद्वयेन तु ।
सावकाशाञ्चैव मुष्टिं कुम्भमुद्रां विदुर्बुधाः ।

सप्तच्छिद्राणि संरुध्य ततो मज्जेत्त्रिधा सुधीः ॥
आत्मविद्याशिवैस्तत्त्वैराचामेत् साधकाग्रणीः ।
वह्निजायां ततो दत्त्वा शुद्धेन पयसा प्रिये ! ॥

ओं मानध्वनि वज्रिणि महाप्रतिशरे रक्ष रक्ष हुं फट् स्वाहा। इति शिखाबन्धनम्। मूलेन तिलकं कृत्वा पूर्ववदाचम्य वैदिकीं सन्ध्यां विधाय तान्त्रिकीं सन्ध्यां कुर्य्यात्। तदुक्तं कुमारीकल्पे—

प्रणवं पूर्वमुद्धृत्य मानान्ते च ध्वनीति च ।
वज्रिणीतिपदं प्रोक्तं महाप्रतिशरे तथा ॥
रक्षद्वयं हुं फट् स्वाहा इति च तदनन्तरम् ।
अनेनैव च मन्त्रेण रक्षां कुर्य्याद्विचक्षणः ॥

रक्षामिति शिखाबन्धनरूपेण वस्त्राञ्चले ग्रन्थिबन्धनरूपेण वा कुर्य्यादित्यर्थः। सारदाटीकायाञ्च—

उक्तेनैव विधानेन कृत्वा स्नानञ्च तान्त्रिकम् ।
वैदिकीं तान्त्रिकीं सन्ध्यां कृत्वा तर्पणमाचरेत् ॥

तान्त्रिकीसन्ध्या यथा। तदुक्तं तत्रैव।

पुनराचम्य विन्यस्य षड़ङ्गमपि मन्त्रवित् ।
वामहस्ते जलं गृह्य गलितोदकविन्दुभिः ॥
सप्तधा प्रोक्षणं कृत्वा मूर्द्ध्नि मन्त्रं समुच्चरन् ।
अवशिष्टोदकं दक्षहस्ते संगृह्य बुद्धिमान् ॥
इड़याकृष्य देहान्तः क्षालितं पापसञ्चयम् ।
कृष्णवर्णं तदुदकं दक्षनाड्या विरेचयेत् ॥
दक्षहस्ते च तन्मन्त्री पापरूपं विचिन्त्य च ।
पुरतो वज्रपाषाणे प्रक्षिपेदस्त्रमन्त्रतः ॥

अन्यत्रापि—

षड़ङ्गन्यासमाचर्य्य वामहस्ते जलं ततः ।

गृहीत्वा दक्षिणे चैव संपुटं कारयेत्ततः॥
शिववायुजलपृथ्वीवह्निवीजैस्त्रिधा पुनः।
अभिमन्त्र्य च मूलेन सप्तधा तत्त्वमुद्रया॥
निक्षिपेत्तज्जलं मूर्द्ध्नि शेषं दक्षे विधाय च।
शरीरान्तःस्थितं पापं क्षालयेत् साधकाग्रणीः॥

अथ प्रयोगः। पूर्ववदाचम्य षड़ङ्गन्यासं कृत्वा वामहस्ते जलं निधाय दक्षहस्तेनाच्छाद्य हं यं वं लं रं इति त्रिरभिमन्त्र्य मूलमुच्चरन् गलितोदकविन्दुभिः तत्त्वमुद्रया मूर्द्ध्नि सप्तधाभ्युक्षणं कृत्वा शेषजलं दक्षहस्ते समादाय तेजोरूपं ध्यात्वा इड़याकृष्य देहान्तःपापं प्रक्षाल्य कृष्णवर्णं तज्जलं पापरूपं ध्यात्वा पिङ्गलया विरिच्य पुरःकल्पितवज्रशिलायां फड़िति प्रक्षिपेत्। इति तान्त्रिकी सन्ध्या।

ततः हस्तौ प्रक्षाल्याचम्य जले यन्त्रं ध्यात्वा सावरणां देवतामावाह्य ऐशाने ऐं श्री अमुकानन्दनाथभैरवस्तृप्यतामिति देवतीर्थेन त्रिः सकृद्वा शुद्धोदकेन सन्तर्प्य वह्नौ परमगुरुं नैर्ऋत्यां परापरगुरुं वायव्यां परमेष्ठिगुरुं पूर्ववत् सन्तर्प्य मध्ये श्रीअमुकदेवता तृप्यतामिति यथाशक्तितः सन्तर्प्य एकैकाञ्जलिना परिवारान् सन्तर्पयेत्। अशक्तश्चेत् मूलमुच्चरन् सायुधसपरिवार-सवाहन-महाकालसहित--श्रीदक्षिणकालिकामाता तृप्यतामिति त्रिः सप्तधा वा ऋषीन् भैरवान्तान् स्वकल्पोक्तविधिना स्वपित्रादीनपि सन्तर्प्य दूर्वाक्षतरक्तपुष्पादिना अर्घ्यं कृत्वा ह्रीं हंसः मार्त्तण्डभैरवाय प्रकाशशक्तिसहिताय इदमर्घ्यं स्वाहा इति सूर्य्याय त्रिरर्घ्यं समुत्थाय दत्त्वा सूर्य्यमण्डले देवीं ध्यात्वा दूर्वाक्षतविल्वपत्रजवापुष्पादिना अर्घ्यं कृत्वा देवीगायत्रीमुच्चरन् महाकालसहितायै श्रीमद्दक्षिणकालिकायै इदमर्घ्यं स्वाहा इत्यर्घ्यं दत्त्वा गायत्रीं यथाशक्तितः प्रजप्य देव्यै समर्प-

येत्। तदुक्तम्। तर्पणादौ प्रयुञ्जीत तृप्यतां महाकालभैरवः पिता।

मूलान्ते तर्पयामीति स्वाहान्तं तर्पणं मतम्।
एवंविधं तर्पणन्तु कृत्वा पापक्षयो भवेत्॥

कुलचूड़ामणौ च।

भैरवाय च देवाय भैरवेण च कर्त्तृणा।
भैरवाख्यं प्रदातव्यं मन्त्रमुच्चार्य्य पूर्वतः॥
दातृदानगृहीतृंश्च ततो लिङ्गानुरूपतः।
भैरवीं भैरवात्मानं भावयेत् यदशेषतः॥
श्राद्धे विवाहे दाने च स्नानेनाङ्गप्रपूजने।
एवं चिन्तापरे देवः प्रसीदति न संशयः॥

अन्यच्च।

एवमेव विधानेन यथाशक्ति च तर्पयेत्।
मार्त्तण्डभैरवायेति त्रिरर्घ्यं कल्पयेत्ततः॥

कुलचूड़ामणौ च।

कुलसूर्य्याय देवाय त्रिरर्घ्यं तु प्रकल्प्य च।
देवीं पितॄनृषींश्चैव तर्पयेत् कुलवारिणा॥

नन्दिकेश्वरसंहितायाञ्च।

यावन्न दीयते चार्घ्यं भास्कराय निवेदनम्।
तावन्न पूजयेद्विष्णुं शङ्करं वा सुरेश्वरीम्॥
दिनेशाय तु चोत्तिष्ठन् वारिणा चाञ्जलित्रयम्।
अष्टोत्तरशतावृत्त्या गायत्रीं प्रजपेत् सुधीः॥
कालिकायै पदं प्रोक्त्वा विद्महे तदनन्तरम्।
श्मशानवासिनीं ङेन्तां धीमहीति ततो वदेत्॥
तन्न घोरे पदं प्रोच्य प्रचोदयात् पठेदिति।
अस्याः प्रभावमात्रेण महापातककोटयः॥

सद्यः प्रलयमायान्ति साधकस्य च नान्यथा।
रावणस्य बधाच्चैव रामचन्द्रो विमोचितः॥
गुरुदाराकर्षणाच्च देवश्चन्द्रो विमोचितः।
मातृवधात् परशुरामो मोचितोऽस्याः प्रसादतः॥
सुरापानाच्च श्रीकृष्णो दत्तात्रेयस्तथैव च।
एवमेषा महाविद्या गोप्तव्या चैव सुन्दरि!॥
महापातकयुक्तोऽपि प्रजपेद्दशधा यदि।
सत्यं सत्यं महादेवि! मुक्तो भवति तत्क्षणात्॥

अथ कुलचूड़ामणौ च।

उत्थाय कुलवस्त्रे च परिधाय कुलेन तु।
तिलकं कुलरूपञ्च कृत्वाचम्य कुलेश्वरः॥

स्वतन्त्रेऽपि।

मोक्षार्थी रक्तवस्त्रेण भोगार्थी श्वेतवाससा।
मारणे कृष्णवस्त्रञ्च वश्ये रक्तं सदा गृही॥
उच्चाटे व्याघ्रचर्माणि वृक्षत्वक् स्तम्भकर्मणि।
परिधाय ततो मन्त्री यागभूमिमथो विशेत्॥

तन्त्रान्तरे च।

ततश्च साधकश्रेष्ठो हृदि मन्त्रं परामृशन्।
अवहिर्मानसो योगी यागभूमिमथो विशेत्॥
जलशङ्खं करे कृत्वा गत्वा द्वारि महेश्वरि!।
क्षालयेद्धस्तपादौ च वक्ष्यमाणेन वर्त्मना॥

यागस्थानानि यथा।—फेत्कारिण्याम्।

एकलिङ्गे श्मशाने वा शून्यागारे चतुष्पथे।
तत्रस्थः साधयेद् योगी विद्यां त्रिभुवनेश्वरीम्॥
पञ्चक्रोशान्तरे यत्र न लिङ्गान्तरमीक्षते।

तदेकलिङ्गमाख्यातं तत्र सिद्धिरनुत्तमा ॥

मुण्डमालातन्त्रे च ।

नदीतीरे विल्वमूले श्मशाने शून्यवेश्मनि ।
एकलिङ्गे पर्वते वा देवागारे चतुष्पथे ॥
शवस्योपरि मुण्डे च जले वा कण्ठपूरिते ।
संग्रामभूमौ योनौ वा स्थले वा विजने वने ।
यत्र कुत्र स्थले रम्ये यत्र वा स्यात् मनोलयः ॥

अन्यत्रापि ।

ऊषरे पर्वते वापि निर्जने वा चतुष्पथे ।
देवागारे देवशून्ये विल्वमूले नदीतटे ॥
स्वगृहे निर्जनारामे तथा चाश्वत्थसन्निधौ ।
अथैतेषामेकतमं स्थानमाश्रित्य यत्नतः ॥

ओं वज्रोदके हुं फट् स्वाहा । अनेन जलं सव्येन आनीय आसनमभ्युक्ष्य उपरि उपविश्य ओं ह्रीं विशुद्धैः सर्वपापानि शमय अशेषविकल्पमपनय हुं फट् स्वाहा इति पादौ प्रक्षाल्य पूर्ववदाचामेत् । तदुक्तं कुमारीकल्पे ।

ओं वज्रोदके हुं फट् स्वाहामन्त्रेण मन्त्रवित् ।
जलमानीय सव्ये तु आसनं शोधयेत्ततः ॥
प्रणवं पूर्वमुद्धृत्य लज्जावीजं तथैव च ।
ततो विशुध्यन्ते सर्वपापानि शमयेदथ ॥
अशेषान्ते विकल्पं स्यात् अपनयेति ततःपरम् ।
कूर्चवीजं भवेन्मन्त्रं पादप्रक्षालने प्रिये ! ॥

अथ वामे त्रिकोणवृत्तभूविम्बं विलिख्याधारशक्तये नमः इति संपूज्य तदुपरि अस्त्रमन्त्रेण शोधितं साधारपात्रं निधाय नमः इति संपूज्य अङ्कुशमुद्रया सूर्य्यमण्डलात्तीर्थमावाह्य ओं इति गन्धपुष्पं दत्त्वा धेनुमुद्रां प्रदर्श्य ओं इति दशधा

जप्त्वा तज्जलेन गृहद्वारमभ्युक्ष्य द्वारदेवताः प्रपूजयेत् ॥ तदुक्तं तन्त्रान्तरे ।

तत आचमनं कृत्वा सामान्यार्घ्यं प्रकल्पयेत् ।
त्रिकोणवृत्तभूविम्बं मण्डलं रचयेत् सुधीः ॥
आधारशक्तिं संपूज्य तत्राधारं विनिक्षिपेत् ।
अस्त्रमन्त्रेण संशोध्य हृन्मन्त्रेण प्रपूरयेत् ॥
निक्षिपेत्तीर्थमावाह्य गन्धादीन् प्रणवेन तु ।
दर्शयेद्धेनुमुद्रां वै सामान्यार्घ्यमिदं स्मृतम् ।
सामान्यार्घ्येण देवेशि ! पूजयेद्द्वारपार्श्वयोः ॥

धेनुमुद्रा यथा ।

अन्योन्याभिमुखं श्लिष्टा कनिष्ठानामिका पुनः ।
तथाच तर्जनीमध्या धेनुमुद्राऽमृतप्रदा ॥

द्वारदेवता यथा—

गणेशं क्षेत्रपालञ्च वटुकं योगिनीं तथा ।
ऊर्द्ध्वं वामे च दक्षे च अधश्चैव प्रकीर्त्तितम् ॥

अथ पूजा । द्वारोर्द्ध्वे गां गणेशं वामे क्षां क्षेत्रपालं दक्षिणे वां वटुकम् अधः यां योगिनीं एवं तत्रैव गां गङ्गां यां यमुनां श्रीं लक्ष्मीं ऐं सरस्वतीञ्च एवं चतुर्द्वारे सम्पुटवामाङ्ग-सङ्कोचेन पूजामण्डपान्तर्गत्वा नैर्ऋत्यां ब्रह्मणे नमः वास्तु-पुरुषाय नमः इति गन्धपुष्पाभ्यां संपूज्याक्षतसिद्धार्थ-तिलान् नाराचमुद्रया ओं सर्वविघ्नान् उत्सारय हुं फट् स्वाहा ओं पवित्रवज्रभूमे हुं हुं फट् स्वाहा अनेन भूमिमभिमन्त्र-येत् । तदुक्तं स्वतन्त्रे ।

भूमिव्योमस्थितान् सर्वान् विघ्नांस्तांस्तान् सदाक्षतः ।
सिद्धार्थैस्तिलसंमिश्रैः प्रोत्सार्य त्वासने विशेत् ॥

अन्यत्रापि ।

भूतापसर्पणं कुर्य्यात् मन्त्रेणानेन साधकः ।
यस्मिन् कृते स्थले भूता दूरं यान्ति सुरार्चने ॥
स्थितेषु सर्वभूतेषु नैवेद्यं मण्डलं तथा ।
विलुम्पति सदा लुब्धा न च गृह्णन्ति देवताः ॥
तस्माद् यत्नेन कर्त्तव्यं भूतानामपसर्पणम् ॥

कुमारीतन्त्रेऽपि ।

प्रणवं पूर्वमुद्धृत्य सर्वविघ्नांस्ततःपरम् ।
उत्सारय ततो हुं फट् स्वाहा च तदनन्तरम् ॥
अनेनैव च मन्त्रेण विघ्नानुत्सारयेत् सुधीः ।
प्रणवं पूर्वमुद्धृत्य रक्ष रक्ष तदन्तरम् ।
हुं फट् स्वाहेति मन्त्रेण भूमिञ्च परिशोधयेत् ॥
ततः पवित्रवज्रादौ प्रणवं पूर्वमुद्धरेत् ॥
वर्मद्वयं ततश्चैव फट् स्वाहा तदनन्तरम् ।
अनेनैव विधानेन कुर्य्याद् भूम्यभिमन्त्रणम् ॥

अथ आसनानि यथा— तदुक्तं मत्स्यसूक्ते ।—

मृदुचूड़कमासीनश्चान्येषु कोमलेषु वा ।
विस्तारेषु समाश्रित्य साधयेत् सिद्धिमुत्तमाम् ॥
अर्वाक् षण्मासतो गर्भमृतमाहुर्मृदुं बुधाः ।
चूड़ोपनयनैर्हीनं मृतमचूड़कं विदुः ॥
निवृत्तचूड़को बालो हीनोपनयनः पुमान् ।
यो मृतः पञ्चमे वर्षे तमेव कोमलं विदुः ॥

स्वतन्त्रेऽपि ।

कम्बले लोहिते वापि कृष्णे वा व्याघ्रचर्मणि ।
सन्न्यासी ब्रह्मचारी च विशेत् कृष्णस्य चर्मणि ॥

मत्स्यसूक्तेऽपि ।

कृष्णसारद्वीपचर्म अचूड़कम्बलं तथा ।
पीतवस्त्रञ्च शुक्लं वा आसनाय प्रकल्पयेत् ॥

मुण्डमालातन्त्रे ।—

व्याघ्राजिनं सर्वसिद्ध्यै ज्ञानसिद्ध्यै मृगाजिनम् ।
वस्त्रासनं रोगहरं वेत्रजं प्रीतिवर्द्धनम् ॥
कौषेयं पुष्टिदं प्रोक्तं कम्बलं सर्वसिद्धिदम् ।
शुक्लं वा यदि वा रक्तं विशेषाद्रक्तकम्बलम् ॥
मृदुकोमलमास्तीर्णं संग्रामे पतितं हि यत् ।
जन्तुव्यापादितं वापि मृगं वापि वरासनम् ॥
गर्भच्युतं वा नारीणामथवा योनिजां त्वचम् ।
सर्वसिद्धिप्रदञ्चैव सर्वभोगसमृद्धिदम् ॥
त्वचं वा यौवनस्थानां कुर्य्याद्वीरवरासनम् ।
श्मशानकाष्ठघटितं पीठं वा यज्ञदारुजम् ॥
न दीक्षितो विशेज्जातु कृष्णसाराजिने गृही ।
उदासीनवनासीनस्नातकब्रह्मचारिणः ॥
कुशाजिनाम्बरैराढ्यं चतुरस्रं समन्ततः ।
एकहस्तं द्विहस्तं वा चतुरङ्गुलमुच्छ्रितम् ॥
विशुद्धे आसने कुर्य्यात् संस्कारं पूजनं बुधः ॥ इति ।

अत्र मृतासनमवश्यमेव प्रत्यवायश्रवणात् । कालीतन्त्रे—

मृतासनं विना देवि ! यो जपेत् कालिकां नरः ।
तावत्कालं नारकी स्यात् यावदाभूतसंप्लवम् ॥

यत्तु स्वतन्त्रादौ कम्बलाद्यासनमुक्तं तन्न स्वतन्त्रासनम् । किन्तु मृतकयुतमिति बोद्धव्यम् । मृताभावे विष्टरमिति । तदुक्तं—

मृताभावे विष्टरञ्च शवरूपं प्रकल्पयेत् ।

अथ भूमौ त्रिकोणमण्डलं कृत्वा तत्र आधारशक्त्या-दिभ्यो नमः इति संपूज्य तदुपरि विहितासनमारोप्य कृता-ञ्जलिः पठेत्। तदुक्तं

मेरुपृष्ठ ऋषिः प्रोक्तः सुतलं छन्द ईरितम्।
कूर्मो हि देवता देवि! आसनाय प्रकल्पयेत्॥
विनियोगं तु ततः कृत्वा पठेत् धृत्वा समन्ततः।
पृथ्वि! त्वया धृतालोको देवि! त्वं विष्णुना धृता॥
त्वञ्च धारय मां नित्यं पवित्रं कुरु चासनम्।
इति धृत्वा तु देवेशि! कुशांस्तत्रैव दापयेत्॥
मायाबीजं समुच्चार्य्य आधारशक्तिमुच्चरेत्।
कमलासनमालिख्य ङे नमोऽन्तं प्रपूजयेत्॥

कुमारीकल्पेऽपि।

आःकारान्तं सुरेखे च वज्ररेखे ततःपरम्।
हुं फट् स्वाहेति कुर्य्यात्तु मण्डलञ्च शवासने॥
वीरासनेनोपविशेत् संपूज्यासनमेव च।

अथ आसनोपरि कुशत्रयं दत्त्वा ह्रीं आधारशक्तये कम-लासनाय नमः इति संपूज्य आः सुरेखे वज्ररेखे हुं फट् स्वाहा। इति मन्त्रेण तत्र मण्डलिकां कृत्वा तदुपरि वीरासने उपविश्य विजयां स्वीकुर्य्यात्। तदुक्तं भावचूड़ामणौ।

विना हेतुकमास्वाद्य चोभयुक्तो महेश्वरः।
न पूजां मम कुर्य्याच्च न ध्यानं न च चिन्तनम्॥
तस्माद्भुक्त्वा च पीत्वा च पूजयेत् परमेश्वरीम्।

विजयाकल्पेऽपि।

संविदासवयोर्मध्ये संविदेव गरीयसी।
संवित्प्रयोगस्तेनेह पूजादौ साधकोत्तमैः।
कर्त्तव्या च महापूजा करणीया सुनिन्दितैः॥

अन्यत्रापि।

आनन्देन विना भ्रंशो न च तृप्यन्ति देवताः।

तस्मात् पूजादौ विजयास्वीकारः कार्य्यः। सा पुनश्चतुर्द्धा। ब्राह्मणी क्षत्रिया वैश्या शूद्रा च। श्वेतरक्तकृष्णपीतप्रसूनभेदाः।

तासां शुद्धिर्विजयाकल्पानुसारेण लिख्यते।

संविदे ब्रह्मसम्भूते ब्रह्मपुत्रि सदानघे॥

भैरवाणाञ्च तृप्त्यर्थं पवित्रा भव सर्वदा।

ओं ब्राह्मण्यै नमः स्वाहा। साधयेदपरां ततः॥

इत्यनेन अभिमन्त्रणम्।

सिद्धिमूले प्रिये! देवि! हीनबोधप्रबोधिनि।

राजप्रजावशङ्कारि शत्रुकण्ठत्रिशूलिनि॥

ऐं क्षत्रियायै नमः स्वाहा शोधयेदपरां ततः।

अज्ञानेन्धनदीप्ताग्ने ज्वालाग्ने ज्ञानरूपिणि॥

आनन्दस्याहुतिं प्रीतिं सम्यग्ज्ञानं प्रयच्छ मे।

क्लीं वैश्यायै नमः स्वाहा शूद्रां संशोधयेत्ततः॥

नमस्यामि नमस्यामि योगमार्गप्रबोधिनि।

त्रैलोक्यविजये मातः समाधिफलदा भव॥

क्लीं शूद्रायै नमः स्वाहा ओं अमृते अमृतोद्भवे अमृतवर्षिणि पदं ततः।

अमृतमाकर्षय द्वन्द्वं सिद्धिं देहि ततःपरम्।

अमुकं मे ततो ब्रूयात् वशमानय ततःपरम्।

द्विठान्तोऽयं मनुः प्रोक्तश्चतुर्णाञ्च शोधने॥

उत्तरतन्त्रे च।

मूलमन्त्रं ततो देवि! तस्योपरि नियोजयेत्।

आवाहनादिमुद्राश्च धेनुयोनी ततःपरम्॥"

दिग्बन्धश्छोटिकाभिश्च तालत्रयपुरःसरः ।
दिव्यदृष्ट्या तथा पार्ष्णिघातैर्विघ्नान् विघातयेत् ॥
सप्तधा तर्पयेद् ब्रह्मरन्ध्रे मूलं जपेत् मनुम् ।
गुरुपद्मे सहस्रारे तथा सङ्केतमुद्रया ॥
त्रिधैव तर्पयेत् मन्त्री साधकः सिद्धिमानसः ।
ऐं वद वद पदं ब्रूयात् वाग्वादिनि ततःपरम् ॥
मम जिह्वाग्रे स्थिरा भव सर्वपदं ततः ।
सत्त्वरशङ्करी स्वाहेति मन्त्रेण जुहुयान्मुखे ॥

सङ्केतमुद्रया तत्त्वमुद्रया इत्यर्थः ।

अथ साधकः वामकर्णोर्द्ध्वे अमुकानन्दनाथश्रीभैरवगुरुपादुकाभ्यो नमः । दक्षिणकर्णोर्द्ध्वे गां गणपतिं मध्ये इष्टदेवतां नमस्कृत्य सामान्योदकेन पूजस्थानादिकमभ्युक्ष्य स्वदक्षिणे गन्धपुष्पादिकं वामे सुगन्धिजलं देवतायाः पश्चिमे कुलदेवताया द्रव्याणि अन्यत् पानञ्च देवतावामे धारयेत् । तदुक्तं कुलचूड़ामणौ ।

कुलासनं ततो धृत्वा तदभ्यर्च्य यथासुखम् ।
कुलासनं ततो बद्धा गुरुपूजाक्रमेण च ॥
आत्मशुद्धिं पीठशुद्धिं शृणु शुद्धादि भैरव ।
कृत्वा चार्घ्यं ततो विद्वान् कुर्य्यात् कुलविचेष्टितम् ॥
दीक्षिताभिः कुलीनाभिर्युवतीभिः कुलात्मभिः ।
देवतागुरुभक्ताभिर्वाञ्छितं यागभूमिषु ॥
नानाविधानि पुष्पाणि गन्धानि विविधानि च ।
कर्पूरजातीधूपादिवासितं पटवासितम् ॥
ताम्बूलं देयद्रव्यञ्च धूपदीपादिकञ्च यत् ।
सर्वालङ्कारभूषाभिर्भूषितः कौलिकेश्वरः ॥
मूलमन्त्रजप्ततोयैः प्रोक्षितं स्थापयेत्ततः ।

सर्वस्वं दक्षिणे स्थाप्यं वामे चार्घ्यं निवेदयेत।
पश्चिमे देवतायाश्च कुलद्रव्याणि धारयेत्॥
पश्चिमे पृष्ठे इत्यर्थः। कालिकापुराणेऽपि—
मदिरां पृष्ठतो दद्यादन्यपात्रञ्च वामतः।
कुलार्णवेऽपि—आत्मस्थानमनु द्रव्यं देहशुद्धिस्तु पञ्चमी।
यावन्न कुरुते देवि! तावद्देवार्चनं कुतः॥
मार्जनाद्देहशुद्धिस्तु प्राणयोगादिभिः प्रिये!।
षड़ङ्गानि न्यसेन्मन्त्री आत्मशुद्धिरितीरिता॥
गृहीत्वा मातृकावर्णमूलमन्त्राक्षराणि तु।
क्रमोत्क्रमाद्द्विरावृत्तिर्मन्त्रशुद्धिरितीरिता॥
पूजाद्रव्यादि संप्रोक्ष्य मूलास्त्राभ्यां विधानतः।
धेनुमुद्रां दर्शयेच्च द्रव्यशुद्धिरितीरिता॥
पीठे देवीं प्रतिष्ठाप्य सकलीकृत्य मन्त्रवित्।
मूलमन्त्रेण दीप्तात्मा अभिभाव्योदकेन च॥
त्रिवारं प्रोक्षयेद्विद्वान् देहशुद्धिरितीरिता।
पञ्चशुद्धिं विधायेत्थं पश्चाद् यजनमाचरेत्॥
अन्यत्रापि। पञ्चशुद्धिविहीनेन यत् कृतं न च तत् कृतम्।
पञ्चशुद्धिं विना पूजा अभिचाराय कल्पते॥
आत्मशुद्धिः स्थानशुद्धिर्मन्त्रस्य शोधनं तथा।
द्रव्यशुद्धिर्देहशुद्धिः पञ्चशुद्धिरितीरिता॥

अथ कुमारीकल्पे

पुष्पाधिष्ठाने पुष्पस्य प्रणवं पूर्वमुद्धरेत्।
ततोऽभिषिकेति पदं शताभीति ततःपरम्॥
सेकेति च पदं प्रोक्ता हुं फट् स्वाहा ततःपरम्।
अनेन मनुना देव्याः पुष्पाधिष्ठानमेव च॥
प्रणवं पुष्पकेतुश्च तथा राजार्हतेऽपि च।

शताय सम्यगुक्ता च सम्बद्धाय ततश्च ओं ॥
पुष्पे पुष्पे महापुष्पे सुपुष्पे पुष्पसम्भवे ।
पुष्पचयावकीर्णे हुं फट् स्वाहेति ततः परम् ॥
विशोध्य पुष्पमेतेन जलं पूर्ववदाहरेत् ॥

ओं शताभिषेक ओं शताभिषेक हुं फट् स्वाहेति मन्त्रेण पुष्पमधिष्ठाय ओं पुष्पकेतु राजार्हते शताय सम्यक् सम्बद्धाय इति पुष्पमभिमन्त्र्य पूजाद्रव्यादिकं मूलान्ते फड़ित्यनेन अभ्युक्ष्य धेनुमुद्रया अमृतीकृत्य वामपार्ष्णिघातत्रयं फड़िति भूमौ कृत्वा तर्जनीमध्यमाभ्याम् ऊर्द्धोर्द्धं तालत्रयं दत्त्वा तर्जन्यङ्गुष्ठाभ्यां छोटिकाभिर्दशदिग्बन्धनं कुर्य्यात् । दिव्यदृष्ट्या दिव्यान् विघ्नानुत्सार्य्य रमिति चतुर्दिक्षु वह्निप्राकारं ध्यात्वा मूलमन्त्रेण स्वदेहं संमार्ज्य प्राणायामं कुर्य्यात् । यथा मूलाधारे मनः संयोज्य दक्षिणाङ्गुष्ठेन दक्षिणनासापुटं धृत्वा मूलमन्त्रं प्रणवं वा षोड़शवारं जपन् वामेण वायुमापूर्य्य कनिष्ठानामिकाभ्यां वामनासापुटमपि विधृत्य तमेव चतुःषष्टिवारं जपन् वायुं कुम्भयित्वा पुनस्तं द्वात्रिंशद्वारं जपन् दक्षिणेन वायुं रेचयेत् । एवं क्रमोत्क्रमेण प्राणायामत्रये कृते एकः प्राणायामः । इत्थं वारत्रयं कुर्य्यात् । तदुक्तं स्वतन्त्रे ।

पार्ष्णिघातकरास्फोटसमुदञ्चितवक्त्रकैः ।
तालत्रयमथो दद्यात् सशब्दं सम्प्रदाय च ॥
ऋतुचन्द्रैर्नेत्रवासैर्वासैर्वेदाधिकैः प्रिये ।
मात्राभिः प्रणवं जप्त्वा पूरकुम्भकरेचकैः ॥
प्राणायामं ततः कृत्वा भूतशुद्धिं ततश्चरेत् ॥

अन्यत्रापि । मनो जीवात्मनः शुद्धिः प्राणायामेन जायते ॥
कालीतन्त्रेऽपि । प्राणायामत्रयं कुर्य्यान्मूलेन प्रणवेन वा ।
ज्ञानार्णवेऽपि । कनिष्ठानामिकाङ्गुष्ठैर्यन्नासापुटधारणम् ।

प्राणायामः स विज्ञेयस्तर्जनीमध्यमे विना॥

अथ गौतमीये।

भूतशुद्धिं लिपिन्यासं विना यस्तु प्रपूजयेत्।
विपरीतं फलं दद्यादभक्त्या पूजनं यथा॥

ततो भूतशुद्धिं कुर्य्यात्। तथा मूलाधारपद्मात् कुलकुण्डलिनीं प्रसुप्तभुजगाकारां सार्द्धत्रिवलयां स्वयम्भूलिङ्ग-वेष्टिनीं विषतन्तुतनीयसीं तड़ित्पुञ्जप्रभां हंस इति मन्त्रेण पृथिव्या सह स्वाधिष्ठानं समानीय तत्रस्थजले पृथिवीं विलीनां विचिन्त्य तस्माज्जलेन सह मणिपूरस्थवह्नौ तज्जलं विलीनं विचिन्त्य तस्मान्मणिपूरात् वह्निना सह अनाहत आनीय तत्रस्थवायौ वह्निं लीनं ध्यात्वा तस्मान्मरुता जीवात्मना सह विशुद्धस्थाकाशे वायुं लीनं कृत्वा तस्मादाकाशेन सह आज्ञा-चक्रस्थमनसि आकाशं लीनं विचिन्त्य मनो नादे लीनं विधाय धरणौ ध्वनिं समर्पयेत्। ततः सहस्रदलकमलकर्णिकास्थचन्द्र-मण्डलमध्यत्रिकोणान्तर्गतविन्दुरूपपरमशिवे कुण्डलिनीं जीवात्मानञ्च नित्यैकरूपतां विभाव्य प्राणायामविधिना यमिति वायुवीजं धूम्रवर्णं षोड़शवारं जपन् पापपुरुषेण सह शरीरं संशोष्य रमिति वह्निवीजं रक्तवर्णं चतुःषष्टिवारं जपन् तं संदह्य वमिति वरुणवीजं शुक्लवर्णं द्वात्रिंशद्वारं जपन् तद्भवामृतद्रवध्या निष्पापं शरीरम् उत्पाद्य लमिति पृथ्वीवीजेन पीतवर्णं ध्यायन् शरीरं सुदृढ़ीकृत्य सोऽहमिति मन्त्रेण कुलकुण्डलिनीमसृत-लोलां पञ्चभूतजीवात्मानञ्च ब्रह्मपथेन स्वस्वस्थाने नियोजयेत्। तदा देवीरूपमात्मानं ध्यात्वा हृदि हस्तं निधाय जीवं न्यसेत्। यथा—आं ह्रीं क्रीं हंसः श्रीदक्षिणकालिकायाः प्राणा इह प्राणा आं ह्रीं क्रीं हंसः अमुष्याः जीव इह स्थित। आं ह्रीं क्रीं हंस अमुष्याः सर्वेन्द्रियाणि आं ह्रीं क्रीं हंसः अमुष्याः

वाङ्मनश्चक्षु:श्रोत्रघ्राणप्राणा इहागत्य सुखं चिरं तिष्ठन्तु स्वाहा।
इति जीवं न्यसेत्। तदुक्तं स्वतन्त्रे

संहारक्रमयोगेन पञ्चतत्त्वं समुद्धरेत्।
शोषदाहप्लवान् कृत्वा वाय्वग्निसलिलाक्षरैः॥
ततो न्यासं प्रकुर्वीत फेत्कारीतन्त्र ईरितम्॥

अन्यत्रापि। देवीरूपं ततो ध्यायेदात्मानं कमलेक्षणे।
ततो जीवं प्रविन्यस्य पाशादित्र्यक्षरेण तु॥
प्राणमन्त्रेण मुक्तेन ततोऽमुष्याः पदं ततः।
प्राणा इति पदं पश्चादिह प्राणाः पदं ततः॥
सर्वेन्द्रियाण्यमुष्यान्ते वाङ्मनो नयनं ततः।
श्रोत्रघ्राणपदात् प्राणा इहागत्य सुखं चिरम्।
तिष्ठन्तु वह्निजायान्तः प्राणमन्त्रोऽयमीरितः॥

प्रकारान्तरञ्च ज्ञानार्णवे--
विपरीतं प्राणमन्त्रं विलिखेत् पाशपूर्वकम्।
प्राणप्रतिष्ठामन्त्रोऽयं सर्वकर्माणि साधयेत्॥

अमुष्या इति पदानि बोद्धव्यानि इति साम्प्रदायिकाः। अमुष्याः स्थाने षष्ठ्यन्तं नाम प्रयोक्तव्यं तदुक्तं नारायणीये–
अमुकपदं यद्रूपं यत्रमन्त्रेषु दृश्यते।
साध्याभिधानं तद्रूपं तत्र स्थाने नियोजयेत्॥

कुमारीकल्पेऽपि–
भूतशुद्धिं विधायेत्थं देवीरूपेण चिन्तयेत्॥

ओं आं ह्रीं क्रों फट् स्वाहा अनेन कायवाक्चित्तशोधनं कृत्वा रक्ष हुं फट् स्वाहा अनेन हृदि हस्तं दत्त्वा आत्मरक्षां विधाय स्ववामे लतां गुरुदेवतां नवयौवनगर्वितां विधाय भूतशुद्धिं प्राणायामान् कारयित्वा यथोक्तमाचरेत्। तदुक्तं तत्रैव। प्रणवं पूर्वमुच्चार्य विशेषासनमेव च।

हुं फट् स्वाहा मनुः प्रोक्तं कायवाक्चित्तशोधने ।
रक्ष हुं फट् ततः स्वाहा मन्त्रः स्यादात्मरक्षणे ॥
ततः षोड़शवर्षीयां नारीमानीय मन्त्रवित् ।
युवतीं वा मदोन्मत्तां सुवेशां चारुहासिनीम् ॥
सदा कामाभिलषितां सिन्दूराङ्कितभालिकाम् ।
साधके प्रेमसम्पन्नां वामे संस्थापयेत् बुधः ॥
तस्याश्च भूतशुद्ध्यादीन् कृत्वा तु मातृकां न्यसेत् ।
प्राणायामं मातृकाञ्च कारयित्वा यथाविधि ॥

अथ ऋष्यादिन्यासं कुर्य्यात् । यथा । कृताञ्जलिः भैरवऋषिरनुष्टुप्छन्दः श्रीदक्षिणकालिका देवता क्रीं वीजं हुं शक्तिः क्रीं कीलकं रक्षार्थकाममोक्षपुरुषार्थचतुष्टयसिद्धिपूर्वकदिव्यज्ञानद्रुतकवित्वपाण्डित्यसिद्धये विनियोगः । इत्यभिलप्य पुष्पेण अनामिकया वा न्यसेत् । यथा । शिरसि भैरवऋषये नमः मुखे अनुष्टुप्छन्दसे नमः । हृदि श्रीदक्षिणकालिकायै नमः । गुह्ये क्रीं वीजाय नमः पादयोः हुं शक्तये नमः सर्वाङ्गे क्रीं कीलकाय नमः । तदुक्तम् ।

भैरवोऽस्य ऋषिः प्रोक्तः उष्णिक्छन्द उदाहृतम् ।
देवता कालिका प्रोक्ता लज्जावीजन्तु कीलकम् ॥
शक्तिस्तु कूर्चवीजं स्यादनिरुद्धसरस्वती ।
कवित्वार्थं विनियोगः एवमृष्यादिकल्पना ॥

कवित्वार्थे विनियोगः इत्युपलक्षणम् । यद्यस्याभिलषितं तदर्थे विनियोगः इत्यर्थः । तन्त्रे विविधश्रवणात् । तदुक्तं कालीक्रमे ।

कीलकं चाद्यवीजन्तु चतुर्वर्गार्थसिद्धये ।

कुलचूड़ामणौ ।

भैरवोऽस्य ऋषिः प्रोक्तः उष्णिक्छन्द उदीरितम् ॥

दक्षिणाकालिका देवी चतुर्वर्गफलप्रदा ।

अथ तन्त्रान्तरे ।

ऋषिं न्यसेन्मूर्ध्नि देशे छन्दस्तु मुखपङ्कजे ॥

देवतां हृदये चैव वीजन्तु गुह्यदेशके ।

शक्तिस्तु पादयोश्चैव सर्वाङ्गे कीलकं न्यसेत् ॥

गौतमीये । ऋषिच्छन्दोऽपरिज्ञानान्न मन्त्रः फलभाग् भवेत् ।

नैर्वीर्य्यं याति मन्त्राणां विनियोग अजानताम् ॥

अथ कराङ्गन्यासौ । ओं क्रां अङ्गुष्ठाभ्यां नमः इत्यङ्गुष्ठयोः । ओं क्रीं तर्जनीभ्यां स्वाहा इति तर्जन्योः । ओं क्रूं मध्यमाभ्यां वषट् इति मध्यमयोः । ओं क्रैं अनामिकाभ्यां हुं इति अनामिकयोः । ओं क्रौं कनिष्ठाभ्यां वौषट् इति कनिष्ठयोः । ओं क्रः करतलपृष्ठाभ्यां नमः इति करतलपृष्ठयोः । इति इति करन्यासः । अथवा सर्वत्र नमस्कारान्तेन करन्यासः । ततः ओं क्रां हृदयाय नमः इति हृदि तर्जनीमध्यमानामिकाभिर्न्यसेत् । ओं क्रीं शिरसे स्वाहा इति शिरसि तर्जनीमध्यमाभ्याम् । ओं क्रूं शिखायै वषट् इति शिखायां मुष्टिकृताधोमुखाङ्गुष्ठेन । ओं क्रैं कवचाय हुं इति कवचे हस्तद्वयाङ्गुलीभिः । ओं क्रौं नेत्रत्रयाय वौषट् इति नेत्रत्रये तर्जनीमध्यमानामिकाभिः । ओं क्रः करतलपृष्ठाभ्यां फट् इति करतलपृष्ठयोः । ततः ओं क्रः अस्त्राय फट् इत्यनेन तर्जनीमध्यमाभ्यां मूर्ध्नि ऊर्द्धोर्द्ध तालत्रयं दत्त्वा छोटिकाभिर्दशदिग्बन्धनं कुर्य्यात् । तदुक्तं कालीतन्त्रे ।

अङ्गन्यासकरन्यासौ यथावदभिधीयते ।

षड्दीर्घभाजा वीजेन प्रणवाद्येन कल्पयेत् ॥

हृदयाय नमः प्रोक्तं शिरसे वह्निवल्लभा ।

शिखायां वषडित्युक्तं कवचाय हुमीरितम् ॥

नेत्रत्रयाय वौषट् स्यादस्त्राय फट् प्रकीर्त्तितम्।
वीजं मन्त्राद्यवीजं न तु पारिभाषिकम्॥

तन्त्रान्तरे स्मरणात्। स्वतन्त्रेऽपि।

प्रणवं चाद्यवीजञ्च षड्दीर्घस्वरभाषितम्।
कुर्य्यात् षडङ्गविन्यासं मूलखण्डत्रयेण वा॥

अथ प्रकारः। आद्यसप्तवीजेन हृदयम्। द्वितीयखण्डषड्क्षरेण शीर्षम्। तृतीयखण्डनवाक्षरेण शिखायाम्। पुनराद्येन कवचम्। द्वितीयेन नेत्रत्रयम्। तृतीयखण्डेनास्त्रम। इत्थं वा अङ्गन्यासं कुर्य्यात्। भैरवतन्त्रेऽपि।

षड़ङ्गानि न्यसेन्मन्त्री त्रिः सकृद्वा यथाक्रमम्॥

अथ वर्णन्यासं कुर्य्यात्। अं आं इं ईं उं ऊं ऋं ॠं ऌं ॡं नमो हृदि एं ऐं ओं औं अं अः कं खं गं घं नमो दक्षभुजे। ङं चं छं जं झं ञं। टं ठं डं ढं नमो वामभुजे। णं तं थं दं धं नं पं फं बं भं नमो दक्षजङ्घायाम्। मं यं रं लं वं शं षं सं हं क्षं नमो वामजङ्घायां न्यसेत्। तदुक्तं कालीतन्त्रे।

एवं यथाविधि कृत्वा वर्णन्यासं समाचरेत्।
अ आ इ ई उ ऊ ऋ ॠ ऌ ॡ वै हृदये न्यसेत्॥
ए ऐ ओ औ ततः अं अः क ख ग घ पुनस्ततः।
उक्त्वा च दक्षिणभुजं स्पृशेत् साधकसत्तमः॥
ङ च छ ज झ ञ ट ठ ड ढ तथा पुनः।

इति वामभुजे न्यस्य। ण त थ द पुनः स्मरेत्। ध न प फ ब भ दक्षिणे जङ्घके न्यसेत्। म य र ल व श ष स ह क्ष वामजङ्घके। तथैतल्लिखितवर्णस्वरसात् विन्दुरहितवर्णन्यासः। विरूपाक्षमते तु सविन्दुरेव न्यासप्रमाणम्। तदुक्तं कवचे लिखिष्यामः।

ऋषिर्ब्रह्मा भवेच्छन्दोगायत्री मातृका पुनः ।
देवता व्यञ्जनं वीजं शक्तयस्तु स्वरास्ततः ॥
अव्यक्तं कीलकं ज्ञेयं न्यास उक्तः क्रमेण तु ।

उक्त इति पूर्वोक्तऋष्यादिक्रमवत् । क्रमेण न्यसेदित्यर्थः ।

षड़ङ्गं मातृकायाश्च साधकः कारयेत्ततः ।

स्वराणां क्लीवहीनानां ऋ ॠ ऌ ॡ रहितानामित्यर्थः । एवं विधिना मातृकाषड़ङ्गं कृत्वा ध्यायेत् । यथा ।

शरत् पूर्णेन्दुशुभ्रां सकलगुणमयीं लोलरक्तत्रिनेत्रां
शुक्लालङ्कारभूषां शशिमुकुटजटाटोपयुक्तां प्रसन्नाम् ।
पुस्तोत्सकपूर्णकुम्भान् वरमपि दधतीं शुक्लपट्टाम्बराढ्यां
वाग्देवीं पद्मवक्त्रां कुचभरनमिताम् चिन्तयेत् साधकेन्द्रः ॥

एवं ध्यात्वा ललाटादिक्रमेण अकारादिक्षकारान्तं क्रमेण न्यसेत् । यथा । श्रीक्रमे ।

ब्रह्मरन्ध्रे तथा वक्त्रे वेष्टने नयनद्वये ।
श्रुतिनासापुटद्वन्द्वगण्डोष्ठद्वयकेऽपि च ॥
दन्तयुग्मे च मूर्द्धास्ये षड़र्णान् षोड़श न्यसेत् ।
दोःपत्सन्धिषु साग्रेषु पार्श्वयुग्मे न्यसेत् पुनः ॥
पृष्ठनाभिद्वये चैव जठरे विन्यसेदथ ।
त्वगसृङ्मांसमेदोऽस्थिमज्जशुक्राणि धातवः ॥
प्राणजीवौ च परमौ यकारादिषु संस्थिताः ।
एवं क्रमेण देवेशि न्यस्तव्या एतदात्मिकाः ॥
हृदोर्मूलेऽपि विन्यस्य तथापरगले न्यसेत् ।
करमूले हृदारभ्य पाणिपादयुगे तथा ॥
जठराननयोर्व्यासं न्यासेक्षित्यर्णरूपिणीम् ॥

तत्रं ज्ञानार्णवे । अन्यच्च ललाटमुखवृत्ताक्षीत्यादि ।
अथ प्रयोगः । अं नमो ब्रह्मरन्ध्रे ललाटे वा आं नमो

मुखवृत्ते एवं क्रमेण मकारपर्य्यन्तं विन्यस्य। यं त्वगात्मने नमः। रं असृगात्मने नमः। लं मांसात्मने नमः। वं मेद-आत्मने नमः। वामांशे ककुदि वा शं अस्थ्यात्मने नमः। षं मज्जात्मने नमः। सं शुक्रात्मने नमः। हं प्राणात्मने नमः। ळं जीवात्मने नमः। क्षं परमात्मने नमः। इति विशेषः।

पञ्चाशदक्षरन्यासः क्रमेणैव प्रकाशितः।
श्रीमाद्यन्तो नमोऽन्ताश्च सविन्दुर्विन्दुवर्जितः।
मायालक्ष्मीवीजपूर्वो न्यस्तव्य उच्यते बुधैः॥
ललाटेऽनामिकामध्ये विन्यसेन्मुखवृत्तके।
तर्जनीमध्यमानामा वृद्धानामा च नेत्रयोः॥
अङ्गुष्ठं कर्णयोर्न्यस्य कनिष्ठाङ्गुष्ठकौ नसोः।
मध्यास्तिस्रो गण्डयोश्च मध्यमामोष्ठयोर्न्यसेत्॥
अनामां दन्तयोर्न्यस्य मध्यमामुत्तमाङ्गके।
मुखेऽनामां मध्यमाञ्च हस्ते पादे च पार्श्वयोः॥
कनिष्ठानामिका मध्यास्तास्तु पृष्ठे प्रविन्यसेत्।
ताः साङ्गुष्ठा नाभिदेशे सर्वाः कुक्षौ च विन्यसेत्॥
हृदये च तलं सर्वमंसयोश्च ककुत्स्थले।
हृत्पूर्वं हस्तपत्कुक्षिमुखेषु तलमेव हि॥
एतास्तु मातृकामुद्राः क्रमेण परिकीर्त्तिताः।
अज्ञात्वा विन्यसेद् यस्तु न्यासः स्यात्तस्य निष्फलः॥

अथ श्रीकण्ठन्यासो यथा।

विन्यसेन्मातृकास्थाने श्रीकण्ठादीन् यथाक्रमम्।
पूर्णोदर्य्यादिभिः सार्द्धं मातृकार्णसमन्वितान्॥
श्रीकण्ठोऽनन्तसूक्ष्मौ च त्रिमूर्त्तिरमरेश्वरः।
अर्घीशोभारभूतिश्चातिथीशः स्थाणुको हरः॥
झिण्टीशो भौतिकः सद्योजातश्चानुग्रहेश्वरः।

अक्रूरश्च महाशैलः षोड़श स्वरमूर्त्तयः ॥
पश्चात् क्रोधीशचण्डेशपञ्चान्तकशिवोत्तमाः ।
अथैकरुद्रकूर्मैकनेत्रार्द्धचतुराननाः ॥
अजेशः सर्वसोमेशस्तथा लाङ्गलिदारुकौ ।
अर्द्धनारीश्वरश्चोमाकान्तश्चाषाढ़िदण्डिनौ ॥
स्युरत्रिमीनमेषाख्या लोहितश्च शिखी तथा ।
छगलाण्डद्विरण्डेशौ समहाकालवालिनौ ॥
भुजङ्गेशपिनाकीशखड्गेशाख्यावकेश्वरः ।
श्वेतभृग्वीशनकुलिशिवाः सम्वर्त्तकः स्मृतः ॥
एते रुद्राः स्मृता रक्ताष्टतशूलकपालकाः ।
पूर्णोदरी स्याद्विजया शाल्मली तदनन्तरम् ॥
लोलाक्षी वर्त्तुलाक्षी च दीर्घघोणा समीरिता ।
सुदीर्घमुखीगोमुख्यौ दीर्घजङ्घा तथैव च ॥
कुम्भोदर्य्यूर्द्ध्वकेशी च तथा विकृतमुख्यपि ।
ज्वालामुखी ततो ज्ञेया पश्चादुल्कामुखी तथा ॥
चुल्लीमुखी विद्यामुखी चैताः षोड़श शक्तयः ।
महाकालीसरस्वत्यौ सर्वसिद्धिसमन्विते ॥
गौरी त्रैलोक्यविद्या च मन्त्रशक्तिस्ततःपरम् ।
आत्मशक्तिर्भूतमाता तथा लम्बोदरी मता ॥
द्राविणी नागरी भूयः खेचरी चैव मञ्जरी ।
रूपिणी वीरिणी पश्चात् काकोदर्य्यपि पूतना ॥
स्याद्भद्रकाली योगिन्यौ शङ्खिनी गर्जिनी तथा ।
सकालरात्रिकुब्जिन्यौ कपर्दिन्यपि वज्रिणी ॥
जया च सुमुखी प्रोक्ता रेवती माधवी तथा ।
वारुणी वायवी प्रोक्ता पश्चाद्रक्षोविदारिणी ॥
ततश्च सहजा लक्ष्मीर्व्यापिनी माययान्विता ।

एता रुद्राङ्कपीठस्थाः सिन्दूरारुणविग्रहाः॥
रक्तोत्पलकपालाढ्या अलङ्कृतकराम्बुजाः॥

अथ प्रयोगः यथा। अं श्रीकण्ठपूर्णोदरीभ्यां नमः इति ललाटे। आं अनन्तवीजाभ्यां नमः इति मुखवृत्ते। एवं क्रमेण सर्वं कुर्य्यात्।

अथ षोढ़ान्यासः। तदुक्तं वीरतन्त्रे।

केवलां मातृकां कृत्वा मातृकां तारसंपुटाम्।
मातृकापुटितं तारं न्यसेत् साधकसत्तमः॥

औं अं औं एवं तथैव मातृकापुटितं एवं कामपुटितं तत्पुटितं कामम्। शक्तिपुटितं तत्पुटितां शक्तिम्। लज्जापुटितं तत्पुटितां लज्जाम्। मन्त्रपुटितात् तत्पुटितं मन्त्रम्। पुरनुलोमविलोमतः केवलमन्त्रं मातृकास्थाने न्यस्य अष्टोत्तरशतेन व्यापकं कुर्य्यात्।

इति गुप्तेन दुर्गाया अङ्गषोढ़ा प्रकीर्त्तिता।
तारायाः कालिकायाश्च तन्मुख्याश्च तथापि वा॥
कृतेऽस्मिन्न्यासवर्य्ये तु सर्वं पापं प्रणश्यति।
विषापमृत्युहरणं ग्रहरोगादिनाशनम्॥
दुष्टसत्त्वा विनश्यन्ति शत्रवो यान्ति मित्रताम्।
कवितालहरी तस्य द्राक्षारसपरम्परा॥
अणिमाद्यष्टसिद्धिस्तु तस्य हस्ते व्यवस्थिता।
कायिकं वाचिकं वापि मानसञ्चापि दुस्कृतम्॥
सर्वं तस्य विनाशत्वं याति न्यासस्य चिन्तनात्।
पुरस्कृत्य क्षयं याति यत्किञ्चिदुपपातकम्॥
यद्रूपं दृश्यते योहि स तद्रूपञ्च गच्छति।
यं नमन्ति महेशानि! षोढ़ापुटितविग्रहाः।
अल्पायुः स भवेत् सद्यो देवता कम्पते भिया॥

अथ तत्त्वन्यासः। मूलविद्या स्वतन्त्रे।
आत्मविद्या शिवैस्तत्त्वैस्तत्त्वन्यासं समाचरेत्।
अथ जीवन्यासं कुर्य्यात्। यथा कुमारीतन्त्रे।
ब्रह्मरन्ध्रे भ्रुवोर्मध्ये ललाटे नाभिदेशके।
गुह्ये वक्त्रे तु सर्वाङ्गे सप्तबीजान् क्रमान् न्यसेत्॥

अथ प्रयोगः। आद्यबीजमुच्चार्य्य नमो ब्रह्मरन्ध्रे। एवं द्वितीयबीजं भ्रुवि। तृतीयं भाले चतुर्थं नाभौ पञ्चमं गुह्ये षष्ठं वक्त्रे। सप्तमं सर्वाङ्गे न्यसेत्। ततः प्रणवपुटितमूलेन व्यापकन्यासं कुर्य्यात् नवधा सप्तधा पञ्चधा वा मस्तकादिपादपर्य्यन्तं पादादिमस्तकान्तं न्यसेत्। तदुक्तं भैरवतन्त्रे

पञ्चधा नवधा वापि मूलेन सप्तधा तथा।
व्यापकं कुर्य्यादित्यादि। स्वतन्त्रेऽपि
मूलेन व्यापकं न्यासं नवधा कारयेत् प्रिये!॥

इति महामहोपाध्याय श्रीपरमहंसपरिव्राजक श्रीपूर्णानन्दगिरिविरचिते श्यामारहस्ये न्यासान्तविवरणं नाम प्रथमः परिच्छेदः।

अथ द्वितीयः परिच्छेदः।

अथान्तर्यजनं वक्ष्ये दृष्टादृष्टफलप्रदम्।
गुरुध्यानं प्रकुर्वीत यथा पूर्वं विशालधीः॥
स्नायाच्च विमले तीर्थे पुष्करे हृदयाश्रिते।
विन्दुतीर्थेन वा स्नायात् पुनर्जन्म न विद्यते॥
इड़ासुषुम्ने शिवतीर्थकेऽस्मिन् ज्ञानाम्बुपूर्णेऽथ ततः शरीरे।
ब्रह्माम्बुभिः स्नाति तयोः सदा यः किं तस्य गाङ्गैरपि पुष्करैर्वा॥

इति स्नानम्।

शिवशक्त्योः समायोगो यस्मिन् काले प्रजायते ।
सा सन्ध्या कुलनिष्ठानां समाधिस्थैः प्रतीयते ॥

इति सन्ध्योपासनम् ।

अथ मूलधारात् कुलकुण्डलीं सोमसूर्य्याग्निरूपिणीं समुत्थाप्य परविन्दुं निर्भिद्य देहदेवतां तर्पयेत् । तदुक्तं—

चन्द्रार्कानलसंजुष्टाकुलितं यत् परामृतम् ।
तेनामृतेन दिव्येन तर्पयेत्तेन देवताम् ॥ इति तर्पणम् ।
ब्रह्मरन्ध्रादधोभागे यच्चान्द्रं पात्रमुत्तमम् ।
कलासाधनं संपूर्य्य तर्पयेत्तेन खेचरीम् ॥ इत्यर्घ्यसाधनम् ।
आधारे लिङ्गनाभौ हृदयसरसिजे तालुमूले ललाटे
द्वेपत्रे षोड़शारे द्विदशदशदले द्वादशार्द्धे चतुष्के ।
वासान्ते बालमध्ये डफकठसहिते कण्ठदेशे स्वरांश्च
हृक्षौ कोदण्डमध्ये न्यसतु विमलधीर्न्यासमम्पत्तिसिद्धैर ॥

इति मातृकार्णान् कण्ठच्छदक्रमेण ध्यायेत् ।

अथ षड़ङ्गन्यासः । तदुक्तं गौतमीये ।

इज्यमानहृदर्थोऽयं हृदये स्याच्चिदात्मकः ।
क्रियते तत्परत्वेन हृन्मन्त्रेण ततःपरम् ॥
सर्वज्ञादिगुणोत्तुङ्गे संविद्रूपे परात्मनि ।
क्रियते विषयाहारः शिरो मन्त्रेण देशिकः ॥
हृच्छिरोरूपसिद्धौ नियता भावना दृढ़ा ।
क्रियते निजदेहस्य शिखामन्त्रेण देशिकः ॥
मन्त्रात्मकस्य देहस्य मन्त्रवाच्येन तेजसा ।
सर्वतो धर्ममन्त्रेण अहन्यहनि संवृतिः ॥

इति अहिंसनीयवक्लिलक्षणम् । यत्र क्षणे हिंस्राणां हिंसोपाया न प्रवर्त्तन्ते इत्यर्थः ।

यो ददाति परं ज्ञानं संविद्रूपे परात्मनि ।

हृदयादिमयं तेजः स्यादेतन्मैत्रसंज्ञितम् ॥
आध्यात्मिकादिरूपं यत् साधकस्य विनाशयेत् ।
अविद्याशतमन्त्रं तत्परं धाम समीरितम् ॥

इति षड़ङ्गन्यासं विधाय ध्यानं कुर्य्यात् । यथा उदयाकरपद्धत्यां—

शक्तिद्वयपुटान्तस्थं लक्षद्वयसुसंस्थितम् ।
ज्योतिस्तत्त्वमयं ध्यायेत् कुलाकुलनियोजनात् ॥

अथवा । शृङ्गाटद्वयमध्यस्थं शक्तिद्वयपुटीकृतम् ।
सदा समरसं ध्यायेत् कालं तत् कुलयोगिनाम् ॥

अन्यच्च । किरणस्थं तदग्निस्थं चन्द्रभास्करमध्यगम् ।
महाशून्येन यत् कृत्वा पूर्णस्तिष्ठति योगिराट् ॥

महाशून्य इति सर्वोपाधिविनिर्मुक्ते । पूर्ण इति सर्वोपाधिविनिर्मोचात् विभागविरहात् पूर्ण एव भवतीति । अथवा

निरालम्बपदे शून्ये यत्तेज उपपद्यते ।
तद्धर्ममभ्यसेन्नित्यं ध्यानं तत् कुलयोगिनाम् ॥

तद्धर्ममिति अन्तःकरणस्थं अभ्यसेदिति वारंवारं कुर्य्यादित्यर्थः ॥ इति ध्यानम् ।

अर्चयन् विषयैः पुष्पैस्तत्क्षणात्तन्मयो भवेत् ।
न्यासस्तन्मयता बुद्धिः सोऽहम्भावेन पूजयेत् ॥

तन्मयेति तदेवात्मतत्त्वज्ञानम् । सोऽहमिति तत्त्वम्पदबोधनार्थं परिचिन्तनमात्रम् । विषयपुष्पाणि यथा—

अमायमनहङ्कारमवादमपदं तथा ।
अमोहकमदम्भञ्च तत्त्वेर्षाक्षोभकं तथा ॥
अमात्सर्य्यमलोभञ्च दशपुष्पं विदुर्बुधाः ।
अहिंसा परमं पुष्पं पुष्पमिन्द्रियनिग्रहम् ॥
दयापुष्पं क्षमापुष्पं ज्ञानपुष्पञ्च पञ्चमम् ।

इत्यष्टसप्तभिः पुष्पैः पूजयेत् परमेश्वरीम् ॥ इति पूजनम्।

माला पञ्चाशिका प्रोक्ता सूत्रं शक्तिशिवात्मकम्।
प्रथिता कुण्डलीशक्तिः कल्पान्ते मेरुसंस्थिता ॥

एवं विधिना वर्णमालामुपस्कृत्य क्षमेरुरूपं कृत्वा अकारादिक्षकारान्तं लकारादि श्रीकण्ठान्तं मूलमन्त्रं जप्त्वा परतेजसि समर्पयेत् ॥

अथ होमः। आत्मानमपरिच्छिन्नं विभाव्यान्तरं वा परमात्मज्ञानात्मस्वरूपं चतुरस्रं चित्कुण्डमानन्दमेखलायुतम् अर्द्धमात्राकृतयोनिभूषितं नाभौ ध्यात्वा तन्मध्यस्थज्ञानाग्नौ जुहुयात्। यथा मूलान्ते नाभौ चैतन्यरूपाग्नौ हविषा मनसा स्रुचा ज्ञानप्रदीपिते नित्यमक्षवृत्तिर्जुहोम्यहं स्वाहा। अनेन प्रथमाहुतिं दद्यात्।

मूलान्ते धर्माधर्महविर्दीप्त आत्माग्नौ मनसा स्रुचा।
सुषुम्ना वर्त्मना नित्यमक्षवृत्तिर्जुहोम्यहम्। स्वाहा

इति द्वितीयाहुतिं दत्त्वा

मूलान्ते प्रकाशाकाशहस्ताभ्यामवलम्ब्योन्मनी स्रुचा।
धर्माधर्मफलस्नेहपूर्णां वह्नौ जुहोम्यहं स्वाहा।

अनेन तृतीयाहुतिं दद्यात्। ततो मूलान्ते

अन्तर्निरञ्जननिबन्धनमेधमाने
मायान्धकारपरिपन्थिनि संविदग्नौ।
कस्मिंश्चिदद्भुतमरीचिविकाशभूमौ
विश्वं जुहोमि वसुधां दिशि वावसानाम् ॥

इत्यन्तर्यजनं कृत्वा साक्षाद्ब्रह्ममयो भवेत्।
न तस्य पापपुण्यानि जीवन्मुक्तो भवेत् ध्रुवम् ॥

इति श्यामारहस्ये द्वितीयः परिच्छेदः।

अथ तृतीयः परिच्छेदः।

अथ साधकः कुलवेशं कृत्वा कुलवेशञ्च कारयित्वा पीठन्यासं कुर्य्यात्। तदुक्तं कुमारीतन्त्रे

ततः स्त्रीवेशधारी स्यात् सिन्दूराङ्कितभालकः।
शृङ्गारोज्ज्वलवेशाढ्यस्ताम्बूलपूरिताननः॥
एवं वेशादिकं कृत्वा वनितामपि कारयेत्।
पीठन्यासं ततः पश्चादाधारशक्तिपूर्वकम्॥
प्रकृतिं कमठं चैव शेषं पृथ्वीं तथैव च।
सुधाम्बुधिं मणिद्वीपं चिन्तामणिगृहं तथा॥
श्मशानं पारिजातञ्च तन्मूले रत्नवेदिकाम्।
तस्योपरि मणेः पीठं न्यसेत् साधकसत्तमः॥
चतुर्दिक्षु मुनीन् देवान् शिवांश्च शवमुण्डकान्।
धर्मांश्चैवाप्यधर्मांश्च पादगात्रचतुष्टये॥

पादगात्रचतुष्टयन्तु — दक्षांस-वक्त्रमुख-दक्षजङ्घा-दक्षपार्श्वादिकम्।

हृदि कन्दं तथा पद्मं सूर्यं सोमं महेश्वरि!।
वैश्वानरं तथा सत्त्वं रजश्चैव तमस्तथा॥
आत्मानञ्चैव विन्यस्य शक्तिं हृत्पद्मके न्यसेत्।

आत्मानमिति आत्मशब्देनात्मचतुष्टयमुच्यते। शक्तिर्यथा।

इच्छा ज्ञाना क्रिया चैव कामदा कामदायिनी।
रती रतिप्रियानन्दा तथैव च मनोन्मनी॥
वाग्भवं प्रथमं चोक्का परायै तदनन्तरम्।
अपरायै हिरूपायै हँसौ वाच्यावतःपरम्॥
सदाशिव महाप्रेत ङेन्तं पद्मासनं तथा।
नम इत्येव मन्त्रोऽयं पीठन्यास उदाहृतः।

एवं पीठे देहमये चिन्तयेदिष्टदेवताम् ॥

अथादौ कामकलारूपमात्मानं विभाव्य मूलाधारात् कुण्डलिनीं परमशिवान्तं ध्यात्वा चन्द्रामृतेन संप्लाव्य करकच्छपिकया पुष्पं गृहीत्वा सुषुम्नया आवाह्य हृदयाष्टदलरक्तपद्ममध्ये ध्यायेत् । तदुक्तं स्वतन्त्रे

अतः कामकलाध्यानमावाह्य कालिकां शिवाम् ।
कूर्माख्यमुद्रया पुष्पैश्चक्रमध्ये निधापयेत् ॥

अथ कामकला यथा ।

मुखं विन्दुवदाकारं तदधः कुचयुग्मकम् ।
सर्वविद्यामृतापूर्णं सर्ववाग्विभवप्रदम् ॥
सर्वार्थसाधकं देवि ! सर्वरञ्जनकारकम् ।
तदधः सपरार्द्धञ्च सुपरिष्कृतमण्डलम् ॥
सर्वदेवादिभूतान्तःसर्वदेवनमस्कृतम् ।
सर्वाह्लादसुसंपूर्णं सर्ववश्यप्रवश्यकम् ॥
एतत् कामकलाध्यानं सुगोप्यं साधकोत्तमैः ।

श्रीक्रमेऽपि—

या सा मधुमती नाम्ना मायामोहनकारिणी ।
बाह्याभ्यन्तरयोगेन चिन्तनीयाद्य तां शृणु ॥
त्रैलोक्यमेकरूपेण स्वात्मानमेकरूपिणम् ।
एकाकारतस्वरूपेण सर्वां शान्तिं विचिन्तयेत् ॥
कामयेत् कामिनीं सर्वां देवीमीश्वररूपिणीम् ।
चिन्तयेत् सुन्दरीं देवीं सर्वव्यापककारिणीम् ॥
ईकारः सर्वमन्त्रः स्यादपरं स्याच्चतुष्टयम् ।
बिन्दुत्रयस्य देवेशि ! प्रथमे देवि ! वक्त्रके ॥
बिन्दुद्वय स्तनद्वन्द्वं हृदि स्थाने नियोजयेत् ।
ह[illegible]र्द्धकलां सूक्ष्मां योनिमध्ये विचिन्तयेत् ॥

तथा कामकलारूपां मदनाङ्कुरगोचरे।
उद्यदादित्यसङ्काशां सिन्दूराभां स्तनद्वये॥
विन्दुं सङ्कल्प्य वक्त्रे तु स्फुरद्दीपशिखां प्रिये।
आधाराद् ब्रह्मरन्ध्रान्तं तत्क्रमार्गेण भावयेत्॥
कामविन्दुरहं देवि! तत्रस्थां परमेश्वरीम्।
शिवशक्तिमयीं देवि! तदधःस्थात् कुचद्वयम्॥
तदधः सपरार्द्धञ्च चिद्रूपां परमां कलाम्।
सापि कुण्डलिनी शक्तिः कामकलास्वरूपिणी॥
सा शिखावर्त्म गच्छन्ती भित्त्वा ग्रन्थिं चतुर्दश।
प्रविश्य परमार्गन्तु सूक्ष्ममार्गस्वरूपिणी॥
सापि च त्रिविधा सृष्टिर्ब्रह्मविष्णुस्वरूपिणी।
सञ्चिन्त्य साधकश्रेष्ठस्त्रैलोक्यं वशमानयेत्॥
एतत्ते कथितं देवि! कामकलाविनिर्णयम्।
गोप्तव्यं हि प्रयत्नेन यदिच्छेदात्मनो हितम्॥

अथ कूर्ममुद्रा यथा। कालिकापुराणे

वामहस्तस्य तर्जन्यां दक्षिणस्य कनिष्ठिकाम्।
तथा दक्षिणतर्जन्यां वामाङ्गुष्ठेन योजयेत्॥
प्रोन्नतं दक्षिणाङ्गुष्ठं वामस्य दक्षिणादिकाः।
अङ्गुलीर्योजयेत् पृष्ठे दक्षिणस्य करस्य च॥
वामस्य पितृतीर्थेन मध्यमानामिके तथा।
अधोमुखे च ते कुर्य्यात् दक्षिणस्य करस्य च॥
कूर्मपृष्ठसमं कुर्य्याद्दक्षिणस्य करस्य च।
एवंविधः सर्वसिद्धिं ददाति पाणिकच्छपः॥
कुर्य्यात्तु नयनाग्रे तु निमील्य नयनद्वयम्।
समं कायशिरोग्रीवं कृत्वा स्थिरतरो बुधः।
ध्यानं समारभेन्मन्त्री सर्वपापविनाशनम्॥

ध्यानं यथा—स्वतन्त्रे

देव्या ध्यानं प्रवक्ष्यामि सर्वदेवोपसेविताम्।
अञ्जनाद्रिनिभां देवीं करालवदनां शिवाम्॥
मुण्डमालावकीर्णांसां मुक्तकेशीं स्मिताननाम्।
महाकालहृदम्भोजे स्थितां पीनपयोधराम्॥
विपरीतरतासक्तां घोरदंष्ट्रां शिवैः सह।
नागयज्ञोपवीताञ्च चन्द्रार्द्धकृतशेखराम्॥
सर्वालङ्कारयुक्ताञ्च मुण्डमालाविभूषिताम्।
मृतहस्तसहस्रैस्तु काञ्चीबद्धां दिगम्बरीम्॥
शिवाकोटिसहस्रैस्तु योगिनीभिर्विराजिताम्।
रक्तपूर्णमुखाम्भोजां मदपानप्रमत्तकाम्॥
वह्न्यर्कशशिनेत्रान्तु वह्निविन्दुयुताननाम्।
विगतासुकिशोराभ्यां कृतकर्णावतंसिनीम्॥
कण्ठावसक्तमुण्डालीं गलद्रुधिरचर्चिताम्।
श्मशानवह्निमध्यस्थां ब्रह्मकेशववन्दिताम्॥
सद्यश्छिन्नशिरः खड्गवराभीतिकराम्बुजाम्।
तत्र वामोर्द्ध्वहस्तेन कपालं तदधः शिरः॥
दक्षिणोर्द्ध्वहस्ते अभयं तदधो वरमिति।

तदुक्तं महाकालकृतस्तवे।

ऊर्द्ध्वं वामे कृपाणं करकमलतले छिन्नमुण्डं तथाधः
सव्ये चाभीर्वरञ्च॥ इत्यादि।

ध्यानान्तरं यथा भैरवतन्त्रे—

करालवदनां घोरां मुक्तकेशीं चतुर्भुजाम्।
कालिकां दक्षिणां दिव्यां मुण्डमालाविभूषिताम्॥
सद्यश्छिन्नशिरःखड्गवामाधोर्द्ध्वकराम्बुजाम्।
अभयं वरदञ्चैव दक्षिणोर्द्ध्वाधःपाणिकाम्॥

महामेघप्रभां श्यामां तथैव च दिगम्बरीम् ।
कण्ठावसक्तमुण्डाली गलद्रुधिरचर्चिताम् ॥
कर्णावतंसतानीतशवयुग्मभयानकाम् ।
घोरदंष्ट्रां करालास्यां पीनोन्नतपयोधराम् ॥
शवानां करसंघातैः कृतकाञ्चीं हसन्मुखीम् ।
सृक्कद्वयगलद्रक्तधाराभिः स्फुरिताननाम् ॥
घोररूपां महारौद्रीं श्मशानालयवासिनीम् ।
दन्तुरां दक्षिणव्यापिमुक्तालम्बिकचोच्चयाम् ॥
शवरूपमहादेवहृदयोपरि संस्थिताम् ।
शिवाभिर्घोररावाभिश्चतुर्दिक्षु समन्विताम् ॥
महाकालेन च समं विपरीतरतातुराम् ।
भजेत्त्रिजगतां धात्रीं स्मेराननसरोरुहाम् ॥
एवं सञ्चिन्तयेत् कालीं धर्मकामार्थसिद्धिदाम् ॥

अथानयोरेकतरेण देवीं ध्यात्वा मानसोपचारैराराध्य पूर्ववज्जपहोमं कृत्वा नमस्कारं स्तोत्रपाठं च कुर्य्यात् ।

यन्त्रनिर्माणार्थं पात्राणि यथा मुण्डमालातन्त्रे—
ताम्रपात्रे कपाले वा श्मशाने काष्ठनिर्मिते ।
शनिभौमदिने वापि शरीरे मृतसम्भवे ॥
स्वर्णरौप्ये च लौहे वा चक्रमभ्यर्च्य यत्नतः ।
स्वतन्त्रेऽपि । इत्थं विन्यस्तदेहः सन् चक्रराजं समालिखेत् ।
सुवर्णे रजते ताम्रे पाषाणे वाष्टधातुषु ॥ इति ।

अथ वह्निः पूजार्थं वक्ष्यमाणगन्धाष्टकलिप्ते स्वर्णादिकुण्डगोलस्वयम्भूकुसुमागुरुलिप्ते वा स्वर्णरजतताम्रशलाकया विन्दुकण्टकेन पुष्पेण वा मन्त्रमुच्चरन् । विन्दुमायायुतत्रिकोणपञ्चवृत्ताष्टदलपद्मचतुरस्रं चतुर्द्वारात्मकम् यन्त्रराजं लिखेदिति सत्सम्प्रदाया वदन्ति । तथा च कालीतन्त्रे—

आदौ त्रिकोणं विन्यस्य त्रिकोणं तद्बहिर्न्यसेत् ।
ततो वै विलिखेन्मन्त्री त्रिकोणत्रयमुत्तमम् ॥
ततो वृत्तं समालिख्य लिखेदष्टदलं ततः ।
वृत्तं विलिख्य विधिवल्लिखेत् नूपुरयुग्मकम् ॥

स्वतन्त्रेऽपि ।

स्वयम्भूकुसुमं कुण्डगोलोत्थं रोचनागुरु ।
काश्मीरमृगनाभी च शिलञ्च चन्दनद्वयम् ॥
एष गन्धः समाख्यातः सर्वदा चण्डिकाप्रियः ।
एतेन गन्धयोगेन योनिचक्रं समालिखेत् ॥
योनिद्वयं ततः कुर्य्यात् कोणषट्कं ततः प्रिये ! ।
ततश्चाष्टदलं भूमिं चतुर्द्वारैः समन्विताम् ॥
एतत्ते कथितं चक्रमत्र पुष्पाञ्जलिं किरेत् ॥

कुमारीकल्पेऽपि ।

आदौ त्रिकोणं विन्यस्य त्रिकोणं तद्बहिर्न्यसेत् ।
वहिस्त्रिकोणमालिख्य कोणषट्कं लिखेद्वहिः ॥
मध्ये तु वैन्दवं चक्रं वीजमायाविभूषितम् ।
षट्कोणात् तु वहिर्वृत्तं ततोऽष्टदलकं लिखेत् ॥
वहिर्वृत्तेन संयुक्तं नूपुरैकेण संयुतम् ।
ज्ञात्वैवं मुक्तिमाप्नोति यन्त्रराजं न संशयः ॥
एतत् तु विलिखेत्ताम्रे कुण्डगोलविलेपिते ।
स्वयम्भूकुसुमैर्युक्ते कुङ्कमागुरुसेविते ॥

ननु उक्तं पञ्चदशकोणं कथमुक्तं स्वतन्त्रादि तन्त्रविरोधात् । न च वाच्यं कालीतन्त्रमतमिति तत्रैव पूजायां षट्कोणपदश्रुतेः । तद्यथा ।

कालीं कपालिनीं कुल्लां कुरुकुल्लां विरोधिनीम् ।
विप्रचित्तान्तु संपूज्य वह्निः षट्कोणके बुधः ॥

इति वह्निरुपादानं व्यर्थमेव। अन्तःषट्कोणाभावात् वचनान्तरदर्शनाच्च। तथा कालीतन्त्रे।

पञ्चशक्तिं समालिख्य अधोवक्त्रां सुलक्षणाम्।

कालिकाश्रुतौ च। त्रिकोणं त्रिकोणं नवकोणं पञ्चमम्। कुलसम्भवेऽपि।

त्रिकोणं विन्यसेत् पद्मे पुनश्चापि त्रिकोणकम्।
नवकोणं पुनस्तत्र तन्मध्ये स्थापयेत् शिवाम्॥

तस्मात् षट्कोणमत्र शक्त्यात्मकमिति। ननु एवं त्रिकोणद्वयान्तर्गतभैरवीचक्रवत् नवकोणं मतान्तरं स्यात्। नैवं तदा तत्रैव पूजायां महाविरोधः। तद्यथा कुलसम्भवे।

कालीं कपालिनीं कुल्लां कुरुकुल्लां विरोधिनीम्।
विप्रचित्तां न्यसेच्चैव वह्निः षट्कोणके बुधः॥
उग्रामुग्रप्रभां दीप्तां परत्रिकोणके न्यसेत्।
नीलां घनां वलाकाञ्च तथैवापरके त्रिके॥
मात्रां मुद्रां मिताञ्चैव परत्रिकोणके बुधः॥

एतदुक्तं भवति षट्कोणावरणान्ते अपरत्रिकोणके त्रयावरणम्। तथापरे त्रिकोणत्रयं अपरं चरमं यजेदित्यस्य अर्थो भवन्मते तु त्रिकोणं नास्त्येव त्रिकोणशब्दस्य केवल त्रिकोणात्मके शृङ्गाटके शक्तित्वात्। न च वाच्यं नवयोनेर्वाह्यकोणाष्टकस्यैकैककोणपदशक्तिरिति। तत्त्रिपञ्चारपीठानुपपत्तेः समग्रचक्रपूजाभावाच्च। तस्मात् नवयोन्यात्मकमिति भावः। वस्तुतस्तु स्वतन्त्रादितन्त्रभेदात् षट्कोणान्तर्गतत्रिकोणात्मकमपि यन्त्रान्तरं भवति। यतः षट्कोणशब्दस्यपारिभाषिके शक्तिरन्यत्र लक्षणा। नहि कोऽपि दृष्टपरिकल्पनां विहाय अदृष्टं कल्पयति यत् तु कालीतन्त्रे षट्कोणमुक्तं तत् तु तन्मते बोद्धव्यम्। अन्यत्र कल्पने मानाभावात्। न चैकदैवत-

मन्त्रे यन्त्रद्वयकल्पने विरोध इति वाच्यम्। तारातन्त्रे।

एकदैवतमन्त्रस्य विविधयन्त्रदर्शनात्।

एतत्तु तस्याः पूजायामग्रे लिखिष्यामः।

अथ स्वर्णादिसिंहासने पुरतो यथोक्तयन्त्रं संस्थाप्य तदुपरि पूजयेत् यथा। क्लीं आधारशक्तये नमः। ओं प्रकृत्यै नमः। ओं कूर्माय नमः। ओं अनन्ताय नमः। लं पृथिव्यै नमः। ओं सुधाम्बुधये। ओं मणिद्वीपाय। ओं चिन्तामणिगृहाय। ओं श्मशानाय। ओं पारिजाताय। ओं रत्नवेदिकायै। ओं मणिपीठाय। दिक्षु ओं नमो देवेभ्यः परितः ओं बहुमांसास्थिमोदमानशिवाभ्यः ओं शवमुण्डेभ्यः। पूर्वादिचतुर्दिक्षु ओं धर्माय ओं ज्ञानाय ओं वैराग्याय ओं ऐश्वर्याय। वक्रादि दिक्षु ओं अधर्माय ओं अज्ञानाय ओं अवैराग्याय ओं अनैश्वर्याय। मध्ये ओं अनन्ताय ओं पद्माय अं अर्कमण्डलाय उं सोममण्डलाय मं वह्निमण्डलाय सं सत्त्वाय रं रजसे तं तमसे आं आत्मने अं अन्तरात्मने पं परमात्मने ह्रीं ज्ञानात्मने। पत्रमूले पूर्वादितः ओं इच्छायै ओं ज्ञानायै ओं क्रियायै ओं कामिन्यै ओं कामदायै ओं रत्यै ओं रतिप्रियायै ओं आनन्दायै। कर्णिकायां ओं मनोन्मन्यै। मध्ये ऐं परायै ऐं अपरायै ऐं परापरायै हसौः सदाशिवमहाप्रेतपद्मासनाय नमः। इति पीठपूजां कुर्य्यात्। नमोऽन्तेन सर्वत्र। ततः कलसस्थापनं कुर्य्यात्। तत्र लक्षणमाह तन्त्रान्तरे।

कलाकलां गृहीत्वा तु देवानां विश्वकर्मणा।

निर्मितोऽयं सुरैर्यस्मात् कलसस्तेन उच्यते॥

पद्मपादाचार्य्यास्तु कला सेवते इति कलसः।

सौवर्णं राजतं वापि मार्त्तिकं वा यथोदितम्।

चालयेदस्त्रमन्त्रेण कुम्भं सम्यक् सुरेश्वरि। इति स्वतन्त्रे।

अथ प्रयोगः। स्ववामे विन्दुषट्कोणचतुरस्रं कृत्वा सामान्योदकेनाभ्युक्ष्य तत्र आधारशक्तये नमः इति पूजयेत्। ततो नम इति क्षालिताधारं तत्र निधाय मं वह्निमण्डलाय दशकलात्मने नम इति संपूज्य फड़िति क्षालितघटं रक्तवस्त्रमाल्यादिभिरलङ्कृतं ओं इति देवीबुद्ध्या मण्डलोपरि निधाय अर्कमण्डलाय द्वादशकलात्मने नम इति संपूज्य मूलमुच्चरन् कारणेन तं संपूज्य द्रव्यैः उं सोममण्डलाय षोड़शकलात्मने नम इति दत्त्वा फड़िति दर्भैर्द्रव्यं सन्ताड्य हुं इत्यवगुण्ठ्य मूलेन वीक्ष्य नमः इत्यभ्युक्षणं कृत्वा मूलेन गन्धमादाय ओमिति मन्त्रेण कुम्भे पुष्पं दत्त्वा शापमोचनं कुर्य्यात्। तदुक्तं स्वतन्त्रे।

ततश्च कारणं द्रव्यं समानीय घटे स्थितम्।
वेष्टितं रक्तवस्त्रेण रक्तमाल्येन भूषितम्॥
वामभागे महेशानि! मण्डलं चतुरस्रकम्।
ततः संस्थापयेद्भक्त्या देवीबुद्ध्या वरानने!॥
मण्डले कलसे द्रव्ये वह्न्यर्कशशिमण्डलम्॥

पूजयेदित्यर्थः। भावचूड़ामणौ

स्ववामभागे षट्कोणं तन्मध्ये ब्रह्मरन्ध्रकम्।
लिखित्वा तत्र कुम्भं वै सौवर्णं राजतञ्च वा॥
ताम्रं भूमिमयं वापि यद्वा लौहविवर्जितम्।

तन्त्रान्तरे—

आधारे स्थापयेन्मन्त्री सौवर्णं वाथ राजतम्।
कांस्यजं मृण्मयं वापि घटमव्रणशालिनम्॥
सौवर्णं भोगदं प्रोक्तं राजतं मोक्षदं स्मृतम्।
कांस्यं कान्तिकरञ्चैव मृण्मयं पुष्टिदं भवेत्॥

अथ काव्यशापविमोचनं कुर्य्य। तितदुक्तं कुमारीतन्त्रे

अन्यच्च शृणु देवेशि ! यथा पानादिकर्मणि।
दोषो न जायते देवि ! तान् वै मन्त्रान् शृणुष्व मे॥
एकमेव परं ब्रह्म स्थूलसूक्ष्ममयं ध्रुवम्।
कचोद्भवां ब्रह्महत्यां तेन ते नाशयाम्यहम्॥
सूर्य्यमण्डलसम्भूते ! वरुणमण्डलसम्भवे !।
अमावीजमयी देवि ! शुक्रशापाद्विमुच्यताम्॥
देवानां प्रणवो वीजं ब्रह्मानन्दमयं यदि।
तेन सत्येन देवेशि ! ब्रह्महत्यां व्यपोहतु॥
एवं मन्त्रत्रयेणैव अभिमन्त्र्य सुरां शुभाम्।
प्रदद्यात् कालिकायै च ततो नैवेद्यभुग्भवेत्॥

इति मन्त्रत्रयं द्रव्योपरि त्रिर्जपेत्। ओँ रां रीं रूं रैं रौं रः ब्रह्मशापविमोचनं द्रव्योपरि दशधा जपेत्। ह्रीं श्रीं क्रां क्रीं क्रूं क्रैं क्रौं क्रः सुराकृष्णशापं विमोचय अमृतं स्रावय स्रावय स्वाहा। इति कृष्णशापविमोचनं दशधा जपेत्। यथोत्तरतन्त्रे—हंसः शुचि सद्वसुरन्तरीक्षं सद्धोता वेदीषद तिथिर्दूरो नसत् नृषद्वर सद्दृतसद्व्योम सदब्जा गोजा ऋतजा अद्रिजा ऋतं बृहत्। इति ऋचा वारत्रयं द्रव्यमभिमन्त्र्य तदुपरि आनन्दभैरवौ ध्यायेत्। यथा

सूर्य्यकोटिप्रतीकाशं चन्द्रकोटिसुशीतलम्।
अष्टादशभुजैर्युक्तं पञ्चवक्त्रं त्रिलोचनम्॥
अमृतार्णवमध्यस्थं ब्रह्मपद्मोपरिस्थितम्।
वृषारूढं नीलकण्ठं सर्वाभरणभूषितम्॥
कपालखट्टाङ्गधरं घण्टाडमरुवादिनम्।
पाशाङ्कुशधरं देवं गदामूषलधारिणम्॥
खड्गखेटकपट्टीशं मुद्गरं शूलदन्तकम्।
विचित्रखेटकं दण्डं वरदाभयपाणिनम्॥

लोहितं देवदेवेशं भावयेत् साधकोत्तमः ॥

एवं ध्यात्वा हस क्ष म ल व र ऊँ यूं आनन्दभैरवाय वषट् इत्यानन्दभैरवं त्रिः संपूज्य आनन्दभैरवीं ध्यायेत् यथा—

भावयेच्च सुधां देवीं चन्द्रकोट्यानन्दप्रभाम् ।
हिमकुन्देन्दुधवलां पञ्चवक्त्रां त्रिलोचनाम् ॥
अष्टादशभुजैर्युक्तां सर्वानन्दकरोद्यताम् ।
प्रहसन्तीं विशालाक्षीं देवदेवस्य सम्मुखीम् ॥

एवं ध्यात्वा ह स क्ष म ल व र षीं सुधादेव्यै वौषट् इति आनन्दभैरवीं संपूज्य द्रव्योपरि त्रिकोणचक्रं विलिख्य तत्र त्रिपंक्तिक्रमेण आदि १६ कादि १६ थादि १६ । हं लं क्षं मध्यलसितं विलिख्य शिवशक्त्योः समायोगाद्द्रव्यमध्ये अमृतत्वं विचिन्त्य धेनुमुद्रया अमृतीकृत्य वं इति वरुणबीजं मूलमन्त्रं चाष्टधा तदुपरि जप्त्वा देवतामयं भावयेदिति द्रव्यशुद्धिः । तदुक्तं स्वतन्त्रे ।

ततश्च भावयेद्द्रव्ये मध्येऽलक्तनिभं प्रिये ! ।
अकथादिभिस्त्रिपङ्क्त्या तु हलक्षं मध्यमण्डितम् ॥
पूर्वोक्तयोनिमुद्रायां शिवशक्त्योः समागमम् ।
अमृतं चिन्तयेद्द्रव्यमष्टधाप्यमृतं जपेत् ॥
अष्टधा मूलमन्त्रञ्च जपेद्धृत्वा घटं ततः ।
एतत्तु कारणं देवि ! सुरसङ्घनिषेवितम् ॥
अतएव तस्य नाम सुरेति भुवनत्रये ।
अस्य गन्धः केशवस्तु तेन गन्धेन कौलिकः ॥
सुरया पूजयेत् देवीं दक्षिणां कालिकां शुभाम् ।
ततः शङ्खं वीरपात्रं स्थापयेन्मध्यभागतः ॥
श्रीविद्योक्तक्रमेणैव ततः पूजां समारभेत् ।

समयाचारेऽपि ।

सामान्यार्घ्यं ततः कृत्वा पयसा साधकोत्तमः ।
तज्जलैर्मण्डलं कृत्वा पात्राणि स्थापयेदथ ॥

कुमारीतन्त्रेऽपि ।

ततोऽर्घ्यं कारयेन्मन्त्री तया नार्य्या सुवेशया ।
अर्घ्यद्रव्यमर्घ्यपात्रे निःक्षिपेद्यत्नतः सुधीः ॥
कुण्डगोलोद्भवं द्रव्यं स्वयम्भूकुसुमं तथा ।
नाधर्मो जायते देवि ! महामन्त्रस्य साधने ॥

मुण्डमालायाञ्च ।

रक्तचन्दनविल्वादिजवाकुसुमवर्वरैः ।
अर्घ्यं दत्त्वा महेशानि ! सर्वकामार्थसिद्धये ॥
सुरया चार्घ्यदानेन योगिनीनां भवेत् प्रियः ।
महायोगी भवेद्देवि ! पीठप्रक्षालितैर्जलैः ॥
स्वयम्भूकुसुमे दत्ते भवेत् षट्कर्मभाजनः ।
सुशीतलजलैर्वापि कस्तूरीकुङ्कुमान्वितैः ॥
कुण्डगोलोत्थवीजैर्वा सर्वसिद्धीश्वरो भवेत् ।
जवादिना कृतार्घ्ये तु पूर्वशोधितद्रव्यं किञ्चित् क्षिपेत् ॥

तदुक्तं श्रीक्रमे । अर्घ्यविधौ ।

पूर्वन्तु शोधितं द्रव्यं गुप्तेनैव तु संक्षिपेत् ॥

अथवा ताराप्रकरणे च ।

शङ्खस्थितं तोयपूर्णं जवापुष्पञ्च वर्वरम् ।
चन्दनं चार्ककुसुमं शुक्लाञ्चैवापराजिताम् ॥
आदानञ्च विशेषेण नित्यपूजाक्रमः स्मृतः ॥

अथात्मयन्त्रयोर्मध्ये ईंकारगर्भत्रिकोणवृत्तषट्कोण-चतुरस्रं विलिख्य चतुरस्रे पूं पूर्णशैलाय नमः । उं उड्डीयमानपीठाय नमः । जां जालन्धरपीठाय नमः । कां कामरूपपीठाय नमः इति संपूज्य षट्कोणे षड़ङ्गानि मूलखण्ड-

त्रयेण त्रिकोणाग्रं दक्षोत्तरं संपूज्य मध्ये आधारशक्तिं संपूज्य त्रिकोणवृत्तषट्कोणभूषिताधारं तत्र संस्थाप्य नम इति सामान्यार्घ्योदकेनाभ्युक्ष्य तत्र वह्नेर्दशकलाः पूजयेत्। यं धूमार्चिषे नमः। रं उष्मायै नमः। लं ज्वलिन्यै नमः। वं ज्वालिन्यै नमः शं विस्फुलिङ्गिन्यै नमः। षं सुश्रियै नमः। सं स्वरूपायै नमः। हं कपिलायै नमः। लं हव्यवहायै नमः। क्षं कव्यवहायै नमः। इति संपूज्य मं वह्निमण्डलाय दशकलात्मने अर्घ्यपात्रासनाय नमः। इति संपूज्य षट्कोणे षडङ्गं मध्ये व्यस्तमूलेन देवीम् इष्ट्वा कपालादिपात्रं फडिति क्षालितं तत्राधारोपरि संस्थाप्य सूर्य्यमण्डलं तत्र यजेद्यथा। कं भं तपिन्यै खं बं तापिन्यै गं फं धूम्रायै घं पं मरीच्यै ङं नं ज्वलिन्यै चं धं रुच्यै छं दं सुषुम्नायै जं थं भोगदायै झं तं विश्वायै ञं णं बोधिन्यै टं ढं धारिण्यै ठं डं क्षमायै नमोऽन्तेन संपूज्य अं अर्कमण्डलाय द्वादशकलात्मने अर्घ्यपात्राय नमः। इतीष्ट्वा त्रिकोणवृत्तषट्कोणं पात्रमध्ये विलिख्य समस्तव्यस्तमन्त्रेण त्रिकोणं संपूज्य वमिति वरुणबीजं मूलमन्त्रं विलोममातृकाञ्च पठित्वा घटस्थकारणामृतेन त्रिभागमर्घ्यं संपूर्य्य शेषं जलेन पूरयेत्। ततो दूर्वाक्षतरक्तचन्दनजवार्कश्वेतापराजिताकरवीरविल्ववर्वरीकुन्दसुगन्धिद्रव्याणि शुद्धिमीनमुद्राकुण्डगोलादिकञ्च संशोध्य तत्र निःक्षिप्य सोममण्डलं पूजयेद् यथा। अं अमृतायै नमः आं मानदायै नमः इं पुषायै नमः ईं तुष्ट्यै नमः उं पुष्ट्यै नमः ऊं रत्यै नमः ऋं धृत्यै नमः ॠं शशिन्यै नमः लृं चन्द्रिकायै नमः लॄं कान्त्यै नमः एं ज्योत्स्नायै नमः ऐं श्रियै नमः ओं प्रीत्यै नमः औं अङ्गदायै नमः अं पूर्णायै नमः अः पूर्णामृतायै नमः उं सोममण्डलाय षोडशकलात्मने अर्घ्यपात्रामृताय नमः इति

संपूज्य पूर्ववद्यन्त्रं कारणैः लिखित्वा त्रिकोणत्रिरेखायां अं १६ कं १६ थं १६ मध्ये हं लं चं विलिख्य मूलखण्डत्रयेण त्रिकोणमिष्ट्वा षट्कोणे षड़ङ्गानि संपूज्य।

गङ्गे च यमुने चैव गोदावरि सरस्वति।
नर्मदे सिन्धु कावेरि जलेऽस्मिन् सन्निधिं कुरु॥

इत्यनेनाङ्कुशमुद्रया सूर्य्यमण्डलात्तीर्थमावाह्य आनन्द-भैरवभैरव्यौ पूर्वोक्तक्रमेण संपूज्य पूर्वादिक्रमेण पञ्चरत्नं यजेद्-यथा। ग्लुं गगनमण्डलेभ्यः स्लुं स्वर्गरत्नेभ्यः म्लुं पाताल-रत्नेभ्यः म्लुं मर्त्यरत्नेभ्यः नुं नागरत्नेभ्यः इति नमोऽन्तेन पूजयेत्। अथैषां भेदोऽपि लिख्यते। तदुक्तं यामले।

मांसन्तु त्रिविधं प्रोक्तं जलभूचरखेचरम्।
गोधा चैवाश्वमहिषवराहाजमृगोद्भवम्॥
महामांसाष्टकं प्रोक्तं देवताप्रीतिकारणम्॥

मांसाभावे तदनुकल्पं निक्षिपेत्। तदुक्तं समयाचारे।

लवणार्द्रकपिण्याकगोधूममांसपञ्चमम्।
लशुनञ्च महादेवि! मांसप्रतिनिधी स्मृतम्॥
मत्स्यन्तु त्रिविधं प्रोक्तं उत्तमाधममध्यमम्।
उत्तमं त्रिविधं देवि! शालपाठीनरोहितैः॥
प्रवीणं कण्टकैर्हीनं तैलाक्तं स्वादुसंयुतम्।
देव्याः प्रीतिकरञ्चैव मध्यमं स्याच्चतुर्विधम्॥—
क्षुद्राणि तानि सर्वाणि अधमान्याहुरुत्तमाः॥

मुद्रा द्विविधा यथा कुलार्णवे।

अन्नैर्हेयं मण्डलाकारं चन्द्रबिम्बनिभं शुभम्।
चारुपक्वं मनोहारि शर्करायैः प्रपूरितम्॥
पूजाकाले देवताया मुद्रैषा परिकीर्त्तिता॥

यामलेऽपि।

भृष्टधान्यादिकं यद्यच्चर्वणीयं च चर्वयेत्।
तेषां संज्ञा कृता मुद्रा महामोदप्रवर्द्धिनी॥

कुलकुसुमभेदं त्वग्रे लिखिष्यामः। अथैषां शुद्धि-र्लिख्यते। तदुक्तं भैरवतन्त्रे।

ओं प्रतद्विष्णु स्तवते वीर्य्येण मृगोलभीमकुचयोर्गरिष्ठाः।
यस्योरुषु त्रिषु विक्रमणेष्वधिक्षिपन्ति भुवनानि विश्वाः॥

अनया मांसमभिमन्त्र्य।

त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्द्धनम्।
उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात्॥

इत्यनया मत्स्यं संशोध्य। ओं तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः। दिवीव चक्षुराततम्। तद्विप्रासो विपन्यवो जागृवांसः समिन्धते। विष्णोर्यत् परमं पदं इति ऋचा मुद्रामभिमन्त्र्य।

ओं विष्णुर्योनिं कल्पयतु त्वष्टा रूपाणि पिंषतु।
आसिञ्चतु प्रजापतिर्धाता गर्भं दधातु ते॥
गर्भं धेहि सिनीवालि! गर्भं धेहि सरस्वति!।
गर्भं ते अश्विनौ देवावाधत्तां पुष्करस्रजौ॥

ग्लूं क्लूं म्लूं ङ्लूं स्वाहा अमृते अमृतोद्भवे! अमृतवर्षिणि! अमृतं स्रावय स्रावय स्वाहा। इति कुण्डोद्भवादिकमभिमन्त्र्य सर्वं हुमित्यवगुण्ठ्य धेनुमुद्रया अमृतीकृत्य तालत्रयं दिग्बन्धनं च कृत्वा सर्वेषामुपरि मूलमन्त्रं सप्तधा जपेत्। इति मांसादि-शोधनम्।

ततः ऐं क्रीं सौं ब्रह्मरससम्भूत-मशेषरससम्भवम्।
आपूरितं महापात्रं पीयूषरससंयुतम्॥
अखण्डैकरसानन्दकरे परसुधात्मनि।
स्वच्छन्दस्फुरणामत्र निधेहि कुलरूपिणि।

अकुलस्थामृताकारे शुद्धज्ञानकरे धरे॥
अमृतत्वं निधेह्यस्मिन् वस्तुनि क्लिन्नरूपिणि।
तद्रूपेणैकरस्यञ्च कृत्वा ह्येतत्स्वरूपिणी॥
भूत्वा परामृताकारं मयि चित्स्फुरणं कुरु।

एभिर्मन्त्रैरर्घ्यमभिमन्त्र्य मध्ये कामकलां विलिख्य तत्र इष्टदेवतामावाह्य तालत्रयं दशदिग्बन्धनं च कृत्वा हुमित्यवगुण्ठनमुद्रया अवगुण्ठ्य वमिति धेनुमुद्रया अमृतीकृत्य योनिमुद्रां प्रदर्श्य हंसौ नम इतीष्ट्वा शङ्खमुद्रां प्रदर्श्य षडङ्गेन सकलीकृत्य मत्स्यमुद्रया आच्छाद्य मूलमन्त्रं तदुपरि दशधा जप्त्वा देवतारूपमर्घ्यं भावयेत्। ततः।

पुष्पाञ्जलित्रयं दत्त्वा धूपदीपौ प्रदर्शयेत्!

इति संक्षिप्तार्घ्यसाधनम्।

सम्पूर्णप्रकारस्तु मत्कृततत्त्वानन्दतरङ्गिण्याम् अनुसन्धेयः।

पूजासमाप्तिं यावत् तावदर्घ्यं न चालयेत्॥

अथ अवगुण्ठनमुद्रा यथा ज्ञानार्णवे।

सव्यहस्तकृता मुष्टिर्दीर्घाधोमुखतर्जनी।
अवगुण्ठनमुद्रेयमभितो भ्रमिता सती॥

तदुक्तं तत्रैव।

मध्यमे गुटिकाकारे तर्जन्युपरि संस्थिते।
अनामिकामध्यगते तथैव हि कनिष्ठके॥
सर्वा एकत्र संयोज्य अङ्गुष्ठपरिपीड़िताः।
योनिमुद्रा समाख्याता त्रैलोक्योत्पत्तिमातृका॥

शङ्खमुद्रा यथा। तन्त्रान्तरे।

वाममुष्ट्यन्तरेऽङ्गुष्ठं नियोज्य सरलाङ्गुलीः।
दक्षिणस्य करस्यैव वामाङ्गुष्ठेन संस्पृशेत्॥
शङ्खमुद्रेयमाख्याता मन्त्रविद्भिरनुत्तमा।

देवताङ्गे षड़ङ्गञ्च सकलीकरणं भवेत् ॥
दक्षपाणिपृष्ठदेशे वामपाणितलं क्षिपेत् ।
अङ्गुष्ठौ चालयेत् सम्यङ्मुद्रेयं मत्स्यरूपिणी ॥

ततो देव्या अर्घ्यं गृहीत्वा ।

घटश्रीपात्रयोर्मध्ये पात्रे च स्थापयेत्ततः ।

घटसमीपे गुरुपात्रं ततो भोगपात्रं ततः शक्तिपात्रं योगिनीपात्रं वीरपात्रं वलिपात्रं पाद्याचमनीयपात्राणि सामान्यार्घ्यैः व्युत्क्रमेण स्थापयेत् । ततः शुद्धिसहितकारणेन तत्त्वमुद्रया श्रीगुरुपादुकां स्मरन् तत्पात्रामृतेन श्रीअमुकानन्दनाथगुरुपादुकां तर्पयामि, नमः इति त्रिः सकृद्वा मूर्ध्नि सन्तर्प्य एवं परमगुरु-परापरगुरु-परमेष्टिगुरूनपि सन्तर्पयेत् । ततः श्रीपात्रात् मूर्ध्नि श्रीआनन्दभैरवं तर्पयामि नमः इति मन्त्रेण त्रिः सन्तर्प्य ततो देवीं सायुधां सवाहनां सपरिवारां हृदि सन्तर्पयेत् ।

अथ तत्त्वमुद्रा यथा । स्वतन्त्रे ।

अङ्गुष्ठानामिकायोगाद्वामहस्तस्य पार्वति !
तर्पयेत् कालिकां देवीं सायुधां सपरीकराम् ॥

अथ तत्त्वशुद्धिं कुर्य्यात् । तदुक्तं श्रुतौ । ओं प्राणापानव्यानोदानसमाना मे शुद्ध्यन्तां ज्योतिरहं विरजा विपाप्मा भूयासं स्वाहा ॥ १ ॥ ओं पृथिव्यप्तेजोवाय्वाकाशानि मे शुद्ध्यन्तां ज्योतिरहं विरजा विपाप्मा भूयासं स्वाहा ॥ २ ॥ ओं प्रकृत्यहङ्कारबुद्धिमनःश्रोत्राणि मे इत्यादि ॥ ३ ॥ ओं त्वक्चक्षुर्जिह्वाघ्राणवचांसि मे इत्यादि ॥ ४ ॥ ओं पाणिपादपायूपस्थशब्दा मे इत्यादि ॥ ५ ॥ ओं स्पर्शरूपगन्धाकाशानि मे इत्यादि ॥ ६ ॥ ओं वायुतेजःसलिलभूम्यात्मानो मे शुद्ध्यन्तां ज्योतिरहं विरजा विपाप्मा भूयासं स्वाहा ॥ ७ ॥ इति सप्तभि-

ऋग्भिर्विसृज्य कारणेन करतलं सम्मार्ज्य दक्षहस्ते त्रिकोणं लिखित्वा कलायसदृशीं शुद्धिं दक्षिणवामभुजसंमुखमध्येषु निधाय वामहस्ताङ्गुष्ठमध्यमानामायोगैरेकां गृहीत्वा मन्त्रान्ते क्रीं श्रीं आत्मतत्त्वेन स्थूलदेहं शोधयामि स्वाहा। अनेन अधःस्थां शुद्धिं स्वीकृत्य क्रीं श्रीं विद्यातत्त्वेन सूक्ष्मदेहं शोधयामि स्वाहा। अनेन दक्षिणस्थां स्वीकृत्य क्रीं श्रीं शिवतत्त्वेन परदेहं शोधयामि स्वाहा अनेन उत्तरस्थां स्वीकृत्य क्रीं श्रीं सर्वतत्त्वेन तनुत्रयाश्रयं जीवं शोधयामि स्वाहा अनेन वामदक्षिणमध्यस्थां स्वीकृत्य वस्त्रेण हस्तौ विशोध्य हस्ताभ्यां सर्वाङ्गं मार्जयेदिति तत्त्वशुद्धिः। विस्तृतिस्तु मत्कृततत्त्वानन्दतरङ्गिण्यामनुसन्धेया।

ततः श्रीपात्राद्विन्दुस्वीकारम् आर्द्रं ज्वलतीति ऋग्भिः स्वदेवतमन्त्रेण वा कृत्वा श्रीपात्रामृतेन पूजोपकरणाभ्युक्षणात् सर्वं ब्रह्ममयं भवेदिति। ततः सिंहासनस्य पूर्वदक्षिणपश्चिमोत्तरेषु त्रिकोणवृत्तं विलिख्य ऐं ह्रीं क्रूं मण्डलाय नमः। इति मण्डलान् संपूज्य पूर्वे वां वटुकाय नमः इति गन्धादिभिरिष्ट्वा अर्घ्यं पूर्णसलिलमांसमीनमुद्रापुष्पयुतं बलिमुपस्कृत्य बलिपात्रामृतेन वामाङ्गुष्ठानामाभ्याम् उत्सृजेत् अनेन। एह्येहि देवीपुत्र! वटुकनाथ! कपिलजटाभारभास्कर! त्रिनेत्र! ज्वालामुख! सर्वविघ्नान् नाशय नाशय सर्वोपचारसहितबलिं गृह्ण गृह्ण स्वाहा एष बलिर्वटुकाय नमः। दक्षिणे यं योगिनीभ्यो नमः इति योगिनीः समभ्यर्च्य दक्षानामाङ्गुष्ठाभ्यां पूर्ववद्बलिम् अनेन दद्यात्।

ऊर्द्ध्वं ब्रह्माण्डतो वा दिवि गगनतले भूतले निस्तले वा
पाताले वा तले वा पवनसलिलयोर्यत्र कुत्र स्थिता वा।
क्षेत्रे पीठोपपीठादिषु च कृतपदा धूपदीपादिकेन

प्रीता देव्यः सदा नः शुभवलिविधिना पान्तु वीरेन्द्रवन्द्यान् ॥

सर्वयोगिनीः ह्रूं फट् स्वाहा। एष वलिर्योगिनीभ्यो नमः। पश्चिमे क्षां क्षेत्रपालमभ्यर्च्य वाममुष्टिकृतदीर्घया तर्जन्या वलिं दद्यात् अनेन। क्षां क्षीं क्षूं क्षैं क्षौं क्षः क्षेत्रपाल! धूपदीपसहितं वलिं गृह्ण गृह्ण गृह्ण स्वाहा एष वलिः क्षेत्रपालाय नमः। उत्तरे गां गणेशमभ्यर्च्य दण्डाकारसर्वाङ्गुलिमध्यद्वययोगैर्वलिं दद्यात्। गां गीं गूं गणपतये विरोधिसर्वजनमेव संमारय स्वाहा। एष वलिर्गणपतये नमः। अथ स्ववामे पूर्ववत् मण्डलं कृत्वा ऐं ह्रीं व्यापकमण्डलाय नमः इति संपूज्य तत्र साधारणवलिं संस्थाप्य मूलेन अभिमन्त्र्य गन्धपुष्पधूपदीपादिना तं संपूज्य श्रीं क्रीं सर्वविघ्नकृद्भ्यः सर्वभूतेभ्यः हुं फट् नमः। एष वलिः सर्वभूतेभ्यो नमः। इति तत्त्वमुद्रया उत्सृजेत्। सशक्तश्चेत् सर्वभूताय वलिमेकं दद्यात्। ततः पूर्ववत् षडङ्गन्यासं कृत्वा कामकलां विभाव्य तरुणदिवाकरारुणकुसुमाञ्जलिं कूर्ममुद्रया गृहीत्वा मूलाधारात् कुण्डलिनीं ब्रह्मपथे परशिवान्तं ध्यात्वा हृदयाष्टदलपीठे समानीय मूलेन मूर्त्तिं कल्पयेत्। तदुक्तं तन्त्रान्तरे।

देवीं सुषुम्नामार्गेण आनीय ब्रह्मरन्ध्रकम्।
वामनासापुटे धृत्वा निर्माल्यं स्वाञ्जलिस्थितम्।
पुष्पमारोप्य तत्पुष्पं प्रतिमादौ निधापयेत् ॥

भैरवतन्त्रे च। ततः पूर्वोक्तरूपां तां ध्यायेच्चैव हि दक्षिणाम्।
योगिनीचक्रसंहितां महाकालसमन्विताम् ॥

कालीतन्त्रेऽपि।

ततो हृदयपद्मान्तःस्फुरन्तीं परमां कलाम्।
यन्त्रमध्ये समावाह्य न्यासजालं प्रविन्यसेत् ॥

कुमारीकल्पेऽपि।

ततो हृदयपद्मान्तःस्फुरन्तीं विद्युताकृतिम्।
सुषुम्नावर्त्मना नीत्वा शिरःस्थाने महेश्वरीम्॥
ततो वै हृदयासन्ने पुष्पान्तरे समाह्वयेत्।
नासया वा महादेवि! वायुवीजेन मन्त्रवित्॥
देवेशीति च मन्त्रेण विन्दुनावाहयेत् सुधीः॥

अथ पूर्वोक्तरूपं ध्यात्वा दीपाद्दीपान्तरमिति च परशिवे संयोज्य यमिति वायुवीजमुच्चरन् वामनासापुटपथेन देवीं कुसुमाञ्जलावानीय मन्त्रमध्ये समावाहयेत्। अनेन मन्त्रेण।

देवेशि! भक्तिसुलभे! परिवारसमन्विते।।
यावत्त्वां पूजयिष्यामि तावत्त्वं सुस्थिरा भव॥

दे इति यन्त्रमध्ये देवीं समावाह्य महाकालसहितश्रीदक्षिणकालिके! इहागच्छ इहागच्छ इह तिष्ठ इह तिष्ठ इह सन्निहिता भव इह सन्निरुद्धा भूत्वा पूजां गृहाण। इत्यावाह्य पूर्ववज्जीवन्यासं लेलिहामुद्रया कुशविष्टरेण वा कृत्वा हुं इत्यवगुण्ठ्य षडङ्गेन सकलीकृत्य परमीकरणं कृत्वा छोटिकाभिः दशदिग्बन्धनं विधाय अमृतीकरणं च कृत्वा कृताञ्जलिर्देवीनामसम्बोधनान्ते ओं स्वागतं कुशलमिदमासनमिहास्यतामिति वदेत्। अथ आवाहनादिमुद्रा यथा। दक्षिणामूर्त्तिसंहितायाम्।

ऊर्द्ध्वाञ्जलिमधः कुर्य्यादियमावाहनी भवेत्।
इयन्तु विपरीता स्यात्तदा वै स्थापनी भवेत्॥
ऊर्द्ध्वाङ्गुली मुष्टियोगा तदेयं सन्निधापनी।
अन्तराङ्गुष्ठयुगला तदेयं सन्निरोधनी॥

अथ लेलिहामुद्रा यथा।

तर्जनीमध्यमानामासमं कुर्य्यादधोमुखम्।
अनामायां क्षिपेद्वृद्धाऋदुं कृत्वा कनिष्ठिकाम्॥

लेलिहानामसुद्रेयं जीवन्यासे प्रकीर्त्तिता।
अञ्जलिं चार्घ्यवत् कृत्वा परमीकरणं भवेत्॥

ततः खड्गमुण्डवराभययोनीर्दर्शयित्वा प्रतिचक्रे रश्मिवृन्ददेवतामावाहयेत्। तदुक्तं स्वतन्त्रे।

ध्यात्वा देवीं समावाह्य योनिमुद्रान्तु दर्शयेत्।
खड्गमुण्डवराभीतिपरां योनिन्तु दर्शयेत्।
ततश्च प्रतिचक्रेषु देवीमावाहयेत् सदा॥

अथ खड्गादिमुद्रा यथा।

कनिष्ठानामिके बध्वा स्वाङ्गुष्ठेनैव दक्षतः।
शेषाङ्गुलीस्तु प्रसृते संसृष्टे खड्गमुद्रिका॥
अन्तराङ्गुष्ठमुष्टिञ्च कृत्वा वामकरस्य च।
मध्यमायां दक्षिणस्य तथालम्ब्य प्रयत्नतः॥
मध्यमेनाथ तर्जन्या अङ्गुष्ठाभ्यां विसृष्य च।
दक्षिणं योजयेत् पाणिं वाममुष्टौ च साधकः॥
दर्शयेद्दक्षिणे भागे मुण्डमुद्रेयमुच्यते।
वरदाभयमुद्राञ्च वरदाभयवत् करे॥
तर्जन्यनामिके मध्ये कनिष्ठादिक्रमेण तु।
करयोर्योजयित्वैव कनिष्ठामूलदेशतः॥
अङ्गुष्ठाग्रन्तु निःक्षिप्य महायोनिः प्रकीर्त्तिता॥

अथ रश्मिवृन्ददेवता यथा। कालिकोपनिषदि।

ओं काली कपालिनी कुल्ला कुरुकुल्ला विरोधिनी।
विप्रचित्ता उग्रा उग्रप्रभा दीप्ता नीला घना वलाका च।
मात्रा मुद्रामिता चैव दशपञ्चमकोणगा॥ इति।

आसां ध्यानम्। यथा कालीतन्त्रे

सर्वाः श्यामा असिकरा मुण्डमालाविभूषणाः।
तर्जनीं वामहस्तेन धारयन्त्यश्च संविताः॥

इति पूर्वादिपञ्चदशकोणे ध्यात्वा आवाहयेत्। तदञ्च फेत्कारिण्याम्।

ततः पूर्वादिकोणेषु वामावर्त्तेन विन्यसेत्।

ततः पूर्वास्थस्तद्दले ब्राह्मग्रादिकं ध्यात्वा आवाहयेत्। तद्यथा कुलसम्भवे।

महीमण्डलतश्चापि ब्राह्मी नारायणी तथा।
माहेश्वरी च चामुण्डा कौमारी चापराजिता।
वाराही च तथा पूज्या नारसिंही तथैव च॥

आसां ध्यानं यथा।

ब्रह्माणीं हंससंरूढ़ां स्वर्णवर्णां चतुर्भुजाम्।
चतुर्वक्त्रां त्रिनेत्राञ्च ब्रह्मकूर्चञ्च पङ्कजम्॥
दण्डपद्माक्षसूत्रञ्च दधतीं चारुहासिनीम्।
जटाजूटधरां देवीं भावयेत् साधकोत्तमः॥
नारायणीं महादीप्तां श्यामां गरुड़वाहिनीम्।
नानालङ्कारसंयुक्तां चारुकेशां चतुर्भुजाम्॥
घण्टां शङ्खं कपालञ्च चक्रं सन्दधतीं पराम्।
मधुमत्तमदोल्लोलदृष्टिं सर्वाङ्गसुन्दरीम्॥
माहेश्वरीं वृषारूढ़ां शुभ्रां त्रिनयनान्विताम्।
कपालं डमरुञ्चैव वरदाभयशूलकम्॥
टङ्कञ्च दधतीं देवीं नानाभरणभूषिताम्॥
चामुण्डामट्टहासां प्रकटितदशनां भीमवक्त्रां त्रिनेत्रां
नीलाम्भोजप्रभाभां प्रमुदितवपुषां नारमुण्डालिमालाम्।
खड्गं शूलं कपालं नरशिरघटितं खेटकं धारयन्तीं
प्रेतारूढ़ां प्रमत्तां मधुमदमुदितां भावयेच्चण्डरूपाम्॥
कौमारीं कुङ्कुमप्रभां त्रिनेत्रां शिखिसंस्थिताम्।
चतुर्भुजां शक्तिपाशमङ्कुशाभयधारिणीम्॥

नानालङ्कारसंयुक्तां प्रमत्तां परिचिन्तयेत् ॥
अपराजिताञ्च पीताभामक्षसूत्रवरप्रदाम् ।
कपालं मातुलाङ्गञ्च दधतीं परिचिन्तयेत् ॥
वाराहीं धूम्रवर्णाञ्च वराहवदनां शुभाम् ।
फलकखड्गमूषलहलवेदभुजैर्युताम् ।
नारसिंही नृसिंहस्य बिभ्रती सदृशं वपुः ॥

अत्र काम्या पूर्वा दिक् न त्वन्या विशेषवचनात् । यत्र रवेरुदयः किंवा पूज्यपूजकयोरन्तरा इति । आगमे सर्वदेवतपूजने पूज्यपूजकयोरन्तर एव पूर्वा दिक् । तदुक्तं राघवभट्टेन ।

यत्रैव भानुस्तु वियत्युदेति प्राचीति तां वेदविदो वदन्ति ।
अथान्तरा पूजकपूज्ययोश्च सदागमज्ञाः प्रवदन्ति तान्तु ॥
अन्यच्च । देवसाधकयोरन्तः पूर्वाशा दिगिहोच्यते ॥
अपिच । पूज्यपूजकयोरन्तः पूर्वाशैव निगद्यते ॥

तन्त्रान्तरेऽपि ।

होतुः पूर्वं पूर्वभागं प्रदिष्टं सव्यं भागं दक्षिणन्त्वागमज्ञैः ।
दक्षं विन्द्यादुत्तरं भागमग्रं प्रज्ञावद्भिः पश्चिमं भागमुक्तम् ॥

अग्रमिति संमुखमित्यर्थः ॥ यत्तु ।

पुरन्दरमुखो मन्त्री पूजयेत् त्रिपुरां यदि ।
देवीपश्चात्तदा प्राची प्रतीची त्रिपुरेश्वरः ॥

इति गुप्तार्णववचनम्, तत्त्रिपुराविषये बोद्धव्यम् । देवीमात्रविषयकल्पने अन्यथा भवेत् । अथ मूलमन्त्रान्ते । श्रीमहाकालसहितां श्रीदक्षिणकालिकां तर्पयामीति त्रिः सन्तर्प्य सायुधां सपरिवाराञ्च तर्पयेत् । ततोऽष्टादशोपचारैः षोड़शोपचारैर्दशोपचारैः पञ्चोपचारैर्वा देवीं पूजयेत् । तदुक्तं स्वतन्त्रे ।

आवाहयेत् प्रतिदले मूलदेवीञ्च तर्पयेत् ।

तर्पयेत् कालिकां देवीं सायुधां सपरीकराम् ।
पाद्यादिभिर्मूलदेवीं संपूज्य तर्पयेत् पुनः ॥

अथोपचारा यथा । तदुक्तं फेत्कारिण्याम् ।

आसनावाहने चार्घ्यं पाद्यमाचमनं तथा ॥
स्नानं वासोपवीतञ्च भूषणानि च सर्वशः ।
गन्धपुष्पं तथा धूपदीपावन्नञ्च तर्पणम् ॥
माल्यानुलेपनञ्चैव नमस्कारविसर्जने ।
अष्टादशोपचारैस्तु मन्त्री पूजां समाचरेत् ॥

मन्त्ररत्नावल्यान्तु ।

पाद्यार्घ्याचमनीयञ्च स्नानं वसनभूषणम् ।
गन्धपुष्पधूपदीपनैवेद्याचमनं ततः ॥
ताम्बूलमर्चना स्तोत्रं तर्पणञ्च नमस्क्रिया ।
प्रयोजयेदर्चनायामुपचारांस्तु षोड़श ॥

अन्यच्च । अर्घ्यं पाद्यं निवेद्याथ तथैवाचमनीयकम् ।
मधुपर्काचमनञ्चैव तथा गन्धप्रसूनके ॥
धूपदीपौ च नैवेद्यं दशोपचारकं स्मृतम् ।
गन्धादिका नैवेद्यान्ता पूजा पञ्चोपचारिका ॥

अथ पूजायां विधेयो यथा । कालीकल्पे ।

श्रीपदं पूर्वमुद्धृत्य पादुकापदमुद्धरेत् ।
पूजयामि ततः पश्चात् पूजयेदङ्गदेवताः ॥
काल्यादयः पूजनीयाः क्रमेण परमेश्वरि ! ।
स्वाहा होमे तर्पणे च तर्पयामीति संस्मरेत् ॥

देवीदक्षिणे महाकालं पूजयेत् यथा । कुमारीकल्पे ।

देव्यास्तु दक्षिणे भागे महाकालं समर्चयेत् ॥

कालीकल्पेऽपि ।

महाकालं यजेद् यत्नात् पश्चाद्देवीं प्रपूजयेत् ॥

अथ मन्त्रो यथा। ओं ह्रौं यां रां लां वां क्रौं महाकालभैरव! सर्वविघ्नान् नाशय नाशय ह्रीं श्रीं फट् स्वाहा अनेन पाद्यादिभिराराध्य विसर्पयित्वा मूलदेवीं पूजयेत्। तथा मूलान्ते च ततः पाद्यं महाकालसहित-श्रीदक्षिण-कालिकायै नम इति पादयोः पाद्यं दद्यात्। केषाञ्चिन्मते तु। महाकालसहितपदसम्वलितदेवीनामप्रयोगो न भवतीति साम्प्रदायिकाः। अथ अर्घ्यं शिरसि दद्यात्। एवम् आचमनीयं मधुपर्कञ्च। वमिति वरुणवीजान्ते मुखपङ्कजे दद्यात्। स्नानीयं नम इति स्नानीयं दत्त्वा शुद्धदुकूलेनाङ्गप्रोन्मार्ज्य विचित्रपट्टवस्त्रकस्तूरीकुङ्कुमचन्दनसिन्दूरकज्ज्वलमुकुटकुण्डलताड़ङ्कहारत्रयशङ्खकङ्कणाङ्गदग्रीवाभूषणकाञ्चीनूपुररत्नाङ्गुरीयकाद्याभरणानि विविधपद्मादिरचितमाल्यादीनि निवेद्य केवलं पुनराचमनीयं दद्यात्। तदुक्तम्।

पाद्यञ्च पादयोर्दद्यात् नाममन्त्रेण मन्त्रवित्।
शिरोमन्त्रेण देवेशि! अर्घ्यं दद्याच्छिरोपरि॥
आचमनं मधुपर्कञ्च स्वधामन्त्रेण देशिकः।
स्नानं गन्धं हृदा दद्यात् पुष्पाणि वौषड़ित्यपि॥
ततो निवेदयामीति दद्यात् सर्वं महेश्वरि!।

स्वधामन्त्रेण वरुणमन्त्रेण इत्यर्थः।

स्वधेत्याचमनीयञ्च त्रिवारं मुखपङ्कजे॥

तन्त्रान्तरे च।

नमः स्वाहा स्वधा चैव वौषड़िति यथाक्रमम्।

स्वाहा सन्निधिपाठाच्च आचमनीयं स्वधेति वकारमध्यपाठो युक्त एव भवति तन्न समीचीनम्। अत्रागमे प्रायः सङ्केतेनैव मन्त्रोद्धारः क्रियते एकमन्त्रोद्धारेऽपि कुत्रापि तत्तदक्षरेण कुत्रापि पर्यायशब्देनापि तत्तन्मन्त्रोद्धारो दृष्ट इति

उकारमध्यपाठो युक्तः न तु वकारमध्यः। अन्यथा राघवभट्ट-धृतवचनविरोधापत्तेः। तद्यथा।

मधुपर्कं मुखे दद्यात् जलमन्त्रेण देशिकः। किञ्च।

वारुणेन तु मन्त्रेण मधुपर्कं मुखाम्बुजे ॥ इति ॥

न च वाच्यं मधुपर्कविषयमेवेदं वचनमिति।

मधुपर्काचमनयोरेकमन्त्रेण दानात् सुधेति पाठो युक्तः एवेति निश्चितम्। ततो मध्यमानामिकाङ्गुष्ठे गन्ध' नम इति गन्धम् अङ्गुष्ठतर्जनीभ्यां पुष्पाणि वौषड़िति पुष्पैः संपूज्य साक्षतं स्वयम्भूकुसुमादिकञ्च वौषड़िति मन्त्रेण दत्त्वा धूप-पात्रं फड़िति संप्रोक्ष्य नम इति इष्ट्वा पुरतो निधाय वाम-तर्जन्या संस्पृशन् धूपं निवेदयामीति अोपात्राभ्तेन उत्सृज्य गजध्वनि मन्त्रमातः स्वाहेति घण्टां संपूज्य वामहस्तेन तां वादयन् मध्यमानामिकाङ्गुष्ठैर्धूपं दत्त्वा देवतागायत्रीं मूल-मन्त्रञ्च जप्त्वा त्रिधा उत्तोलनं कृत्वा देवीं धूपयेत्। अथ सम्मुखे दीपभाजनं संस्थाप्य पूर्ववत् प्रोक्षणपूजने कृत्वा वाममध्यमया दीपपात्रं स्पृशन् दीपं निवेदयामीति निवेद्य घण्टां पूर्ववत् वादयन् मध्यमानामिकामध्ये दीपपात्रमङ्गुष्ठाग्रेण धृत्वा दर्शं-येत्। ततो मधुद्रव्यं सम्मुखे कृत्वा ओं कालि! कालि! महा-कालि! क्रूं क्रूं अमृतमासवं विधिवत् कुरु कुरु स्वाहा इति मन्त्रेण सप्तधा अभिमन्त्र्य च ग्रासमुद्रया पात्रमादाय दक्षिण-पाणिना शुध्यादिकं गृहीत्वा कराभ्यां संयोज्य मूलमन्त्रान्ते शुद्धादिसहितमासवं निवेदयामीति दद्यात्। ततो नैवेद्यं स्वर्णादिपात्रे कृत्वा त्रिकोणमण्डलोपरि पुरतः संस्थाप्य हुमि-त्यवगुण्ठ्य यमिति वायुवीजेन संशोध्य रमिति वह्निवीजेन संदह्य वमिति वरुणवीजेन धेनुमुद्रया अमृतीकृत्य तदुपरि मूलं सप्तधा प्रजप्य वामाङ्गुष्ठेन नैवेद्यपात्रं स्पृशन् नैवेद्यं निवेदया-

मीति दक्षिणहस्तं तत्त्वमुद्रया उत्सृजेत्। ततो जलगण्डूषं दत्त्वा प्राणादिपञ्चमुद्रां दर्शयन् वामहस्ते ग्रासमुद्रां दर्शयेत्। ततः पुनराचमनीयं दत्त्वा कर्पूरादियुक्तताम्बूलं वामाङ्गुष्ठेन धृत्वा ताम्बूलं निवेदयामीति दद्यात्। सर्वमर्घ्यजलेन उत्सृजेत्। ततस्तत्त्वमुद्रया अर्घ्यामृतेन देवीं त्रिः संतर्प्य योनिमुद्रां दर्शयेत्। तदुक्तं तन्त्रान्तरे।

मध्यमानामिकाभ्यान्तु अङ्गुष्ठाग्रेण पार्वति!
दद्याच्च विमलं गन्धं मूलमन्त्रेण देशिकः॥
अङ्गुष्ठतर्जनीभ्यान्तु चक्रे पुष्पं निवेदयेत्।
यथा गन्धं तथा देवि! धूपं दद्याद्विचक्षणः॥
मध्यमानामिकाभ्यान्तु मध्यपर्वणि देशिकः।
अङ्गुष्ठाग्रेण देवेशि! धृत्वा दीपं निवेदयेत्॥
उत्तोलनं त्रिधा कृत्वा गायत्र्या मूलयोगतः।
तत्त्वाख्यमुद्रया देवि! नैवेद्यञ्च निवेदयेत्॥

मूलेन आचमनं ताम्बूलं तेन मुद्रया दद्यात्। सारदाटीकायाञ्च।

धूपभाजनमन्त्रेण प्रोक्ष्याभ्यर्च्य हृदात्मना।
मन्त्रेण पूजितां घण्टां वादयन् गुग्गुलुं दहेत्॥
अन्यत्रापि। गजध्वनि ततो मन्त्रमातःस्वाहेत्युदीर्य च।
अभ्यर्च्य वादयन् घण्टां सधूपैर्धूपयेत्ततः॥
तन्त्रान्तरे च। ततः समर्पयेत् धूपं घण्टावादनसंयुतम्।
एवं दीपदाने घण्टावादनमिति साम्प्रदायिकाः॥

अथ गन्धादिनिवेदनस्थानम्। यथा यामले।
निवेदयेत् पुरोभागे गन्धं पुष्पञ्च भूषणम्।
दीपं दक्षिणतो दद्यात् पुरतो न तु वामतः॥
वामतस्तु तथा धूपमग्रे वा न तु दक्षिणे।

नैवेद्यं दक्षिणे चापि पुरतो न तु पृष्ठतः॥

दीपमिति घृतयुक्तश्चेत् दक्षिणे तैलयुक्तश्चेद्वामे इति साम्प्रदायिकाः। एवं सिता वर्त्तिश्चेत् दक्षिणतः रक्ता चेद्वामतः संमुखे तु न नियमः। नैवेद्यमिति सिद्धान्नं चेत् देवतावामे आमान्नं चेद्दक्षिणे इत्यपि बोद्धव्यम्।

अथ पुष्पनियमो यथा। मुण्डमालायाम्।

पुष्पाण्यपि तथा दद्यात् रक्तकृष्णसितानि च।
श्वेतं रक्तं जवापुष्पं करवीरं तथा प्रिये!॥
टगरं मल्लिका जाती मालती यूथिका तथा।
धुस्तूराशोकवकुलं श्वेतकृष्णापराजिता॥
वकपुष्पं विल्वपत्रं चम्पकं नागकेशरम्।
मल्लिका झिण्टिका काञ्ची रक्तं यत् परिकीर्त्तितम्॥
अर्कपुष्पं जवापुष्पं वर्वरञ्च प्रियं भवेत्।
अष्टम्याञ्च विशेषेण तुष्टा भवति पार्वती॥
पद्मपुष्पेण रक्तेन सन्तुष्टाः सर्वदेवताः।
कृष्णं वा यदि वा रक्तं कालिका वरदा भवेत्॥
श्मशानधूस्तुरेणैव तुष्टा स्वप्नावती परा।
अन्यपुष्पैश्च विविधैः सन्तुष्टा देवि! पार्वती॥
आमलक्यास्तु पत्रेण तुष्टा भवति पार्वती।
अष्टम्याञ्च चतुर्दश्यां नानापुष्पैः समर्चयेत्॥
श्मशाने रात्रिशेषे वा शनिभौमदिने तथा।

मत्स्यसूक्ते। सुगन्धिश्वेतलोहितकुसुमैरर्चयेद्दलैः॥
विल्वैर्मरुवकाद्यैश्च तुलसीवर्जितैः शुभैः।
ओड्रपुष्पैर्विशेषेण वज्रपुष्पेण मिश्रितम्॥
सर्वं पुष्पं प्रदातव्यं भक्तियुक्तेन चेतसा।
देवानामित्युपलक्षणं देवीनामिति बोद्धव्यम्॥

तदुक्तं तन्त्रान्तरे ।

देवीपूजा सदा कार्य्या जलजैः स्थलजैरपि ।
विहितैर्वा निषिद्धैर्वा भक्तियुक्तेन चेतसा ॥
पूजनीया सदा भक्त्या नृणां शीघ्रफलाप्तये ॥

अथ पुष्पदानविधानम् यथा तदुक्तम्, सारदाटीकायाम् ।

पुष्पं वा यदि वा पत्रं फलं नेष्टमधोमुखम् ।
दुःखदं तत्समाख्यातं यथोत्पन्नं तथार्पणम् ॥
अधोमुखं फलं नेष्टं पुष्पाञ्जलिविधौ न तत् ।

अथ नैवेद्यं यथा । तदुक्तं मत्स्यसूक्ते ।

पायसं कृषरं दद्यात् शर्करागुड़संयुतम् ।
गव्यं मुखे मधुपयस्तथान्यानि निवेदयेत् ॥
शालमत्स्यञ्च पाठीनं गोधामांसमनुत्तमम् ।
अन्नञ्च मधुना युक्तं यत्नाद्दद्याच्च मन्त्रवित् ॥

कृषरं तिलतण्डुलमित्यर्थः । पाठीनं वोयालाख्यमत्स्यमित्यर्थः । अन्यत्रापि ।

कन्दुपक्वं स्नेहपक्वं घृतसंयुक्तपायसम् ।
मनःप्रियञ्च नैवेद्यं दद्याद्देव्यै पुनः पुनः ॥

कन्दुपक्वं भृष्टतण्डुलपृथुकादिकम् । स्नेहपक्वं लड्डुकादि । कुमारीकल्पेऽपि ।

ताम्बूलञ्च सकर्पूरं नारिकेलं सशर्करम् ।
पायसं सघृतञ्चैव आर्द्रकं सगुड़ं तथा ॥
सतण्डुलं तिलञ्चैव दधि चैव सशर्करम् ।
जम्बीरं पनसञ्चैव आम्रातकफलं तथा ॥
कदलीं तिन्तिड़ीञ्चैव श्रीफलं फलमुत्तमम् ।
करञ्जं वकुलञ्चैव तालं खर्जूरमेव च ॥
अन्यानि च सुगन्धीनि स्वादूनि च फलानि च ॥

मुण्डमालायामपि।

दधि क्षीरं गुड़ञ्चान्नं पायसं शर्करान्वितम्।
पायसं क्षौद्रमांसञ्च नारिकेलं समोदकम्॥
शशकं मेषकञ्चैव आर्द्रं कञ्च सशर्करम्।
शालमत्स्यञ्च पाठीनं शकुलं गड़कं तथा॥
मद्गुरं चेलिषं दद्यात् मांसं माहिषमेव च।
पक्षिमांसं वरारोहे! डिम्बं नानासमुद्भवम्॥
कृष्णाच्छागं महामांसं गोधिकां हरिणीं तथा।
जलजे मत्स्यमांसे च गण्डकीमांस मेव च॥
नानाव्यञ्जनदुग्धानि व्यञ्जनानि बहूनि च॥

नैवेद्यपात्रं यथा। यामले।

तैजसेषु च पात्रेषु सौवर्णे राजते तथा।
ताम्रे वा प्रस्तरे वापि पद्मपत्रेऽथवा पुनः॥
यज्ञदारुमये वापि नैवेद्यं कल्पयेत् बुधः।
सर्वाभावे तु माहेशि! स्वहस्तघटितं यदि॥
यद्योग्यमर्घ्यपात्रे तु तद्विधाय निवेदयेत्।
अन्यैस्तोयैर्यदुत्सृष्टमर्घ्यपात्रस्थितञ्च यत्॥
न गृह्णाति महादेवी दत्तं विधिशतैरपि।

अथ कृताञ्जलिः। श्रीदक्षिणकालिके! आवरणं ते पूजयामीति आज्ञां गृहीत्वा अग्नीशासुरवायव्यसंमुखे दिक्षु च देव्याः षड़ङ्गे वा षड़ङ्गदेवतां ध्यात्वा न्यासोक्तमन्त्रेण यजेत्। तदुक्तं कुलार्णवे। अग्नीशासुरवायव्यमध्यदिक्ष्वङ्गपूजनम्। इति। तन्त्रान्तरे च।

दृष्ट्वा हृदयमाग्नेय्यामैशान्यान्तु शिरो यजेत्।
नैर्ऋत्याञ्च शिखा पूज्या वायव्यां कवचं यजेत्॥
अभ्यर्च्य पुरतो नित्यं दिक्षु वास्त्रमथार्चयेत्।

अपिच । वक्त्रादिदिक्षु वा पूज्या तत्तदङ्गेषु च क्रमात् ॥

ध्यानं यथा ।

तुषारस्फटिकश्यामनीलकृष्णारुणार्चिषः ।
वरदाभयधारिण्यः प्रधानतनवस्त्रियः ॥

अथ गुरुपंक्तित्रयं पूजयेत् । तदुक्तं सारदाटीकायाम् ।

वायव्यादीशपर्यन्तं गुरुपंक्तिं समर्चयेत् ।
तदशक्तौ गुरुचतुष्टयं तदशक्तौ गुरुत्रयम् ॥

तद्दैवतऋषिमात्रं वा । अथ गुरुपंक्तिर्यथा । तदुक्तं भावचूड़ामणौ ।

भैरव उवाच ।

मातर्देवि ! महामाये । बन्धमोक्षप्रवर्त्तिनि ! ।
इदानीं श्रोतुमिच्छामि गुरुक्रममनुत्तमम् ॥

देव्युवाच ।

गुरुक्रमस्तु बहुधा मन्त्रविस्तारगौरवात् ।
कालीनामप्यनादित्वात् तत् कथं कथयामि ते ॥
न ज्ञात्वा गुरुकुलं ह्येव नष्टमार्गो भविष्यसि ।
नष्टमार्गो नात्र विद्ये न तादृक् फलगोचरम् ॥
गुरूणां शिष्यभूतानां नास्ति चेत् सन्ततिक्रमः ।
मन्त्रतन्त्राश्च विद्याश्च निष्फला नात्र संशयः ॥
विंशतिं पुरुषान् वापि नवसप्तत्रयोऽपि वा ।
अज्ञात्वा गुरुवंशानां शिष्यस्य नष्टसन्ततिः ॥
स्ववंशादधिकं ज्ञेयं गुरुवंशं महाशुभम् ।
जनकादधिको ज्ञेयो मन्त्रदश्च महेश्वर ! ॥
तस्मात् सर्वत्र देवेश ! संक्षेपात् शृण तान् गुरून् ।
आदौ सर्वत्र देवेश ! मन्त्रदः परमो गुरुः ॥

परापरगुरुस्त्वं हि परमेष्ठिरहं ततः ।
सर्वतन्त्रेषु विद्यासु स्वयं प्रकृतिरूपिणी ॥
ततः पुरुषरूपश्च ततः स्वगुरुसन्ततिः ।
तेनैव हि मदंशाश्च मन्त्राश्च विशेषतः ॥
शैवमन्त्रेषु पुरतः सर्वत्र सिद्धिदायकः ।
दिव्यौघा गुरवो देव ! सिद्धौघा गुरवस्तथा ॥
मानवौघाः समासेन कथयामि तवाग्रतः ।
तत्रादौ कालिका देवी तस्याः शृणु गुरुक्रमम् ॥
महादेवी महादेव स्त्रिपुरा चैव भैरवः ।
दिव्यौघाः गुरवः प्रोक्ताः सिद्धौघान् कथयामि ते ॥
ब्रह्मानन्दः पूर्णदेव श्चलच्चित्तश्च लोचनः ।
कुमारः क्रोधनश्चैव वरदः स्मरदीपनः ॥
माया मायावती चैव मानवौघान् शृणु प्रिये ! ॥
विमनः कुशलश्चैव भीमः शूरः सुधाकरः ।
मीनो गोरक्षकश्चैव भोजदेवः प्रजापतिः ॥
मूलदेवो रन्तिदेवो विघ्नेश्वरहुताशनौ ।
समरानन्दसन्तोषौ कालिकागुरवः स्मृताः ॥

अथ देवीं प्रति भैरववाक्यम् ।

तदुक्तं तन्त्रार्णवे ।

दिव्या वसन्ति ये नित्यं सिद्धभूमाविहापि च ॥
मानवौघा मानवेषु मम रूपधराः सदा ।
आनन्दनाथशब्दान्ता गुरवः सर्वसिद्धिदाः ॥
स्त्रियोऽपि गुरुरूपाश्च अम्बान्ताः परिकीर्त्तिताः ।
मानवौघान्तिके देवि ! स्वगुरुं परिपूजयेत् ॥

अथवा प्रातःकृत्येषु यन्नामान्यगुरुकुलमुक्तं तदेवार्च्चयेत् । तद्यथा भावचूड़ामणौ ।

अथवा सर्वशास्त्रेषु गुरवः पूर्वसूचिताः ।

कुलचूड़ामणौ च ।

एकचित्तमना भूत्वा शृणु वत्स ! समाहितः ।
येषु येषु च मन्त्रेषु ये ये ऋषिगणाः स्मृताः ॥
ते ते पूज्याः सपर्य्यादौ संक्षेपान्नदितं यया ।
अज्ञात्वा गुरुकुलं वा गुरुत्रितयमर्चयेत् ॥
चतुष्टयं वा सङ्कोचो न च कार्य्यस्ततःपरम् ।
गुरुः परमगुरुश्चैव परापरगुरुस्तथा ॥
परमेष्टि गुरुश्चैव कथिता गुरवस्तव ।
गुरुपूजां विना वत्स ! यदि पूजां समाचरेत् ॥
निष्फला मम सा पूजा ज्ञातव्या साधकोत्तमैः ।
निर्गुणं तत्तदेव स्यात् सगुणं कुलपूजनम् ॥
कुलावलोकनं चेत् स्यात् कुतः प्रोक्षणमार्जनम् ।
क्व च स्थानं क्व वा शुद्धिः क्व च न्यासविशोधनम् ॥
दीक्षाप्रभुः कुलीनः स्यात् कुलात्मा वटुकेश्वरः ।
स्वगेहे गुरुमानीय कुलरूपं गुरुं स्मरेत् ॥
गुरुक्रमश्च कथितं गोपनीयं प्रयत्नतः ॥
न देयं यत्र कुत्रापि योगभ्रष्टे च शिष्यके ।
वैष्णवे शक्तितन्त्रे वा गाणपत्येऽथवा पुनः ।
निजं गुरुं परं ध्यात्वा ततो गुरुचतुष्टयम् ॥
पूजयित्वा यजेद्देवं न च सङ्कोचमाचरेत् ॥

श्रीमहादेव्यम्बायाः श्रीपादुकां पूजयामि नमः इति संपूज्य गुरुपात्रास्तेन त्रिः सकृद्वा तर्पयेत्। एवं महादेवानन्दनाथ-गुरुपादुकां पूजयामि नम इति संपूज्य पूर्ववत् पूजयेत्। एवं क्रमेण गुरुपंक्तित्रयं संपूज्य मानवौघान्त-स्वगुरुं गुरोर्गुरुं तद्गुरुं च पूजयेत् तर्पयेच्च। ततो रश्मिवृन्ददेवताः पूजयेत्

यथा वाह्ये त्रिकोणस्य सम्मुखे ओं कालिकायाः श्रीपादुकां पूजयामि नमः। इति पाद्यादिभिः संपूज्य योगिनीपात्रामृतेन तत्त्वमुद्रया तर्पयेत्। एवं देव्या वामे ओं कपालिन्नीं दक्षे कुल्लां तदन्तस्त्रिकोणे ॐ कुरुकुल्लां ॐ विरोधिनीं ॐ विप्रचित्ताम्। तस्यान्तस्त्रिकोणे ॐ उग्रां ओं उग्रप्रभां ओं दीप्तां तदन्तस्त्रिकोणे ओं मात्रां ओं मुद्रां ओं मितां पाद्यादिना त्रिः संपूज्य पूर्ववत्तर्पयेत्। ततोऽष्टदलपद्मे पूर्वादिक्रमेणाष्टशक्तीः पूजयेत्। यथा ओं आं ब्रह्माण्याः श्रीपादुकां पूजयामि नम इति पाद्यादिभिः संपूज्य तर्पयेत्। अग्नौ ओं ईं नारायणीं दक्षिणे ओं ऊं माहेश्वरीं नैर्ऋत्यां ओं ॠं चामुण्डां वारुणे ओं ॡं कौमारीं वायौ ओं ऐं अपराजिताम् उत्तरे ओं औं वाराहीम् ईशे अं अः नारसिंहीं पूर्ववत् संपूज्य तर्पयेच्च। तदुक्तं श्रुतौ द्वितीयचतुःषष्ठ्यष्टादशद्वादशचतुर्दशषोड़शस्वरभेदेन प्रथममेव प्रणवेन आवाहनञ्च तेनैव पूजनं विदुः। कुमारीकल्पेऽपि।

ब्रह्माद्याः पूजयेत् पत्रे पत्राग्रे भैरवान् यजेत्।
लोकपालांस्तथा वाह्ये तदस्त्राणि च तद्बहिः॥

अथ भैरवाः। यथा ज्ञानार्णवे।

असिताङ्गो रुरुश्चण्डः क्रोधश्चोन्मत्तभैरवः।
कपाली भीषणश्चैव संहारश्चाष्टमः स्मृतः॥

एषां मन्त्रो यथा।

ह्रस्वार्णा विन्दुसंयुक्ता वाङ्मायापूर्वभूषिता। इति।

अत्र प्रयोगः। पूर्वादिवामावर्त्तेन ऐं ह्रीं अं असिताङ्गभैरव-श्रीपादुकां पूजयामि नमः ऐं ह्रीं इं रुरुभैरव ऐं ह्रीं उं चण्डभैरव ऐं ह्रीं ऋं क्रोधभैरव ऐं ह्रीं ऌं उन्मत्तभैरव ऐं ह्रीं एं कपालिभैरव ऐं ह्रीं ओं भीषणभैरव ऐं ह्रीं षं

संहारभैरव पूजयेत्तर्पयेच्च। ततो भूपूरे इन्द्रादिलोकपालान् यथा पूर्वादितः नां इन्द्र-श्रीपादुकां एवं वां वह्नि यां यम चां निऋर्ति वां वरुण यां वायु शां कुवेर हां ईशाननिऋर्तिवरुणयोर्मध्ये क्रौं अनन्त इन्द्रेशानयोर्मध्ये आं ब्रह्मणः श्रीपादुकामित्यादि। तद्वहिः तदस्त्राणि पूजयेत्तर्पयेच्च। तथा वं वज्र-श्रीपादुकाम्। एवं शं शक्ति। दं दण्ड। खं खड्ग। पां पाश। अं अङ्कुश। गं गदा। शूं शूल। पं पद्म। चं चक्र श्रीपादुकामित्यादि। अथैवं क्रमेण सर्वावृतिदेवतानुलेपनगन्धपुष्पधूपदीपद्रव्यादिभिः संपूज्य त्रिः सकृद्वा पूजयेत् तर्पयेच्च। तदुक्तं कुलार्णवे।

त्रिवारं तर्पयेद्वापि सकृद्वापि यथेच्छया।

कालीतन्त्रे। सर्वासामपि दातव्या वलिपूजा तथैव च॥

अनुलेपनकं गन्धं धूपदीपौ च पालकम्।

त्रिस्त्रिः पूजा प्रकर्त्तव्या सर्वासामपि साधकैः॥

अतएव सर्वासां वलीनां शक्तीनां पूजने त्रिवारमवश्यमेव दर्शयेत्। ततो देव्या अस्त्रं पूजयेद् यथा। देवीवामोर्द्ध्वहस्ते खं खड्गम् अधो मुं मुण्डं दक्षोर्द्ध्वं अं अभयम् अधोवं वरं पूजयेत्तर्पयेच्च। ततः षड़ङ्गं विन्यस्य पूर्ववद्देवीं ध्यात्वा गन्धपुष्पाक्षतकुसुमधूपदीपं दत्त्वा पूर्ववद्घण्टां वादयन् धूपं दीपं दर्शयेत्। ततः पानीयादिद्रव्यं दत्त्वा पूर्ववन्नैवेद्यादिकं निवेद्य त्रिस्तर्पयेत्। योन्यादिमुद्रां दर्शयेत्। ततः पुष्पाञ्जलित्रयेण पञ्चभिर्वा देवीं सायुधसपरिवारमहाकालसहितश्रीपादुकां पूजयामि नम इति संपूज्य त्रिस्तर्पयेदिति। कालीतन्त्रेऽपि।

एवं पूजां पुरा कृत्वा मूलेनैव यथाविधि।

नैवेद्यादीन् यथाशक्त्या दद्याद्देव्यै पुनः पुनः॥

ततो वै दशवारन्तु दीपं दत्त्वा च साधकः।

पुष्पादिकं पुनर्दद्यान्मूलेनैव यथाविधि ॥

कुमारीकल्पेऽपि ।

ततो नीराजनं कुर्य्यात् दशवारं प्रदीपकैः ।

अस्यार्थः आरात्रिकविधिना दीपान् प्रज्वाल्य देवतामस्तकान्तं नीत्वा परिभ्राम्य नीराजनं कुर्य्यादित्थं दशधा। आरात्रिकविधानन्तु श्रीतत्त्वचिन्तामणावनुसन्धेयम् । अथ पञ्चमाद्यैर्देवीं परितोषयेत् । तदुक्तम् ।

पूजयेच्च महादेवीं सुरामांसभक्तादिभिः ।
अन्नैर्नानाविधैश्चापि तोषयेत् साधकोत्तमः ॥

अथ मुण्डमालातन्त्रे । सुरादानप्रशंसा ।

सुरादानेन देवेशि ! महायोगीश्वरो भवेत् ।
सुरा तु त्रिविधा देवि ! स्फाटिकी डाकिनी तथा ॥
काञ्जिकी स्फाटिकीदाने धनवृद्धिरनुत्तमा ।
डाकिनीदानमात्रेण वैश्यः सर्वो भवेत् ध्रुवम् ॥
काञ्जिकीसुरया देवि ! योऽर्चयेत् परमेश्वरीम् ।
गुटिकाञ्जनसम्भारिमारणोच्चाटनादिभिः ॥
महासिद्धीश्वरो भूत्वा वसेत् कल्पायुतं दिवि ।
अर्घ्ये दत्ते महेशानि ! महासिद्धिरनुत्तमा ॥

अथोत्तरे त्रिकोणमालिख्य मांसतिलरक्तपुष्पभक्तानि एकीकृत्य तत्र संस्थाप्य ऐं क्रीं श्रीं दक्षिणायै कालिकायै स्वाहा एष वलिर्नम इति उत्सृज्य नैऋत्यां धारयेत् । तदुक्तम् ।

पूजान्ते भोजनादौ वा वलिं दद्याच्च साधकः । इति ।
वलिमुत्थाप्य नैवेद्यं नैऋत्यां दिशि धारयेत् ॥

ततः प्राणायामादिकं कृत्वा कामकलां विभाव्य शिरसि गुरुं ध्यात्वा हृदि देवीं भावयन् मनसा अष्टोत्तरसहस्रं रहस्य-

मालया वर्णमालया करमालया वा प्रजप्य पुनः प्राणायामं विधाय अर्घ्यजलं पुष्पादिकं गृहीत्वा ।

गुह्यातिगुह्यगोप्त्री त्वं गृहाणास्मत्कृतं जपम् ।
सिद्धिर्भवतु मे देवि ! त्वत्प्रसादात् सुरेश्वरि ! ॥

इत्यनेन तेजोमयं जपफलं देव्या दक्षहस्ते समर्पयेत् । तदुक्तं कालीतन्त्रे ।

ततः सावहितो मन्त्री गुरुं नत्वा शिरःस्थितम् ।
देवीं ध्यात्वा चाष्टोत्तरसहस्रं प्रजपेन्मनुम् ॥
तेजोमयं जपफलं देव्या हस्ते समर्पयेत् ।
गुह्यातिगुह्यगोप्त्री त्वमिति मन्त्रेण मन्त्रवित् ॥

अथ रहस्यमाला यथा । तदुक्तं कालीतन्त्रे ।

दन्ताक्षमालया देवि ! राजदन्तेन मेरुणा ।

प्रजपेदित्यर्थः । तस्य द्वादशपटलेऽपि ।

दन्तेन कालिकायास्तु पूर्वोक्ता भुवि दुर्लभा ।

इति । मुण्डमालायाञ्च ।

नाड़ीभिर्ग्रथिता माला महासिद्धिप्रदा भवेत् ।

तत्रैव सर्वशाक्तैः ।

नवाङ्गुल्यास्थिमाला च ग्रथिता पर्वभेदतः ।
सर्वसिद्धिप्रदा मोक्षदायिनी वरवर्णिनि ! ॥
नाड़ीसंग्रथनं कार्य्यं रक्तेन वाससा तथा ।
सदा गोप्या प्रयत्नेन मातुश्च जारवत् प्रिये ! ॥

अथ वर्णमाला यथा । विशुद्धेश्वरमहातन्त्रे ।

मालाविधानं परमं शृणु पार्वति ! तत्त्वतः ।
येनानुष्ठितमात्रेण मन्त्राः सिध्यन्ति तत्क्षणात् ॥
अनुलोमविलोमेन मन्त्रं जप्त्वा विधानतः ।
मन्त्रेणान्तरितं वर्णं वर्णेनान्तरितं मनुम् ॥

कुर्य्याद्वर्णमयीं मालां सर्वमन्त्रप्रदीपनीम्।
चरमार्णं मेरुरूपं लङ्घयेन्न कदाचन॥
रहस्यमेतत् परमं मयोक्तं ते यशस्विनि!।
त्वया गुप्ततरं कार्य्यं नाख्येयं यस्य कस्यचित्॥

मतान्तरमुक्तं यामले यथा।

सविन्दुवर्णमुच्चार्य्य पश्चात् मन्त्रं जपेत् सुधीः।
क्षमेरुकं जल्पयित्वा जपेत्तन्नातिलङ्घयेत्॥
अनुलोमविलोमस्थक्लृप्तया वर्णमालया।
जपेन्मेरुं समाश्रित्य लङ्घनं तस्य नाचरेत्॥
अष्टोत्तरजपादादौ वर्गाष्टकं प्रयोजयेत्।

अकचटतपयश इत्ययं चाष्टवर्गः। मुण्डमालायाञ्च।

मेरुहीना या माला मेरुलङ्घा च या भवेत्।
अशुद्धातिप्रकाशाच्च सा माला निष्फला भवेत्॥

अथ करमाला यथा। तदुक्तम्। बृहत्श्रीक्रमे।

तर्जन्यग्रे तथा मध्ये यो जपेत् स तु पापकृत्।
अनायामास्त्रयं पर्व तर्जनीमूलपर्वणि॥

जपेदित्यर्थः। मुण्डमालायाञ्च।

अत्राङ्गुलिजपं कुर्य्यात् साङ्गुष्ठाङ्गुलिभिर्जपेत्।
अङ्गुष्ठेन विना कर्म कृतं तदफलं भवेत्॥
आरभ्यानामिकामध्यात् प्रादक्षिण्यक्रमेण तु।
तर्जनीमूलपर्य्यन्तं करमाला विधीयते॥
मेरुं प्रदक्षिणीकुर्वन् अनामामूलपर्वतः।
मेरुलङ्घनदोषात्तु अन्यथा जायते फलम्॥
मध्यमाक्षितया ग्राह्या अनामामूलमेव च।
अनामामध्यपर्वाच्च मेरुं कृत्वा न लङ्घयेत्॥
तर्जन्यग्रे तथा मध्ये यो जपेत्तु भ्रमान्नरः।

चत्वारि तस्य नश्यन्ति आयुर्विद्यायशो बलम् ॥

हंसपारमेश्वरेऽपि ।

पर्वद्वयमनामायाः परिवर्त्तेन वै क्रमात् ।
पर्वत्रयं मध्यमायास्तर्जन्येकं समाहरेत् ॥
शक्तिमाला समाख्याता सर्वतन्त्रप्रदीपिका ।
नित्यं जपं करे कुर्य्यात् न तु काम्यं कदाचन ॥

-मुण्डमालातन्त्रे च ।

जपं नित्यं करे कुर्य्यात् न तु काम्यप्रबोधनात् ।

अयं क्रमो निशायां करणीयः ।

बलिपूजादिकं सर्वं निशायां क्रियते यदि ।
तत्तदक्षयतां याति कालीविद्याप्रसादतः ॥

कुलचूड़ामणौ च ।

रात्रौ पर्य्यटनं कुर्य्याद् रात्रौ शक्तिप्रपूजनम् ।
न करोति कथं देवीसाधकः कौलिको भवेत् ॥

तदुक्तं कालिकापुराणे ।

छागन्तु वामतो दद्यान्महिषं वितरेत् पुनः ।
दक्षिणे वामतो दद्याद् अग्रतो देहशोणितम् ॥
नाभेरधस्ताद्रुधिरं पृष्ठभागस्य वा प्रिये ! ।
स्वगात्ररुधिरं दद्यान्न कदाचित्तु साधकः ॥
नोष्ठस्य चिवुकस्यापि नेन्द्रियाणां तथैव च ।
कण्ठाधो नाभितश्चोर्द्ध्वं हृद्भागस्य प्रयत्नतः ॥
पार्श्वयोश्चापि रुधिरं दुर्गायै विनिवेदयेत् ।
न च रोगादिकादङ्गान्नान्यघाताच्च भैरव ! ॥
सौवर्णे राजते पात्रे कांस्याधारे च मानवः ।
निधाय देव्यै दद्यात्तु तदुक्तं मन्त्रपूर्वकम् ॥
यद्यद् हृदयसंजातं मांसं रक्तापिधानतः ।

तिलमुद्गप्रमाणं वा देव्यै दद्यात्तु भक्तितः॥
षण्मासाभ्यन्तरे भक्तः काममिष्टमवाप्नुयात्।

कुमारीकल्पेऽपि।

नराश्छागा स्तथा मेषा महिषाः शशकास्तथा।
एतेषाञ्चैव रक्तानि देयानि परमेश्वरि!॥

मुण्डमालायाञ्च।

ईषद्रक्तं घृतेनाक्तं निशायां दिवसेऽपि वा।
बलिं दद्याद्विशेषेण कृष्णपक्षे शुभे दिने॥
छागे दत्ते भवेद्वाग्मी मत्स्ये दत्ते कवि र्ध्रुवम्।
महिषे धनवृद्धिः स्यान्मृगे भोगफलं लभेत्॥
खगे दत्ते समृद्धिः स्याद् गोधिकायां महाफलम्॥
नरे दत्ते समृद्धिः स्यादिष्टसिद्धिरनुत्तमा।
ललाटहस्तहृदयशिरोभ्रूमध्यदेशतः॥
स्वदेहरुधिरे दत्ते रुद्रदेह इवापरः।
चाण्डालबलिदानेन महासिद्धिः प्रजायते॥

ईषद्रक्तमिति मत्स्यमांसविशेषणं तत्प्रकरणस्थलिखितवचनात्। नरबलिस्तु न विप्रेण विधेयः। तदुक्तं यामले।

राजा नरबलिं दद्यान्नान्योऽपि परमेश्वरि!।

तत्रापि न तु विप्रेण। ततो वक्ष्यमाणमन्त्रेण देवीं स्तुत्वा प्रदक्षिणत्रयं विधायाष्टप्रणामं कुर्य्यात् तदुक्तं कालीतन्त्रे।

ततो वै शिरसि पुष्पं दत्त्वाष्टाङ्गं प्रणम्य च।

अथ प्रदक्षिणं यथा।

प्रसार्य्य दक्षिणं हस्तं स्वयं नम्रशिराः पुनः।
दक्षिणं दर्शयन् पार्श्वं मनसापि च दक्षिणः॥
त्रिधा च वेष्टयेत् सम्यक् कालिकायाः प्रदक्षिणम्।

सर्वान् कामानवाप्नोति पश्चान्मोक्षमवाप्नुयात् ॥

अष्टाङ्गप्रणामो यथा ।

दोर्भ्यां पद्भ्याञ्च पाणिभ्यामुरसा शिरसा दृशा ।
मनसा वचसा चेति प्रणामोऽष्टाङ्ग ईरितः ॥

अशक्तौ प्रणामः यथा ।

बाहुभ्याञ्च सजानुभ्यां शिरसा वचसा धिया ।
पञ्चाङ्गकः प्रणामः स्यादुदितः परिकीर्त्तितः ॥

ततः सामयिकैः सह पानादिकं कुर्य्यात् । यथा चक्राकारेण पंक्त्याकारेण वा भिन्नासने साधकैः सह शक्तिभिश्च युग्मायुग्मक्रमेण पद्मासनेनोपविश्य सामयिकललाटे चन्दनाक्षतं दत्त्वा शिवशक्तिबुद्धया पुष्पं दद्यात् । ततो यदि गुरुस्तिष्ठति तत्रादौ गन्धचन्दनपुष्पादिना तं प्रपूज्य तत् पात्रं तस्मै दत्त्वा प्रणमेत् । गुरोरभावे तत् पात्रं जले क्षिपेत् । ततः पात्रं शुद्धिसहितं शक्त्यै दत्त्वा सामयिकेभ्योऽपि ज्येष्ठानुक्रमेण वीरपात्रात् परामृतं शुद्धिसहितं दद्यात् । ततः सामयिकोऽपि भक्त्या हस्ताभ्यां गृहीत्वा मूलमन्त्रं तदुपरि अष्टधा जप्त्वा पूर्ववत् आनन्दभैरवानन्दभैरव्यौ सन्तर्प्य गुरुं देवताञ्च तर्पयेत् । ततस्तु शुद्धिं कुर्य्यात् । ततश्चक्रनायकस्तैः सह पात्रवन्दनञ्चरेत् ।

ओमङ्गैरवशेखरप्रविलसच्चन्द्रामृतप्लावितं
क्षेत्राधीश्वरयोगिनीजनगणैः सिद्धैः समाराधितम् ।
आनन्दार्णवकं महात्मकमिदं यन्नविश्वखण्डामृतं
वन्दे श्रीप्रथमं कराम्बुजगतं पात्रं विशुद्धिप्रदम् ॥

इति अभिवन्द्य वामहस्तेन पात्रमुत्तोल्य वन्दनं कृत्वा गृह्णामीति गुरुशक्तिसाधकाज्ञां गृह्णीयात् । ते च जुषस्व इति ब्रूयुः । ततो मूलाधारात् कुण्डलिनीमिष्टदेवतास्वरूपां विभाव्य गुरुपादुकां स्मृत्वा शिवोऽहमिति विचिन्त्य हस्ताभ्यां पात्रं

गृहीत्वा मूलमन्त्रमुच्चरन् कुण्डलिनीमुखे देवतां तर्पयेत्।
तदुक्तम् उदयाकरपद्धत्याम्।

ज्ञात्वा मन्त्रतनुं स्मरेद् गुरुपदं देवीकलां चिन्मयीं
पश्चात् पात्रवरं परामृतयुतं दीपैयुतं प्रोज्ज्वलैः।
पुष्पादिष्वभिमन्त्रितं च नियतं सम्मोहकञ्चासवं
ये संचिन्त्य पिबन्ति यान्ति खलु ते भुक्तिञ्च मुक्तिं पराम्॥

तन्त्रान्तरे च।

सिन्दूरतिलकं भाले पाणौ च मदिरारसम्।
ज्ञात्वा परगुरुं ध्यायेत् तथा देवीञ्च चिन्मयीम्॥ इति।

ततः पात्रमाधारोपरि संस्थाप्य पूर्ववत् पात्रं गृहीत्वा पात्रवन्दनं कुर्य्यात्।

हैमं मीनरसावहं दयितया दत्तञ्च पेयादिभिः
किञ्चिच्चञ्चलरक्तपङ्कजदृशा तस्यै समावेदितम्।
वामे स्वादुविशुद्धिशुद्धिकरणं पाणौ विधायात्मके
वन्दे पात्रमहं द्वितीयमधुनानन्दैकसंवर्द्धनम्॥

इत्यादिना पुनस्तेन च क्रमेण परामृतं गृहीत्वा पात्रवन्दनं यथा।

सर्वाम्नायकलाकलापकलितं कौतूहलद्योतनं
चन्द्रोपेन्द्रमहेन्द्रशम्भुवरुणब्रह्मादिभिः सेवितम्।
ध्यातं देवगणैः परं मुनिगणैर्मोक्षार्थिभिः सर्वदा
वन्दे पात्रमहं तृतीयमधुना स्वात्मावबोधक्षमम्॥

इति तृतीयपात्रम्।

मद्यं मीनरसावहं हरिहरब्रह्मादिभिः पूजितं
मुद्रामैथुनधर्मकर्मनिरतं चारात्रतिक्ताश्रयम्।
आचार्य्याष्टकसिन्धुभैरवकलामांसेन संशोधितं

पायात् पञ्चमकारतत्त्वसहितं पात्रं चतुर्थं नमः ॥

इति चतुर्थपात्रम् ।

आधारे भुजगाधिराजवलये पात्रं महीमण्डलं
मद्यं सप्तसमुद्रवारिपिषितं चाष्टौ च दिग्दन्तिनः ।
सोऽहं भैरवमर्चयन् प्रतिदिनं तारागणैरन्वितैः
आदित्यप्रमुखैः सुरासुरगणै रत्नाकरैः किन्नरैः ॥

इति पञ्चमपात्रम् ।

ततो यावन्न चलते दृष्टिर्यावन्न चलते मनः ।
तावत् पानं प्रकुर्वीत पशुपानमतःपरम् ॥

अथ अस्य प्रमाणं यथा । तदुक्तं रुद्रयामले ।

साधकेभ्यश्च शाक्तेभ्यो दद्यान्निर्माल्यचन्दनम् ।
सामयिकः समं कुर्य्यात् देवि ! पानादिभक्षणम् ॥

अन्यत्रापि । निवसेच्चक्ररूपेण पङ्क्त्याकारेण वा यथा ।
शक्तियुक्तो वसेद्वापि युग्मायुग्मविधानतः ॥
शिवशक्तिधिया सर्वं चक्रमध्ये समर्चयेत् ॥

तन्त्रान्तरे च । ततः पुष्पं समादाय गुरोः पात्रे निवेदयेत् ।
गुरवे च निवेद्याथ भूत्यै दत्त्वा स्वयं हरेत् ॥

भावचूड़ामणौ च ।

साक्षाद्यदि गुरुर्न स्यात्तदा तोये विसर्जयेत् ।

अत्र पात्रपरिमाणं यथा । तदुक्तं कुलसारे ।

नयनाग्निवाणसंख्यकर्षैस्तु परमेश्वरि ! ।
हेतुपात्रं प्रकर्त्तव्यमित्युक्तं कुलशासने ॥
इतोऽप्यधिकपात्रन्तु न कर्त्तव्यं हि साधकैः ॥

कर्षं लौकिकमित्यर्थः । तदुक्तं कुलोड्डीशे ।

गुञ्जा द्वादशमासः स्यात् तदष्टौ कर्षमुच्यते ॥

अथ उत्तरतन्त्रे।

अनुज्ञां पुरतो लब्ध्वा गृह्णामीति स्वयं वदेत्।
जुषस्वेत्यभ्यनुज्ञातो गुरुणा वा कुलीनकैः॥
गृह्णीयाच्च स्वयं सिद्धो वज्रपद्मासनः सुधीः॥

कुलार्णवे च। एकासननिविष्टा ये भुञ्जीरन्नैकभाजने।
नैकपात्रे पिबेयुश्च ते यान्ति नरकाधमे॥

एकपात्र इति सर्वैर्मिलित्वा एकपात्रेण पिबेत् न तु वारं वारं द्रव्यपाने भिन्नं भिन्नं पात्रं कुर्य्यात्। अनुष्ठानापत्तेः। न कुर्य्यात् पात्रशङ्करमिति वचनविरोधात्। सम्प्रदायविरोधाच्च।

विना मद्येन या पूजा विना मांसेन तर्पणम्।
विना शक्त्या च यत् पानं तत् सर्वं निष्फलं भवेत्॥
स्वशक्तिं वीरशक्तिं वा दीक्षितां गुरुपूजनीम्।
पाययित्वा पिबेद्द्रव्यमिति शास्त्रस्य निर्णयः॥
न पद्मां च स्पृशेत् पात्रं न विन्दुं पातयेदधः।
नैकहस्तेन दातव्यं न मुद्रावर्जितं पुनः॥
नार्चयेदेकहस्तेन न पिबेदेकपाणिना।
अन्योन्यवन्दनं कृत्वा पिबेत्तदमृतं पुनः॥
सव्येनोद्धृत्य पात्रन्तु मुद्रां कृत्वापसव्यतः।
विना सङ्गेन योगेन न कुर्य्याद्द्रव्यसङ्गतिम्॥
साधारं नोद्धरेत् पात्रमाधारे च विनिक्षिपेत्।
पात्रं न चालयेत् स्थानात् न कुर्य्यात् पात्रशङ्करम्॥
सशब्दं न पिबेद्द्रव्यं तथैव तं न पूरयेत्।
न स्थूलं नैव सूक्ष्मञ्च पात्रं कुर्य्यात् मनोरमम्॥
उच्छिष्टं न स्पृशेच्चक्रे कुलद्रव्याणि सुन्दरि!।
वह्निः प्रक्षाल्य च करौ कुलद्रव्याणि दापयेत्॥

निष्ठीवनमधोवायुं चक्रमध्ये विवर्जयेत् ।
चक्रमध्ये घटे भग्ने पात्रे च पतिते भुवि ॥
दीपनाशे च शान्त्यर्थं श्रीचक्रं कारयेत् सुधीः ।
स्वपात्रस्थितहेतुञ्च न दद्याद्भैरवाय च ॥
दत्ते च सिद्धिहानिः स्यात् क्रुद्धा भवति योगिनी ।
परीहासं प्रलापञ्च वितण्डां बहुभाषणम् ॥
औदासीन्यं भयं क्रोधं चक्रमध्ये विवर्जयेत् ।
नान्योन्यं ताड़येत् पात्रं न पात्रमानयेदधः ॥
गुरुशक्तिसुतानाञ्च गुरुज्येष्ठकनिष्ठयोः ।
उच्छिष्टं भक्षयेत् स्त्रीणां नान्योन्योच्छिष्टमर्पयेत् ॥
चक्रमध्ये च नियमं नान्यथा पतनं भवेत् ।
कनिष्ठानां स्वशिष्याणां दद्याच्चोच्छिष्टमेव हि ॥
दद्यात् स्नेहेन योऽन्येभ्योः स भवेदापदां पदम् ।
अन्यत्रापि । शक्त्युच्छिष्टं पिबेद्द्रव्यं वीरोच्छिष्टञ्च चर्वणम् ।
पीत्वा पीत्वा पुनः पीत्वा पुनः पतति भूतले ॥
उत्थाय च पुनः पीत्वा पुनर्जन्म न विद्यते ।

ततः शान्तिस्तोत्रं पठेत् । तदुक्तं डामरे ।

पीत्वा पेयं जनैः सार्द्धं शान्तिस्तोत्रं ततः पठेत् ।
नश्यन्तु प्रेतकुष्माण्डाः नश्यन्तु दूषका नराः ॥
साधकानां शिवाः सन्तु आम्नायपरिपालिनाम् ।
जयन्ति मातरः सर्वाः जयन्ति योगिनीगणाः ॥
जयन्ति सिद्धिडाकिन्यो जयन्ति गुरुपङ्क्तयः ।
जयन्ति साधकाः सर्वे विशुद्धाः कौलिकाश्च ये ॥
समयाचारसम्पन्ना जयन्ति पूजका नराः ।
नन्दन्ति चाणिमासिद्धा नन्दन्ति कुलपालकाः ॥
इत्याद्या देवताः सन्तु तृप्यन्तु वास्तुदेवताः ।

चन्द्रसूर्य्यादयो देवास्तृप्यन्तु मम भक्तितः ॥
नक्षत्राणि ग्रहा योगाः करणा राशयश्च ये।
सर्वे ते सुखिनो यान्तु सर्वा नद्यश्च पक्षिणः ॥
पशव स्तुरगाश्चैव पर्वताः कन्दरायुताः।
ऋषयो ब्राह्मणाः सर्वे शान्तिं कुर्वन्तु सर्वदा ॥
शुभा मे विदिताः सन्तु मित्रास्तिष्ठन्तु पूजकाः।
ये ये पापधियः स्वभूषणरताः स्वनिन्दकाः पूजने
दैवाचारविमत्तनष्टहृदया भ्रष्टाश्च ये साधकाः।
दृष्ट्वा च क्रमपूर्वमन्दहृदया ये कौलिका दूषका
स्ते ते यान्तु विनाशमत्र समये श्रीभैरवस्याज्ञया ॥
ये द्वेष्टारः साधकानां सदैवाम्नायदूषकाः।
डाकिनीनां मुखे यान्तु तृप्तास्तत्पिशितैस्तु ताः ॥
पशवो नाशमायान्तु मम निन्दाकराश्च ये।
द्वेष्टारः साधकानाञ्च ते नश्यन्तु शिवाज्ञया ॥

ततो यथाविधिना शिवशक्तिसमायोगं कृत्वा देवीपादेषु आत्मानं समर्प्य श्रीपात्रमुत्तोल्य देव्या उपरि त्रिधा भ्रामयित्वा मूलमुच्चरन् श्रीदक्षिणकालिके पराङ्मुखार्घ्यं स्वाहा इति अर्घ्यं दत्त्वा तदुपरि पुनः संस्थाप्य संहारमुद्रया देवीं स्वहृदि समानीय श्रीदक्षिणकालिके पूजितासि क्षमस्वेति विसृज्य ऐशान्यां मण्डलिकां कृत्वा निर्माल्येन निर्माल्यवासिन्यै नमः इति मण्डले त्रिः संपूजयेत्। तदुक्तं कुमारीकल्पे।

देवताग्रे तु संभोगि देवताप्रीणनं भवेत्।
संभोगन्तु परं कृत्वा देवीं हृदि समानयेत् ॥
कृतकृत्यो भवेन्मन्त्री नात्र कार्य्या विचारणा ॥

अथ आत्मसमर्पणमन्त्रो यथा। इतः पूर्वं प्राणबुद्धिदेह-धर्माधिकारतो जाग्रत्स्वप्नसुषुप्त्यवस्थया स्वकायेन मनसा वाचा

कर्मणा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना यत् स्मृतं यदुक्तं यत् कृतं तत्सर्वं ब्रह्मार्पणं भवतु स्वाहा। मदीयञ्च सकलं श्रीदक्षिण-कालिकाचरणे समर्पितमस्तु। ओँ तत् सत्।

अथ कालीतन्त्रे च।

विसृज्य परया भक्त्या सन्निधापनमुद्रया।
उद्वास्य हृदये देवीं तन्मयो भवति ध्रुवम्॥
पुरश्चरणकालेऽपि पूजा चैषा प्रकीर्त्तिता।

भैरवतन्त्रेऽपि।

स्वहृदये च वह्निर्देवीं समर्प्य विधिवत् पुनः।
निर्माल्यं वै शुचौ देशे नैवेद्यं भक्षयेत्ततः॥

ततः श्रीपात्रामृतं स्वपात्रे कृत्वा स्वीकृत्य भूमौ पात्रं न्युब्जीकृत्य तदुपरि पुष्पं निक्षिप्य पात्रप्रक्षालनं कृत्वा गोपयेत्। तदुक्तम् तन्त्रान्तरे।

अर्घ्यादिवन्दनमाचर्य्य अर्घ्यामृतं पिबेत्ततः।
न्युब्जीकृत्य स्वयं पात्रं तत्र पुष्पं विनिक्षिपेत्।
प्रक्षाल्य गोपयेत् पात्रं तत्त्वचिन्तापरो बुधः॥

ततस्तदमृतस्निग्धभूमौ मायाबीजं विलिख्य कनिष्ठाङ्गुलिना तिलकं कुर्य्यादनेन।

यं यं स्पृशति पादेन यं यं पश्यति चक्षुषा।
स एव दासतां याति यदि शक्रसमो भवेत्॥

ततो यन्त्रलेपं मूर्ध्नि कृत्वा नैवेद्यं सर्वदेवाय साधकाय च दत्त्वा शेषं स्वीकृत्य सोऽहमिति भावयेत्। बाह्यतो वैष्णवाचारपरायणो निःशङ्को यथासुखं विहरेत्। तदुक्तं कुलचूड़ामणौ।

ब्रह्मरन्ध्रे गुप्तस्थाने यन्त्र लेपन्तु धारयेत्।
नास्तिकेभ्यो न पशुभ्यो न मूर्खेभ्यो न वा द्विजे॥

कुलीनाय च दातव्यं अथवा जलमध्यतः।
ततः सोऽहमिति ध्यात्वा वैष्णवाचारतत्परः॥
हरिनाम्ना जातभावो भावाखिलविचेष्टितः।
चौरवद्विचरेदेकः सदा सङ्गविवर्जितः॥

यामलेऽपि। नैवेद्यं त्रिपुरादेव्या वाञ्छन्ति विबुधाः सदा।
तस्माद्देयं सुरश्रेष्ठ! ब्राह्मणे वैष्णवेऽपि च॥
मह्यं शुक्राय सूर्य्याय गणेशाय यमाय च।
वह्नये वरुणायापि वायवे धनदाय च॥
ईशानाय महेशानि! साधकाय प्रदापयेत्॥

अत्र त्रिपुरापदमुपलक्षणमिति।

अथ देवीविसर्जनानन्तरं पानादिकं कुर्य्यात्। तदुक्तं कुलार्णवे।

दिव्यं देव्यग्रतः पानं वीरमेकान्तवासिनम्।

अन्यत्रापि। पानन्तु त्रिविधं प्रोक्तं दिव्यवीरपशुक्रमैः॥
दिव्यं देव्यग्रतो ध्यायेद् वीरं वीरासनस्थितम्।
तृतीयन्तु पशोः पानं पापकृत् शोककमोहकृत्॥

उदयाकरपद्धत्याम्।

असंस्कृतं वृथा पानं संस्कृतं भैरवः स्वयम्।
चक्रपूजाविधौ प्रोक्तं सर्वसिद्धिकरं शुभम्॥
असंस्कृतं पशोः पानं कलहोद्वेगकारकम्।
संस्कृतं सिद्धिजनकं प्रायश्चित्तादिदूषणम्॥
मन्त्राणां स्फुरणं तेन महापातकनाशनम्।
आयुःश्रीकान्तिसौभाग्यं भवेत् संस्कृतपानतः।
नष्टैश्वर्य्यं खेचरत्वं पतनं विधिवर्जनात्॥

इति श्यामारहस्ये सपर्य्यापर्य्यायस्तृतीयः परिच्छेदः।

अथ चतुर्थः परिच्छेदः ।

अथ स्तुतिः । यामले ।

कर्पूरं मध्यमान्त्यस्वरपरिरहितं सेन्दुवामाक्षियुक्तं
बीजं ते मातरेतत्त्रिपुरहरवधु ! त्रिः कृतं ये जपन्ति ।
तेषां गद्यानि पद्यानि च मुखकुहरादुल्लसन्त्येव वाचः
स्वच्छन्दं ध्वान्तधाराधररुचिरुचिरे सर्वसिद्धिं गतानाम् ॥१॥
ईशानं सेन्दुवामश्रवणपरिगतं बीजमन्यत् महेशि !
द्वन्द्वं ते मन्दचेता यदि जपति जनो वारमेकं कदाचित् ।
जित्वा वाचामधीशं धनदमपि चिरं मोहयन्नम्बुजाक्षी-
वृन्दं चन्द्रार्द्धचूड़े ! प्रभवति हि महाघोरबालावतंसे ! ॥२॥
ईशो वैश्वानरस्थः शशधरविलसद्वामनेत्रेण युक्तं
बीजं ते द्वन्द्वमन्यद्विगलितचिकुरे ! कालिके ! ये जपन्ति ।
द्वेष्टारं घ्नन्ति ते च त्रिभुवनमपि ते वश्यभावं नयन्ति
सृक्कद्वन्द्वास्रधाराप्रकटितवदने दक्षिणे ! कालिके ! ऽति ॥३॥
ऊर्द्धं वामे कृपाणं करकमलतले छिन्नमुण्डं तथाधः
सव्ये चाभीर्वरञ्च त्रिजगदघहरे ! दक्षिणे कालिके च ।
जप्त्वैतन्नामवर्णं तव मनुविभवं भावयन्त्येतत् अम्ब !
तेषामष्टौ करस्थाः प्रकटितवदने सिद्धयस्त्र्यम्बकस्य ॥ ४ ॥
वर्गाद्यं वह्नियुक्तं विधुरतिकलितं तत्त्रयं कूर्चयुग्मं
लज्जायुग्मञ्च पश्चात् स्मितमुखि ! तदधष्ठद्वयं योजयित्वा ।
मातर्ये ये जपन्ति स्मरहरमहिले ! भावयन्तः स्वरूपं
ते लक्ष्मीलास्यलीलाकमलदलदृशः कामरूपा भवन्ति ॥५॥
प्रत्येकं वा त्रयं वा द्वयमपि च परं बीजमत्यन्तगुह्यं
त्वन्नाम्ना योजयित्वा सकलमपि सदा भावयन्तो जपन्ति ।

तेषां नेत्रारविन्दे विहरति कमला वक्त्रशुभ्रांशुबिम्बे
वाग्देवी छिन्नमुण्डस्रगतिशयलसत्कण्ठ पीनस्तनाढ्ये ॥६॥
गतासूनां बाहुप्रकरकृतकाञ्चीपरिलस-
न्नितम्बां दिग्वस्त्रां त्रिभुवनविधात्रीं त्रिनयनाम्।
श्मशानस्थे तल्पे शवहृदि महाकालसुरत-
प्रसक्तां त्वां ध्यायन् जननि ! जड़चेता अपि कविः ॥ ७ ॥
शिवाभिर्घोराभिः शवनिवहमुण्डास्थिनिकरैः
परं संकीर्णायां प्रकटितचितायां हरवधूम्।
प्रविष्टां सन्तुष्टामुपरि सुरते नातियुवतीं
सदा त्वां ध्यायन्ति क्वचिदपि न तेषां परिभवः ॥ ८ ॥
वदामस्ते किंवा जननि ! वयमुच्चैर्जड़धियो
न धाता नापीशो हरिरपि न ते वेत्ति परमम्।
तथापि त्वद्भक्तिर्मुखरयति चास्माकमपि ते
तदेतत् क्षन्तव्यं न खलु पशुरोधः समुचितः ॥ ९ ॥
समन्तादापीनस्तनजघनधृग्यौवनवती-
रतासक्तो नक्तं यदि जपति भक्तस्तव मनुम्।
विवासास्त्वां ध्यायन् गलितचिकुरस्तस्य वशगाः
समस्ताः सिद्धौघाः भुवि चिरतरं जीवति कविः ॥ १० ॥
समाः सुस्थीभूतां जपति विपरीतां यदि सदा
विचिन्त्य त्वां ध्यायन्नतिशयमहाकालसुरताम्।
तदा तस्य क्षोणीतलविहरमाणस्य विदुषः
कराम्भोजे वश्याः स्मरहरवधु ! महासिद्धिनिवहाः ॥ ११ ॥
प्रसूते संसारं जननि ! जगतीं पालयति च
समस्तं क्षित्यादि प्रलयसमये संहरति च।
अतस्त्वं धातापि त्रिभुवनपतिः श्रीपतिरपि
महेशोऽपि प्रायः सकलमपि किं स्तौमि भवतीम् ॥ १२ ॥

अनेके सेवन्ते भवदधिकगीर्वाणनिवहान्
विमूढास्ते मातः ! किमपि न हि जानन्ति परमम् ।
समाराध्यामाद्यां हरिहरविरिञ्चयादिविबुधैः
प्रपन्नोऽस्मि स्वैरं रतिरसमहानन्दनिरताम् ॥ १३ ॥
धरित्रीकीलालं शुचिरपि समीरोऽपि गगनं
त्वमेका कल्याणी गिरिशरमणी कालि ! सकला ।
स्तुतिः का ते मातस्तव करुणया मामगतिकं
प्रसन्ना त्वं भूयाः भवमनु न भूयान्मम जनुः ॥ १४ ॥
श्मशानस्थः सुस्थो गलितचिकुरो दिक्पटधरः
सहस्रं त्वर्काणां निजगलितवीर्य्येण कुसुमम् ।
जपंस्तत् प्रत्येकं मनुमपि तव ध्याननिरतो
महाकालि ! स्वैरं स भवति धरित्रीपरिवृढः ॥ १५ ॥
गृहे सम्मार्जन्या परिगलितबीजं हि कुसुमं
समभ्याङ्के नित्यं विरचयति चितायां कुजदिने ।
समुच्चार्य्य प्रेम्णा मनुमपि सकृत् कालि ! सततं
गजारूढो याति क्षितिपरिवृढः सत्कविवरः ॥ १६ ॥
स्वपुष्पैराकीर्णं कुसुमधनुषो मन्दिरमहो
पुरो ध्यायन् ध्यायन् यदि जपति मातस्तव मनुम् ।
स गन्धर्वश्रेणीपतिरिव कवित्वामृतनदी-
नदीनः पर्य्यन्ते परमदलीनः प्रभवति ॥ १७ ॥
त्रिपञ्चारे पीठे शवशिवहृदि स्मेरवदनां
महाकालेनोच्चैर्मदनरसलावण्यनिरताम् ।
समासक्तो नक्तं स्वयमपि रतानन्दनिरतो
नरो यो ध्यायेत् त्वां भवजननि ! स स्यात् स्मरहरः ॥ १८ ॥
स लोमास्थि स्वैरं पललमपि मार्जारमपि ते
परं चौष्ट्रं मैषं नरमहिषयोश्छागमपि वा ।

बलिं ते पूजायां मयि विरलवक्ते वितरतां
सतां सिद्धिः सर्वा प्रतिपदमपूर्वा प्रभवति ॥ १९ ॥
वशीमन्त्वं लक्षं प्रजपति हविष्याशनरतो
दिवा मातर्युष्मच्चरणयुगलध्याननिरतः ।
परं नक्तं नग्नो निधुवनविनोदेन च मनुं
जपेल्लक्षं स स्यात् स्मरहरसदृक्षः क्षितितले ॥ २० ॥
इदं स्तोत्रं मातस्तव मनुसमुद्धारणजनुः
स्वरूपाख्यं पादाम्बुजयुगलपूजाविधियुतम् ।
निशार्द्धं वा पूजासमयमधि वा यस्तु पठति
प्रलापस्तस्यापि प्रसरति कवित्वामृतरसः ॥ २१ ॥
कुरङ्गाक्षीवृन्दं तमनुसरति प्रेमतरलं
वशस्तस्य क्षोणीपतिरपि कुवेरप्रतिनिधिः ।
रिपुः कारागारं कलयति च तं केलिकलया
चिरं जीवन्मुक्तः प्रभवति स भक्तः प्रतिजनुः ॥ २२ ॥

इति महाकालविरचितं स्वरूपाख्यं स्तोत्रं सम्पूर्णम् ।

अथोत्तरतन्त्रे कवचं लिख्यते ।

कैलासशिखरारूढं भैरवं चन्द्रशेखरम् ।
वक्षःस्थले समासीना भैरवी परिपृच्छति ॥
भैरव्युवाच । देवेश ! परमेशान ! लोकानुग्रहकारक ! ।
कवचं सूचितं पूर्वं किमर्थं न प्रकाशितम् ॥
यदि मे महती प्रीतिस्तवास्ति कुलभैरव ! ।
कवचं कालिकादेव्याः कथयस्वानुकम्पया ॥

श्रीभैरव उवाच ।

अप्रकाश्यमिदं देवि ! नरलोके विशेषतः ।

लक्षवारं वारितासि स्त्रीस्वभावाद्धि पृच्छसि ॥

देव्युवाच। सेवका बहवो नाथ ! कुलधर्मपरायणाः ।

यतस्ते त्यक्तजीवा सा शवोपरि चितोपरि ॥

तेषां प्रयोगसिद्ध्यर्थं स्वरक्षार्थं विशेषतः ।

पृच्छामि बहुशो देव ! कथयस्व दयानिधे ! ॥

भैरव उवाच।

कथयामि शृणु प्राज्ञे ! कालिकाकवचं परम् ।

गोपनीयं पशोरग्रे स्वयोनिमपरे यथा ॥

सर्वविद्यामहाराज्ञि ! सर्वदेवनमस्कृते ! ॥

कालिकाकवचस्य भैरव ऋषिरुष्णिक्छन्दः अद्वैतरूपिणी श्रीदक्षिणकालिका देवता क्रीं बीजं हुं शक्तिः क्रीं कीलकं सर्वार्थसाधनपुरःसरमन्त्रसिद्धौ विनियोगः।

सहस्रारे महापद्मे कर्पूरधवलो गुरुः ॥

वामोरुस्थिततच्छक्तिः सदा सर्वत्र रक्षतु ।

परमेशः पुरः पातु परापरगुरुस्तथा ॥

परमेष्ठी गुरुः पातु दिव्यसिद्धिश्च मानवः।

महादेवो सदा पातु महादेवः सदावतु ॥

त्रिपुरो भैरवः पातु दिव्यरूपधरः सदा।

ब्रह्मानन्दः सदा पातु पूर्णदेवः सदावतु ।

चलच्चित्तः सदा पातु चेलाञ्चलश्च पातु माम् ॥

कुमारः क्रोधनश्चैव वरदः स्मरदीपनः ।

माया मायावती चैव सिद्धौघाः पान्तु सर्वदा ॥

विमलः कुशलश्चैव भीमसेनः सुधाकरः ।

मीनो गोरक्षकश्चैव भोजदेवः प्रजापतिः ॥

कुलदेवो रन्तिदेवो विघ्नेश्वरहुताशनः ।

सन्तोषः समयानन्दः पातु मां मानवाः सदा ॥

सर्वेऽप्यानन्दनाथान्ताः अम्बान्ता मातरः क्रमात्।
गणनाथः सदा पातु भैरवः पातु मां सदा॥
वटुकी नः सदा पातु दुर्गा मां परिरक्षतु।
शिरसः पादपर्य्यन्तं पातु मां घोरदक्षिणा॥
तथा शिरसि मां काली हृदि मूले च रक्षतु।
संपूर्णविद्यया देवी सदा सर्वत्र रक्षतु॥
क्रीं क्रीं क्रीं वदने पातु हृदि हुं हुं सदावतु।
ह्रीं ह्रीं पातु सदाधारे दक्षिणे कालिके हृदि।
क्रीं क्रीं क्रीं पातु मे पूर्वे हुं हुं दक्षे सदावतु॥
ह्रीं ह्रीं मां पश्चिमे पातु हुं हुं पातु सदोत्तरे॥
पृष्ठे पातु सदा स्वाहा मूला सर्वत्र रक्षतु।
षड़ङ्गे युवती पातु षड़ङ्गेषु सदैव माम्॥
मन्त्रराजः सदा पातु ऊर्द्धाधो दिग्विदिक्स्थितः।
चक्रराजे स्थिताश्चापि देवताः परिपान्तु माम्॥
उग्रा उग्रप्रभा दीप्ता पातु पूर्वे त्रिकोणके।
नीला घना वलाका च तथापरत्रिकोणके॥
मात्रा मुद्रामिता चैव तथा मध्यत्रिकोणके।
काली कपालिनी कुल्ला कुरुकुल्ला विरोधिनी॥
वह्निः षट्कोणके पान्तु विप्रचित्ता तथा प्रिये!।
सर्वाः श्यामाः खड्गधरा वामहस्ते न तर्जनाः॥
ब्राह्मी पूर्वदले पातु नारायणी तथाग्निके।
माहेश्वरी दक्षदले चामुण्डा राक्षसेऽवतु॥
कौमारी पश्चिमे पातु वायव्ये चापराजिता।
वाराही चोत्तरे पातु नारसिंही शिवेऽवतु॥
ऐं ह्रीं असिताङ्गः पूर्वे भैरवः परिरक्षतु।
ऐं ह्रीं रुरुश्चाग्निकोणे ऐं ह्रीं चण्डस्तु दक्षिणे॥

ऐं क्लीं क्रोधो नैर्ऋतेऽव्यात् ऐं क्लीं उन्मत्तकस्तथा ।
पश्चिमे ऐं ह्रीं मां कपालो वायुकोणके ॥
ऐं ह्रीं भीषणाख्यश्च उत्तरेऽवतु भैरवः ।
ऐं ह्रीं संहार ऐशान्यां मातृणामङ्गगाः शिवाः ॥
ऐं हेतुको वटुकः पूर्वदले पातु सदैव माम् ।
ऐं त्रिपुरान्तको वटुक आग्नेय्यां सर्वदाऽवतु ॥
ऐं वह्निवेतालो वटुको दक्षिणे मां सदाऽवतु ।
ऐं अग्निजिह्ववटुकोऽव्यात् नैर्ऋत्यां पश्चिमे तथा ॥
ऐं कालवटुकः पातु ऐं करालवटुकस्तथा ।
वायव्यां ऐं एकः पातु उत्तरे वटुकोऽवतु ॥
ऐं भीमवटुकः पातु ऐशान्यां दिशि मां सदा ।
ऐं ह्रीं ह्रीं हुं फट् स्वाहान्तास्चतुःषष्टिमातरः ॥
ऊर्द्ध्वाधो दक्षवामाग्रे पृष्ठदेशे तु पातु माम् ।
ऐं हुं सिंहव्याघ्रमुखी पूर्वे मां परिरक्षतु ॥
ऐं कां कीं सर्पमुखी अग्निकोणे सदाऽवतु ।
ऐं मां मां मृगमेषमुखी दक्षिणे मां सदाऽवतु ॥
ऐं चौं चौं गजराजमुखी नैर्ऋत्यां मां सदाऽवतु ।
ऐं मे मे विड़ालमुखी पश्चिमे पातु मां सदा ॥
ऐं खौं खौं क्रोष्टुमुखी वायुकोणे सदाऽवतु ।
ऐं हां हां ह्रस्वदीर्घमुखी लम्बोदरमहोदरी ॥
पातु मामुत्तरे कोणे ऐं ह्रीं ह्रीं शिवकोणके ।
ह्रस्वजङ्घतालजङ्घप्रलम्बौष्ठी सदाऽवतु ॥
एताः श्मशानवासिन्यो भीषणा विकृताननाः ।
पातु मां सर्वदा देव्यः साधकाभीष्टपूरिकाः ॥
इन्द्रो मां पूर्वतो रक्षेदाग्नेय्यामग्निदेवता ।
दक्षे यमः सदा पातु नैर्ऋत्यां नैर्ऋतिश्च माम् ॥

वरुणोऽवतु मां पश्चात् वायुर्मां वायवेऽवतु ।
कुवेरश्चोत्तरे पायात् ऐशान्यान्तु सदाशिवः ॥
उर्द्ध ब्रह्मा सदा पातु अधश्चानन्तदेवता ।
पूर्वादिदिक्स्थिताः पान्तु वज्राद्याश्चायुधाश्च माम् ॥
कालिकाऽवतु शिरसि हृदये कालिकाऽवतु ।
आधारे कालिका पातु पादयोः कालिकाऽवतु ॥
दिक्षु मां कालिका पातु विदिक्षु कालिकाऽवतु ।
ऊर्द्ध मे कालिका पातु अधश्च कालिकाऽवतु ॥
चर्मासृङ्मांसमेदोऽस्थिमज्जाशुक्राणि मेऽवतु ।
इन्द्रियाणि मनश्चैव देहं सिद्धिञ्च मेऽवतु ॥
आकेशात् पादपर्य्यन्तं कालिका मे सदाऽवतु ।
वियति कालिका पातु पथि मां कालिकाऽवतु ॥
शयने कालिका पातु सर्वकार्य्येषु कालिका ।
पुत्त्रान् मे कालिका पातु धनं मे पातु कालिका ॥
यत्र मे संशयाविष्टास्ता नश्यन्तु शिवाज्ञया ।
इतीदं कवचं देवि ! ब्रह्मलोकेऽपि दुर्लभम् ॥
तव प्रीत्या मया ख्यातं गोपनीयं स्वयोनिवत् ।
तव नाम्नि स्मृते देवि ! सर्वयज्ञफलं लभेत् ॥
सर्वपापः क्षयं याति वाञ्छा सर्वत्र सिध्यति ।
नाम्नः शतगुणं स्तोत्रं ध्यानं तस्मात् शताधिकम् ॥
तस्मात् शताधिको मन्त्रः कवचं तच्छताधिकम् ।
शुचिः समाहितो भूत्वा भक्तिश्रद्धासमन्वितः ॥
संस्थाप्य वामभागे तु शक्तिं स्वामिपरायणाम् ।
रक्तवस्त्रपरीधानां शिवमन्त्रधरां शुभाम् ॥
या शक्तिः सा महादेवी हररूपश्च साधकः ।
अन्योऽन्यचिन्तनाद्देवि ! देवत्वमुपजायते ॥

शक्तियुक्तो यजेद्देवीं चक्रे वा मनसापि वा ।
भोगैश्च मधुपर्काद्यैस्ताम्बूलैश्च सुवासितैः ॥
ततस्तु कवचं दिव्यं पठेदेकमनाः प्रिये ! ।
तस्य सर्वार्थसिद्धिः स्यान्नात्र कार्य्या विचारणा ॥
इदं रहस्यं परमं परं स्वस्त्ययनं महत् ।
यः सकृत्तु पठेद्देवि ! शृणुयाद्वा समाहितः ॥
स सर्वान् लभते कामान् परे देवीपुरं व्रजेत् ।
सकृद्‌यस्तु पठेद्देवि ! कवचं देवदुर्लभम् ॥
सर्वयज्ञफलं तस्य भवेदेव न संशयः ।
संग्रामे च जयेत् शत्रून् मातङ्गानिव केशरी ॥
नास्त्राणि तस्य शस्त्राणि शरीरे प्रभवन्ति च ।
तस्य व्याधिः कदाचित् न दुःखं नास्ति कदाचन ॥
गतिस्तस्यैव सर्वत्र वायुतुल्यः सदा भवेत् ।
दीर्घायुः कामभोगीशो गुरुभक्तः सदा भवेत् ॥
अहो कवचमाहात्म्यं पठमानस्य नित्यशः ।
विनापि नययोगेन योगीशसमतां व्रजेत् ॥
भूर्जत्वचि समालिख्य चक्रं तन्त्रविनिर्मितम् ।
मध्यत्रिकोणे संलिख्य साध्यसाधकयोर्लिपिम् ॥
उद्धरेन्मूलमन्त्रञ्च मातृकार्णेन वेष्टयेत् ।
लघुमिश्रेण चन्द्रेण चन्दनाभ्यां सुरेश्वरि ! ॥
एतन्मन्त्रं महेशानि ! सुरासुरसुदुर्लभम् ।
गोरोचनाकुङ्कुमाभ्यां तद्बाह्ये कवचं लिखेत् ॥
श्वेतसूत्रेण संवेष्ट्य लाक्षया परिमण्डयेत् ।
पञ्चामृतैः पञ्चगव्यैः स्नापयित्वा शुभेऽहनि ॥
संपूज्य देवतारूपं गुटिकां सर्वकामदाम् ।
प्राणप्रतिष्ठामन्त्रेण प्राणं तत्र नियोजयेत् ॥

अन्तर्योनिं ततो ध्यात्वा तत्र संस्थापयेत् बुधः।
एषा तु गुटिका देवि! कण्ठलग्नाऽखिलप्रदा॥
शीर्षे वश्यकरी देवि! नाभौ स्तम्भनकारिणी।
बद्धा वामभुजे ह्येषा वैरिपक्षक्षयङ्करी॥
जठरे रोगदमनी पुत्त्रदा हृदि संस्थिता।
विद्याकरी ललाटस्था शिखायान्तु यशःप्रदा॥
सर्वकामप्रदा देवी सर्वरोगक्षयङ्करी।
दक्षिणे बाहुमूले वै यदि तिष्ठति सर्वदा॥
तदा सर्वार्थसिद्धिः स्याद् यद्यन्ममनसि वर्त्तते।
त्वग्रहात्तु कवचस्यास्य पठनाद्धारणात् प्रिये!॥
सर्वान् कामानवाप्नोति तव स्नेहात् प्रकाशितम्।
गुरोः पादप्रसादेन सद्विद्या यदि लभ्यते॥
तथैव कवचं देवि। ना जप्त्वा गुरुपादुकाम्।
तत्फलं नाशमाप्नोति परे नरकमाप्नुयात्॥
सत्यं सत्यं पुनः सत्यं सत्यं सत्यं पुनः पुनः।
न शक्नोमि प्रभावन्तु कवचस्यास्य वर्णितुम्॥
यस्मै कस्मै न दातव्यं कवचञ्च सुदुर्लभम्।
न देयं परशिष्येभ्यः कृपणेभ्यः सुरेश्वरि!॥
शिष्याय भक्तियुक्ताय सेवकाय तथैव च।
गुरुभक्तिविहीनाय परदाररताय च॥
निन्दकाय कुलीनाय दाम्भिकाय च सुन्दरि!।
यो ददाति निषिद्धेभ्यः कवचं मम्मुखात् श्रुतम्॥
तस्य नश्यन्ति देवेशि! आयुःकीर्त्तियशःश्रियः।
न हिंसन्ति सदा देवि! योगिन्यो मातृमण्डलात्॥
परे नरकमाप्नोति जन्मकोटिशतानि च।
देयं शिष्याय शान्ताय गुरुभक्तिपराय च॥

सर्वलक्षणयुक्ताय तत्तन्मन्त्रयुताय च ॥

इत्युत्तरतन्त्रे कालीप्रस्तावे कालीभैरवसंवादे
श्रीमद्दक्षिणकालिकाकवचं सम्पूर्णम् ।

विरूपाक्ष उवाच ।

नमामि गुरुमक्षोभ्यं मन्त्रशक्तिसमन्वितम् ।
प्रसन्नं ज्ञानमज्ञानं हेतुं बुद्धिप्रकाशकम् ॥
गजेन्द्रवदनं नौमि रक्तं विघ्नविदारकम् ।
पाशाङ्कुशवराभीतिलसद्भुजचतुष्टयम् ॥
भैरवः सर्वदा पातु ऋषिर्मे शिरसोपरि ।
मुखे छन्दः सदा पातु त्रिष्टुप् च विजयात्मकम् ॥
गुणत्रयमयी शक्तिः परशक्तिस्तु ईड़िता ।
ब्रह्मस्वरूपिणी पातु हृदये मम कालिका ॥
वीजस्वरूपिणी पातु क्रीङ्कारी शक्तिरूपिणी ।
हूं शक्तिः सर्वदा पातु सर्वरक्षास्वरूपिणी ॥
महाकालः सदा पातु महाभीमपराक्रमः ।
ददातु मम कामानि सर्वसिद्धीश्वरो यतः ॥
आदि लृवर्णपर्य्यन्ताः हृदये मम मातृकाः ।
एवान्ते ङादि चान्ताश्च रक्षन्तु बाहुयुग्मके ॥
नभोमध्यगता वर्णा मादिक्षान्तास्तथैव च ।
सविन्दवः सदा पान्तु जङ्घयोरुभयोर्मम ॥
भूतप्रेतपिशाचाद्या विघ्नदेहास्तथा पुनः ।
पृथग्भावाः समध्याश्च वर्णा रक्षन्तु मां सदा ॥
समस्तरोमकूपेषु मर्मस्थानेषु सन्धिषु ।
नाड़ीधातुविकारेषु रक्षन्तु मम मातृकाः ॥
शक्तिराधाररूपा या सा पातु परमेश्वरी ।
श्रवर्णः सर्वदा पातु सर्वदेवमयः स्वयम् ॥

फणागताऽवनिः पातु समुद्रः पातु मां सदा ।
रत्नद्वीपः सदा पातु रक्षन्तु कल्पपादपाः ॥
श्मशानपीठकः पातु पातु मां मानवेदिका ।
सदाशिवमहाप्रेतशवो मां परिरक्षतु ॥
द्वारदेशे द्वारपाला योगिन्यः पान्तु मां सदा ।
सिद्धयोऽष्टौ सदा पान्तु पूर्वादिवसुदिग्गताः ॥
कालीं कपालिनीं कुल्लां कुरुकुल्लां तथैव च ।
विरोधिनीं विप्रचित्तां नमामि सर्वसिद्धये ॥
एतास्तु वंशयोगिन्यो वह्निः षट्कोणके स्थिताः ।
रक्षन्तु मां सदा देव्यो मातरो भक्तवत्सलाः ॥
उग्रामुग्रप्रभां दीप्तां नमाम्यात्मविभूतये ।
सर्वसिद्धिं प्रयच्छन्तु पान्तु मां पुत्रवत् सदा ॥
नीलां घनां वलाकाञ्च प्रणमामि समुत्सुकः ।
सर्वविघ्नान् समुत्सार्य्य रक्षन्तु कलुषार्णवात् ॥
मात्रामुद्रामितानाञ्च नमामि चरणाम्बुजम् ।
देवीप्रेमसखीनाञ्च शरणं यामि सिद्धये ॥
एताः पञ्चदशे कोणे एकैका वरदा सदा ।
तर्जनीं वामहस्तेन खड्गं दक्षिणपाणिना ॥
मुण्डमालाधराः शीर्षे नीलाञ्जनचयोपमाः ।
शत्रुभ्यः सिद्धिदाश्चण्डाः पान्तु मां कालिकाप्रियाः ॥
वह्निःपद्मदलान्ते तु ब्रह्माण्याद्यष्टशक्तयः ।
रक्षन्तु मे प्रयच्छन्तु सर्वसिद्धिं दयान्विताम् ॥
ब्रह्माणी पातु मां पूर्वे सर्वाः शिववरप्रदाः ।
वह्नौ नारायणी पातु सर्वकामार्थसिद्धिदा ॥
माहेशी दक्षिणे पातु सर्वमङ्गलकारिणी ।
चामुण्डा नैरृते पातु सर्वशत्रुप्रमर्दिनी ॥

कौमारी पश्चिमे पातु शक्तिहस्ता विसूदिनी ।
अपराजिता च वायव्यां पातु मां जयदा शुभा ॥
उत्तरे पातु वाराही वरदा घोररूपिणी ।
नारसिंही सदा पातु ऐशान्यां भयनाशिनी ॥
एतास्तु वरविद्यायाः शक्तयश्चाष्टदेवताः ।
ब्रह्मविष्णुशिवादीनां तेजोभिन्नकलेवरा ॥
सूर्य्येन्दुवह्निपीठे तु वैन्दवे परमेश्वरी ।
नमामि दक्षिणामूर्त्तिं कालिकां परभैरवीम् ॥
भिन्नाञ्जनचयप्रख्यां प्रवीनशवसंस्थिताम् ।
गलच्छोणितधाराभिः स्मेराननसरोरुहाम् ॥
पीनोन्नतकुचद्वन्द्वां पीनवक्षोनितम्बिनीम् ।
दक्षिणे मुक्तकेशां च दिगम्बरविनोदिनीम् ॥
महाकालसमाविष्टां स्मेरानन्दोपरि स्थिताम् ।
सुखसान्द्रस्मितामोदमोदिनीं मदविह्वलाम् ॥
आरक्तसुखसान्द्रादिनेत्रालीभिर्विराजिताम् ।
शवद्वयकृतोत्तंसां सिन्दूरतिलकोज्ज्वलाम् ॥
पञ्चाशन्मूर्त्तिघटितमालां शोणितलोहिताम् ।
नानामणिविशोभाढ्यां नानालङ्कारशोभिताम् ॥
शवास्थिकृतकेयूरशङ्खकङ्कणमण्डिताम् ।
शववक्षःसमारूढां लेलिहानां शवं क्वचित् ॥
शवमांसकृतग्रासां साट्टहासां मुहुर्मुहुः ।
खड्गमुण्डधरां वामे सव्येऽभयवरप्रदाम् ॥
दन्तुराञ्च महारौद्रीं चण्डनादातिभीषणाम् ।
शिवाभिर्घोररावाभिर्वेष्टितां भयनाशिनीम् ॥
माभैर्माभैः स्वभक्तेषु जल्पन्तीं घोरनिस्वने ।
यूयं किमिच्छथ ब्रूथ ददामीति प्रभाषिणीम् ॥

त्वं गतिः शरणं देवि ! त्वं माता परमेश्वरि !।
पाहि मां करुणासान्द्रे ! नमस्ते परमेश्वरि !॥
नमस्ते कालिके ! देवि ! नमस्ते भक्तवत्सले !।
मूर्खतां हर मे देवि ! प्रतिभाप्रतिदायिके !॥
गद्यपद्यमयीं वाणीं तर्कव्याकरणादिकाम्।
अनधीतगतां विद्यां देहि दक्षिणकालिके !॥
जयं देहि सभामध्ये धनं देहि धनागमे।
देहि मे चिरजीवित्वं कालिके ! रक्ष दक्षिणे !॥
राज्यं देहि यशो देहि पुत्रान् दारान् धनं तथा।
देहान्ते देहि मे मुक्तिं जगन्मात ! नमोऽस्तु ते॥
मङ्गला भैरवी दुर्गा कालिका त्रिदशेश्वरी।
उमा हैमवती कन्या कल्याणी भैरवेश्वरी॥
काली ब्राह्मी च माहेशी कौमारी माधुसूदनी।
वाराही वासवी चण्डा त्वां जगुर्मुनयो मुदा॥
उग्रतारेति तारेति शिवेत्येकजटेति च।
लोकोत्तरेति बालेति गीयते कृतिभिः सदा॥
यथा काली तथा तारा, तथा छिन्ना च कुल्लुका।
एकमूर्त्तिश्चतुर्भिश्च देवि ! त्वं कालिकापरा॥
एकद्वित्रिविधा देवि ! कोटिधाऽनन्तरूपिणी।
अङ्गाङ्कैर्नामभेदैः कालिकेति प्रगीयते॥
शम्भुः पञ्चमुखेनैव गुणान् वक्तुं क्षमो न ते।
चापलं यत् कृतं सर्वं क्षमस्व शुभदा भव॥
प्राणान् रक्ष यशो रक्ष पुत्त्रदारधनं तथा।
सर्वकाले सर्वदेशे पाहि दक्षिणकालिके !॥
यः संपूज्य पठेद्भक्त्या दिवा वा सन्ध्ययोस्तथा।
अवाप्य महतीं प्रज्ञां सर्वकामांस्ततो लभेत्॥

यद्यद् प्रार्थयते चित्ते तत्तदाप्नोति का कथा।
स्वयं लक्ष्मीर्वसेद् गेहे मुक्तिः करगता पुनः॥
इति रुद्रजामले उत्तरतन्त्रे दक्षिणकालिकाकवचं
समाप्तम्।

अथ स्तोत्रम्। महाकालभैरव उवाच।

स्तवराजं शृणु राम! सर्वकालमनोहरम्।
यस्य स्मरणमात्रेण कालिका संप्रसीदति॥
यद्भक्तस्त्वं यदेवासि भृगुवंशसमुद्भव!।
गोपनीयं प्रयत्नेन पठनीयं परात्परम्॥
कालीस्तोत्रं मम प्रेयः कस्मैचिन्न प्रकाशितम्।
कथ्यते त्वदनुरोधात् सर्वपापप्रणाशनम्॥
शृणु राम! शृणु राम! शृणु राम! सदैव हि।
गोपनीयं गोपनीयं गोपनीयं न संशयः॥
गणरात्रे मुक्तकेशो नग्नः शक्तिसुसङ्गतः।
रक्तचन्दनसिन्दूरैस्तथा पञ्चोपचारकैः॥
मत्स्यमांससुराद्यैश्च ताम्बूलैश्च विशेषतः।
पूजयित्वा महाकालीं महाकालरतातुराम्॥
तीर्थपानं विधायादौ ताम्बूलं भक्षयेत्ततः।
भगलिङ्गामृतं मध्ये निवेदयेत् सुसाधकः॥
जपित्वा च महामन्त्रं कालीरूपं मनोहरम्।
मनसा चिन्तयेत् कालीं पठन् स्तोत्रन्तु साधकः॥
रक्षोयक्षपिशाचेभ्यो नित्यं रक्षाकरं परम्।
प्रसन्ना कालिका तस्य पुत्रत्वेनानुकम्पते॥
दक्षिणे कालिके! मातर्मुण्डमालाविभूषिते!।
भक्तत्राणव्यग्रचित्ते! यमजाड्यं विनाशय॥
ज्वलच्चिताग्निमध्यस्थे! परिवारसमन्विते!।

त्वत्पदाम्भोजमापन्नं रक्ष मां पुत्त्रवत् सदा ॥
महामेघच्छविन्यासे ! मुक्तकेशि ! चतुर्भुजे ! ।
पाण्डित्यं कविताञ्चैव मह्यं देहि महेश्वरि ! ॥
वामोर्द्ध्वे च महाखड्गं विधारयसि शङ्करि ! ।
अधोलसच्छिन्नमुण्डे ! मम विघ्नं विनाशय ॥
अभयं दक्षिणे चोर्द्ध्वे तथाधःपाणिना वरम् ।
कण्ठसंसक्तमुण्डालि ! महाकालि ! नमोऽस्तु ते ॥
सततं त्वत्स्वरूपं ये स्मरन्ति साधकोत्तमाः ।
तेषां समस्तशास्त्रेषु गतिरव्याहता सदा ॥
चिन्तयामि च त्वन्नाम रक्ष मां सर्वतः सदा ।
दिगम्बरीं करालास्यां घोरदंष्ट्रां भयानकाम् ॥
कर्णमूले शवयुग्मां स्थूलतुङ्गपयोधराम् ।
महारौद्रीं महाघोरां श्मशानालयवासिनीम् ॥
शवपाणिसमूहैश्च कृतकाञ्चीं हसन्मुखीम् ।
ओष्ठप्रान्तगलद्रक्तधाराविस्फुरिताननाम् ॥
मुण्डालीसंस्रवद्रक्तैः सर्वाङ्गे चारुचर्च्चिताम् ।
शिवाभिर्घोररावाभिश्चतुर्दिक्षु समन्विताम् ॥
पूजाकाले पठेद् यस्तु सद्भावपुलको बुधः ।
स भवेत् कालिकापुत्त्र इति ख्यातिमुपागतः ॥
रजस्वलाभगं पश्यन् जप्त्वा कालीमहामनुम् ।
स्तवेनानेन संस्तुत्य साधकः किं न साधयेत् ॥
अष्टोत्तरशतं जप्त्वा योनिमामन्त्र्य मन्त्रवित् ॥
संगम्य पठनादस्य सर्वविद्येश्वरो भवेत् ।
मातेव दक्षिणा तस्य सर्वत्र हितकारिणी ।
तस्य देहे सदा काली वसेद्राम ! न संशयः ॥
पूजाजपविहीनाय स्त्रीसुरानिन्दकाय च ।

षण्मार्गस्य रोधकाय गुर्वभक्ताय सर्वदा ॥
शृणु वत्स ! प्रयत्नेन स्तवमेनं न दर्शयेत् ।
प्रमादाद्दर्शनाद्वापि तस्य सिद्धिर्भवेन्न हि ॥
इति कालिकापरमरहस्ये कालीहृदये महाकालभैरव-
परशुरामसंवादे श्रीदक्षिणकालिकास्तवः समाप्तः ।
तन्त्रान्तरोक्तकवचम् यथा—। भैरव उवाच ।
कालिका या महाविद्या कथिता भुवि दुर्लभा ।
तथापि हृदये शल्यमस्ति देवि ! कृपां कुरु ॥
कवचन्तु महादेवि ! कथयस्वानुकम्पया ।
यदि नो कथ्यते मातर्विमुञ्चामि तदा तनुम् ॥
देव्युवाच । शङ्कापि जायते वत्स ! तव स्नेहात् प्रकाश्यते ।
न वक्तव्यं न दातव्यमतिगुह्यतरं महत् ॥
कालिका जगतां माता शोकदुःखविनाशिनी ।
विशेषतः कलियुगे महापातकहारिणी ॥
काली मे पुरतः पातु पृष्ठतश्च कपालिनी ।
कुल्ला मे दक्षिणे पातु कुरुकुल्ला तथोत्तरे ॥
विरोधिनी शिरः पातु विप्रचित्ता च चक्षुषी ।
उग्रा मे नासिकां पातु कर्णौ चोग्रप्रभा तथा ॥
वदनं पातु मे दीप्ता नीला च चिबुकं तथा ।
घना ग्रीवां सदा पातु बलाका बाहुयुग्मकम् ॥
मात्रा पातु करद्वन्द्वं वक्षो मुद्रा सदावतु ।
मिता पातु स्तनद्वन्द्वं योनिमण्डलदेवताः ॥
ब्राह्मी मे जठरं पातु नाभिं नारायणी तथा ।
ऊरू माहेश्वरी पातु चामुण्डा पातु लिङ्गकम् ॥
कौमारी च कटीं पातु जङ्घायुग्मं तथैव च ।
अपराजिता च पादौ मे वाराही पातु चाङ्गुलीः ॥

सन्धिस्थानं नारसिंही पत्नस्था देवताऽवतु।
रक्षाहीनञ्च यत् स्थानं वर्जितं कवचेन तु॥
तत् सर्वं रक्ष मे देवि! कालिके घोरदक्षिणे!।
ऊर्द्ध्वमधस्तथा दिक्षु पातु देवी स्वयं वपुः॥
हिंस्रेभ्यः सर्वदा पातु साधकञ्च जलाधिकात्।
दक्षिणा कालिका देवी व्यापकं मे सदावतु॥
इदं कवचमज्ञात्वा यो भजेद्घोरदक्षिणाम्।
न पूजाफलमाप्नोति विघ्नस्तस्य पदे पदे॥
कवचेनावृतो नित्यं यत्र तत्रैव गच्छति।
तत्र तत्राभयं तस्य न क्षोभं विद्यते क्वचित्॥

इति दक्षिणकालिकाकवचं समाप्तम्।

अथ सहस्रनामस्तोत्रम् यथा—। श्रीशिव उवाच।

कथितोऽयं महामन्त्रः सर्वमन्त्रोत्तमोत्तमः।
यामासाद्य मया प्राप्तमैश्वर्य्यपदमुत्तमम्॥
संयुक्तः परया भक्त्या यथोक्तविधिना भवान्।
कुरुतामर्चनं देव्यास्त्रैलोक्यविजिगीषया॥
श्रीराम उवाच। प्रसन्नो यदि मे देव! परमेश! पुरातन!।
रहस्यं परमं देव्याः कृपया कथय प्रभो!॥
विनार्चनं विना होमं विना न्यासं विना वलिम्।
विना गन्धं विना पुष्पं विना नित्योदितां क्रियाम्॥
प्राणायामं विना ध्यानं विना भूतविशोधनम्।
विना दानं विना जापं येन काली प्रसीदति॥
शिव-उवाच। पृष्टं त्वयोत्तमं प्राज्ञ! भृगुवंशसमुद्भव!।
भक्तानामपि भक्तोऽसि त्वमेव साधयिष्यसि॥
देवीं दानवकोटिघ्नीं लीलया रुधिरप्रियाम्।
सदा स्तोत्रप्रियामुग्रां कामकौतुकलालसाम्॥

सर्वदानन्दहृदयामासवोत्सवमानसाम् ।
माध्वीकमत्स्यमांसानुरागिणीं वैष्णवीं पराम् ॥
श्मशानवासिनीं प्रेतगणनृत्यमहोत्सवाम् ।
योगप्रभावां योगीशीं योगीन्द्रहृदयस्थिताम् ॥
तामुग्रकालिकां राम ! प्रसादयितुमर्हसि ।
तस्याः स्तोत्रं परं पुण्यं स्वयं काल्या प्रकाशितम् ॥
तव तत् कथयिष्यामि श्रुत्वा वत्सावधारय ।
गोपनीयं प्रयत्नेन पठनीयं परात्परम् ॥
यस्यैककालपठनात् सर्वे विघ्नाः समाकुलाः ।
नश्यन्ति दहने दीप्ते पतङ्गा इव सर्वतः ॥
गद्यपद्यमयी वाणी तस्य गङ्गाप्रवाहवत् ।
तस्य दर्शनमात्रेण वादिनो निष्प्रभां गताः ॥
तस्य हस्ते सदैवास्ति सर्वसिद्धिर्न संशयः ।
राजानोऽपि च दासत्वं भजन्ते किं परे जनाः ? ॥
निशीथे मुक्तकेशस्तु नग्नः शक्तिसमाहितः ।
मनसा चिन्तयेत् कालीं महाकालेन लालिताम् ॥
पठेत् सहस्रनामाख्यं स्तोत्रं मोक्षस्य साधनम् ।
प्रसन्ना कालिका तस्य पुत्रत्वेनानुकम्पते ॥
यथा ब्रह्मामृतैर्ब्रह्मकुसुमैः पूजिता परा ।
प्रसीदति तथानेन स्तुता काली प्रसीदति ॥

अस्य श्रीदक्षिणकालिकासहस्रनामस्तोत्रस्य महाकाल-भैरव-ऋषिस्त्रिष्टुप्छन्दः श्मशानकाली देवता धर्मार्थकाम-मोक्षार्थे विनियोगः ।

ॐ श्मशानकालिका काली भद्रकाली कपालिनी ।
गुह्यकाली महाकाली कुरुकुल्ला विरोधिनी ॥
कालिका कालरात्रिश्च महाकालनितम्बिनी ।

कालभैरवभार्य्या च कुलवर्त्मप्रकाशिनी ॥
कामदा कामिनी कन्या कमनीयस्वरूपिणी।
कस्तूरीरसलिप्ताङ्गी कुञ्जरेश्वरगामिनी ॥
ककारवर्णसर्वाङ्गी कामिनी कामसुन्दरी।
कामार्त्ता कामरूपा च कामधेनुः कलावती ॥
कान्ता कामस्वरूपा च कामाख्या कुलकामिनी।
कुलीना कुलवत्यम्बा दुर्गा दुर्गतिनाशिनी ॥
कौमारी कुलजा कृष्णा कृष्णदेहा कृशोदरी।
कृशाङ्गी कुलिशाङ्गी च क्रीङ्कारी कमला कला ॥
करालास्या कराली च कुलकान्तापराजिता।
उग्रा उग्रप्रभा दीप्ता विप्रचित्ता महाबला ॥
नीला घना मेघनादा मात्रा मुद्रा मितामिता।
ब्राह्मी नारायणी भद्रा सुभद्रा भक्तवत्सला ॥
माहेश्वरी च चामुण्डा वाराही नारसिंहिका।
वज्राङ्गी वज्रकङ्काला नृमुण्डस्रग्विणी शिवा ॥
मालिनी नरमुण्डालीगलद्रक्तविभूषणा।
रक्तचन्दनसिक्ताङ्गी सिन्दूरारुणमस्तका ॥
घोररूपा घोरदंष्ट्रा घोरा घोरतरा शुभा।
महादंष्ट्रा महामाया सुदती युगदन्तुरा ॥
सुलोचना विरूपाक्षी विशालाक्षी त्रिलोचना।
शारदेन्दुप्रसन्नास्या स्फुरत्स्मेराम्बुजेक्षणा ॥
अट्टहासा प्रफुल्लास्या स्मेरवक्त्रा सुभाषिणी।
प्रफुल्लपद्मवदना स्मितास्या प्रियभाषिणी ॥
कोटराक्षी कुलश्रेष्ठा महती बहुभाषिणी।
सुमतिः कुमतिश्चण्डा चण्डमुण्डातिवेगिनी ॥
प्रचण्डा चण्डिका चण्डी चर्चिता चण्डवेगिनी।

सुकेशी मुक्तकेशी च दीर्घकेशी महाकचा ॥
प्रेतदेहकर्णपूरा प्रेतपाणिसुमेखला ।
प्रेतासना प्रियप्रेता प्रेतभूमिकृतालया ॥
श्मशानवासिनी पुण्या पुण्यदा कुलपण्डिता ।
पुण्यालया पुण्यदेहा पुण्यश्लोका च पावनी ॥
पूता पवित्रा परमा परा पुण्यविभूषणा ।
पुण्यनाम्नी भीतिहरा वरदा खड्गपाशिनी ॥
नृमुण्डहस्ता शान्ता च छिन्नमस्ता सुनासिका ।
दक्षिणा श्यामला श्यामा शान्ता पीनोन्नतस्तनी ॥
दिगम्बरी घोररावा सृक्कान्तरक्तवाहिनी ।
घोररावा शिवासङ्गा निःसङ्गा मदनातुरा ॥
मत्ता प्रमत्ता मदना सुधासिन्धुनिवासिनी ।
अतिमत्ता महामत्ता सर्वाकर्षणकारिणी ॥
गीतप्रिया वाद्यरता प्रेतनृत्यपरायणा ।
चतुर्भुजा दशभुजा अष्टादशभुजा तथा ॥
कात्यायनी जगन्माता जगतीपरमेश्वरी ।
जगद्बन्धुर्जगद्धात्री जगदानन्दकारिणी ॥
जगज्जीववती हैमवती माया महालया ।
नागयज्ञोपवीताङ्गी नागिनी नागशायिनी ॥
नागकन्या देवकन्या गान्धारी किन्नरी सुरी ।
मोहरात्री महारात्री दारुणाभा सुरासुरी ॥
विद्याधरी वसुमती यक्षिणी योगिनी जरा ।
राक्षसी डाकिनी वेदमयी वेदविभूषणा ॥
श्रुतिस्मृतिमहाविद्या गुह्यविद्यापुरातनी ।
चिन्ताचिन्ता स्वधा स्वाहा निद्रा तन्द्रा च पार्वती ॥
अपर्णा निश्चला लोला सर्वविद्यातपस्विनी ।

गङ्गा काशी शची सीता सती सत्यपरायणा ॥
नीतिः सुनीतिः सुरुचिस्तुष्टिः पुष्टिर्धृतिः क्षमा ।
वाणी बुद्धिर्महालक्ष्मीर्लक्ष्मीर्नीलसरस्वती ॥
स्रोतस्वती स्रोतवती मातङ्गी विजया जया ।
नदी सिन्धुः सर्वमयी तारा शून्यनिवासिनी ॥
शुद्धा तरङ्गिणी मेधा लाकिनी बहुरूपिणी ।
सदानन्दमयी सत्या सर्वानन्दस्वरूपिणी ॥
सुनन्दा नन्दिनी स्तुत्या स्तवनीया स्वभाविनी ।
रङ्गिणी टङ्किनी चित्रा विचित्रा चित्ररूपिणी ।
पद्मा पद्मालया पद्ममुखी पद्मविभूषणा ॥
शाकिनी हाकिनी क्षान्ता राकिणी रुधिरप्रिया
भ्रान्तिर्भवानी रुद्राणी मृड़ानी शत्रुमर्दिनी ॥
उपेन्द्राणी महेशानी ज्योत्स्ना चेन्द्रस्वरूपिणी ।
सूर्य्यात्मिका रुद्रपत्नी रौद्री स्त्री प्रकृतिः पुमान् ॥
शक्तिः सूक्तिर्मतिमती भुक्तिर्मुक्तिः पतिव्रता ।
सर्वेश्वरी सर्वमाता शर्वाणी हरवल्लभा ॥
सर्वज्ञा सिद्धिदा सिद्धा भाव्या भव्या भयापहा ।
कर्त्री हर्त्री पालयित्री शर्वरी तामसी दया ॥
तमिस्रा यामिनीस्था च स्थिरा धीरा तपस्विनी ।
चार्वङ्गी चञ्चला लोलजिह्वा चारुचरित्रिणी ॥
त्रपा त्रपावती लज्जा निर्लज्जा ह्रीं रजोवती ।
सत्त्ववती धर्मनिष्ठा श्रेष्ठा निष्ठुरवादिनी ॥
गरिष्ठा दुष्टसंहर्त्री विशिष्टा श्रेयसी घृणा ।
भीमा भयानका भीमनादिनी भीः प्रभावती ॥
वागीश्वरी श्रीर्यमुना यज्ञकर्त्री यजुःप्रिया ।
ऋक्सामाथर्वनिलया रागिणी शोभनस्वरा ॥

कलकण्ठी कम्बुकण्ठी वेणुवीणापरायणा ।
वंशिनी वैष्णवी स्वच्छा धात्री त्रिजगदीश्वरी ॥
मधुमती कुण्डलिनी ऋद्धिः सिद्धिः शुचिस्मिता ।
रम्भोर्वशी रतीरामा रोहिणी रेवती रमा ॥
शङ्खिनी चक्रिणी कृष्णा गदिनी पद्मिनी तथा ।
शूलिनी परिघास्त्रा च पाशिनी शार्ङ्गपाणिनी ॥
पिनाकधारिणी धूम्रा शरभी वनमालिनी ।
वज्रिणी समरप्रीता वेगिनी रणपण्डिता ॥
जटिनी विम्बिनी नीला लावण्याम्बुधिचन्द्रिका ।
वलिप्रिया सदापूज्या पूर्णा दैत्येन्द्रमाथिनी ॥
महिषासुरसंहर्त्री वासिनी रक्तदन्तिका ।
रक्तपा रुधिराक्ताङ्गी रक्तखर्परहस्तिनी ॥
रक्तप्रिया मांसरुचिरासवासक्तमानसा ।
गलच्छोणितमुण्डालिकण्ठमालाविभूषणा ॥
शवासना चितान्तस्था माहेशी वृषवाहिनी ।
व्याघ्रत्वगम्बरा चीनचेलिनी सिंहवाहिनी ॥
वामदेवी महादेवी गौरी सर्वज्ञभाविनी ।
वालिका तरुणी वृद्धा वृद्धमाता जरातुरा ॥
सुभ्रुर्विलासिनी ब्रह्मवादिनी ब्राह्मणी मही ।
स्वप्नावती चित्रलेखा लोपामुद्रा सुरेश्वरी ॥
अमोघाऽरुन्धती तीक्ष्णा भोगवत्यनुवादिनी ।
मन्दाकिनी मन्दहासा ज्वालामुख्यसुरान्तका ॥
मानदा मानिनी मान्या माननीया मदोद्धता ।
मदिरा मदिरोन्मादा मेध्या नव्या प्रसादिनी ॥
सुमध्यानन्तगुणिनी सर्वलोकोत्तमोत्तमा ।
जयदा जित्वरा जेत्री जयश्रीर्जयशालिनी ॥

सुखदा शुभदा सत्या सभासंक्षोभकारिणी ।
शिवदूती भूतिमती विभूतिर्भीषणानना ॥
कौमारी कुलजा कुन्ती कुलस्त्री कुलपालिका ।
कीर्त्तिर्यशस्विनी भूषा भूष्या भूतपतिप्रिया ॥
सगुणा निर्गुणा धृष्टा निष्ठा काष्ठा प्रतिष्ठिता ।
धनिष्ठा धनदा धन्या वसुधा स्वप्रकाशिनी ॥
उर्वी गुर्वी गुरुश्रेष्ठा सगुणा त्रिगुणात्मिका ।
महाकुलीना निष्कामा सकामा कामजीवना ॥
कामदेवकला रामाभिरामा शिवनर्त्तकी ।
चिन्तामणिकल्पलता जाग्रती दीनवत्सला ॥
कार्त्तिकी कीर्त्तिका कृत्या अयोध्या विषमा समा ।
सुमन्त्रा मन्त्रिणी घूर्णा ह्लादिनी क्लेशनाशिनी ॥
त्रैलोक्यजननी हृष्टा निर्मांसा मनोरूपिणी ।
तड़ागनिम्नजठरा शुष्कमांसास्थिमालिनी ॥
अवन्ती मथुरा माया त्रैलोक्यपावनीश्वरी ।
व्यक्ताव्यक्तानेकमूर्त्तिः शर्वरी भीमनादिनी ॥
क्षेमङ्करी शङ्करी च सर्वसम्मोहकारिणी ।
ऊर्द्ध्वतेजस्विनी क्लिन्ना महातेजस्विनी तथा ॥
अद्वैता भोगिनी पूज्या युवती सर्वमङ्गला ।
सर्वप्रियङ्करी भोग्या धरणी पिशिताशना ॥
भयङ्करी पापहरा निष्कलङ्का वशङ्करी ।
आशा तृष्णा चन्द्रकला निद्रान्वा वायुवेगिनी ॥
सहस्रसूर्य्यसङ्काशा चन्द्रकोटिसमप्रभा ।
वह्निमण्डलसंस्था च सर्वतत्त्वप्रतिष्ठिता ॥
सर्वाचारवती सर्वदेवकन्याधिदेवता ।
दक्षकन्या दक्षयज्ञनाशिनी दुर्गतारिका ॥

इज्या पूज्या विभीर्भूतिः सत्कीर्त्तिर्ब्रह्मरूपिणी ।
रम्भोरुश्चतुरा राका जयन्ती करुणा कुहूः ॥
मनस्विनी देवमाता यशस्या ब्रह्मचारिणी ।
ऋद्धिदा वृद्धिदा वृद्धिः सर्वाद्या सर्वदायिनी ॥
आधाररूपिणी ध्येया मूलाधारनिवासिनी ।
आज्ञा प्रज्ञापूर्णमनाश्चन्द्रमुख्यनुकूलिनी ॥
वावदूका निम्ननाभिः सत्या सन्ध्या दृढव्रता ।
आन्वीक्षिकी दण्डनीतिस्त्रयी त्रिदिवसुन्दरी ॥
ज्वलिनी ज्वालिनी शैलतनया विन्ध्यवासिनी ।
अमेया खेचरी धैर्य्या तुरीया विमलातुरा ॥
प्रगल्भा वारुणीच्छाया शशिनी विस्फुलिङ्गिनी ।
भुक्तिः सिद्धिः सदाप्राप्तिः प्राकाम्या महिमाणिमा ॥
इच्छासिद्धिर्विसिद्धा च वशित्वोर्द्ध्वनिवासिनी ।
लघिमा चैव गायत्री सावित्री भुवनेश्वरी ॥
मनोहरा चिता दिव्या देव्युदारा मनोरमा ।
पिङ्गला कपिला जिह्वारसज्ञा रसिका रसा ॥
सुषुम्नेडा भोगवती गान्धारी नरकान्तका ।
पाञ्चाली रुक्मिणी राधाराध्या भीमाधिराधिका ॥
अमृता तुलसी वृन्दा कैटभी कपटेश्वरी ।
उग्रचण्डेश्वरी वीरा जननी वीरसुन्दरी ॥
उग्रतारा यशोदाख्या दैवकी देवमानिता ।
निरञ्जना चित्रदेवी क्रोधिनी कुलदीपिका ॥
कुलवागीश्वरी वाणी मातृका द्राविणी द्रवा ।
योगेश्वरी महामारी भ्रामरी बिन्दुरूपिणी ॥
दूती प्राणेश्वरी गुप्ता बहुला चामरी प्रभा ।
कुब्जिका ज्ञानिनी ज्येष्ठा भूशुण्डी प्रकटातिथिः ॥

द्रविणी गोपनी माया कामबीजेश्वरी क्रिया ।
शाम्भवी केकरा मेना मूषलास्त्रा तिलोत्तमा ॥
अमेयविक्रमा क्रूरा सम्पत्शाला त्रिलोचना ।
सुस्थी हव्यवहा प्रीतिरुष्मा धूम्रार्चिरङ्गदा ॥
तपिनी तापिनी विश्वा भोगदा धारिणी धरा ।
त्रिखण्डा बोधिनी वश्या सकला शब्दरूपिणी ॥
बीजरूपा महामुद्रा योगिनी योनिरूपिणी ।
अनङ्गकुसुमानङ्गमेखलानङ्गरूपिणी ॥
वज्रेश्वरी च जयिनी सर्वद्वन्द्वक्षयङ्करी ।
षडङ्गयुवती योगयुक्ता ज्वालांशुमालिनी ॥
दुराशया दुराधारा दुर्जया दुर्गरूपिणी ।
दुरन्ता दुष्कृतिहरा दुर्ध्येया दुरतिक्रमा ॥
हंसेश्वरी त्रिकोणस्था शाकम्भर्य्यनुकम्पिनी ।
त्रिकोणनिलया नित्या परमामृतरञ्जिता ॥
महाविद्येश्वरी श्वेता भेरुण्डाकुलसुन्दरी ।
त्वरिता भक्तिसंसक्ता भक्तवश्या सनातनी ॥
भक्तानन्दमयी भक्तभाविका भक्तशङ्करी ।
सर्वसौन्दर्य्यनिलया सर्वसौभाग्यशालिनी ॥
सर्वसंभोगभवना सर्वसौख्यनिरूपिणी ।
कुमारीपूजनरता कुमारीव्रतचारिणी ॥
कुमारीभक्तिसुखिनी कुमारीरूपधारिणी ।
कुमारीपूजकप्रीता कुमारीप्रीतिदा प्रिया ॥
कुमारीसेवकासङ्गा कुमारीसेवकालया ।
आनन्दभैरवी बाला भैरवी वटुभैरवी ॥
श्मशानभैरवी कालभैरवी पुरभैरवी ।
महाभैरवपत्नी च परमानन्दभैरवी ॥

सुधानन्दभैरवी च उन्मादानन्दभैरवी ।
मुक्तानन्दभैरवी च तथा तरुणभैरवी ॥
ज्ञानानन्दभैरवी च अमृतानन्दभैरवी ।
महाभयङ्करी तीव्रा तीव्रवेगा तपस्विनी ॥
त्रिपुरा परमेशानी सुन्दरी पुरसुन्दरी ।
त्रिपुरेशी पञ्चदशी पञ्चमी पुरवासिनी ॥
महासप्तदशी चैव षोड़शी त्रिपुरेश्वरी ।
महाङ्कुशस्वरूपा च महाचक्रेश्वरी तथा ॥
नवचक्रेश्वरी चक्रेश्वरी त्रिपुरमालिनी ।
राजराजेश्वरी धीरा महात्रिपुरसुन्दरी ॥
सिन्दूरपूररुचिरा श्रीमत्त्रिपुरसुन्दरी ।
सर्वाङ्गसुन्दरी रक्ता रक्तवस्त्रोत्तरीयिणी ॥
जवा यावकसिन्दूररक्तचन्दनधारिणी ।
जवायावकसिन्दूररक्तचन्दनरूपधृक् ॥
चामरीवालकुटिलनिर्मलश्यामकेशिनी ।
वज्रमौक्तिकरत्नाढ्यकिरीटमुकुटोज्ज्वला ॥
रत्नकुण्डलसंसक्तस्फुरद्गण्डमनोरमा ।
कुञ्जरेश्वरकुम्भोत्थमुक्तारञ्जितनासिका ॥
मुक्ताविद्रुममाणिक्यहाराढ्यस्तनमण्डला ।
सूर्य्यकान्तेन्दुकान्ताढ्यस्पर्शाश्मकण्ठभूषणा ॥
वीजपूरस्फुरद्वीजदन्तपङ्क्तिरनुत्तमा ।
कामकोदण्डकाभुग्नभ्रूकटाक्षप्रवर्षिणी ॥
मातङ्गकुम्भवक्षोजा लसत्कोकनदेक्षणा ।
मनोज्ञशष्कुलीकर्णा हंसीगतिविविड़म्बिनी ॥
पद्मरागाङ्गदज्योतिर्दोश्चतुष्कप्रकाशिनी ।
नानामणिपरिस्फूर्जच्छुद्धकाञ्चनकङ्कणा ॥

नागेन्द्रदन्तनिर्माणवलयाङ्कितपाणिनी ।
अङ्गुरीयकचित्राङ्गी विचित्रक्षुद्रघण्टिका ॥
पट्टाम्बरपरीधाना कलमञ्जीरशिञ्जिनी ।
कर्पूरागुरुकस्तूरीकुङ्कमद्रवलेपिता ॥
विचित्ररत्नपृथिवीकल्पशाखितलस्थिता ।
रत्नद्वीपस्फुरद्रत्नसिंहासनविलासिनी ॥
षट्चक्रभेदनकरी परमानन्दरूपिणी ।
सहस्रदलपद्मान्तश्चन्द्रमण्डलवर्त्तिनी ॥
ब्रह्मरूपशिवक्रोड़नानासुखविलासिनी ।
हरविष्णुविरिञ्चीन्द्रग्रहनायकसेविता ॥
शिवा शैवा च रुद्राणी तथैव शिववादिनी ।
मातङ्गिनी श्रीमती च तथैवानन्दमेखला ॥
डाकिनी योगिनी चैव तथोपयोगिनी मता ।
माहेश्वरी वैष्णवी च भ्रामरी शिवरूपिणी ॥
अलम्बुषा वेगवती क्रोधरूपा सुमेखला ।
गान्धारी हस्तिजिह्वा च ईड़ा चैव शुभङ्करी ॥
पिङ्गला ब्रह्मदूती च सुषुम्ना चैव गन्धिनी ।
आत्मयोनिर्ब्रह्मयोनिर्जगद्योनिरयोनिजा ॥
भगरूपा भगस्थात्री भगिनी भगरूपिणी ।
भगात्मिका भगाधाररूपिणी भगमालिनी ॥
लिङ्गाख्या चैव लिङ्गेशी त्रिपुराभैरवी तथा ।
लिङ्गगीतिः सुगीतिश्च लिङ्गस्था लिङ्गरूपधृक् ॥
लिङ्गमाना लिङ्गभवा लिङ्गलिङ्गा च पार्वती ।
भगवती कौशिकी च प्रेमा चैव प्रियंवदा ॥
गृध्ररूपा शिवारूपा चक्रिणी चक्ररूपधृक् ।
लिङ्गाभिधायिनी लिङ्गप्रिया लिङ्गनिवासिनी ॥

लिङ्गस्था लिङ्गिनी लिङ्गरूपिणी लिङ्गसुन्दरी ।
लिङ्गगीतिर्महाप्रीता भगगीतिर्महासुखा ॥
लिङ्गनामसदानन्दा भगनामसदागतिः ।
लिङ्गमालाकण्ठभूषा भगमालाविभूषणा ॥
भगलिङ्गामृतप्रीता भगलिङ्गामृतात्मिका ।
भगलिङ्गार्चनप्रीता भगलिङ्गस्वरूपिणी ॥
भगलिङ्गस्वरूपा च भगलिङ्गसुखावहा ॥
स्वयम्भूकुसुमप्रीता स्वयम्भूकुसुमार्चिता ।
स्वयम्भूकुसुमप्राणा स्वयम्भूकुसुमोत्थिता ।
स्वयम्भूकुसुमस्नाता स्वयम्भूपुष्पतर्पिता ॥
स्वयम्भूपुष्पघटिता स्वयम्भूपुष्पधारिणी ।
स्वयम्भूपुष्पतिलका स्वयम्भूपुष्पचर्चिता ॥
स्वयम्भूपुष्पनिरता स्वयम्भूकुसुमग्रहा ।
स्वयम्भूपुष्पयज्ञांशा स्वयम्भूकुसुमात्मिका ॥
स्वयम्भूपुष्पनिचिता स्वयम्भूकुसुमप्रिया ।
स्वयम्भूकुसुमादानलालसोन्मत्तमानसा ॥
स्वयम्भूकुसुमानन्दलहरीस्निग्धदेहिनी ।
स्वयम्भूकुसुमाधारा स्वयम्भूकुसुमाकुला ॥
स्वयम्भूपुष्पनिलया स्वयम्भूपुष्पवासिनी ।
स्वयम्भूकुसुमस्निग्धा स्वयम्भूकुसुमात्मिका ॥
स्वयम्भूपुष्पकारिणी स्वयम्भूपुष्पपाणिका ।
स्वयम्भूकुसुमध्याना स्वयम्भूकुसुमप्रभा ॥
स्वयम्भूकुसुमज्ञाना स्वयम्भूपुष्पभोगिनी ।
स्वयम्भूकुसुमोल्लासा स्वयम्भूपुष्पवर्षिणी ॥
स्वयम्भूकुसुमोत्साहा स्वयम्भूपुष्परूपिणी ।
स्वयम्भूकुसुमोन्मादा स्वयम्भूपुष्पसुन्दरी ॥

स्वयम्भूकुसुमाराध्या स्वयम्भूकुसुमोद्भवा।
स्वयम्भूकुसुमव्यग्रा स्वयम्भूपुष्पपूर्णिता॥
स्वयम्भूपूजकप्रज्ञा स्वयम्भूहोतृमातृका।
स्वयम्भूदातृरक्षित्री स्वयम्भूरक्ततारिका॥
स्वयम्भूपूजकग्रस्ता स्वयम्भूपूजकप्रिया।
स्वयम्भूवन्दकाधारा स्वयम्भूनिन्दकान्तका॥
स्वयम्भूप्रदसर्वस्वा स्वयम्भूप्रदपुत्त्रिणी।
स्वयम्भूप्रदसस्मेरा स्वयम्भूप्रदशरीरिणी।
सर्वकालोद्भवप्रीता सर्वकालोद्भवात्मिका॥
सर्वकालोद्भवोद्भावा सर्वकालोद्भवोद्भवा।
कुण्डपुष्पसदाप्रीतिर्गोलपुष्पसदारतिः॥
कुण्डगोलोद्भवप्राणा कुण्डगोलोद्भवात्मिका।
स्वयम्भूवा शिवा धात्री पावनी लोकपावनी॥
कीर्त्तिर्यशस्विनी मेधा विमेधा शुक्रसुन्दरी।
अश्विनी कृत्तिका पुष्या तेजस्का चन्द्रमण्डला।
सूक्ष्मासूक्ष्मा वलाका च वरदा भयनाशिनी॥
वरदाभयदा चैव मुक्तिबन्धविनाशिनी।
कामुका कामदा कान्ता कामाख्या कुलसुन्दरी॥
दुःखदा सुखदा मोक्षा मोक्षदार्थप्रकाशिनी।
दुष्टादुष्टमतिश्चैव सर्वकार्य्यविनाशिनी॥
शुक्राधारा शुक्ररूपा शुक्रसिन्धुनिवासिनी।
शुक्रालया शुक्रभोगा शुक्रपूजासदारतिः॥
शुक्रपूज्या शुक्रहोमसन्तुष्टा शुक्रवत्सला।
शुक्रमूर्त्तिः शुक्रदेहा शुक्रपूजकपुत्त्रिणी॥
शुक्रस्था शुक्रिणी शुक्रसंस्पृहा शुक्रसुन्दरी।
शुक्रस्नाता शुक्रकरी शुक्रसेव्यातिशुक्रिणी॥

महाशुक्रा शुक्रभवा शुक्रवृष्टिविधायिनी ।
शुक्राभिधेया शुक्रार्हा शुक्रवन्दकवन्दिता ॥
शुक्रानन्दकरी शुक्रसदानन्दाभिधायिका ।
शुक्रोत्सवा सदाशुक्रपूर्णा शुक्रमनोरमा ॥
शुक्रपूजकसर्वस्वा शुक्रनिन्दकनाशिनी ।
शुक्रात्मिका शुक्रसम्पत् शुक्राकर्षणकारिणी ॥
शारदा साधकप्राणा साधकासक्तमानसा ।
साधकोत्तमसर्वस्वा साधकाभक्तरक्तपा ॥
साधकानन्दसन्तोषा साधकानन्दकारिणी ।
आत्मविद्या ब्रह्मविद्या परब्रह्मस्वरूपिणी ॥
त्रिकूटस्था पञ्चकूटा सर्वकूटशरीरिणी ।
सर्ववर्णमयी वर्णजपमालाविधायिनी ॥

श्रीशिव उवाच ।

इति श्रीकालिकानामसहस्रं शिवभाषितम् ।
गुह्याद्गुह्यतरं साक्षात् महापातकनाशनम् ॥
पूजाकाले निशीथे च सन्ध्ययोरुभयोरपि ।
लभते गाणपत्यं स यः पठेत् साधकोत्तमः ॥
यः पठेत् पाठयेद्वापि शृणोति श्रावयेदथ ।
सर्वपापविनिर्मुक्तः स याति कालिकापुरम् ॥
श्रद्धयाऽश्रद्धया वापि यः कश्चिन्मानवः स्मरेत् ।
दुर्गं दुर्गशतं तीर्त्वा स याति परमां गतिम् ॥
बन्ध्या वा काकबन्ध्या वा मृतवत्सा च याङ्गना ।
श्रुत्वा स्तोत्रमिदं पुत्रान् लभते चिरजीविनः ॥
यं यं कामयते कामं पठन् स्तोत्रमनुत्तमम् ।
देवीपादप्रसादेन तत्तदाप्नोति निश्चितम् ॥
स्वयम्भूकुसुमैः शुक्रैः सुगन्धिकुसुमान्वितैः ।

जवायावकसिन्दूररक्तचन्दनसंयुतैः॥
मत्स्यमांसादिभिर्धीरो मधुभिः साज्यपायसैः।
भक्त्योपनीतैर्मन्त्रेण शोधितैः सह पञ्चमैः॥
पञ्चोपचारनैवेद्यैर्वलिभिर्बहुशोणितैः।
धूपदीपैर्महादेवीं पूजयित्वा मनोहरैः॥
जप्त्वा महामनुस्तोत्रं पठेद् भक्तिसमन्वितः।
अनन्यचेताः स्थिरधीर्मुक्तकेशो दिगम्बरः॥
शवारूढ़श्चितास्थो वा श्मशानालयमागतः।
शून्यालयगतो वापि शय्यास्थो वा शिवात्मकः॥
स भवेत् कालिकापुत्त्र इति ख्याति सुपागतः।
सर्वविद्यावतां श्रेष्ठो धनेन च धनाधिपः॥
वायुतुल्यवलो लोके दुर्जयः शत्रुमर्दनः।
सर्वसङ्कटमुत्तीर्णः सर्वसिद्धिसमन्वितः॥
मधुमत्या स्वयं देव्या सेव्यमानः स्मरोपमः।
महेश इव योगीन्द्रः सर्वसत्त्वपुरस्कृतः॥
कामिनीकामरूपोऽसौ सर्वाकर्षणकारकः।
जलसूर्य्येन्दुवायूनां स्तम्भको राजवल्लभः॥
यशस्वी सत्कविर्धीमान् सन्मन्त्री कोकिलस्वरः।
बहुपुत्त्री गजाश्वानामीश्वरो धार्मिकः कृती॥
मार्कण्डेय इवायुष्मान् जरापलितवर्जितः।
नवयौवनयुक्तः स्यादपि वर्षसहस्रभाक्॥
बहु किं कथ्यते तस्य पठतः स्तोत्रमुत्तमम्।
न किञ्चिद्दुर्लभं लोके यद्यत् मनसि वर्त्तते॥
ब्रह्महत्या सुरापानं स्तेयं गुर्वङ्गनागमः।
सर्वमाशु भवत्येव स्तवस्यास्य प्रसादतः॥
रजस्वलाभगं पश्यन् जप्त्वा कालीं महामनुम्।

स्तवेनानेन संस्तुत्य साधकः किं न साधयेत् ॥
परदारपरो वापि जप्त्वा मन्त्रं पठन् स्तवम् ।
कुबेर इव वित्ताढ्यो जायते साधकोत्तमः ॥
अष्टोत्तरशतं जप्त्वा योनिमामन्त्र्य तत्त्ववित् ।
संगम्य पठनादस्य सर्वविद्येश्वरो भवेत् ॥
दिगम्बरो मुक्तकेशः शय्यास्थो मैथुनी नरः ।
जप्त्वा स्तुत्वा महाकालीं खेचरो जायतेऽचिरात् ॥
शुक्रोत्सारणकाले च जपपूजापरायणः ।
श्मशानकालिकां स्तुत्वा वाणीव सत्कविर्भवेत् ॥
आलोकयन् चिन्तयन् वा विवस्त्रां परयोषिताम् ।
जप्त्वा स्तुत्वा महाकालीं सर्वपापैः प्रमुच्यते ॥
सुरतेषु मनुं जप्त्वा स्तुत्वा भगवतीं शिवाम् ।
सर्वपापैः परित्यक्तो मानवः स्यात् शुकोपमः ॥
कुहूपूर्णेन्दुसंक्रान्तिचतुर्दश्यष्टमीषु च ।
नवम्यां मङ्गलदिने पठेत् स्तोत्रं सुसाधकः ॥
भौमावास्यां निशीथे च चतुष्पथगतो नरः ।
मासभक्तबलिं दत्त्वा सदग्धमीनशोणितम् ॥
अष्टोत्तरशतं जप्त्वा पठन्नामसहस्रकम् ।
सोऽदर्शनो भवेदाशु देवगन्धर्वसेवितः ॥
येन तेन प्रकारेण कालीस्तुतिपरायणः ।
स्तम्भयेदखिलान् लोकान् राजानमपि मोहयेत् ॥
आकर्षयेद्देवकन्यां वशयेदपि केशवम् ।
मारयेदखिलान् दुष्टानुच्चाटयति शात्रवान् ॥
नरमार्जारमहिषच्छागमूषिकशोणितैः ।
सास्थिमांसैः समधुभिः सौवीरैः दुग्धपायसैः ॥
योनिलग्नतो येन भगलिङ्गस्रुतेन च ।

शुक्रैः पूजाजपान्ते तु कालीं सन्तर्प्य साधकः॥
सहस्रनामभिर्दिव्यैः स्तौति भक्तिपरायणः।
मातेव दक्षिणा तस्य सर्वत्र हितकारिणी॥
परनिन्दापरद्रोहपरदारपराय च।
खलाय परतन्त्राय भ्रष्टायासाधकाय च॥
शिवाभक्ताय दुष्टाय दूषकाय दुरात्मने।
हरिभक्तिविहीनाय परदारपराय च॥
पूजाजपविहीनाय स्त्रीसुरानिन्दकाय च।
न स्तवं दर्शयेद्देवि! सन्दर्श्य शिवहा भवेत्॥
कुलीनाय महोत्साय दुर्गाभक्तिपराय च।
वैष्णवाय विशुद्धाय भक्तियुक्ताय मन्त्रिणे॥
अद्वैतानन्दरूपाय निवेदितरताय च।
दद्यात् स्तोत्रं महाकाल्याः साधकाय शिवाज्ञया॥
गुरुविष्णुमहेशानामभेदेन महेश्वरीम्।
स्वमन्त्रां भावयेत् मन्त्री महेशः स्यान्न संशयः॥
स शाक्तः शिवभक्तश्च स एव वैष्णवोत्तमः।
संपूज्य स्तौति यः कालीमद्वैतभावमावहन्॥
देव्यानन्देन सानन्दो देवीभक्तेन भक्तिमान्।
स एव धन्यो यस्यार्थे महेशो व्यग्रमानसम्॥
कामयित्वा यथाकामं स्तवमेन मुदीरयेत्।
सर्वरोगविनिर्मुक्तो जायते मदनोपमः॥
चक्रं वा स्तव मेनं वा धारयेदङ्गसङ्गतम्।
विलिख्य विधिवत् साधुः स एव कालिका तनुः॥
देव्यै निवेदितं यद्यत् तस्यांशं भक्षयेन्नरः।
दिव्यदेहधरो भूत्वा देव्याः पार्श्वचरो भवेत्॥
नैवेद्यनिन्दकं दृष्ट्वा नृत्यन्ति योगिनीगणाः।

रक्तपानोद्यताः सर्वे मांसास्थिचर्वणोद्यताः ॥
तस्मान्निवेदितं देव्यै दृष्ट्वा श्रुत्वा च मानवः ।
न निन्देत् मनसा वाचा सर्वव्याधिपराङ्मुखः ॥
आत्मानं कालिकात्माने भावयन् स्तौति यः शिवाम् ।
शिवोपमं गुरुं ध्यात्वा स एव श्रीसदाशिवः ॥

यस्यालये तिष्ठति नून मेतत्
स्तोत्रं भवान्या लिखितं विधिज्ञैः ।
गोरोचनालक्तककुङ्कुमाक्त-
सिन्दूरकर्पूरमधुद्रवेण ॥
न तस्य चौरस्य भयं न दस्यो-
र्मनोरथो नाशनिर्वह्निभीतिः ।
उत्पातवायो रपि नात्र शङ्का
लक्ष्मीः स्वयं तत्र वसेदलोला ।
स्तोत्रं पठन्नेतदनन्तपुण्यं
कालीपदाम्भोजपरो मनुष्यः ।
विधानपूजाफलमेव सम्यक्
प्राप्नोति संपूर्णमनोरथोऽसौ ॥

मुक्ताः श्रीचरणारविन्दविमुखाः स्वर्गामिनो भोगिनो
ब्रह्मोपेन्द्रशिवात्मिकार्चनसुखं लोकेप्सिनो लेभिरे ।
श्रीमत्सद्गुरुभक्तिपूर्वकमहाकालीपदध्यायिनो
भुक्तिर्मुक्ति स्वयं स्तुतिपरा मुक्तिः करस्थायिनो ॥

इति कालिकाकुलसर्वस्वे हररामसंवादे कालिका-
सहस्रनामस्तोत्रं समाप्तम् ।

इति श्यामारहस्ये चतुर्थः परिच्छेदः ।

०

अथ पञ्चमः परिच्छेदः ।

अथ मन्त्रसिद्ध्यर्थमादौ पुरश्चरणविधिर्लिख्यते ।

तदुक्तं कालीतन्त्रे ।

आदौ पुरष्क्रियां कुर्वन् नियमेन यथाविधि ।
लक्षमेकं जपेद्विद्यां हविष्याशी दिवा शुचिः ॥
रात्रौ ताम्बूलपूरास्यः शय्यायां लक्षमानतः ।
ततः सिद्धमनुर्मन्त्री प्रयोगार्हो न चान्यथा ॥
जीवहीनो यथा देही सर्वकर्मसु न क्षमः ।
पुरश्चरणहीनोऽपि तथा मन्त्रप्रदायकः ॥
तस्मादादौ पुरश्चर्य्यां कुर्य्यात् साधकसत्तमः ।
नानाचारं न कर्त्तव्यं नोच्चारणमितस्ततः ॥
भूतहिंसा न कर्त्तव्या पशुहिंसा विशेषतः ।
बलिदानं विना देव्या हिंसा सर्वत्र वर्जिता ॥
अन्यमन्त्रपुरस्कारं निन्दाञ्चैव विवर्जयेत् ।
प्रयोगञ्च ततः कुर्य्यात् सर्वमेव च दुर्लभम् ॥
स्वतन्त्रेऽपि । दिवा लक्षं शुचिर्भूत्वा हविष्याशी जपेन्नरः ।
ततस्तु तद्दशांशेन होमयेद्धविषा प्रिये ! ॥
तीर्थतोयेन पयसा मधुना सर्पिषा दिवा ।
मधुना वासिता मिश्रतोयेन परमेश्वरि ! ॥
देवीञ्चाभिषिञ्चेत्तोयैस्तर्पणञ्च दशांशतः ।
तद्दशांशं हविष्यान्नं भोजयेद्भक्तितः प्रिये ! ॥
कालीमन्त्रविच्च विद्वान् दक्षिणां गुरवे ददेत् ।
पाशवं कथितं कल्पं शृणुष्वैवं ततः प्रिये ! ॥

फेत्कारिणीयेऽपि ।

भक्ष्यादिनियमाहारः सक्तद्रात्रौ विधीयते ।
दिवा चैव जपं कुर्य्यात् पौरश्चारणिको द्विजः ॥
शाकयावकभक्ष्याशी चरुणा सह सर्पिषा ।
दध्ना मूलफलैर्वापि कुर्य्याद्दर्शनमन्वहम् ॥
ब्रह्मचर्य्यं तथैवोक्तं स्नानं द्विवसनं तथा ।
पूर्वाह्णे देवतायाश्च पूजां कृत्वा विशेषतः ॥
सर्वे मन्त्राः प्रयोक्तव्याः प्रायश्च प्रणवादिकाः ।

वाराहीतन्त्रे च ।

न चात्र सिद्धिमाप्नोति हीने च प्रणवान्तरे ।
ठद्वयान्ते ठद्वयञ्च नमोऽन्ते च नमो न च ॥
वाक् चैव कामः शक्तिश्च प्रणवः श्रीश्च कथ्यते ।
तदाद्येषु च मन्त्रेषु प्रणवं नैव योजयेत् ॥
वैष्णवे प्रणवं दद्यात् शैवे शक्तिं नियोजयेत् ।
शक्तौ कामं गणेशे च रमाबीजं न्यसेत् पुरः ॥
सूर्य्यं चैव तदान्येषां तात्तीयं विनियोजयेत् ।
प्रणवाद्यं गृहस्थानां तच्छून्यं निष्फलं भवेत् ॥
आद्यन्तयोर्वनस्थानां यतीनां महतामपि ।
अनन्यचेता आसीनो वाग्यतो विहिताशनः ॥
जप्तव्या मूलमन्त्राश्च गुरुवन्दनपूर्वकम् ।

ताराप्रदीपे च ।

कूर्मचक्रमुखं वीक्ष्य चासनं तत्र कल्पयेत् ।
चैनाजिनकुशेष्वेव सुचित्रकम्बलेषु वा ॥
आसनानि प्रकल्प्याथ संविशेत् साधकोत्तमः ।
शरैर्वा कुशदर्भे वा न चर्मणि तथा पुनः ॥
महाशङ्खोपरि स्थित्वा साधयेद्वा प्रयत्नतः ।

अन्यत्रापि । देवतागुरुमन्त्राणामैक्यं सम्भावयन् धिया ॥
जपेदेकमनाः प्रातःकालमध्यान्दिनावधि ।
यावत्संख्यं समारब्धं तत् कर्त्तव्यमवश्यकम् ॥
यदि न्यूनाधिकं कुर्य्याद् व्रतभ्रष्टो भवेन्नरः ।

मुण्डमालायाम् ।

प्रातःकालं समारभ्य जपेन्मध्यन्दिनावधि ।
प्रथमेऽहनि यज्जप्तं तज्जप्तव्यं दिने दिने ॥
न्यूनाधिकं न जप्तव्यं आसमाप्तेः सदा जपेत् ।
संख्यापूर्णौ निजद्रव्यैर्जपसंख्यादशांशतः ॥
यथोक्तकुण्डे जुहुयाद् यथाविधि समाहितः ।
अथवा प्रत्यहं जप्त्वा जुहुयात्तद्दशांशतः ।
ततो होमदशांशन्तु जले संपूज्य देवताम् ॥

तर्पणादिकं कार्य्यमित्यादि । कुलसम्भवेऽपि ।

स्नातः शुक्लाम्बरधरः शुचिः प्रयतमानसः ।
दिवा चैवं प्रकर्त्तव्यं सर्वकामार्थसिद्धये ॥

ताराप्रदीपे च ।

विविच्य विधिवद्विद्वान् मण्डलं सुमनोहरम् ।
तस्मिन् कलसमारोप्य कायतोयैः प्रपूरयेत् ॥
निक्षिप्य नवरत्नानि तत्र गन्धाष्टकं पुनः ।
आवाह्य पूजयेत्तत्र देवीमावरणैः सह ॥
कलसाग्रे जपेत् मन्त्रं संख्यया पूरणावधि ।
ततः पूर्णं समागत्य गुरुर्देवो विधानतः ॥
अभिषिञ्चेत् शिष्यमूर्ध्नि कलसोदरवारिभिः ।
ततः शिष्यः प्रयत्नेन धनाद्यैस्तोषयेद्गुरुम् ॥

तथैवं विधिना लक्षं प्रजप्य तद्दशांशहोमं तद्दशांशतर्पणं तद्दशांशाभिषेकं तद्दशांशब्राह्मणभोजनं कारयेत् । तदशक्तौ

होमादिसंख्याद्विगुणजपो विप्रेण कार्य्यः। क्षत्रियेण त्रिगुणजपः वैश्येन चतुर्गुणजपः। शूद्रेण पञ्चगुणजपः कार्य्यः। तदुक्तं कुलप्रकाशे

यद्यदङ्गं विहीयेत तत्संख्याद्विगुणं जपम्।
कुर्वीत त्रिचतुःपञ्चसंख्यया साधकोत्तमः॥

अन्यत्रापि। होमकर्मण्यशक्तानां विप्राणां द्विगुणो जपः।
इतरेषाञ्च वर्णानां त्रिगुणादिः समीरितः॥
गुरुं सन्तोषयेदेवं मन्त्राः सिध्यन्ति मन्त्रिणः।

मुण्डमालायाञ्च—

होमाद्यशक्तो देवेशि! कुर्य्यात्तु द्विगुणं जपम्।
यदि पूज्याद्यशक्तः स्यात् द्रव्याभावेन सुन्दरि!॥
केवलं जपमात्रेण पुरश्चर्य्या विधीयते॥

अथात्र ब्राह्मणभोजनमवश्यमेव। तदुक्तं कुलप्रकाशे—

एकमङ्गं विहीयेत मन्त्रसिद्धिमवाप्नुयात्।
अन्नैश्चतुर्विधैर्देवि! पदार्थैः षड्रसैरपि॥
सुभोजितेषु विप्रेषु सर्वं हि सफलं भवेत्।
सम्यक्सिद्धैकमन्त्रस्य पञ्चाङ्गोपासनैव हि॥
सर्वे मन्त्राश्च सिध्यन्ति तत् प्रसादात् कुलेश्वरि!।

अन्यत्रापि। सर्वदा भोजयेद्विप्रान् कृतसाङ्गत्वसिद्धये।
विप्राराधनमात्रेण व्यङ्गं साङ्गं भवेत् सदा॥

तन्त्रान्तरेऽपि। कृत्वा मन्त्रजपं मन्त्री पुरस्काराय संयतः।
दशांशं जुहुयादग्नौ यथोक्तविधिना तु यः॥
यद्वा जपचतुर्थांशं स्वाहान्तं मूलमुच्चरन्।
ततो होमदशांशन्तु स्वाहान्तं तर्पयेज्जलैः॥
तर्पणस्य दशांशेन नमोऽन्तं मूलमुच्चरन्।
अभिषिञ्चेत् स्वमूर्द्धानं जलैः कुम्भाख्यमुद्रया॥

फेत्कारिण्यां—स्वाहान्तेनैव मन्त्रेण कुर्य्याद्धोमं वलिं तथा ।
मन्त्रान्ते नाम संयोज्य तर्पयामीति तर्पणम् ॥

इति पाशावकल्पः । अथ एकवीराकल्पे विशेषो यथा । तदुक्तं कुलचूड़ामणौ ।

पुरश्चरणकालेऽपि परयोषां प्रपूज्य च ।
दीक्षितां वस्त्रपुष्पाद्यैर्भोज्यैः पायससम्भवैः ॥
आरम्भकाले नियतं स्वयं पक्वान्नभोजनम् ।
नानाविधं पिष्टकञ्च नानारससमन्वितम् ॥
दुग्धं दधि घृतं तक्रं नवनीतं सशर्करम् ।
उपलाखण्डचूर्णञ्च नानाविधरसायनम् ॥
नारिकेलं कपित्थञ्च नागरङ्गं सुदर्शनम् ।
लिम्पाकं वीजपूरञ्च दाड़िमीफलमुत्तमम् ॥
नागरङ्गफलञ्चैव नानागन्धविलेपनम् ।
चन्दनं मृगनाभिञ्च श्रीखण्डं नवपल्लवम् ॥
टङ्कनं लोध्रकञ्चैव जलजं वनजं तथा ।
नानाशैलसमुद्भूतं नानालङ्कारभूषितम् ॥
शून्यगेहे समानीय अर्घ्योदकविभूषितम् ।
अमृतीकरणं कृत्वा शक्तीश्चाभिमुखं नयेत् ॥

शक्तिर्यथा । तदुक्तं तत्रैव ।

ब्राह्मणी क्षत्रिया वैश्या शूद्रा च कुलभूषणा ।
वेश्या नापितकन्या च रजकी योगिनी तथा ॥
विशेषवैदग्ध्ययुताः सर्वा एव कुलाङ्गनाः ।

अथ दीक्षिताष्टशक्तीः क्रमेण संस्थाप्य पूर्ववद्घटार्घ्यपात्रादिकं स्थापयित्वा अर्घ्योदकेन तामभ्युक्ष्य अमृतमन्त्रेण धेनुमुद्रया अमृतीकृत्य अष्टशक्तिरूपभेदं ज्ञात्वा ब्राह्मण्याद्यष्टशक्तीनां संज्ञादिनामकरणं क्रमेण कृत्वा आसनादिकं गन्धपुष्पं दद्यात् ।

तदुक्तं तत्रैव। अष्टकन्यारूपभेदं विलोक्यामर्षचेष्टितम्।
ब्राह्मण्याद्यष्टशक्तीनां नामभिः कृतसंज्ञकाः॥
आसनञ्च ततो दत्त्वा स्वागतञ्च पुनः पुनः।
अर्घ्यं पाद्यञ्च पानीयं मधुपर्कं जलं तथा॥
स्नापयेद्गन्धपुष्पाद्यैः केशसंस्कारमाचरेत्।
धूपयित्वा ततः केशान् कौशेयञ्च निवेदयेत्॥
ततः स्नानान्तरे पीठमास्तीर्य्य पादुकाद्वयम्।
दत्त्वा तत्र समासीनां नानालङ्कारभूषणैः॥
भूषयित्वाऽनुलेपञ्च गन्धं माल्यं निवेदयेत्॥

ततस्तां तां शक्तिं पूजाप्रकरणोक्तक्रमेण ध्यात्वा तासां मूर्ध्नि ब्रह्माण्यादिमातृः समावाह्य जीवन्यासादिकं गन्धपुष्पधूपदीपान् नानाद्रव्यानुरञ्जनादिकं दत्त्वा तासां सव्यकर्णे क्रमेण स्तोत्रं पठेत्। तदुक्तं तत्रैव।

तां तां शक्तिं समावाह्य मूर्ध्नि तासां समानयेत्।
भोज्यं मण्डपमध्ये तु स्वर्णपात्रे सुशोभने॥
चर्व्यं चोष्यं लेह्यं पेयं भक्ष्यं भोज्यं निवेदयेत्।
अदीक्षिता या स्तास्तत्र ततो मायां निवेदयेत्।
तासां सर्वेषु कर्णेषु ततस्तोत्रं समाचरेत्॥
मातर्देवि! नमस्तेऽस्तु ब्रह्मरूपधरेऽनघे!।
कृपया हर विघ्नं मे मन्त्रसिद्धिं प्रयच्छ मे॥
महेशि! वरदे! देवि! परानन्दस्वरूपिणि!।
कृपया हर विघ्नं मे मन्त्रसिद्धिं प्रयच्छ मे॥
कौमारि! सर्वविद्येशि! कुमारक्रीड़ने! परे!।
कृपयेत्यादि। विष्णुरूपधरे! देवि! विनतासुतवाहिनि!॥
कृपयेत्यादि। वाराहि! वरदे! देवि! दंष्ट्रोद्धृतवसुन्धरे!।
कृपयेत्यादि। शक्ररूपधरे! देवि! शक्रादिसुरपूजिते!॥

क्षपयेत्यादि । चामुण्डे ! मुण्डमालासृक्चर्चिते ! विघ्ननाशिनि ! ।
क्षपयेत्यादि । महालक्ष्मिर्महामाये ! क्षोभसन्तापनाशिनि ! ॥
क्षपयेत्यादि । पितृमातृमयि देवि ! पितृमातृवहिष्कृते ! ।
एके ! बहुविधे ! देवि ! दिव्यरूपे ! नमोऽस्तु ते ॥
एतत् स्तोत्रं पठेद् यस्तु कर्मारम्भेषु संयतः ।
बहुविघ्नान् समालोक्य तस्य विघ्नो न जायते ॥
कुलीनस्य द्वारदेवाः कथितास्तव पुत्रक ! ।
दीक्षाकाले नित्यपूजासमये नार्चयेद्यदि ॥
तस्य पूजाफलं वत्स ! नीयते यक्षराक्षसैः ।
आचम्य मुखवासादिताम्बूलञ्च निवेदयेत् ॥
ततो दद्यात् पुनर्माल्यं गन्धचन्दनपङ्कितम् ।
विसृज्य प्रदक्षिणीकृत्य वरं प्रार्थ्य सुखी भवेत् ॥
अन्या यदि न गच्छन्ति निजकन्या निजानुजा ।
अग्रजा मातुलानी वा माता वा तत्सपत्निका ॥
वयसो जातितो वापि हीना वा परमा कला ।
पूज्या कुलवरैः सर्वैर्निजाहङ्कारवर्जितैः ॥
सर्वाभावे एकतरा पूजनीया प्रयत्नतः ।
संस्कृतासंस्कृता वापि सपतिर्निष्पतिश्च या ॥
पूर्वाभावे परा पूज्या मदंशयोषितो यतः ।
एकश्चेत् कुलशास्त्रज्ञः पूजार्हस्तत्र भैरव ! ॥
सर्वे सुरादयः पूज्याः सत्यं ब्रह्मशिवादय ।
एका चेत् युवती तत्र पूजिता चावलोकिता ॥
सर्वा एव परादेव्यः पूजिताः कुलभैरव ! ।
आदावन्ते च मध्ये च लक्षपूर्त्तौ विशेषतः ॥
न पूजयति चेत् कान्तां तदा विघ्नैर्विलुप्यते ।
पूर्वार्जितफलं नास्ति का कथा परजन्मनि ॥

तस्मात् सर्वप्रयत्नेन यदीच्छेदात्मनो हितम् ।
ममापि क्रोधसन्तापशमनं विघ्ननाशम् ॥
यत्नतः पूजनीयाः स्युः कुलाकुलजनाः सुत ! ।

अथैतेन क्रमेण लक्षजपादौ मध्ये अन्ते च शक्तीः पूजयेत्। ततो रात्रौ प्रथमप्रहरगते पञ्चमेनैव देवीं संपूज्य गुरुं शिरसि हृदि देवीञ्च ध्यात्वा शिवोऽहमिति भावयन् जपं कुर्य्यात् तृतीयप्रहरं यावत् । तदुक्तं मुण्डमालायाम् ।

गते तु प्रथमे यामे तृतीयप्रहरावधि ।
निशायाञ्च प्रजप्तव्यं रात्रिशेषे जपेन्न हि ॥

स्वतन्त्रेऽपि ।

रात्रौ मांसासवैर्देवीं पूजयित्वा विधानतः ।
ततो नग्नां स्त्रियं नग्नो रमन् क्लेदयुतोऽपि वा ॥
जपेल्लक्षं ततो देवि ! होमयेत् ज्वलितानले ।
योनिकुण्डे स्थिते सर्पिर्मांसमत्स्ययुतं भृशम् ॥
दशांशं तर्पयेन्मद्यैर्मांसमिश्रैः सुसाधकः ।
तर्पणस्य दशांशन्तु अभिषिच्य जगन्मयीम् ॥
दशांशं भोजयेत् साधु साधकं कालिकाप्रियम् ।
मद्यं मांसञ्च मत्स्यञ्च चर्वणञ्च प्रदापयेत् ॥
ततस्तु तोषयेद्भक्त्या गुरुं स्वर्णादिभिः प्रिये ! ।
एतत् कल्पद्वयाद्देवि ! मन्त्रैः सिध्यति निश्चितम् ॥
विना पीत्वा सुरां भुक्त्वा मांसं गत्वा रजस्वलाम् ।
यो जपेद्दक्षिणां देवीं तस्य दुःखं पदे पदे ॥

कालीतन्त्रेऽपि ।

तर्पणस्य विधिं वक्ष्ये येन कार्य्याणि साधयेत् ।
तर्पयेच्च पयोभिश्च रक्तधारायुतैस्तथा ॥
मज्जाभिश्च तथा तद्वत् स्वकीयेन कचेन च ।

आकर्षितायाः कन्यायाः कुलप्रक्षालनेन च ॥
मेषमाहिषरक्तेन नररक्तेन चैव हि।
मूषमार्जाररक्तेन तर्पयेत् परदेवताम् ॥
एवं तर्पणमात्रेण साक्षात् सिद्धीश्वरो भवेत्।
कविता जायते तस्य द्राक्षारसपरम्परा ॥
वृहस्पतिसमो भूत्वा दिविवद्भुवि मोदते।
न तस्य पापपुण्यानि जीवन्मुक्तो भवेद्ध्रुवम् ॥

उत्तरतन्त्रेऽपि।

योनिरूपं हि कुण्डं वै कृत्वा वितस्तिमात्रतः।
हस्तविस्तारितस्तावत् कृत्वा चापि तथाप्यधः ॥
तत्र कार्य्या हि मन्त्रेण अग्निस्थापनिका क्रिया।
महाकालाय देवाय दद्याच्च प्रथमाहुतिम् ॥
एवमाद्येन मांसेन भक्तेन रुचिरेण च।
कृष्णपुष्पेण साज्येन सरक्तेन विशेषतः ॥
आमिषादिभिरप्येवं श्मशाने जुहुयात् सुधीः ॥

कुलसम्भवेऽपि।

रात्रौ नग्नो मुक्तकेशो मैथुनेनापि तत्त्वतः।
प्रकर्त्तव्यं प्रयत्नेन सर्वकामार्थसिद्धये ॥
द्विजानां चैव सर्वेषां दिवा विधिरिहोच्यते ॥
शूद्राणाञ्च तथा प्रोक्तं रात्राविष्टं महाफलम्।
यद्यत् कामयते कामं तत्तदाप्नोति नित्यशः ॥

कालिकाश्रुतौ च। अथ हैनां कालिकामनुजापी यः सदा।
श्रद्धाज्ञानवैराग्ययुक्तः शाम्भवदीक्षासु रतः।
शाक्तेषु वा दिवा ब्रह्मचारी रात्रौ नग्नो मैथुनासक्तमानसः।

जपपूजादिनियमो योषित्सु प्रियकरः सुभगोदकेन तर्पणम्। तेनैव पूजनं सर्वदा कालीरूपमात्मानं विभावयेत्। स

शान्तो भवति। सर्वंहत्यां तरते। अथ पञ्चमसर्वयोषि-दाकारेण सर्वमाप्नोति विद्यां पशुं धनं धान्यं सर्वशक्तिञ्च कवित्वञ्च नान्यः परमः पन्था विद्यतेऽतो मोक्षाय ज्ञानाय धर्माय तत्सर्वं भूतं भव्यं यत्किञ्चिद्दृश्यादृश्यमानं स्थावरजङ्गमं तत्सर्वम्। कालिकातन्त्रे तु, तत् प्रोक्तं वैदिकश्रुति मनुजापी स पाप्मानं तरति। स तु अगम्यागमनं तरति। स भ्रूणहत्यां सर्वपापं तरति। सर्वसुखमाप्नोति सर्वं जानाति सर्वन्यासी तरति भवति स विविक्तो भवति सर्ववेदाध्यायी भवति स सर्व-जापी भवति स सर्वशास्त्रार्थवेत्ता भवति सर्वयज्ञाधिकारी भवति। अरयो मित्रभूता भवन्ति। इत्याह भगवान् शिवः। निर्विकल्पेन मनसा यः सर्वं करोति अथैवं पुरश्चरणशीलः प्रयो-गार्हो भवति। अथादौ शक्तिशुद्धिर्विलिख्यते। अदीक्षिताङ्गना-सङ्गात् निन्दाश्रुतेः। तदुक्तं भावचूड़ामणौ—

अदीक्षिताङ्गनासङ्गात् सिद्धिहानिः प्रजायते।
तत्कथाश्रवणे श्रद्धा तत्तल्पागमनं यदि।
स कुलीनः कथं देवीं पूजयेत् परमेश्वरीम्॥

श्रीक्रमेऽपि।

संशोधनमनाचर्य्य स्त्रीषु मर्त्त्यांषु साधकः।
कृतेऽपि सिद्धिहानिः स्यात् क्रुद्धा भवति चण्डिका॥

तस्मात् शक्तिशुद्धिः कार्य्या। तदुक्तं कौलतन्त्रे।

अभिषेकाद् भावशुद्धिर्मन्त्रस्योच्चारणात् शुचिः।
रतिकाले महेशानि! दीक्षादानेन कन्यका॥
सुरया रेतसा वापि जलेन मनुनाथवा॥
सम्भोगेऽभिषिञ्चेन्नारीं रण्डां वा मन्त्रवर्जिताम्।
आदौ वालां समुच्चार्य्य त्रिपुराञ्च समुच्चरेत्॥
नमःशब्दं समुच्चार्य्य इमां कान्तां ततो वदेत्।

पवित्रीकुरु शब्दान्ते मम शक्तिं कुरु प्रिये ! ॥
वह्निजायां समुच्चार्य्य शुद्धिमन्त्रं सुरेश्वरि ! ।
अनेन मनुना देवि ! अभिषिक्ताः स्त्रियः सदा ।
रममाणो भ्रमेन्नित्यं सर्वसिद्धिमवाप्नुयात् ॥
इह लोके परं भोगं भुक्त्वा सिद्धिमवाप्नुयात् ॥

अन्यत्रापि । आनीय कन्यकां दिव्यां घृणालज्जाविवर्जिताम् ।
स्वकान्तां परकान्तां वा दीक्षितां यौवनान्विताम् ॥
पूजकः पूजयेन्नित्यं वामपार्श्वे निवेश्य च ।
स्वीयकल्पोक्तविधिना न्यासजालं प्रविन्यसेत् ॥
ततो जपेत् स्त्रियं गच्छन् देवीं त्रिभुवनेश्वरीम् ।

शक्तौ विशेषो यथा कुमारीतन्त्रे ।

नटी कपालिनी वेश्या रजकी नापिताङ्गना ॥
ब्राह्मणी शूद्रकन्या च तथा गोपालकन्यका ।
मालाकारस्य कन्यापि नवकन्याः प्रकीर्त्तिताः ॥
एतासु काञ्चिदानीय ततस्तद्योनिमण्डले ।
पूजयित्वा महादेवीं ततो मैथुनमारभेत् ॥
धर्म्माधर्म्महविर्दीप्ते आत्माग्नौ मनसा स्रुचा ।
सुषुम्नावर्त्मना नित्यमक्षवृत्तीर्जुहोम्यहम् ॥
स्वाहान्तोऽयं महामन्त्र आरम्भे परिकीर्त्तितः ।
ततो जपेत् स्त्रियं गच्छन् देवीं त्रिभुवनेश्वरीम् ॥
प्रकाशाकाशहस्ताभ्यामवलम्ब्य महीस्रुचम् ।
धर्म्माधर्म्मकलास्नेहपूर्णमग्नौ जुहोम्यहम् ॥
स्वाहान्तोऽयं महामन्त्रः शुक्रत्यागे प्रकीर्त्तितः ।

अथास्य प्रयोगः । निशायां शक्तिं पूर्वोक्तां स्ववामभागे समानीय तस्या गात्रे स्वकल्पोक्तन्यासान् विधाय, अदीक्षिता चेत्तदा पूर्वोक्ताभिषेकमन्त्रेण तीर्थादिना अभिषेकं कृत्वा तस्याः

कर्णे अभेदबुद्ध्या मन्त्रमुच्चारयेदिति शक्तिशुद्धिः। ततो मकारपञ्चमेन देवीं संपूज्य मूलान्ते धर्माधर्मेत्यादि पठन् मातृपीठे पितृमुखं दत्त्वा जपं कुर्य्यात्। ततो मूलान्ते प्रकाशाकाशेत्यादि पठन् तत्त्वमुत्सृजेत्। अथवा मातृपीठ पितृमुखं दत्त्वा जपं कुर्य्यात्। सावरणां देवीं ध्यात्वा शिवोऽहमिति भावयन् उभयोः सङ्गमं कृत्वा पूर्ववज्जपादिकं कुर्य्यादित्यपरप्रकारः।

इति श्यामारहस्ये पञ्चमः परिच्छेदः।

अथ षष्ठः परिच्छेदः।

अथ मन्त्रभेदाः निरूप्यन्ते। तदुक्तं सिद्धेश्वरतन्त्रे।

अथ वक्ष्यामि ते देवीं कालिकां भवदुःखहाम्।
यां ज्ञात्वा साधको भोगान् भुक्त्वा मोक्षमवाप्नुयात्॥
मूकोऽपि कवितामेति धनेन च धनाधिपः।
बलेन पवनः साक्षात् रूपेण च मनोहरः॥
मन्त्रोद्धारं शृणुष्वेमं गुह्याद् गुह्यतरं प्रिये।
खान्तादिवह्निमारूढं वामनेत्रेण संयुतम्॥
चन्द्रार्द्धविन्दुना मूर्ध्नि भूषितं परमेश्वरि।
खान्तादि वामनेत्रस्थं वह्निचन्द्रसमन्वितम्॥
वीजरत्नमिदं प्रोक्तं साक्षात् कल्पद्रुमं प्रिये।
मादनं चन्द्रवीजस्थं भूतस्वरसमन्वितम्॥
चन्द्रार्द्धविन्दुभूषाढ्यं सम्पूर्णं सिद्धिदं मनुम्।
अस्यैवाशेषमाहात्म्यं वक्तुं नाहं महेश्वरि॥
तथापि कथ्यते देवि! संक्षेपादस्य यत्फलम्।

मोक्षार्थी लभते मोक्षं कैवल्यं परमं पदम् ॥
देवीरूपं जगत् पश्येत् द्वैधं तत्र विवर्जयेत् ॥

अथ मन्त्रान्तरं तत्रैव तदुक्तम् ।

मन्त्रान्तरं प्रवक्ष्यामि शृणु पार्वति ! सादरम् ।
यस्याराधनमात्रेण सर्वसिद्धीश्वरी भवेत् ॥
अप्रकाश्यं परं गुह्यं न देयं यस्य कस्यचित् ।
न कुत्रापि समाख्यातं तव स्नेहादिहोच्यते ॥
पूर्वोक्तमन्त्रराजस्य शेषवर्णद्वयं प्रिये ! ।
संहारसृष्टिमार्गेण बन्धुभ्योऽपि न दर्शयेत् ॥
मन्त्रस्य स्मरणादेव सकृदप्यस्य सुन्दरि ! ।
कोटिजन्मार्जितं पापं तत्क्षणादेव नश्यति ॥
न कुत्रापि समाख्यातं तव स्नेहादिहोच्यते ।
पूर्वोक्तमन्त्रराजस्य शेषवर्णद्वयं प्रिये ! ॥
संहारसृष्टिमात्रेण मूकः काव्यं करोति च ।
तस्य दर्शनमात्रेण वादिनो मूकसंकुलाः ॥
द्वन्द्वभावं परित्यज्य किमन्यद्बहुजल्पितैः ।
यद्यत् प्रार्थयते चित्ते तत्तदाप्नोति नित्यशः ॥
ऋषिः स्याद्भैरवो देवोऽनुष्टुप्छन्दः प्रकीर्त्तितम् ।
देवता कालिका प्रोक्ता चतुर्वर्गफलप्रदा ॥
ध्यानमस्याः प्रवक्ष्यामि शृणु पार्वति ! सादरम् ॥
नीलेन्दीवरसन्निभां त्रिनयनामापीनतुङ्गस्तनीम्
भास्वन्मौलिकिरीटभोगिलसनां वीणां भुजैर्बिभ्रतीम् ।
खड्गं मुण्डवराभयां स्मितमुखीं मोहान्धकारापहाम्
ध्यायेत् सम्यगनाकुलेन मनसा प्रेतासनां कालिकाम् ॥
एवं ध्यानपरो देवि ! सर्वान् कामानवाप्नुयात् ।
उक्तपीठे महेशानि ! ततः पूजां समाचरेत् ॥

रात्रौ द्वितीययामे च अशक्तौ दिवसेऽपि च ।
हेमादिपात्रमादाय कुर्य्यान्मन्त्रं विचक्षणः ॥
अष्टपत्रं लिखेत् पद्मं चतुर्द्वारसुशोभितम् ।
तन्मध्ये त्रिस्त्रिकोणं स्यात्तन्मध्ये विलिखेन्मनुम् ॥

अथ दक्षिणावत् प्रातःकृत्यादि व्यापकन्यासं समाचरेत् । तत्र विशेषो यथा तत्रैवोक्तम् ।

आचान्तो मूलमन्त्रेण शिखां बद्ध्वा तु मन्त्रतः ।
स्वाहान्तं मूलमुच्चार्य्य सर्ववश्यकरीति च ॥
मनुमानेन देवेशि ! शिखाबन्धनमाचरेत् ।
तत उक्त्वा मूलमन्त्रं सर्वशुद्धिं समानय ॥
अनेन मनुना देवि ! स्थानशुद्धिं समाचरेत् ।
षड्दीर्घयुक्तेनाद्येन षडङ्गानि न्यसेद्बुधः ॥

ततो यन्त्रं निधाय दक्षिणावत् पीठपूजां कुर्य्यात् किन्तु पीठशक्तौ विशेषः । तदुक्तं तत्रैव ।

ब्रह्माणीं मङ्गलां दुर्गां जयन्तीं विजयां जयाम् ॥
वाराहीं भुवनेशीञ्च प्रागादिषु च दिक्षु च ।
संपूज्य गन्धपुष्पैस्तु देवीं ध्यायेत् समाहितः ॥
गन्धाद्यैरर्चयेन्मन्त्री आत्मानं देवतामयम् ।
श्वासमार्गक्रमेणैव यन्त्रमध्ये तु साधकः ॥
समानीय ततो देवीं तत्रावाह्य च मुद्रया ।
प्राणप्रतिष्ठां कृत्वा तु पाद्यादिभिस्तथार्चयेत् ॥
अनुलेपं प्रयत्नेन दद्याद्गन्धादिभिर्युतम् ।
नानाविधञ्च नैवेद्यं पायसं शर्करायुतम् ॥
दद्यात् प्रयत्नतो मन्त्री बलिञ्चैव विधानतः ।
षडङ्गानि प्रपूज्याथ तथैवावरणं यजेत् ॥
त्रिकोणे पूजयेद्देवीं कामाख्यां भद्रकालिकाम् ।

त्रिपुराञ्च समभ्यर्च्य वामावर्त्तक्रमेण तु॥
उग्रचण्डां प्रचण्डाञ्च भैरवीञ्चापरे त्रिके।
माहेश्वरीं महादुर्गां वैष्णवीञ्चापरे त्रिके॥
ततोऽष्टदलपत्रे तु ब्राह्म्याद्याः पूजयेत् क्रमात्।
पश्चाद्वहिः समभ्यर्च्य भैरवाष्टकमेव च॥
तद्वहिश्चापि देवेशि! दिक्पालांस्तु समर्चयेत्।
स्वाहान्तेनैव मूलेन देवीं सावरणां ततः॥
पश्चाद्यैरर्चयित्वा तु यथाशक्ति जपं चरेत्।
एवं पूजापरो देवि! साधको विजितेन्द्रियः॥

एवं क्रमेण लक्षं प्रजप्य तद्दशांशं होमादिकं कुर्य्यात्। एतत् प्रमाणमेकाचर्य्याः कल्पेऽपि लिखितमेव। तत्तु अग्रे लिखिष्यामः। अथान्यः प्रकारः। तदुक्तं कालिकाश्रुतौ। अथ सर्वां विद्यां प्रथममेकं द्वयं त्रयं वा नामत्रयपुटितं वा कृत्वा जपेत्। गतिस्तस्यास्तीति नान्यस्य इह गतिः। ओं सत्यं तत् सत्।

अथ हैनं गुरुं परितोष्य गोभूहिरण्यादिभिर्गृह्णीयात् मन्त्रराजम्। गुरुः शिष्याय सत्कुलीनाय विद्याभक्ताय शुश्रूषवे मन्त्रं दत्त्वा स्वयं परिपूज्य निशायां विहरेत्। एकाकी शिवगेहे लक्षं तदर्द्धं वा जप्त्वा मन्त्रं दद्यात्। ओं तत् सत्। सत्यं नान्यप्रकारेण सिद्धिर्भवतीह कालिकामनोर्वा भावनेति त्रिपूर्वा मनोर्वा सर्वस्य दुर्गामनोर्वा स्वयं शिवोपरि। ओं तत् सत् इति सर्वाविद्यामिति पूर्वोक्तद्वाविंशत्यक्षर्य्याः प्रथमवीजं वा वीजद्वयं वा वीजत्रयं वा केवलनाम वा वीजत्रयपुटितं नाम वा जपेदित्यर्थः।

कालीहृदयविद्याञ्च सिद्धविद्यां महोदयाम्।
पुरा थेन यथा जप्त्वा सिद्धिमापुर्दिवौकसः॥

कामाक्षरं वह्निसंस्थमिन्दिरानादविन्दुभिः ।
मन्त्रराजमिदं ख्यातं दुर्लभं पापचेतसाम् ॥
सुलभं पुण्यचित्तानां साधकानां महात्मनाम् ।
त्रिगुणा तु विशेषेण सर्वशास्त्रे प्रबोधिका ॥
अनया सदृशी विद्या अनया सदृशो जपः ।
अनया सदृशी पूजा न हि सारस्वतप्रदा ॥
आकर्षण-वशीकारमारणोच्चाटनं तथा ।
शान्तिपुष्ट्यादिकर्माणि साधयेदनयाचिरात् ॥
किं वक्तव्यमजेनापि वर्णितुं नैव शक्यते ।
जिह्वाकोटिसहस्रैस्तु वक्त्रकोटिशतैरपि ॥
अनया सदृशी विद्या अनया सदृशो जपः ।
अनया सदृशं ज्ञानं न भूतं न भविष्यति ॥
ध्यानपूजादिकं सर्वंससाधनपुरस्क्रियाम् ।
अनिरुद्धसरस्वत्याः समानां समुदीरयेत् ॥

अथ कुलचूड़ामणौ ।

ब्रह्मा सरस्वती गुप्तो देवतासुखसंयुता ।
वीजव्यक्तिसमाकीर्णः कालीमन्त्र उदाहृतः ॥
एकं वा द्विगुणं वापि त्रिगुणं वापि भैरव ! ।
जप्त्वा कर्षयति स्वैरं स्थावरं जङ्गमादिकम् ॥
एषा गुह्या महाकाली गुह्याद् गुह्यतरा स्मृता ।

सिद्धेश्वरतन्त्रे च ।

शृणु देवि ! प्रवक्ष्यामि एकाक्षरमनुं प्रिये ! ।
यस्य विज्ञानमात्रेण जीवन्मुक्तश्च साधकः ॥
गुह्याद् गुह्यतरं मन्त्रं न देयं प्राणसंशये ।
खान्तं हि वह्निमारूढं सव्येतरदृगन्वितम् ।
चन्द्रविन्दुसमायुक्तं परं गुह्यं महेश्वरि ! ॥

अथ विशेषो यथा ।

तदुक्तं कुलचूड़ामणौ ।

पूर्वं वीजं ततः शक्तिं वीजेन मूर्त्तिकल्पना ।
षड् दीर्घभाजा वीजेन कुर्य्यादङ्गानि नामतः ॥

अथास्या ध्यानं यथा ।

तदुक्तं तत्रैव ।

ध्यायेत् कालीं करालास्यां दंष्ट्राभीमविलोचनाम् ।
स्फुरच्छवकरश्रेणीकृतकाञ्चीं दिगम्बरीम् ॥
वीरासनसमासीनां महाकालोपरि स्थिताम् ।
श्रुतिमूलसमाकीर्णसृक्कणीं चण्डनादिनीम् ॥
मुण्डमालागलद्रक्तचर्च्चितां पीवरस्तनीम् ।
मदिरास्वादनास्फालकम्पिताखिलमेदिनीम् ॥
वामहस्ते खड्गमुण्डधारिणीं दक्षिणे करे ।
वराभययुतां घोरवदनां लोलजिह्विकाम् ॥
शकुन्तपक्षसंयुक्तबालकर्णविभूषणाम् ।
शिवाभिर्घोररावाभिः सेवितां प्रणयोदिताम् ॥
चण्डहासचण्डनादचण्डास्फालैश्च भैरवैः ।
गृहीत्वा नरकङ्कालं जयशब्दपरायणैः ॥
सेवितां किल सिद्धौघै र्मुनिभिः सेवितां तथा ।
एवं तां कालिकां ध्यात्वा पूजयेत् कुलनायकः ॥
सर्वसिद्धिप्रदा देवी हेलयापि च चिन्तिता ।
ततः सा दक्षिणा नाम्ना त्रिषु लोकेषु गीयते ॥

स्वतन्त्रेऽपि ।

ध्यानं शृणु वरारोहे ! साधकानां सुदुर्लभम् ।
शवारूढ़ां महाभीमां घोरदंष्ट्रां वरप्रदाम् ॥
हास्ययुक्तां त्रिनेत्राञ्च कपालकर्त्तिकाकराम् ।

मुक्तकेशीं लोलजिह्वां पिबन्तीं रुधिरं मुहुः ॥
चतुर्बाहुयुतां देवीं वराभयकरां स्मरेत् ॥ इति ॥

अथास्याः पूजनम्। सिद्धेश्वरतन्त्रमतेन दक्षिणावत् किन्तु अव्यवहितविद्यावदिति। तदुक्तम्।

ऋषिन्यासं पूजनञ्च देव्यास्तु पूर्ववद्भवेदिति।

पुरश्चरणेऽपि लक्षसंख्यजपः कार्य्यः। तदुक्तं तत्रैव।

एवं ध्यात्वा जपेन्मन्त्रं लक्षमेकं विधानतः।
तद्दशांशं विधानेन ततो होमादिकल्पनम् ॥
पूर्वोक्तमन्त्रराजस्य जपमेवं वरानने!।
अथान्यत् संप्रवक्ष्यामि कालिकामन्त्रमुत्तमम् ॥
येन विज्ञानमात्रेण जीवन्मुक्तश्च साधकः।
स्कन्धारूढमहाकाली शिवादीश्वरसंयुता ॥
चन्द्रार्द्धविन्दुनाक्रान्ता तत्परोज्वलनाक्षरम्।
नानाविन्दुकलासार्द्धं महामन्त्रोदितः प्रिये! ॥
इन्द्रारूढदिवानाथो भगतूर्य्यः स्वरान्वितः।
कलाविन्दुसमायुक्तः कथितः कामतः प्रिये! ॥
गोप्तव्योऽयं महामन्त्रो न देयो यस्य कस्यचित्।
गुरुभक्ताय शान्ताय दद्याद्दान्ताय चैव हि ॥
ध्यानं पूजादिकं देवि! सर्वं पूर्ववदाचरेत्।
एकलक्षेण सिद्धिः स्यात् पुरश्चरणकर्मणि ॥ इति।

अथ प्रकारान्तरं तदुक्तं कालीतन्त्रे

अथातः संप्रवक्ष्यामि मन्त्रं कल्पद्रुमं परम्।
येन जप्तेन विधिवत् सिद्धयोऽष्टौ भवन्ति हि ॥
अस्य स्मरणमात्रेण पलायन्ते महापदः।
यस्य स्मरणमात्रेण वाचस्विन्नायते नृणाम् ॥
अज्ञानादमरत्वञ्च लभेन्मुक्तिं चतुर्विधाम्।

ये जपन्ति परां देवीं नियमेन च संस्थिताः ॥
देवास्तांस्तु नमस्यन्ति किं पुनर्मानवादयः ।
बृहस्पतिसमो वाग्मी धनैर्धनपतिर्भवेत् ॥
कामतुल्यश्च नारीणां रिपूणां स यमोपमः ।
तस्य पादाम्बुजद्वन्द्वं राज्ञां किरीटभूषणम् ।
तस्य भूतिं विलोक्यैव कुबेरोऽपि तिरस्कृतः ॥
य एनां चिन्तयेद्देवीं नियतः पितृकानने ।
तस्य चाज्ञाकराः सर्वे सिद्धयोऽष्टौ भवन्ति हि ॥
तस्यैव जननी धन्या पिता तस्य सुरोपमः ।
संप्रदायी च वक्ता स य एनां वेत्ति तत्त्वतः ॥
अस्य विज्ञानमात्रेण कुलकोटीः समुद्धरेत् ।
नन्दन्ति पितरः सर्वे गाथां गायन्ति ते मुदा ॥
अपि नः स कुले कश्चित् कुलज्ञानी भविष्यति ।
स धन्यः स च विज्ञानी स कविः स च पण्डितः ॥
स कुलीनः स च क्रती स वशी स च साधकः ।
स ब्राह्मणः स वेदज्ञः सोऽग्निहोत्री स दीक्षितः ॥
स तीर्थसेवी पीठानां स निवासी स सर्वदः ।
स सोमपायी स व्रती स यज्वा स परन्तपः ॥
स सन्न्यासी स योगी च स मुक्तो ब्रह्मविच्च सः ।
स वैष्णवः स शैवश्च स सौरः स च गाणपः ॥
स च विज्ञानवेत्ता च य एनां वेत्ति तत्त्वतः ।
तस्मात् सर्वप्रयत्नेन सर्वावस्थासु सर्वदा ॥
एनां ध्यात्वा जपेन्मन्त्री मुक्तमोक्षमवाप्नुयात् ॥
विद्यारत्नं प्रवक्ष्यामि श्रुत्वा कर्णावतंसवत् ।
मायाद्वन्द्वं कूर्चयुग्मं मेत्रान्तं मादनत्रयम् ॥
मायाविन्द्वीश्वरयुतं दक्षिणे कालिके पदम् ।

संहारक्रमयोगेन वीजसप्तकमुद्धरेत् ॥
एकविंशत्यक्षराख्यस्ताराद्यः कालिकामनुः ।
पूर्वोक्तमन्त्रराजस्य कुर्य्यात् पूजां विचक्षणः ॥
भैरवतन्त्रेऽपि । मायाद्वयं कूर्चयुग्मं मैत्रान्तं मादनत्रयम् ।
मायावह्नीश्वरयुतं दक्षिणे कालिके पदम् ॥
संहारक्रमयोगेन वीजसप्तकमुद्धरेत् ।
एकविंशत्यक्षराख्यस्ताराद्यो विश्वपूजितः ॥
आकाशं वामकर्णेन युतं विन्दुविभूषितम् ।
चतुर्थवीजमाख्यातं त्रैलोक्यवशकारणम् ॥
स्वाहान्तश्च त्रयोविंशत्यक्षरो मन्त्रराजकः ।
विंशत्यर्णा महाविद्या स्वाहा प्राणविवर्जिता ।
ध्यानपूजादिकं सर्वं दक्षिणावदुपाचरेत् ॥
सिद्धसारस्वततन्त्रेऽपि ।
शृणु देवि ! प्रवक्ष्यामि कालिकामन्त्रमुत्तमम् ।
मायाद्वयं कूर्चयुग्मं मैत्रान्तं मादनत्रयम् ॥
मायाविन्द्वीश्वरयुतं दक्षिणे कालिके पदम् ।
संहारक्रमयोगेन वीजसप्तममुद्धरेत् ॥
द्वाविंशत्यक्षरी विद्या वह्निजायान्विता शुभा ।
कालिकाया महाविद्या सिद्धिदा भुवनत्रये ॥
मायावीजैः षडङ्गानि महादेव्याः प्रकल्पयेत् ।
भैरवो हि ऋषिश्छन्दोऽनुष्टुप् काली च देवता ॥
अथ अन्यप्रकारम् । तदुक्तं कालीतन्त्रे ।
अथ वक्ष्ये महाविद्यां सिद्धविद्यां महोदयाम् ।
ईश्वरेण पुरा प्रोक्तां देवीहृदयसंस्थिताम् ॥
अस्या ज्ञानप्रभावेण कलयामि जगत्त्रयम् ।
प्रणवं पूर्वमुच्चार्य्य हृल्लेखावीजमुद्धरेत् ॥

रतिबीजं समुद्धृत्य प्रपञ्चमभगान्वितम्।
ठद्वयेन समायुक्ता विद्याराज्ञी प्रकीर्त्तिता॥
अनया सदृशी विद्या कालीतन्त्रे सुगोपिता।
बीजञ्च बीजमस्याश्च ह्लल्ले खा शक्तिरुच्यते॥
षड्दीर्घमायाबीजेन प्रणवाद्येन कल्पयेत्।
अष्टाङ्गकं ततोऽन्यस्य ध्यात्वा देवीं शिवो भवेत्॥
खड्गोद्भिन्नेन्दुबिम्बस्रवदमृतरसप्लाविताङ्गी त्रिनेत्रा
सव्ये पाणौ कपालाद्गलदसृजमथो मुक्तकेशी पिबन्ती।
दिग्वस्त्रा बद्धकाञ्ची मणिमयमुकुटाद्यैः संयुता दीप्तजिह्वा
पायान्नीलोत्पलाभा रविशशिविलसत्कुण्डला लीढ़पादा॥
जपेद्विंशतिसाहस्रं सहस्रैकेण संयुतम्।
होमयेत्तद्दशांशेन मृदुपुष्पेण मन्त्रवित्॥
त्रिकोणं कुण्डमासाद्य सिद्धविद्यः शिवो भवेत्।
पूजनञ्च प्रयोगञ्च दक्षिणावदुपाचरेत्॥
एकाक्षर्य्या महाकल्पसमानं सर्वमेव वा।
रक्तपद्मस्य होमेन साक्षाद्वैश्रवणो भवेत्॥
बिल्वपत्रस्य होमेन राज्यं भवति निश्चितम्।
रक्तप्रसूनहोमेन वशयेदखिलं जगत्॥
पीतपुष्पस्य होमेन स्तम्भयेत् विश्वमप्यथ।
मालतीपुष्पहोमेन साक्षाद्वाक्पतिसन्निभः॥
कृष्णपुष्पस्य होमेन शत्रून् मारयतेऽचिरात्।
अत्र सर्वस्य होमेन संख्या स्यादयुतं किल॥
अस्याः स्मरणमात्रेण महापातककोटयः।
सद्यः प्रलयमायान्ति साधकः खेचरो भवेत्॥
अथ कालिकामन्त्रान्तरं तदुक्तं स्वतन्त्रे।
श्मशानकालिकामन्त्रं शृणुष्वावहिता शिवे!।

वाणीं मायां ततो लक्ष्मीं कामवीजं ततःपरम् ॥
कालिका संपुटत्वेन चतुष्कं वीजमालिखेत्।
एकादशार्णा देवेशि ! चतुर्वर्गप्रदायिनी ॥
ऋषिर्भैरवश्छन्दो देवता कालिका परा ।
श्मशानाद्या च यां माये वीजशक्ती महेश्वरि । ॥
कीलकं कामवीजन्तु शृणु पूजाविधिं प्रिये ! ।
चतुर्द्विस्त्रिश्चतुर्वर्णैर्विद्यामन्त्रं षडङ्गकम् ॥
विन्यस्य ध्यानं कुर्वीत कालिकायाः समाहितः ।
अञ्जनाद्रिनिभां देवीं श्मशानालयवासिनीम् ॥
त्रिनेत्रां मुक्तकेशीञ्च शुष्कमांसातिभीषणाम्।
पिङ्गाक्षीं वामहस्तेन मद्यपूर्णकपालकम् ॥
सद्यः कृत्तशिरो दक्षहस्तेन दधतीं शिवाम् ।
स्मितवक्त्रां सदा चाममांसचर्वणतत्पराम् ॥
नानालङ्कारभूषाङ्गीं नृत्योन्मत्तां सदासवैः ।
एवं ध्यात्वा जपेद्देवीं श्मशाने तु विशेषतः ॥
गृहे वापि गृहस्थश्च मत्स्यैर्मांसैः सुशोभनैः ।
नग्नो भूत्वा महापूजां कुर्य्याद्रात्रौ विशेषतः ॥
पद्मं चाष्टदलं वृत्तं तद्वाह्ये धरणीतलम् ।
चतुर्द्वारसमायुक्तं मध्ये मूलं समालिखेत् ॥
दलेष्वष्टासु विलिखेत् कवर्गाद्यष्टवर्गकम् ।
धरण्यां विलिखेदाद्यं चतुष्कञ्च चतुष्ककम् ॥
पूर्वादि चोत्तरान्ताशां मध्ये देवीं प्रपूजयेत् ।
ब्राह्म्याद्याः पूजयेन्मातृदलेष्वष्टासु पूर्ववत् ।
भैरवानसिताङ्गाद्यान् धरण्यां पूजयेत् प्रिये ! ॥

अथ पुरश्चरणनियमो यथा—। तदुक्तं स्वतन्त्रे ।
वर्णलक्षं जपेन्मन्त्रं तद्दशांशेन होमयेत् ।

वर्णलक्षं मन्त्रवर्णसंख्याजपमित्यर्थः ।
रजस्वलां स्त्रियं गत्वा रेतोरुधिरसंयुताम् ॥
मद्यं चाष्टविधं मांसं मत्स्यं बहुविधं प्रिये ! ।
नैवेद्यं चात्मसात् कृत्वा कालीभक्तिपरायणः ॥
तदा भोगञ्च मोक्षञ्च लभते नात्र संशयः ॥

अथ मन्त्रान्तरम् ।

कामबीजं समालिख्य कालिकायै पदं लिखेत् ।
नमोऽन्तेन च देवेशि ! सप्तार्णो मनुरुत्तमः ॥
सर्वाङ्गकालिका देवी अन्यत् सर्वन्तु पूर्ववत् ।
गुरोश्चापि कृपां लब्ध्वा सर्वसिद्धिमवाप्नुयात् ॥

इति पूर्णानन्दगिरिविरचिते श्यामारहस्ये मन्त्रभेद-
विवरणं नाम षष्ठः परिच्छेदः ।

अथ सप्तमः परिच्छेदः ।

अथ विद्यामाहात्म्यं तदुक्तं कालीतन्त्रे ।
गुणं समस्तविद्यानां वाग्भिः स्तोतुं न शक्यते ।
वक्त्रकोटिसहस्रैस्तु जिह्वाकोटिशतैरपि ॥
सर्वसिद्धिप्रदा भूमिरनिरुद्धसरस्वती ।
तस्मात् तस्या ज्ञानमात्रात् सिद्धयोऽष्टौ भवन्ति हि ॥
अनिरुद्धसरस्वत्या ज्ञानमात्रेण साधकः ।
पाण्डित्ये च कवित्वे च वागीशसमतां व्रजेत् ॥
तस्य पाण्डित्यवैदग्ध्यं विचित्रपदजल्पनात् ।
देवा अपि विलज्जन्ते किं पुनर्मानुषादयः ॥
अपि चेत् त्वत्समा नारी मत्समः पुरुषोऽस्ति चेत् ।

अनिरुद्धसरस्वत्याः समानो नास्ति वै भुवि ॥
अस्या जपो ब्रह्मजपो महाशोके महोत्सवे ।
महामोहे महासौख्ये महादारिद्र्यसङ्कटे ॥
योगसंसाधनं सम्यग् ध्यानमस्या न संशयः ।
महापदि महापापे महाग्रहनिवारणे ॥
महाभयमहोत्पाते महाशोके महोत्सवे ।
महामोहे महासौख्ये महादारिद्र्यसङ्कटे ॥
महारण्ये महाशून्ये महाज्ञाने महारणे ।
दुरापदि दुरावासे दुर्भिक्षे दुर्निमित्तके ॥
समस्तक्लेशसंघाते स्मरणादेव नाशयेत् ।
अस्या ज्ञानं ज्ञानमेव ध्यानमस्याश्च चिन्तनम् ॥
तस्मादस्याः समा विद्या नास्ति तन्त्रे न संशयः ।
श्मशानशयनो वीरः कुलस्त्रीभिर्विहारवान् ॥
कुलामृतनिषेवी च कालीतत्त्वार्थचिन्तकः ।
ब्रह्मादिभुवने तस्य समो नास्ति कुतः परः ॥
स एव सुकृती लोके स एव कुलभूषणः ।
धन्या च जननी तस्य येन देवी समर्चिता ॥
धनेन धननाथश्च तेजसा भास्करोपमः ।
वेगेन पवनो ह्येष येन देवी समर्चिता ॥
गानेन तुम्बुरुः साक्षात् दानेन वासवो यथा ।
दत्तात्रेयसमो ज्ञानी येन देवी समर्चिता ॥
वह्निरिव रिपोर्हन्ता गङ्गेव मलनाशकः ।
भुवि सूर्य्यसमः साक्षादिन्दोरिव सुखप्रदः ॥
पितृदेवसमः साक्षात् कालस्येव दुरासदः ।
समुद्र इव गम्भीरो निऋ॑तेरिव दुर्द्धरः ॥
बृहस्पतिसमो वक्ता धरणीसदृशः क्षमी ।

कन्दर्पसदृशः श्रीमान् येन देवी समर्चिता ॥
सर्वभाग्ययुतो लोके कुलज्ञानी भविष्यति ।
तेषां मध्येऽपि यः कोऽपि कालीसाधनतत्परः ॥
त्यजसि त्वं न कदाचित् पुमांसं परमं प्रियम् ।
मादृशन्तु क्वचित् काले त्यजसि त्वं शुचिस्मिते ! ॥
किन्तु कालीज्ञानिनश्च त्यच्यसि न कदाचन ।
न हि कालीसमा पूजा न हि कालीसमं फलम् ॥
न हि कालीसमं ज्ञानं न हि कालीसमं तपः ।
ये गुणाः परमेशस्य पञ्चकृत्यविधायिनः ॥
ते गुणाः सन्ति सर्वेऽपि कालीतत्त्वस्य ज्ञानिनः ।
कालिकाहृदयज्ञानी कालीसाधनतत्परः ॥
देववत् मानुषो भूत्वा लभेत् मुक्तिं चतुर्विधाम् ।
इति ते कथितं सम्यक् कालिकातत्त्वमुत्तमम् ॥
अनेन सम्यगास्थाय सर्वकामफलं लभेत् ॥

इति श्यामारहस्ये विद्यामाहात्म्यकथनं नाम सप्तमः परिच्छेदः ।

अथ अष्टमः परिच्छेदः ।

अथ आचारक्रमो लिख्यते तदुक्तं कालीतन्त्रे ।

ईश्वर उवाच ।

अथाचारं प्रवक्ष्यामि यत्कृतेऽमृतमश्नुते ।
सर्वभूतहिते युक्तः समयाचारपारगः ॥
अनित्यकर्मसंत्यागी नित्यानुष्ठानतत्परः ।
परायां देवतायाञ्च सर्वकर्मनिवेदकः ॥

अन्यमन्त्रार्चनश्रद्धा मन्यमन्त्रप्रपूजनम् ।
कुलस्त्रीवीरनिन्दाञ्च तथा वेश्योपसङ्गमम् ॥
स्त्रीषु रोषं प्रहारञ्च वर्जयेत् मतिमान् सदा ।
स्त्रीमयञ्च जगत् सर्वं चिन्तयेत् साधकोत्तमः ॥
स्त्रीद्वेषो नैव कर्त्तव्यो विशेषात् पूजनं स्त्रियः ।
जपस्थाने महाशङ्खं निवेश्योर्द्ध्वं जपं चरेत् ॥
स्त्रियं गच्छन् स्पृशन् पश्यन् विशेषात् कुलजां शुभाम् ॥
भक्षं स्ताम्बूलमद्यांश्च भक्ष्यद्रव्यान् यथारुचीन् ।
मांसमत्स्यदधिक्षौद्रपयःशाकाद्यमैक्षवम् ॥
भक्ताद्यशेषभक्ष्याणि दत्त्वा तत्र जपं चरेत् ।
दिक्कालनियमो नास्ति स्थित्यादिनियमस्तथा ॥
न जपे कालनियमो नार्चादिषु वलिष्वपि ।
स्वेच्छानियम उक्तो हि महामन्त्रस्य साधने ॥
वस्त्रासनस्थानदेह स्पर्शादिगेहबाधनात् ।
नास्त्यशुद्धिरिह क्वापि निर्विकल्पं मनश्चरेत् ॥
सुगन्धिश्वेतलौहित्यकुसुमैरर्चयेत् ततः ।
वन्यैर्मरुवकाद्यैश्च तुलसीवर्जितैः शुभैः ॥
पेयं चर्व्यं तथा चोष्यं भक्ष्यं भोगं गृहं सुखम् ।
सर्वञ्च युवतीरूपं भावयेद् यतमानसः ॥
कुलजां युवतीं वीक्ष्य नमस्कुर्य्यात् समाहितः ।
यदि भाग्यवशेनैव कुलदृष्टिस्तु जायते ॥
तदैव मानसीं पूजां तत्र तासां प्रकल्पयेत् ।
वालां वा यौवनोन्मत्तां वृद्धां वा सुन्दरीं तथा ॥
कुत्सितां वा महादुष्टां नमस्कृत्य विभावयेत् ।
तासां प्रहारं निन्दाञ्च कौटिल्यमप्रियं तथा ॥
सर्वथा न च कर्त्तव्यमन्यथा सिद्धिरोधकृत् ।

स्त्रियो देवाः स्त्रियः प्राणाः स्त्रिय एव विभूषणम् ॥
स्त्रीसङ्गिना सदा भाव्यमन्यथा स्वस्त्रियामपि।
विपरीतरता सा तु भविता हृदयोपरि ॥
नाधर्मो जायते सुभ्रु ! किञ्च धर्मो महान् भवेत्
स्वेच्छाचारोऽत्र गदितः प्रचरेत् हृष्टमानसः ॥
इत्याचारपरः श्रीमान् जपपूजादितत्परः।
पानतः कुलतन्वीनां परतत्त्वे प्रलीयते ॥

कौलतन्त्रेऽपि। शृणु देवि ! प्रवक्ष्यामि कौलिकाचरणं यथा।
पाने भ्रान्तिर्भवेद् यस्य घृणा स्याद्रक्तरेतसोः ॥
शुद्धौ चाशुद्धता भ्रान्तिः पापशङ्का च मैथुने।
स भ्रष्टः पूजयेद्देवीं चण्डीमन्त्रं कथं जपेत् ॥
रोगी दुःखी भवेद्देवि ! रौरवे नरके वसेत्।
पञ्चमात्तु परं नास्ति शाक्तानां सुखमोक्षयोः ॥
भावरूपा च या देवी रेतःप्रीता सदानघे !।
रेतसा तर्पणं तस्या मद्यैर्मांसैः समं प्रिये ! ॥
केवलैः पञ्चमैर्देवि ! सिद्धो भवति साधकः।
ध्यात्वा कुण्डलिनीं शक्तिं रमन् रेतो विमुञ्चयेत् ॥
अमन्त्रा च यदा नारी रसाद् यत्नात्तु लभ्यते।
आत्मदेहस्वरूपेण तत्कर्णे मन्त्रमुच्चरेत् ॥
ततश्च शक्तिरूपा स्यात् भुक्तिमुक्तिप्रदायिनी।
रम्भा च उर्वशी मुख्या या नारी गगने भुवि ॥
पाताले वा स्थिता या च तस्या नाथस्तु कौलिकः।
तस्यापि वर्ज्या या नार्य्यस्तस्याः शृणु विधिं प्रिये ! ॥
गुरुरेव शिवः साक्षात् तत्पत्नी परमेश्वरी।
मनसा कर्मणा वाचा रमणं तत्र वर्जयेत् ॥
तस्य देवपदे भक्तो मुक्तिं प्राप्य परां व्रजेत्।

गुरोः स्नुषा गुरोः कन्या तथा च मन्त्रपुत्रिका ॥
एतस्या रमणं वर्ज्यं ब्रह्मघ्नं मानसेऽपि च।
कौलिकस्य च पत्नी च सा साक्षादीश्वरी शिवे ! ॥
तस्या रमणमात्रेण कौलिको नारकी भवेत्।
मातापि गौरवाद्वर्ज्या अन्यां वा विहिताः स्त्रियः ॥
भूतियागे च कर्त्तव्ये विचारो मन्त्रवित्तमैः।
अन्यस्थाने विचारे च देवीशापः प्रजायते ॥
शिवहीना च या शक्तिर्दूरं तां परिवर्जयेत्।
अभिषेकाद् भवेत् शुद्धिर्मन्त्रोच्चारणतः श्रुतौ ॥
पञ्चमेन च देवेशि ! सर्वपापैः प्रमुच्यते।
केवलेनाद्ययोगेन साधको भैरवो भवेत् ॥
द्वितीयेन महेशानि ! पूजको ब्रह्मरूपभाक्।
केवलेन तृतीयेन महाभैरवतां व्रजेत् ॥
चतुर्थेन तु तत्त्वेन भुवि पूज्यैकनायकः।
परे च परतां याति मम तुल्यः परेश्वरि ! ॥
पञ्चमेन भवेद्योगी सर्वसिद्धिपरायणः।
इतीदं कथितं देवि ! सुगोप्यमतियत्नतः ॥
न देयं पशवे देवि ! कुलनिन्दापराय च।
कुलाचारगृहं गत्वा भक्त्या पापविशुद्धये ॥
याचयेदमृतं स्नानं तदभावे जलं पिबेत्।
कुलाचारो हि यच्छक्त्या दत्तं पात्रन्तु भक्तितः ॥
नमस्कृत्य प्रगृह्णीयात् अन्यथा नरकं व्रजेत् ॥
अन्यत्रापि। वृथा कालं न गमयेत् द्यूतक्रीड़ादिना सुधीः।
गमयेद्देवतापूजाजपयागस्तवादिना ॥
गुरोः कृपालापकथास्तोत्रागमविलोकनैः।
गमयेदनिशं कालं न वदेत् परदूषणम् ॥

प्रत्यक्षे वा परोक्षे वा प्रत्यहं प्रणमेद् गुरुम् ।
गुरोरग्रे पृथक् पूजामौद्धत्यञ्च विवर्जयेत् ॥
दीक्षां व्याख्यां प्रभुत्वञ्च गुरोरग्रे न कारयेत् ।
गुरुशय्यासनं यानं पादुकोपानहौ तथा ॥
स्नानोदकं तथा च्छायां लङ्घनं न कदाचन ।
श्रीगुरुं कुलशास्त्राणि पूजास्थानानि यानि च ॥
भक्त्या श्रीपूर्वकं देवि ! प्रणम्य परिकीर्त्तयेत् ।
गुरुनाम न भाषेत जपकालादृते प्रिये ! ॥
श्रीनाथदेवस्वामीति विवादे साधने वदेत् ।
उत्पादकब्रह्मदात्रोर्गरीयान् मन्त्रदः पिता ॥
तस्मान्मन्ये च सततं पितुरप्यधिकं गुरुम् ।
कुलाचारं गुरुं देवं मनसापि न निन्दयेत् ॥
कुलस्त्रीवीरनिन्दाञ्च वर्जयेत् मतिमान् सदा ।
अन्तः शाक्ता वहिः शैवाः सभायां वैष्णवा मताः ॥
नानामूर्त्तिधराः कौलाः विचरन्ति महीतले ।

निगमे तु । गुरुणालोकितः शिष्य उत्तिष्ठेदासनं त्यजेत् ।
गुरुणा सदसद्वापि यदुक्तं तन्न लङ्घयेत् ॥
रभसं मैथुनं मिथ्या यो वदेदन्तिके गुरोः ।
स याति नरकं घोरं भैरवेण च भाषितम् ॥
संक्रान्तिर्नवमी पूर्णा चाष्टमी च चतुर्दशी ।
एकादशी व्यतीपाते कर्मलोपं न कारयेत् ॥
तत्त्वहीनं कृतं कर्म जपकर्म च निष्फलम् ।
शाम्भवी कुप्यते तेभ्यो ब्रह्महत्या दिने दिने ॥

भावचूड़ामणौ च ।

एकाकी निर्जने देशे श्मशाने निर्जने वने ।
शून्यागारे नदीतीरे निःशङ्को विहरेत् मुदा ॥

वीराणां जपकालस्तु सर्वकालः प्रशस्यते ।
सर्वदेशे सर्वपीठे कर्त्तव्यं नात्र संशयः ॥
अन्यदुक्तम् । स्वकुलान्ते पुरश्चर्य्या कार्य्या रात्रौ च नान्यथा ।
वेदहीने द्विजे जात्या यथा न श्रुतिसंस्क्रिया ॥
विष्णुभक्तिं विना देवि ! भक्तिर्नैव यथा भवेत् ।
शक्तिज्ञानं विना मुक्तिर्यथा हास्याय कल्पते ॥
गुरुं विना तथा तन्त्रे नाधिकारः कथञ्चन ।
पतिहीना यथा नारी सर्वकर्मविवर्जिता ॥
कुलं विना तथा दिव्यो वीरो वा मम साधकः ।
नाधिकारीति कौलेषु तस्माद् यत्नपरो भव ॥
अविनीतं कुलं यस्य स कथं मम पूजकः ।
तस्माद् यत्नात् तथा कार्य्यं यथा स्याद् विनयान्वितम् ॥ इति
तन्त्रचूड़ामणौ च ।
विष्णुभक्तो यदा देव ! कुलदीक्षापरो भवेत् ।
पुत्रदारधनं तस्य नाशयामि न संशयः ॥
कुलं देवं द्विजं हित्वा वैष्णवं देशिकं यदि ।
करोति कुलशिष्योऽसौ भ्रष्टो भवति साधकः ॥
हविरारोपमात्रेण वह्निर्दीप्तो यथा भवेत् ।
कुलदेवमुखात् तद्वत् तथा दीप्तो भवाम्यहम् ॥
दीक्षणात् पूजनाद्धोमात्तथा दृष्ट्यवलोकनात् ।
यत्किञ्चित् ज्ञानमात्रेण पशुना निर्जितोऽस्मतः ॥
साधकस्य महापापं दत्त्वा तस्य हराम्यहम् ।
पशोर्विद्यां समासाद्य यदि पूजापरो भवेत् ॥
तस्य वक्त्रं समालोक्य कुलवक्त्रं विलोकयेत् ।
पशूपदिष्टं यत्किञ्चित् क्रियते कुलसाधकैः ॥
तत्तत्कर्म महादेव ! अभिचाराय कल्पते ।

यदि दैवात् पशोर्विद्यां लभ्यते कुलजैर्बुधैः ॥
द्विजस्य कौलिकीं प्राप्य पुनर्विद्या मुपालभेत्।
अज्ञानाद् यत् कृतं कर्म नालोच्य कुलकौलिकीम् ॥
क्षमस्व देवि ! तत्पापं हर देवि ! कृपां कुरु।
एवं प्रार्थ्य पुनर्दीक्षां कुर्य्यात् साधकसत्तमः ॥

अन्यदुक्तं तत्रैव।

मनसा वचसा देव ! कुलाकुलगुरुं यदि।
निन्दां करोति पापो यस्तस्योपरि च जायते ॥
एतत् शास्त्रप्रसङ्गन्तु एतत् पुस्तकदर्शनम्।
पशोरग्रे न कर्त्तव्यं प्राणान्तेऽपि कदाचन ॥
कृत्वा सूर्य्यमुखं दृष्ट्वा स्मर्त्तव्यः कुलनायकः।
पशुना यः सहालापः सहशय्या सहासनम् ॥
संसर्गश्चैव मेवात्र कुलीनस्य महात्मनः।
पातकं न तु चैतेषां संक्षये पुण्यराशयः ॥
प्रभवन्ति न तीर्थानि न गङ्गा न च काशिका।
महाविद्याजपादेव चत्वारि पातकानि च ॥
नश्यन्ति च न संसर्गः क्षयं याति कदाचन।
अज्ञानात् पशुसंसर्गो यदि दैवात् प्रजायते ॥
तदा द्वादशवर्षाख्यं व्रतार्थं यत्नमाचरेत्।
कुलीनायाः समीपस्थः कुलसेवापरायणः ॥
उच्छिष्टभोजी तन्नामजापी च तत्पतेरपि।
तदा ह्येतां समाभ्यर्च्च्य यत्नेश्च परितोष्य च ॥
शुचिर्भूत्वा परां विद्यां गृहीत्वा शुद्धिमाप्नुयात्।
व्रताशक्तो यदि भवेत् सुवर्णं कुलतोषकृत् ॥
दद्यात् कुलाय पापानां क्षयार्थं कुलसाधकः।
ज्ञानात् संसर्गमासाद्य शुद्धिं प्राप्नोति नैव च ॥

पशुभ्यो भाषणाच्चैव योनिमालभ्य साधकः।
नानाक्लेशसमायुक्तो नरकान् प्रतिपद्यते॥
न चैवं दीक्षयेन्नाम न चान्यदर्शनञ्चरेत्।
मम शास्त्रकथाञ्चाग्रे प्रयत्नेन विवर्जयेत्॥
कर्मणा मनसा वाचा पशुशास्त्राङ्गपूजनम्।
प्रकुर्वन्ति महापापास्त्याज्याश्च कुलपांशुलाः॥
निर्जीवकाष्ठे लोष्ट्रे वा शर्करायां तृणेऽपि वा।
सर्वत्र चिन्तिता चाहं न पशोर्मित्रविग्रहे॥
चेतनाधिष्ठितं सर्वसुखं दुःखं प्रकल्पितम्।
तत्रैव चेतनाभावान्नियमो नास्ति तादृशः॥
प्रसन्ना तेन गोप्तव्या कुलीनैः सिद्धिहेतवे।

अन्यदुक्तं तत्रैव।

दीक्षायां कुलपूजायां शिष्यत्वे यदि वा गुरौ।
लज्जापरं कुलं तत्र नित्यापि नित्यनिद्रिता॥
अधस्ताद्दृष्टिमात्रेण तस्य विद्या ह्यधोमुखी।
निमीलनान्मृता विद्या बोधनान्मारयेद्ध्रुवम्॥
पार्श्वावलोकनेनैव व्याधिदारिद्र्यपीड़िता।
चतुर्दिगवलोकेन उच्चाटनगता भवेत्॥
एतादृशं कुलं देव! यदि कुर्य्यात् कथञ्चन।
तदा कुलगुरुं प्रार्थ्य कारयेद्दीक्षणं ततः॥
उपदेष्टा यदा देव! तदा पुत्त्री तु कन्यका।
पूजार्हा च तदा देवी तदा माता न संशयः॥
सर्वथा पितृपुत्त्रीभ्यां मूलयोगेन दृश्यते।
तत्कृते पापबुद्ध्या वै उभौ नरकगामिनौ॥
चुम्बके अन्यशास्त्रज्ञे पशुग्रामे च भैरव!।
न वक्तव्यं न कर्त्तव्यं न च वाच्यं कथञ्चन॥

एवं कृते गुरौ शिष्ये मम शापो भविष्यति।
शिवागमे च। शक्त्युच्छिष्टमविचार्य्य पिबेच्चक्रेश्वरी यदि॥
घोरञ्च नरकं याति कुलमार्गे पतेद् ध्रुवम्।
तस्माद्विचार्य्य यत्नेन शक्त्युच्छिष्टं पिबेत् सुधीः॥
आनन्दं कारयेद्वीरस्तत्त्वं निर्भ्रान्तितः पिबेत्।
शक्तिः शिवः शिवः शक्तिः शक्तिर्ब्रह्मजनार्दनः॥
शक्तिरिन्द्रोरविः शक्तिः शक्तिश्चन्द्रो ग्रहो ध्रुवम्।
शक्तिरूपं जगत् सर्वं यो न जानाति नारकी॥
वीरतन्त्रेऽपि। स्नानादिमानसं शौचं मानसः प्रवरो जपः।
पूजनं मानसं दिव्यं मानसं तर्पणादिकम्॥
सर्व एव शुभ कालो नाशुभो विद्यते क्वचित्।
न विशेषो दिवा रात्रौ न सन्ध्यायां महानिशि॥
सर्वदा पूजयेद्देवीं सुस्नातः कृतभोजनः।
महानिश्यशुचौ देशे वलिं मन्त्रेण दापयेत्॥

एतेन दिवसेऽपि पञ्चतत्त्वेन संपूजनं कार्य्यमिति सूचितम्। यत्तु।

रात्रावेव महापूजा कर्त्तव्या वीरवन्दिते!।
इति स्वतन्त्रवचनम्।
न दिने सर्वथा कार्य्या शासनात् मन्त्रसुव्रते!।
हविष्याशी दिवा लक्षं पुरश्चारी तु यो जपेत्।
तत्र मात्रं दिवा पूजा पशुवद्वधवन्दिते!॥

इति स्वतन्त्रवचनम्, तत्तु पुरश्चरणविषये बोद्धव्यमिति। तत्र रात्रावेव इति शब्दस्वरसात् सामान्याधिकारपर इति ब्रूमः। कालीतन्त्रादिस्वरसाच्च। तत्तु जपेन कालनियमम् इति पुरैव लिखितम्। एवं छिन्नमस्तातन्त्रेऽपि।

सिद्धमन्त्रे न दोषः स्यान्नाशौचे नियमेऽपि च।

न कल्पना दिवारात्रौ न च सन्ध्यावसानकम् ॥
सदैव पूजयेन्मन्त्री मैथुने तु विशेषतः ।
किन्तु—न पश्येत् पतितां नग्नामुन्मत्तां प्रकटस्तनीम् ॥
दिवसे न रमेन्नारीं तद्योनिं नैव वीक्षयेत् ॥

कुलार्णवेऽप्येवम् । तत्प्रकरणत्वात् पुरश्चरणं वा इति ।

अथ रुद्रयामले ।

पशोः सम्भाषणाद्देवि ! मन्त्रसिद्धिर्न जायते ।
पशुस्तु द्विविधो देवि ! दीक्षितोऽपि भवेत् पशुः ॥
दीक्षितश्च कुलाचारनिन्दको द्विविधः पशुः ।
गोलकेन सहालापात् स्पर्शात् सम्भावसंस्कृतात् ॥
न सिध्यति महेशानि ! सत्यं सत्यं वदाम्यहम् ।
विकल्पिता न सिध्यन्ति जपात् सिध्यन्ति लोकदाः ॥
तस्मादेतत् परित्यज्य सिद्धिः स्यात् केवलाज्जपात् ।
वीरहत्या वृथापानं वीरजायानिषेवणम् ॥
महापातकमित्याहुः कौलिकानां कुलेश्वरि ! ।
अर्थाद्वा कामतो वापि लौल्यादपि च यो नरः ।
लिङ्गयोनिरतो मन्त्री रौरवं नरकं व्रजेत् ॥

इति महामहोपाध्यायपरमहंसपरिव्राजक-पूर्णानन्दगिरि-विरचिते श्यामारहस्ये पुरुषार्थसाधनाचारविवरणं नामाष्टमः परिच्छेदः ।

अथ नवमः परिच्छेदः ।

अथ कुण्डगोलोद्भवादिग्रहणविधिः । तदुक्तं तन्त्रान्तरे ।
आनीय प्रमदां मत्तां दीक्षितां यौवनान्विताम् ।
स्वकान्तां परकान्तां वा घृणालज्जाविवर्जिताम् ॥

पराङ्मुखोपविष्टस्तु निशायामर्द्धरात्रके ।
हेतुयुक्तं सताम्बूलं दत्त्वा न्यासान् विधाय च ॥
मौलौ कुन्तलकर्षणं नयनयोराचुम्बनं गण्डयो-
र्दन्तेनाधरपीड़नं हृदि हतिर्मुष्ट्या च नाभौ भगे ।
कक्षाकण्ठकपोलमण्डलकुचश्रोणीषु देया नखाः
सीमन्ते लिखनं नखैरुरसिजं गृह्णीत गाढ़ं ततः ।
कुर्वीताविरतं मनोभवगृहे मातङ्गलीलामिति
जङ्घाङ्गुष्ठपदोरुगुल्फहननं चान्योन्यतः कामिनोः ॥
आं ईं हुं क्रीं ब्लूं अमुकीं द्रावय स्वाहा इति विन्यसेत् ।
ऐं क्लीञ्चपले चलच्चित्तान्तु रेतो मुञ्च द्वयं पठेत् ॥
ब्लूं क्लीं स्त्रीं क्लीं देवेशि ! द्राविणीवीजमुत्तमम् ।
तस्यां योनौ न्यसेद्विद्यां मैथुनं कारयेत् प्रिये ! ॥
शुद्धमन्त्रौषधेनैव योनिप्रमथनं चरेत् ।
मथ्यमाने पुनस्तस्यां जायते तत्त्वमुत्तमम् ॥
गृह्णीयात् तत् प्रयत्नेन द्रव्यं कुलोद्भवं शुभम् ।
निःशङ्कमाहितं द्रव्यं गृहीत्वा तेन पूजयेत् ॥
सान्निध्यं जायते देवि ! सर्वकाममुपालभेत् ।
कुण्डोद्भवामृतं द्रव्यं कथितं दुर्लभं मया ॥

पञ्चमीयामलेऽपि ।

चर्व्यं चोष्यं निवेद्याथ वस्त्रालङ्करणादिकम् ।
पूजयेद्यतः शुक्रैस्तस्या मदनमन्दिरम् ॥
भावयेत् कामतत्त्वेन तासु तत्त्वं न चोत्सृजेत् ।
शुद्धमन्त्रौषधेनैव मथयेन्मदनालयम् ॥
मथ्यमाने पुनस्तस्या जायते तत्त्वमुत्तमम् ।
गृह्णीयात् तत् प्रयत्नेन द्रव्यं कुण्डोद्भवं शुभम् ॥

अथ शुक्रमन्त्रौषधं यथा तदुक्तं कुलोड्डीशे।
मायागच्छ पदं शुक्रस्तम्भनकारिणि ठद्वयम् ॥
अनेनार्कोपरागे च जातीमूलं समानयेत्।
एतद्धृत्वा साधकेन्द्रः शुक्रस्तम्भनमाचरेत् ॥ इति।
गोलोद्भवं तथा देव ! गृह्णाति च विधानवित्।
कुलजां दीक्षितां मत्तां पतिहीनां विचक्षणाम् ॥
शक्तियोग्यां स्वरूपाञ्च अनपत्यां समानयेत्।
सुन्दरीं शोभनां दिव्यां पीनोन्नतपयोधराम् ॥
द्विरष्टवर्षदेशीयां सदा कामाभिलाषिणीम्।
पूर्वोक्तक्रमयोगेन कृत्वा न्यासादिकं ततः ॥
तत्त्वं प्रगृह्य यत्नेन पूजार्थं साधकोत्तमः।
इदं गोलोद्भवं द्रव्यं देवतातुष्टिकारकम् ॥
अनेन पूजयेद् यो हि सर्वकाममुपालभेत्।
स्वयम्भूं कथयिष्यामि पूजार्थं साधकोत्तमः ॥
पूर्ववन्न्यासवर्य्यन्तु कारयेद्देवि ! सुन्दरि।
तस्यास्तु मदनागारे पूजयेत् परमेश्वरीम् ॥
स्वयमक्षोभितो भूत्वा साधकः पञ्चमीं यजेत्।
स्वेच्छा ऋतुमती शक्तिः साक्षाद्देवी सुरेश्वरि ! ॥
तस्याः पुष्पं स्वयं यत्तद्रक्षणीयं प्रयत्नतः।
वस्त्रालङ्कारपुष्पेण शक्तिञ्च पूजयेत् सदा ॥
यथा काले तथा पुष्पं स्वयं तन्नोपयेत् सकृत्।
गृहीत्वा तत् प्रयत्नेन स्वयम्भू कुसुमं चरेत् ॥
स्वयम्भूपुष्पयोगेन साक्षतेन समर्चयेत्।
विद्यां स्वप्नावतीं जप्त्वा क्षिप्रमाकर्षणादिकम् ॥
देवताश्च महानागा राक्षसा दानवाश्च ये।
राजानश्च स्त्रियः सर्वा नित्यं वश्या भवन्ति हि ॥

मुण्डमालायाम् ।

स्वयम्भू कुसुमं देवि ! त्रिविधं भुवि जायते ।
आषोड़शादनूढ़ाया उत्तमा सर्वसिद्धिदा ॥
बलात्कारेण ऊढ़ाया मध्यमा भोगवर्द्धिनी ।
रजोयोगवशादन्या चाधमा फलदायिनी ॥

तन्त्रचूड़ामणौ च ।

शृणु वत्स ! कुलद्रव्यमाहात्म्यं परमं शुभम् ।
यत् प्राप्य कुलदेवेन लभ्यते वाञ्छितं महत् ॥
अमावस्यातिथौ देवी स्वयम्भूमध्यवर्त्तिनी ।
अमृतं वर्षते सा तु त्रिदिनं पृथिवीतले ॥
तस्यां तिथौ कुले देवि ! यदि विद्यां समुच्चरेत् ।
पूर्वसेवा भवत्यत्र प्रत्युच्चारणमेव हि ॥
तस्मात् सर्वप्रयत्नेन कुलं वीक्ष्य जपं कुरु ।
दृष्ट्वा च अमृतं देवगलितं परिगृह्य च ॥
साधयेत् साधनं सर्वं कुलाचारस्य सिद्धये ।
शिवहीना यदा शक्तिः सर्गादौ वर्षते यतः ॥
तदेव परमं द्रव्यं स्वयम्भूकुसुमाख्यकम् ।
स्वयम्भूकुसुमं द्रव्यं त्रैलोक्ये चापि दुर्लभम् ॥
क्वचिद्गन्धर्वराजेन लभ्यते वा नराधिपैः ।
यदि तल्लभ्यते देव ! लाक्षारससमन्वितम् ॥
कस्तूरीकुङ्कुमाक्तञ्च वटीं कृत्वा सुगोपयेत् ।
मन्त्रराजं समालिख्य पूजयेद् यदि साधकः ॥
एतेनाक्षतयोगेन मधुमतीसिद्धमानयेत् ।
सुप्तादिदोषयुक्ता ये मन्त्रा विद्याश्च कीर्त्तिताः ॥
प्रबुद्धास्तत्प्रयोगेण यावत् सा पुनरागता ।
ततः प्रयोगं विद्यानां मन्त्रादीनाञ्च कारयेत् ॥

एवं प्रबुद्धा भवति नैव तादृक् कदाचन ।
एतत् त्रयाणां मध्ये तु स्वयम्भूकुसुमं महत् ॥
श्रीक्रमेऽपि । कस्तूरीकुङ्कुमं रक्तचन्दनागुरुकादिकम् ।
नानासुगन्धिकं दत्त्वा एकीकृत्य तु साधकः ॥
एतेनाक्षतयोगेन पूजयेत् परमेश्वरीम् ।
स्वयम्भूकुसुमैः पूजां प्रत्यहं यः समाचरेत् ।
तस्य मधुमतीसिद्धिरधीना देवि ! जायते ॥

अथ दूतीयजनविधिः ।

याममात्रगते रात्रौ कुलगेहगतः पुमान् ।
ताम्बूलपूरितमुखो धूपामोदसुगन्धिभिः ॥
रक्तचन्दनलिप्ताङ्गो रक्तमाल्यानुलेपितः ।
रक्तवस्त्रपरीधानो लाक्षारुणगृहे स्थितः ॥
रक्तमाल्येन संवीतो रक्तपुष्पविभूषितः ।
पञ्चीकरणसङ्केतैः पूजयेत् कुलनायिकाम् ॥

कुलनायिका यथा । तदुक्तं तत्रैव ।

नटी कापालिनी वेश्या पुक्कसी नापिताङ्गना ।
रजकी रञ्जकी चैव सैरिन्ध्री च सुभाषिणी ॥
घटिका घटिका चैव तथा गोपालकन्यका ।
विशेषवैदग्ध्ययुताः सर्वा एव वराङ्गनाः ॥
गुरुभक्ता देवभक्ता घृणालज्जाविवर्जिताः ।
संगोपनरताः प्रायस्तरुण्यः सर्वसिद्धिदाः ॥

एवं यथोदितां प्रसूनतूलिकोपरि संस्थाप्य पूजामारभेत् । तदुक्तं तत्रैव ।

अद्वैताचारसम्पन्नां घृणालज्जाविवर्जिताम् ।
सदनुष्ठाननिरतां सात्त्विकीं भक्तिसंयुताम् ॥
देवताभावसंयुक्तां गुरुभक्तां दृढव्रताम् ।

ईर्षालस्येन रहितां समयां भक्तवत्सलाम् ॥
चातुर्य्यौदार्य्यदाक्षिण्यकरुणादिकलान्विताम् ।
रूपयौवनसम्पन्नां शीलसौभाग्यशालिनीम् ॥
सदा परिगृहीतां वा यद्वा सङ्केतमागताम् ।
अथवा तत्क्षणायातां मदनानलतापिताम् ॥
विलिप्तां रक्तगन्धेन रक्ताम्बरविभूषिताम् ।
सुगन्धिबद्धकुसुमां सर्वाभरणभूषिताम् ॥
स्वधूपधूपितां तन्वीं दूतीकर्मणि योजयेत् ।
एवं भूतां यजेत्ताञ्च प्रसूनतूलिकोपरि ॥
व्यङ्गाङ्गीं विक्षताङ्गीं वा सविकल्पकमानसाम् ।
वर्षीयसीं पापरतां क्रूरामत्यन्तलोलुपाम् ॥
अभक्तां मनसा दीनां वर्जयेत् साधकोत्तमः ।
समानीय कुलं सोऽपि गुरुभक्तमनन्तरम् ॥
स्नातं शुद्धदुकूलादि अनुलेपनशोभितम् ।
स्वलङ्कृतं गतं श्रान्तिं स्वागतं चासनं तथा ॥
निवेश्य तूलिकामध्ये प्रसूनेन सुगन्धिना ।
चन्दनागुरुकर्पूरकस्तूरीकुङ्कुमादिभिः ॥
समाकीर्णे स्वपर्य्यङ्के पूजयेत् कुलनायिकाम् ॥
अङ्गन्यासकरन्यासौ प्राणायामस्ततःपरम् ।
विधाय मातृकान्यासं कुलाङ्गेऽपि प्रविन्यसेत् ॥
ततः पूर्वोक्तविधिना घटार्घ्यस्थापनादिकम् ।
विधाय तद्वराङ्गेषु पूजयेत् परमेश्वरीम् ॥

तदुक्तं तत्रैव ।

पूजयेदपि पल्यङ्कमध्ये मण्डूकमग्रतः ।
कालाग्निरुद्रमाधारशक्तिं कूर्ममनन्तकम् ॥
वराहं पृथिवीं कन्दं मृणालं केशराण्यपि ।

पद्मञ्च कर्णिकाञ्चैव मण्डलञ्च समर्चयेत् ॥
धर्मं वैराग्यमैश्वर्य्यं ज्ञानमज्ञानमेव च ।
अनैश्वर्य्यमवैराग्यमधर्ममपि पूजयेत् ॥
आत्मतत्त्वं ज्ञानतत्त्वं परतत्त्वञ्च पूजयेत् ।
गन्धपुष्पाक्षतादीनि दत्त्वा तत्रैव धूपयेत् ॥
तस्योपरि कुलं स्थाप्य पूजानुष्ठानमेव च ।
पूजयेच्च ततस्तस्यां पञ्चकामान् समाहितः ॥
क्लींचैव कामवीजं क्लीं कन्दर्पो ह्रुं च मन्मथः ।
ब्लूं मकरकेतनश्चैव स्त्रीं चैव हि मनोभवः ॥
ओंकारादिनमोऽन्तञ्च कुसुमैर्गन्धसंयुतैः ।
अर्चयित्वा चतुर्दिक्षु पूजयेत् कुलनायकः ॥
वटुकं भैरवञ्चैव दुर्गाञ्च क्षेत्रपालकम् ॥

तन्त्रान्तरे च । वाग्भवं कामवीजञ्च स्त्रीवीजं कामराजकम् ।
ह्सव्लूं मातृकं दत्त्वा आधारशक्तिमुच्चरेत् ॥
श्रीपादुकां ततो दत्त्वा पूजयामि वदेत्ततः ।
अनेन मनुना तस्या ललाटे सुमनोहरम् ॥
त्रिकोणं तत्र संलिख्य सिन्दूराद्यैर्वरानने ! ॥

उत्तरतन्त्रे च । तस्या मूर्ध्नि त्रिकोणञ्च यन्त्रमालिख्य साधकः ।
महाप्रेतासनं मध्ये अधो वालाञ्च पूजयेत् ॥
मौलौ गणेशं केशाग्रे कुलाध्यक्षं ललाटके ।
दुर्गां भ्रुवो स्तथा लक्ष्मीं रसनायां सरस्वतीम् ॥
स्तनद्वये वसन्तञ्च मदनञ्च प्रपूजयेत् ।
मुखे सुधाकरं पृष्ठे ग्लुं वीजानन्तरोदिते ॥
दक्षिणांशं समाश्रित्य आग्निरस्वरणावधि ।
पूज्याः कामकलास्तस्याः साधकाङ्गेषु साधकः ॥
श्रद्धाप्रीतीरतिश्चैव भूतिः कान्तिर्मनोरमा ।

विमला मोदिनी घोरा मदनोत्पादिनी मदा ॥
मोहिनी दीपनी चैव शोधिनी शाङ्करी तथा ।
रञ्जनी चैव मदना कला स्वरविभूषिता ॥
ततश्चन्द्रकलाः पूज्याः आशिरश्चरणावधि ।
पूष्ठा वशा च सुमना रतिः प्रीतिर्धृतिस्तथा ॥
सिद्धिः सौम्या मरीचिश्च तथा चैवांशुमालिनी ।
मदिरा शशिनीच्छाया तथा सम्पूर्णमण्डला ॥
तुष्टिश्च अमृता चैव पूज्याश्चन्द्रकला इमाः ।
स्वरैरेव प्रपूज्या हि सर्वकार्य्यार्थसिद्धये ॥

ललिताख्यासिदीपिकायान्तु ।

भगे तदीये विद्यन्ते नाड्यस्तिस्रः प्रधानिकाः ।
एका तु नाड़िका सौरी चान्द्री चान्या च नाड़िका ॥
आग्नेयी चापरा ज्ञेया पूजयेत्ताश्च साधकः ।
अम्बु स्रवति चान्द्री हि पुष्पं स्रवति भानवी ॥
वीजं स्रवति चाग्नेयी तास्तु नामभिरर्चयेत् ।
वाग्भवाद्यैर्नमोयुक्तैः पूजयेत् सुप्रसन्नधीः ॥

उत्तरतन्त्रेऽपि । पूजयेन्मदनागारे रक्तगन्धेन चर्चिते ।
भगमालामनुं प्रोच्य त्रितारानन्तरं तथा ॥
ऐं क्लीं श्रीं हुं ब्लूं क्लिन्ने ततः परम् ।
सर्वाणीति भगानीति वशमानय मे ततः ।
स्त्रों क्रीं क्लीं व्लीं क्लीं भगमालिन्यै नमः स्वाहा ॥
पूजयित्वा तु तच्चक्रं गन्धैः पुष्पैस्तथाक्षतैः ।
धूपैर्दीपैश्च नैवेद्यैर्विविधैः कुलसाधकः ॥
विधाय नन्दितां तांश्च तदुच्छिष्टं स्वयं हरेत् ।
अर्चयेद्गन्धपुष्पाद्यैः स्वशिरस्तदनन्तरम् ॥
मूलमन्त्रं ततः श्रीं क्रीं नमः शिवाय ततः परम् ।

यजेत्तु तत्पुरा घोरे सद्योजातेश्वरानपि ॥
निवृत्तिश्च प्रतिष्ठा च विद्या च तदनन्तरम् ।
शान्तिश्च शान्त्यतीता च षडङ्गं तदनन्तरम् ॥
समग्रमविद्यामुच्चार्य्य त्रिकोणञ्चैव पूजयेत् ।
अन्यत्रापि । इहाप्यावाहनं नास्ति जीवन्यासोऽपि नैव च ॥

अथैनां विधिना षोड़शोपचारैः इष्टदेवीं प्रपूजयेत्। तदुक्तं उत्तरतन्त्रे ।

अवधूतेश्वरीं कुब्जां कामाख्यां समयामपि ।
राजेश्वरीं कालिकाञ्च तथा दिक्करवासिनीम् ॥
महाचण्डेश्वरीं तारां पूजयेत्तत्र साधकः ।
तदनुज्ञां ततो लब्ध्वा दत्त्वा ताम्बूलमुत्तमम् ॥
शिवञ्च तत्र निःक्षिप्य गजतुण्डाख्यमुद्रया ।

गजतुण्डा मुद्रा यथा ।

अङ्गुष्ठानामिकामध्या योन्याकारेण योजयेत् ।
गजतुण्डाकृतिर्देवीम् इत्याह भगवान् हरः ॥

अत्राप्यारम्भे त्यागे च धर्माधर्महवीत्यादि मन्त्रद्वयं गृह्यवचनान्तरदर्शनात् तद्यथा ।

शिवशक्तिसमायोगो यत्र यत्र प्रजायते ।
तत्र तत्र त्वयं ग्राह्यो धर्माधर्मादिको मनुरिति ॥

ततोऽष्टोत्तरसहस्रमष्टोत्तरशतं वा अक्षुब्धो जपेत्। तदुक्तम् उत्तरतन्त्रे ।

प्रजपेत् क्षोभरहितश्चाष्टोत्तरसहस्रकम् ।
शतमष्टोत्तरं वापि अक्षुब्धस्थिरमानसः ॥
जपान्ते तज्जपं देव्यै समर्प्य तदनन्तरम् ।
लुब्धां मनोभवसुखैः पूजयेत् सुचिरां रसात् ॥
गलच्चक्रदलं तस्माद् गृहीत्वा कुण्डगोलकम् ।

अर्घ्यंस्थापनयन्त्राङ्गं चन्दनादिषु योजयेत्॥

ज्ञानार्णवे विशेषो यथा।

शिवशक्तिसमायोगो योग एव न संशयः।
शीत्कारो मन्त्ररूपस्तु वचनं स्तवनं भवेत्॥
आलिङ्गनन्तु कस्तूरी कर्पूरं चुम्बनं भवेत्।
नखदन्तक्षतान्यत्र पुष्पाणि विविधानि च॥
मैथुनं तर्पणं विद्धि वीर्य्यपातो विसर्जनम्। इति।

कुलार्णवे च।

आलिङ्गनं चुम्बनञ्च स्तनयोर्मर्दनं ततः।
दर्शनं स्पर्शनं योनेर्विकाशं लिङ्गघर्षणम्॥
प्रवेशः स्थापनं शक्तेर्नवपुष्पाणि वर्जयेत्।

रुद्रयामलेऽपि।

संयोगाज्जायते सौख्यं परमानन्दलक्षणम्।
कुलामृतं प्रयत्नेन गृह्णीयाद् दुर्लभं नरः॥
तेनामृतेन दिव्येन तर्पयेत्त्रिपुरां पराम्।
सान्निध्यात् तत्क्षणाद् याति प्रीता सिद्धिं प्रयच्छति॥
समस्तदेवतानाञ्च तर्पणञ्च सदामृतैः।
गुरूणां साधकानाञ्च सर्वेषां तर्पणं भवेत्॥
तेनामृतेन दिव्येन सर्वे तुष्टा भवन्ति च।
यत्कामं कुरुते मन्त्री तत्क्षणादेव सिध्यति॥

समयार्णवे च।

कुलामृतं समादाय ततोऽर्घ्यं वा क्षिपेत् बुधः॥

इति श्रीपूर्णानन्दगिरिविरचिते श्यामारहस्ये कुसुमोत्पादनं नाम नवमः परिच्छेदः।

अथ दशमः परिच्छेदः ।

अथ सामान्यसाधनम् । तदुक्तं कालीतन्त्रे ।

अथोच्यते कालिकायाः सामान्यं साधनं प्रिये ! ।
कृतेन येन विधिना पलायन्ते महापदः ॥
शिवाबलिश्च दातव्यः सर्वसिद्धिमभीप्सुभिः ।
महोत्पाते महायोगे महादोषे महाग्रहे ॥
महापदि महायुद्धे महाविग्रहसंकुले ।
महादारिद्र्यशमने महादुःस्वप्नदर्शने ॥
महाशान्तौ महारण्ये महास्वस्त्ययने तथा ।
घोराभिचारशमने घोरोपद्रवनाशने ॥
कूटयुद्धादिशमने कूटशत्रुनिवारणे ।
राजादिभयशान्त्यर्थं राजक्रोधोपशान्तये ॥
न ददाति बलिं यस्तु शिवायाः शिवलक्षये ।
स पापिष्ठो नाधिकारी कुलदेव्याः प्रपूजने ॥
कुलीनं नावमन्येत कुलजां परिपूजयेत् ।
कुलजेषु प्रसन्नेषु कालिकासन्निधिर्भवेत् ॥
अहो धन्यवतां लोके जानाति कुलदर्शनम् ।
तेषां मध्ये च यः कोऽपि कुलदेवीं समर्चयेत् ॥
कुलाचारविहीनो यः पूजयेत् कालिकां नरः ।
स स्वर्गमोक्षभागी च न स्यात् सत्यं न संशयः ॥
आयुरारोग्यमैश्वर्यं बलं पुष्टिर्महद्यशः ।
कविता भक्तिमुक्ती च कालिकापदपूजनात् ॥

कुलचूड़ामणौ । कुलवारे कुलाष्टम्यां चतुर्दश्यां विशेषतः ।
योगिनीपूजनं तत्र प्रधानं कुलपूजनम् ॥
यथा विष्णुतिथौ विष्णुः पूजितो वाञ्छितप्रदः ।

अया कुलतिथौ दुर्गा पूजिता वरदायिनी ॥

अथ कुलवारादयो यथा। तदुक्तं यामले।

रविश्चन्द्रो गुरुः सौरिश्चत्वारश्च कुला मताः ॥
भौमशुक्रौ कुलाख्यौ तु बुधवारः कुलाकुलः।
द्वितोया दशमी षष्ठी कुलाकुलमुदाहृतम् ॥
विषमाश्चाकुलाः सर्वाः शेषाश्च तिथयः कुलाः।
वारुणार्द्राभिजिन्मूलं कुलाकुलमुदाहृतम् ॥
कुलानि समधिष्ठानि शेषभान्यकुलानि च।
तिथिवारे च नक्षत्रे अकुलस्थायिनो जनाः ॥
कुलाख्ये जापको नित्यं साम्यञ्चैव कुलाकुलम् ॥
एवं कुलवारादिकं ज्ञात्वा साधकः कर्म कुर्य्यात्।

अथ शिवाबलिप्रकारः। तदुक्तं कुलचूड़ामणौ।

विल्वमूले प्रान्तरे वा श्मशाने वापि साधकः।
मांसप्रधानं नैवेद्यं सन्ध्याकाले निवेदयेत् ॥
कालिकालीति वक्तव्ये तत्रोमा शिवरूपिणी।
पशुरूपा समायाति परिवारगणैः सह ॥
भुक्त्वा रौति यदैशान्यां मुखमुत्तोल्य सुस्वरम्।
तदैव मङ्गलं तस्य नान्यथा कुलदूषणम् ॥
अवश्यमन्नदानेन नियतं तोषयेत् शिवाम्।
नित्यश्राद्धं तथा सन्ध्यावन्दनं पितृतर्पणम् ॥
तथैव कुलदेवीनां नित्यता कुलपूजने।
पशुरूपां शिवां देवीं यो नार्चयति निर्जने ॥
एकया भुज्यते यत्र शिवया देव भैरव!।
शिवाभावेन तस्याशु सर्वं नश्यति निश्चितम् ॥
जपपूजाविधानानि यत्किञ्चित् सुकृतानि च।
गृहीत्वा शापमादाय शिवा रोदिति निर्जने ॥

एकया भुज्यते यत्र शिवया देव भैरव ! ।
वाञ्छनाद्द्विगुणं कर्म सगुणं साधयेद्यतः ॥
तेन सर्वप्रयत्नेन कर्त्तव्यं पूजनं महत् ।
राजादिभयमापन्ने देशान्तरभयादिके ॥
शुभाशुभानि कार्य्याणि विचिन्त्य वलिमाहरेत् ।
गृह्ण देवि ! महाभागे ! शिवे ! कालाग्निरूपिणि ! ॥
शुभाशुभफलं व्यक्तं ब्रूहि गृह्ण वलिं तव ।
एवमुच्चार्य्य दातव्यो वलिः कुलजनप्रियः ॥
यदि न गृह्यते वत्स ! तदा नैव शुभं भवेत् ।
शुभं यदि भवेत्तस्य भुज्यते तदशेषतः ॥
एवं ज्ञात्वा महादेव ! शान्तिस्वस्त्ययनं चरेत् ।
कुलाचारं दक्षिणाख्यं कथितं तव सुव्रतम् ॥
न कस्मैचित् प्रवक्तव्यं यदीच्छेच्छुभमात्मनः ।
निर्जने चैव कर्त्तव्यं न चैवं जनसन्निधौ ॥
न पितुः सन्निधाने वा न मातुः सुतसन्निधौ ।
किं वा पक्षिपतङ्गादिदर्शने नैव कारयेत् ॥
पाताले मण्डले वापि गह्वरे वा सुयन्त्रिते ।
कुलपुष्पं कुलद्रव्यं कुलपूजां कुले जपम् ॥
कुरुं कुलपतिञ्चापि कुलमालां कुलाकुलम् ।
कुलचक्रं कुलध्यानं सर्वथा न प्रकाशयेत् ॥
प्रकाशात् सिद्धिहानिः स्यात् प्रकाशाद् वन्धनादिकम् ।
प्रकाशान्मन्त्रनाशः स्यात् प्रकाशादेव हिंसनम् ॥
प्रकाशान्मृत्युलाभः स्यात् न प्रकाश्यं कदाचन ।
पूजाकाले च देवेशि ! यदि कोऽप्यत्र गच्छति ॥
दर्शयेद्वैष्णवीं मुद्रां विष्णुन्यासं तथान्तरम् ।
प्रकाशाद् यदि गुप्तिः स्यात् तत्प्रकाशे न दूषणम् ॥

गोपनाद्यदि व्यक्तः स्यात् न गुप्तिः साभिधीयते।
कदाचिदङ्गहानिस्तु न च व्यक्तिः कदाचन॥

अथ समयाचारः। तदुक्तं तत्रैव।

शृणु पुत्र! रहस्यं मे समयाचारसम्भवम्।
येन हीना न सिध्यन्ति जन्मकोटिसहस्रशः॥
मानवः कुलशास्त्राणां कुलचर्य्यानुसारिणाम्।
उदारचित्तः सर्वत्र वैष्णवाचारतत्परः॥
परनिन्दासहिष्णुः स्यादुपकाररतः सदा।
पर्वते विपिने चैव निर्जने शून्यमण्डपे॥
चतुष्पथे कलामध्ये यदि दैवाद् गतिर्भवेत्।
क्षणं ध्यात्वा मनुं जप्त्वा नत्वा गच्छेद् यथासुखम्॥
गृध्रं वीक्ष्य महाकालीं नमस्कुर्य्यादलक्षितम्।
क्षेमङ्करीं तथा वीक्ष्य जम्बूकीं यमदूतिकाम्॥
कुररं श्येनभूकाकौ कृष्णमार्जारमेव च।
पूर्णोदरि! महाचण्डे! मुक्तकेशि! बलिप्रिये!॥
कुलाचारप्रसन्नास्ये! नमस्ते शङ्करप्रिये!।
श्मशानस्थं शवं दृष्ट्वा प्रदक्षिणमनुव्रजन्॥
प्रणम्यानेन मन्त्रेण मन्त्री सुखमवाप्नुयात्।
घोरदंष्ट्रे! कठोराक्षि! किचिशब्दप्रणादिनि!॥
घुष्टघोररवास्फाल्ले! नमस्ते चितिवासिनि!।
रक्तवस्त्रां रक्तपुष्पां विलोक्य त्रिपुरात्मिकाम्॥
प्रणमेद्दण्डवद्भूमाविमं मन्त्रमुदीरयन्।
बन्धूकपुष्पसङ्काशे! त्रिपुरे! भयनाशिनि!॥
भाग्योदयसमुत्पन्ने! नमस्ते वरवर्णिनि!।
कृष्णवस्त्रं तथा पुष्पं राजानं राजपुत्रकम्॥
हस्त्यश्वरथशस्त्राणि फलकान् वीरपौरुषान्।

महिषं कुलदेवञ्च दृष्ट्वा महिषमर्दिनीम् ॥
जयदुर्गां स्मरेन्मन्त्री शतविघ्नैर्न लिप्यते ।
जयदेवि ! जगद्धात्रि ! त्रिपुराद्ये ! त्रिदैवते ! ॥
भक्तेभ्यो वरदे ! देवि ! महिषघ्नि ! नमोऽस्तु ते ।
मद्यभाण्डं समालोक्य मत्स्यं मांसं वरस्त्रियम् ।
दृष्ट्वा च भैरवीं देवीं प्रणम्य विमृषेन्मनुम् ॥
घोरविघ्नविनाशाय कुलाचारसमृद्धये ।
नमामि वरदे देवि ! मुण्डमालाविभूषिते ! ॥
रक्तधारासमाकीर्णवदने ! त्वां नमाम्यहम् ।
एतेषां दर्शने देवि ! यदि नैवं प्रकुर्वते ॥
शक्तिमन्त्रं पुरस्कृत्य तस्य सिद्धिर्न जायते ।
एतेषां मारणोच्चाटौ हिंसनं वाग्भवादिभिः ॥
कुरुते यदि पापात्मा मद्भक्तः स कथं भवेत् ।
प्रधानांशसमुद्भूता एते कुलजनप्रियाः ॥
डाकिन्यश्च तथा सर्वा मदंशाः शृणु भैरव ! ।
लब्धसिद्धिसमायोगात् डाकिनीहिंसनं यदि ॥
अथवा दानवानाञ्च मद्भक्तानां विशेषतः ।
वटुकानां भैरवाणां तस्य सिद्धिर्न जायते ॥

इति श्रीपूर्णानन्दगिरिविरचिते श्यामारहस्ये
दशमः परिच्छेदः ।

अथ एकादशः परिच्छेदः ।

अथ मन्त्रसिद्धिप्रकारो लिख्यते । तदुक्तं वीरतन्त्रे ।
अथातः संप्रवक्ष्यामि गुरुसिद्धिपरम्पराम् ।
रहस्यं मन्त्रसिद्धेस्तु पुरश्चर्यादिभिर्विना ॥

गोपितं कोटिशास्त्रेषु इदानीं प्रकटीकृतम् ।
एवं ज्ञात्वा विशेषज्ञो गोपयेत् प्रीतये मम ॥
एतत् प्रकाशनात् लोके महाहानिः पदे पदे ॥
शिवशिखिसितभानुं पञ्चमान्त्यस्वराढ्यं
द्वितयमिदमपूर्वं वीजमुग्रप्रभायाः ।
क्षणमपि रमणीनां मण्डलान्तर्विभाव्य
क्षपयति दुरदृष्टं वादिराट् जायते सः ॥ १ ॥
स जयति रिपुवर्गान् वादिराज्ञो विवादे
लसति च रमणीनां चित्तचौरश्चिरायुः ।
कलयति कविराजैरप्रदृष्टं सुकाव्यं
मधुमतिरपि हेया किं पुनः सिद्धसङ्घाः ॥ २ ॥
कुलयुवतिसुयोनौ मन्त्रवर्णान् विलिख्य
निखिलनिगमवर्णान् सुप्तदोषादिदृष्टान् ।
विदितगुरुकुलान्तर्वाह्यवर्त्माविधिज्ञो
मनुपुटितसुधीमान् साधयेद्दान्तचेताः ॥ ३ ॥
कुलपथमनुसन्ध्यां योऽपि तासां स्वभूमौ
तव जननि ! जनो यं तर्पयेत्तीर्थतोयैः ।
रुधिरभवसुपुष्पै र्गन्धमाल्यानुलेपै-
रचितयुवतिवेशस्त्वद्धिया ध्यायते सः ॥ ४ ॥
परिचरति समस्तैर्न्यासपूर्वैः प्रसिद्धै-
स्तव परिकरजालैर्योनिचक्रे प्रपूज्य ।
सुविमलकुलजां त्वां क्रोधघृणावर्जितां यः
स्वयमपि रचिताङ्गः क्षोभकृद्योगिनीनाम् ॥ ५ ॥
पशुरिपुकुलचक्रं संस्पृशन्मध्यशाखां
कुलपतिकुलनाथद्वयं योजयित्वा ।
मनुपुटितविमृग्यं योजयेत्तद्दयोर्यो

जननि ! तव कलानां कोविदां कामरूपः ॥ ६ ॥
कुमतिरहितचित्तः संलिखेत्तां त्रिधा मे
विगतभयविवादध्वान्तजालः सुधांशुः ।
तव चरणतलान्तर्धूलिजालैर्विशालैः
चिरकलितवपुस्तद्धर्मभिर्देवपूज्यैः ॥ ७ ॥
परिचरति स विप्रो मोक्षचर्य्याधिपश्च
मदनमदबधूनां वीजमुद्धृत्य शक्तिम् ।
तदनु कठिनवीजं ज्ञानचक्रं तदन्त-
र्यदि जपति मदन्तर्भावमासाद्य सद्यः ॥ ८ ॥
सुरनगरगतिज्ञैः सिद्धवृन्दैः प्रपूज्यः
शिवभृगुमदपृथ्वीशक्तियुक्तः स्वसिद्धम् ।
हरिहरचतुरास्यस्वस्वभूतिं प्रसूतं
परमवररसज्ञः क्षोभकृत् कामिनीनाम् ॥ ९ ॥
रतिपतिरपि वाचां श्रीपतिः सार्वभौमः
मृगमदकठिनाधः कामवीजं तदग्रे ।
भुवनभयविनाशः क्षोभिणीं योजयित्वा
जपति यदि सकृद्वा चिन्तते वीरसिंहः ॥
(कुलयुवतिकुलान्तः क्षोभकृत् कामभावः) ॥१०॥ पाठान्तरम् ।
मदनमदलताधः शक्तिवीजं नियोज्य
स्मरहरहरिरूपो कामरूपः कुवेरः ।
रिपुकुलहरिणाक्षो लोचनाम्भोजविप्रुड्-
विपुलजलनिषेकात् खण्डितान्तःस्थतापः ॥ ११ ॥
शिवमृगमदमूलं लोभमूलं समूलं
भजति यदि गुरूणां वर्त्ममूलं विमृग्यम् ।
निधिरपि निशिनाथो गोष्पतिः क्षुद्रचेताः
यदि भवति तदेतन्मुख्यमुर्वीपतित्वम् ॥ १२ ॥

वरुणरणविवर्ज्यं प्राणमेकं विवर्ज्यं
तदुपरि मृगचिह्नं द्वन्द्वमेतद् भवान्याः।
निखिलमनुवरेण्यं मोक्षदानैकदक्षं
सदसदमयधर्माक्षेपदक्षमन्त्रराजम् ॥ १३ ॥
अनलशिरसि घर्मं वादिराजं स्वतन्त्रं
भवसमनययुक्तं वीजमेतद्भवान्याः।
द्वितयमपि विमानं वक्तुमीशो महेशः
किमिह कमलजन्माजन्मधारासहस्रैः ॥ १४ ॥
इह भजति य एनं मन्त्रराजं सुभाग्यैः
भवति जननि ! युष्मत्पादपद्मोत्थजन्मा।
त्यजसि परपुमांसं मातृवत् क्वापि काले
न खलु न पुनरर्घ्यं तस्य किञ्चित् कदाचित् ॥ १५ ॥
विहितगुरुमुखाद्वा वालकाद्वा पशोर्वा
लिखितमपि सुबुद्धा प्राप्य कस्मादकस्मात्।
स्मररिपुपुरपारे मोक्षचर्य्याश्च पारे
परमपदविलीनः सर्वसौभाग्यभोगैः ॥ १६ ॥
अनलपुरविभागी कालिकावक्त्रवीजं
तदपि यदि विदध्यादक्षतं सान्तवर्णम्।
नयनयुतलकारं मस्तके नामयुक्तं
तदनु विकटदंष्ट्रासोत्कटं वीजयुक्तम्।
जपति यदि समस्तं गुह्यगुह्यातिगुह्यं
त्रिजगति किमिहास्ते क्लेशलभ्यं कथञ्चित् ॥ १७ ॥
क्रमपठितमपूर्वं सर्वमेवानुबध्य
मनुमपि परवाच्यं तस्य मध्यस्वरूपम्।
भजति यदि चिदानन्दात्मधृक्केवलोऽसौ
विपिनभुवि मनुष्यः कौतुकी कामदेवः ॥ १८ ॥

इति ते कथितं सर्वं रहस्यं परमाद्भुतम् ।
यथानुक्रमतो लोके किं न साधयति योगिराट् ॥

इति श्रीपूर्णानन्दपरमहंसविरचिते श्यामारहस्ये मन्त्र-
साधनोपाय एकादशः परिच्छेदः ।

अथ द्वादशः परिच्छेदः ।

अथ काम्यप्रयोगो लिख्यते । तदुक्तं कालीतन्त्रे ।

अथ काम्यविधिं वक्ष्ये येन सर्वत्र सर्वगः ।
साधकः साधयेत् सिद्धिं देवानामपि दुर्लभाम् ॥
कुलागारं पुष्पितायाः दृष्ट्वा यो जपते नरः ।
अयुतैकप्रमाणेन साधकः स्थिरमानसः ॥
केवलं गुप्तभावेन स तु विद्यानिधिर्भवेत् ॥

अयुतैकप्रमाणेति दिनत्रयं व्याप्य अयुतं जपेदित्यर्थः । इदन्तु रात्रावेव कर्त्तव्यं न तु दिवसे विविधविधिनिन्दाश्रुतेरिति ।

संस्कृताः प्राकृताः सर्वा लौकिका वैदिकास्तथा ।
वशमायान्ति ते सर्वे साधकस्य न चान्यथा ॥

कुलसर्वस्वेऽपि । ऋतुमत्या भगं पश्यन् यो जपेदयुतं नरः ।
अनुकूलाहि तद्वाणी गद्यपद्यमयी भवेत् ॥
छन्दोवद्धा परा वाणी तस्य वक्त्रात् प्रजायते ।

अथ कालीतन्त्रे ।

अथवा मुक्तकेशश्च हविष्यं भक्षयन्नरः ।
प्रजप्य चायुतं प्राज्ञ एतदेव फलं लभेत् ॥
नग्नां पररतां पश्यन् अयुतं यस्तु साधकः ।
प्रजपेत् स भवेत् सद्यो विद्याया वल्लभः स्वयम् ॥

तस्य दर्शनमात्रेण वादिनः कुण्ठतां गताः।
गद्यपद्यमयी वाणी सभायां तस्य जायते॥
तन्नाम्ना सुधियः सर्वे प्रणमन्ति मुदान्विताः।
तस्य वाक्यपरिचयात् जड़ा भवन्ति वाग्मिनः॥

सारसर्वस्वेऽपि।

नग्नां परस्त्रियं वीक्ष्य यो जपेदयुतं नरः।
स भवेत् सर्वविद्यानां पारगः सर्वदेव हि॥
कवित्वं जायते तस्य वाचा जीवसमो भवेत्।
अथवा मुक्तकेशश्च हविष्यं भक्षयन्नरः॥
प्रजपेदयुतं तावदेवं प्रतिनिधिर्भवेत्।
धनकामस्तु यो विद्वान् महदैश्वर्य्यकामुकः॥
बृहस्पतिसमो यस्तु कवित्वं कामयेन्नरः।
अष्टोत्तरशतं जप्त्वा कुलमामन्त्र्य मन्त्रवित्॥
मैथुनं यः प्रयात्येषः स तु सर्वफलं लभेत्।
लतारतेषु जप्तव्यं महापातकमुक्तये॥
लता यदि न संसर्गः तदा रेतः प्रयत्नतः।
समुत्सार्य्य जपेन्मन्त्री धर्मकामार्थसिद्धये॥
महाचीनद्रुमलतावेष्टितः साधकोत्तमः।
रात्रौ यदि जपेन्मन्त्रं सैव कल्पलता भवेत्॥
महाचीनद्रुमलतावेष्टनेन च यत् फलम्।
तस्यापि षोड़शांशेन कलां नार्हन्ति ते शवाः।
शवासनाधिकफलं लतागेहप्रवेशनम्॥

अथ विशेषो यथा। तदुक्तं कूलचूड़ामणौ।

रजोऽवस्थां समालोक्य तन्मूलेष्विष्टदेवताम्।
पूजयित्वा महारात्रौ त्रिदिनं पूजयेन्मनुम्॥
लक्षपीठफलं देव! लभते नात्र संशयः।

वेतालपादुकासिद्धिं खड्गसिद्धिञ्च भैरव ! ॥
अञ्जनं तिलकं गुप्तिं साधयेत् साधकोत्तमः ॥

प्रजपेदिति । प्रतिदिनमष्टोत्तरसहस्रमित्यर्थः ।

यत्र जापे च होमे च संख्या नोक्ता मनीषिभिः ।
तत्रेयं गणना प्रोक्ता गजाष्टकसहस्रकम् ॥
पृथ्वीमृतुमतीं वीक्ष्य सहस्रं यदि नित्यशः ।
तदा वादी सुसिद्धान्तः हतः क्षितितलं विशेत् ॥
पर्वते हस्तमारोप्य निर्भयः शुद्धमानसः ।
कवित्वं लभते सोऽपि अमृतत्वञ्च गच्छति ॥
पद्मं दृष्ट्वा तथा विन्दुं खञ्जनं शिखिनं तथा ।
चामरं रविविम्बञ्च तिलपुष्पं सरोवरम् ॥
त्रिशूलं वीक्ष्य जप्त्वा च शतशः शुद्धभावतः ।
सुप्रसादं सुवचनं सुलोचनं सुहास्यकम् ।
सुवेशं सुभगं गन्धं सुजनं सुखमेव च ॥
लभते च यथासंख्यं शृणु पार्वति ! सादरम् ।
महाचीनक्रमेणैव देवीं ध्यात्वा प्रपूज्य च ॥
तद्द्रुमोद्भवपुष्पेण पूजयेद्भक्तिभावतः ।
स भवेत् कुलदेवस्य कुलक्रमगतः शुचिः ॥
ब्रह्मतरोर्महापद्मे देवीं ध्यात्वा यथाविधि ।
तत् सुधारसधारेण तर्पयेन्मातृकानने ॥
तिथिक्रमेण संख्याभिर्लताभिर्वेष्टितो यदि ।
तदा मासेन सिद्धिः स्यात् सहस्रजपमानतः ॥
अष्टम्यां च चतुर्दश्यां द्विगुणं यदि दृश्यते ।
तदैव महती सिद्धर्देवानामपि दुर्लभा ॥
जपकल्पं महादेवि ! शृणुष्व कमलानने ।
स्वयं कर्त्तुमशक्तश्चेत् सम्प्रदायविदोऽथवा ॥

देशिकेन पुरश्चर्य्यां कारयेन्मन्त्रसिद्धये ॥

तथाच योगिनीहृदये ।

तस्माज्जपं स्वयं कुर्य्याद् गुरुं वा कारयेद्बुधः ।
गुरोरभावे विप्रञ्च सर्व्वप्राणिहिते रतम् ॥
गृहीत्वा भाग्यतो मन्त्रमिमं सद्गुरुवक्त्रतः ।
पुरश्चर्य्यामवश्यं हि कुर्वीत विजितात्मनः ॥

उत्तरतन्त्रेऽपि । सर्वस्वेनापि कर्त्तव्यं पुरश्चरणमुत्तमम् ।
अन्यथा नाधिकारः स्यात् तस्य पूजादिषु प्रिये ! ॥
कारयित्वा पुरश्चर्य्यां मन्त्रिणं शास्त्रवेदिनम् ।
वस्त्रालङ्कारवसुभिः प्रीणयेद् देवताधिया ।
ततोऽस्य मन्त्रसिद्धिः स्याद् देवता च प्रसीदति ॥

अथ कुलसारे ।

एवंविधविधानेन पुरश्चारी भवेन्नरः ।
लक्ष्यसंख्यं जपेद्देवि ! होमं कुर्य्यात् दशांशतः ॥
विल्वपत्रेण वा देवि ! तथा नीलाम्बुजेन च ।
शर्कराघृतयुक्तेन मधुयुक्तेन वा पुनः ॥
एवं हुत्वा ततो देवि ! तर्पणञ्च तथा पुनः ।
तर्पयेत् शुद्धदुग्धैश्च तथा च विमलैर्जलैः ॥
कुम्भाख्यमुद्रया देवि ! अभिषेकं स्वमूर्द्धनि ।
ब्राह्मणान् भोजयेद्द्रव्यैः पदार्थैः षड्रसैरपि ॥
विप्राराधनमात्रेण व्यङ्गं साङ्गं भवेद् यतः ।
गोभूहिरण्यवसुभिस्तर्पयेद्देशिकः सुधीः ॥
देशिकाय ततो देवि ! दक्षिणां विभवावधि ।
दातव्या परमप्रीत्या कार्य्यसिद्धिमभीप्सुभिः ॥
देशिके परितुष्टे च तुष्टाः स्युः सर्वदेवताः ।
एवंविधं जपं कृत्वा सर्व्वसिद्धिमुपालभेत् ॥

अथ जपनियमः। तदुक्तं कुलार्णवे।

लक्षमात्रं जपेद् यस्तु महापापैः प्रमुच्यते।
लक्षद्वयेन पापानि सप्तजन्मभवान्यपि।
महापातकमुख्यानि नाशयेन्नात्र संशयः॥
चतुर्लक्षं जपेद्देवि! महावागीश्वरो भवेत्।
कुवेर इव देवेशि! पञ्चलक्षात् न संशयः॥
षड्लक्षजपमात्रेण महाविद्याधरो भवेत्।
सप्तलक्षजपान्मन्त्री खेचरी मेलको भवेत्॥
अष्टलक्षं जपन्मन्त्री देवपूज्यो भवेन्नरः।
अणिमाद्यष्टसिद्धीनां नायको भवति प्रिये!॥
वरदास्तस्य राजानः योषितस्तु विशेषतः।
नवलक्षप्रमाणानि यो जपेत् कालिकामनुम्॥
रुद्रमूर्त्तिः स्वयं कर्त्ता हर्त्ता साक्षान्न संशयः।
सर्व्वैर्वन्द्यः सदा सुस्थः सर्वसौभाग्यवान् भवेत्॥
यत्र वा कुत्रचिद्भागे लिङ्गं स्यात् पश्चिमामुखम्।
स्वयम्भूर्वाणलिङ्गं वा वृषशून्यं जलस्थितम्॥
पश्चिमायतनं वात्र इतराद्वापि सुव्रते।।
शक्तिक्षेत्रेषु गङ्गायां नद्यां पर्वतमस्तके।
पवित्रे सुस्थले देवि! जपेद्विद्यां प्रसन्नधीः॥

अथ यामले। एवं कृतपुरश्चर्य्यः स्वयं वा गुरुणाऽथवा।
सर्वकामसमृद्धिः स्यात् प्रयोगानथ चारयेत्॥

भैरवतन्त्रेऽपि। महापीठे शिवक्षेत्रे शून्यागारे चतुष्पथे।
पूजयित्वा गन्धपुष्पैर्धूपदीपानुलेपनैः॥
कालिकां परमेशानीं जपेदयुतमानकम्।
अष्टम्याञ्च चतुर्दश्यां संक्रान्त्यां पूर्णिमातिथौ॥
भौमकुह्वां विशेषेण स्वयं वा गुरुणाऽथवा।

जपेत् सहस्रमानन्तु साष्टं शतमथापि वा ॥
होमयेन्मधुरोपेतैः पायसैः सर्वसिद्धये।

कुलसर्वस्वेऽपि।

कारयित्वा स्वस्त्ययनं द्विजेनागमवेदिना।
प्रतोष्य दक्षिणाभिस्तं वसेत् कल्पायुतं दिवि॥

कुलसारसंग्रहे।

पुण्यकाले युगाद्यायां पुष्ये मूलोत्तरासु च।
सुगन्धिकुसुमैर्देवीमर्चयित्वा वरानने!॥
जपेत् साष्टसहस्रैस्तु तर्पयेद् दुग्धखण्डकैः।
महतीं श्रियमाप्नोति राजानस्तस्य किङ्कराः॥

वीरतन्त्रे च। आनीय देशिकं शुद्धं जितेन्द्रियञ्चापि द्विजम्।
कारयीत जपं रात्रौ पूजयित्वा महेश्वरीम्॥
गन्धताम्बूलधूपाद्यैर्नैवेद्यैश्च पृथग्विधैः।
अष्टोत्तरसहस्रन्तु साष्टं शतमथापि वा॥
प्रत्यहं कारयेद्धीमान् यावत्त्रिंशद्दिनं भवेत्।
पूर्णमासे तु मन्त्रज्ञं तोषयेत् धनधान्यकैः॥
पुत्रवत् पालयत्येषा कालिकासाधकं सदा।
अवश्यं कालिकामन्त्रे जपो रात्रौ मतः प्रिये!॥
पूज्यो गुरुः सदा चास्मिन् परमोऽपि गुरुस्तथा।
परमेष्ठिगुरुश्चैव परापरगुरुस्तथा॥
उत्तरोत्तरतश्चैषां प्रशस्ता जपकर्मणि।
गुरुर्न रूक्षो द्रष्टव्यो नापि क्षुब्धस्तथैव च॥
इदं रहस्यं देवेशि! नाभक्ताय प्रदर्शयेत्।
कुलज्ञाय सुशीलाय वदान्याय महात्मने॥
गुरुभक्ताय शान्ताय सर्वभूतहिताय च।
प्रदद्याद् देशिको देवि! विधानं कालिकामतम्॥

अथ निशायां दीक्षितायां कुलनायिकां समानीय व्यापकन्यासं कुर्य्यात्।

प्रथमं साधकश्रेष्ठो देवीकूटस्य मन्त्रवित्।
विलिख्य मन्त्रं पूर्वोक्तं पूजयेत् कुलवर्त्मना॥
पीठदेवीं प्रथमे च पूजयेद् गन्धपुष्पकैः।
महाभागं ततो मूलदेवीमावरणैः सह॥
लक्षैकं तत्र जप्त्वा तु चोड्डीयानं ततो विशेत्।
देवीकूटस्येति पादपद्मोपरि।
तत्पीठे योगनिद्राख्यां पूजयित्वा ततो जपेत्॥
निजेष्टदेवतां तत्र जपेत् लक्षं समाहितः।
उड्डीयानमरुयुगमित्यर्थः।
कामरूपं ततो ध्यात्वा तत्र कात्यायनीं जपेत्।
कामरूपं प्रजापतिमित्यर्थः।
तत्रापि लक्षमानेन जप्त्वा मन्त्रं समाहितः।
ततः पूर्णगृहं गत्वा यजेच्चण्डीं ततो जपेत्॥

पूर्णगिरौ शिरसि इत्यर्थः। यजेदिति मूलदेवीं सावरणां प्रपूज्य लक्षं जपेदित्यर्थः।

कामरूपान्तरे वत्स! कामाख्यां प्रथमं यजेत्।
कामरूपं विन्दुचक्रं जप्त्वा रात्रौ समाहितः॥
संख्यापूर्त्तौ पुनः पृच्छेत् का त्वं देवि! कुलोत्तमे!।
एवं कृते विस्मृतश्चेत् स्वनामगोत्रकान्यपि॥
तत्रेष्टदैवतैरेव शृणुष्व वरमुत्तमम्।
ततः प्रणम्य देवेशीं शृणुयाद्वरमुत्तमम्॥
एवं जपवशादेव पुनः पूर्वोक्तमाचरेत्।
अक्षोभितकुलाचारपरिचर्य्यापरायणः।
अथवा सर्वपीठेषु यजेन्महिषमर्दिनीम्॥

ततः प्रसन्ना भवति स्वैरं कुलवरं प्रिये !।
ततो जप्त्वा मूलमन्त्रं सर्वसिद्धीश्वरो भवेत् ॥

इति पूर्णानन्दपरमहंसविरचिते श्यामारहस्ये
द्वादशः परिच्छेदः।

अथ त्रयोदशः परिच्छेदः।

अत्र ग्रन्थगौरवभयात् महाभयादिपीठक्रमो न लिखितः। किन्तु सर्वपीठे महिषमर्दिनीपूजायाः विहितत्वात् तत् क्रमो लिख्यते। तदुक्तं कुलचूड़ामणौ।

भैरव उवाच।

मातर्महिषमर्दिन्याः सङ्केतं कथयस्व नः।
कुलाचारस्य संसिद्धौ भुक्तिमुक्तिप्रसिद्धये ॥

श्रीदेव्युवाच।

सृष्टिस्थितिविनाशानामादिभूता महेश्वरी।
गोप्या सर्वप्रयत्नेन शृणु तां कथयामि ते ॥
त्रैलोक्यवीजभूतान्ते सम्बोधनपदं ततः।
सृष्टिसंहारवर्णौ द्वौ निष्ठा महिषमर्दिनी ॥

अस्यार्थः। मदनरिपुशक्तिवीजान्ते महिषमर्दिनीपदमाभिमुख्यार्थेनोद्धृत्य वह्निललनामुद्धरेदिति।

अतिगुह्यतरा विद्या सृष्टिस्थितिविधायिनी।
सर्वदेवसर्वसिद्धिवीजभूता सनातनी ॥
न कस्मैचित् प्रदातव्या कथिता सिद्धिदायिनी।
अत्यन्तगुरुभक्ताय शिष्याय यदि कथ्यते।
तदाष्टवर्णं वक्तव्यं न वीजं नापि साधनम् ॥

साधारणी प्राणविद्या हृल्लेखा सिद्धिगोचरा।
एतत् पूर्वस्थिता देवी गुरुसिद्धिप्रणाशिनी॥
विशेषतः कलियुगे महासिद्धौघदायिनी।
गुरूणां कुलनाथानां महाशापप्रदायिनी॥
जयदुर्गा त्वया प्रोक्ता परमा सिंहवाहिनी।
त्रैलोक्यबीजभूतान्ते सा परा मर्दिनी कुलम्॥
वरं वह्निप्रियायुक्ता देवाननसमन्विता।
दत्ता ते परमा विद्या ङेयुक्ता हृदयान्विता॥
सर्वत्र कुलशास्त्रज्ञे! महाशापप्रदायिनी।
तस्मात् सर्वप्रयत्नेन गोप्तव्येयं नवाक्षरी॥
अष्टलक्षं जपेन्मन्त्रं तद्दशांशं हुनेत्ततः।
नारदोऽस्य ऋषिः प्रोक्तश्छन्दोगायत्रमीरितम्॥
देवता महिषघ्नीयं पूर्वं बीजं परापरा॥

अथ अस्याः पूजाक्रमः। प्रातःकृत्यादि स्नानादिकं विधाय द्वारदेवताः पूजयेत्। तदुक्तं तन्त्रान्तरे।

ऊर्द्ध्वोडुम्बरके विघ्नं महालक्ष्मीं सरस्वतीम्॥
ततो दक्षिणशाखायां विघ्नं चेत्रेशमध्यतः।
तयोः पार्श्वगते गङ्गायमुने पुष्पवारिभिः॥
देहल्या मर्चयेदस्त्रं प्रतिद्वारमिति क्रमात्।

ततस्त्रिविधविघ्नोत्सारणं स्थापनं भूतशुद्धिं प्राणायामञ्च पूर्ववत् कृत्वा ऋष्यादिन्यासान् कुर्य्यात्। तदुक्तम्। नारदऋषिर्गायत्रीच्छन्दः श्रीमहिषमर्दिनी देवता क्लीं बीजं स्वाहा शक्तिर्महिषमर्दिनीकीलकं चतुर्वर्गे इत्यभिलप्य पूर्ववत् न्यसेत्। तदा करन्यासं कुर्य्यात् यथा। ॐ महिषहिंसके! हुं फट् अङ्गुष्ठाभ्यां नमः। ॐ महिषशत्रो। सर्वे हुं फट् तर्जनीभ्यां स्वाहा ॐ महिषं हिंसय हुं फट् मध्यमाभ्यां वषट्। महिषं

हन हन देवि ! हुं फट् अनामिकाभ्यां हुं । ओं महिषमर्दिनि ! हुं फट् करतलपृष्ठाभ्यां अस्त्राय फट्। इति न्यस्य एवं पञ्चा-पञ्चाङ्गेषु अङ्गन्यासं कृत्वा ऊर्द्धोर्द्ध तालत्रयं कृत्वा दशदिग्-बन्धनं कुर्य्यात्। तदुक्तं तत्रैव।

ओं महिषहिंसके ! हुं फट् हृदयाय नमो हृदि ।
ओं महिषशत्रो ! सर्वं हुं फट् शिर उदीरितम् ॥
ओं महिषं हिंसय हुं फट् शिखामन्त्र उदीरितम् ।
ओं महिषं हन हन देवि ! हुं फट् कवच इत्यपि ॥
ओं महिषमर्दिनि ! हुं फट् अस्त्राणि शृणु भैरव ! ॥

ततः पूर्ववन्मातृकान्यासव्यापकन्यासौ कृत्वा कुलकुसुमा-दिना वृत्तषोड़शदलकेशराष्टदलाष्टवर्णयुक्तं वृत्तचतुरस्रं चतु-र्द्वारकर्णिकाख्यवीजात्मकं यन्त्रं निर्माय पुरतः सिंहासने संस्थाप्य तत्राधारशक्त्यादिपीठदेवताः च संपूज्य पूर्ववदर्घ्य-स्थापनादिकं कृत्वा देवीं ध्यात्वा पूजयेत् तदुक्तं तत्रैव।

ध्यायेत् कालीं महादैत्ययुद्धवासरसोन्मुखीम् ।
दक्षिणे चक्रखड्गौ च बाणशूलौ तथैव च ॥
वामे शङ्खं तथा चर्म धनुस्तर्जनमेव च ।
बिभ्रतीं कालतीव्रोरुमहिषाङ्गनिषेदुषीम् ॥
पीताम्बरधरां देवीं पीनोन्नतकुचद्वयाम् ।
जटामुकुटशोभाढ्यां पितृभूमिसुखावहाम् ॥

एवं ध्यात्वा मानसोपचारैः संपूज्य आवाहनादिकं कृत्वा षोड़शोपचारैः देवीं पूजयेत्। अङ्गमन्त्रैरङ्गानि संपूज्य कामाख्यां दिशि पर्य्यन्तं पूर्वोक्तप्रह्लादानन्दनाथादिगुरुपंक्तिं गुरुपरमगुरुपरमेष्टिगुरूंश्च पूजयेत्। पूर्वाद्यष्टदले आं दुर्गायै ईं वरवर्णिन्यै ऊं आद्यायै एं कनकप्रभायै ऐं कृत्तिकायै ओं अभयप्रदायै औं कन्यायै अः स्वरूपायै नम इति पूजयेत्।

तदुक्तं तन्त्रान्तरे।

आदौ दुर्गां ततो वर्णां ततोऽपि आद्यकाह्वयाम्।
ततः कनकप्रभाञ्चैव कृत्तिकामभयप्रदाम्॥
कन्यकाञ्च स्वरूपाञ्च यजेत् पूर्वादितः सुधीः॥

कुलचूड़ामणौ।

अष्टपत्रे यजेद्देवीं दुर्गाद्यां दीर्घपूर्विकाम्।

दीर्घशब्देन अत्र पारिभाषिकग्रहणम्। तेन आ ई ऊ ए ऐ ओ औ अः इति शारदाटीकाकारेणोक्तम्। ततो देव्या दक्षोर्द्ध्वहस्ततः पत्राग्रे यं चक्राय नमः वं खड्गाय नमः लं बाणाय नमः वं शूलाय नमः। वामोर्द्ध्वतः शं शङ्खाय नमः चं चर्मणे नमः। हं तर्जनाय नमः सं धनुषे नमः इति पूजयेत्। तदुक्तं तत्रैव।

आयुधानि पत्राग्राग्रे यादिभिः क्रमशो यजेत्।

ततोऽष्टदलबाह्ये ब्रह्माण्याद्यष्टशक्तीः प्रपूज्य चतुरस्रे पूर्वादिक्रमेण लोकपालान् तद्बहिस्तदस्त्राणि पूजयेत्। तदुक्तं तत्रैव।

ब्रह्माण्याद्यास्ततः पश्चात् लोकपालान् ततो बहिः।
तदस्त्राणि सिद्धमन्त्री प्रयोगञ्च समाचरेत्॥

ततः पुनर्देवीं संपज्य यथाशक्ति जपं कृत्वा अर्घ्यजलपुष्पाभ्यां गुह्यातिगुह्यमन्त्रेण देव्या वामकरे जपं समर्प्य स्तुतिं कृत्वा प्रदक्षिणाष्टाङ्गप्रणामं विधाय देवीं स्वहृदि विसर्जयेदिति।

अथ पुरश्चरणनियमो यथा।

अष्टलक्षं जपेन्मन्त्रं तद्दशांशं हुनेत्ततः।

ततो होमदशांशतर्पणं तद्दशांशाभिषेकं तद्दशांशब्राह्मण-

भोजनमिति पुरश्चरणाङ्गत्वाद् दक्षिणा। होमद्रव्यनियमो यथा।

वशयेत्तिलहोमेन नरान्नरपतीनपि।
सिद्धार्थैर्जुहुयान्मन्त्री रोगैर्मुच्येत तत्क्षणात्॥
पद्मं हुत्वा यजेत् शत्रून् दूर्वाभिः शान्तिमेव च।
पलाशकुसुमैः पुष्टिर्धान्यैः धान्यश्रियं लभेत्॥
काकपक्षैः कृतो होमो द्वेषं वितनुते नृणाम्।
मरीचहोमैर्मरणं रिपुराप्नोति सर्वदा॥
क्षुद्राभिचारभूतादीन् ध्यात्वा देवीं विनाशयेत्।

कुलचूड़ामणौ। प्रयोगहोमसंशये सहस्रवसुसंज्ञकम्॥

एषा विद्या महाविद्या न देया यस्य कस्यचित्।
यदि भाग्यवशाद्देवि! कुलदेवी कुलोत्तमैः॥
दीक्षिता कुलजाभिस्तु सिद्धिदा सैव नान्यथा॥

गुप्तरहस्योक्तं महिषमर्दिन्याः कवचं लिख्यते।

भैरव उवाच। शृणु देवि! प्रवक्ष्यामि मर्दिन्याः कवचं शुभम्।

यस्याराधनमात्रेण महाभैरवतां व्रजेत्॥
देवैर्देवत्वविषये सिद्धैः खेचरसिद्धये।
पन्नगैराक्षसैर्मर्त्यैर्मुनिभिः सेवितं सदा॥
अस्याः कवचं महापुण्यं स्वयं वक्त्राद् विनिःसृतम्।
भूप्रदेशे समे शुद्धे पुष्पप्रकरसंकुले।
कल्पयेदासनं धीमान् कोमलं कम्बलासनम्॥
वामे गुरुं पुनर्नत्वा दक्षिणे च गणाधिपम्।
मध्ये तु मर्दिनीं नत्वा सर्वे रक्षन्तु मां सदा॥
आग्नेय्यां नैरृते पातु चैशान्यां वायवे तथा।
उत्तरे पातु ललिता जिह्वाललनभीषणा॥
कौमारी पश्चिमे पातु धनदा च दिशो दश।

शाकिनी डाकिनी पातु मर्दिनी पातु सर्वदा ॥
कृत्स्नवृत्त्चः सदा पातु विघ्ने च रक्तदन्तिका ।
एतास्तु वरयोगिन्यो रक्षन्तु साधकाग्रतः ॥
पठित्वा पाठयित्वा च कवचं सिद्धिदायकम् ।
पठेन्मासत्रयं मन्त्री वारमेकं तथा निशि ॥
रात्रौ वारत्रयं जप्त्वा नाशयेद्विघ्नमेव च ।
जपन्मासत्रयं विद्यां राजानं वशमानयेत् ॥
भीतो भयात् प्रमुच्येत देवि ! सत्यं न संशयः ।
अप्रकाश्य मिदं गुह्यं न देयं यस्य कस्यचित् ॥
सत्कुलीनाय शान्ताय सुजने दम्भवर्जिते ।
दद्यात् स्तोत्रमिदं पुण्यं सर्वकर्मफलप्रदम् ॥
कवचं यो न जानाति जपेन्महिषमर्दिनीम् ।
दारिद्र्यत्वं भवेत्तस्य सत्यं सत्यं वदाम्यहम् ।
अनया सदृशी विद्या नास्ति तन्त्रेषु गोपिता ॥

इति कवचं समाप्तम् ।

अथ स्तुतिः तदुक्तं कुलचूड़ामणौ । भैरव उवाच ।
मच्चित्ते चर चण्डि ! चूर्णितदुराचारप्रचण्डासवे
स्वैरं दारय भूवि दुर्धरदवद्रोहोर्मिमर्मास्पदः ।
तेनायं निरुपद्रुतो निरुपमश्रीपादपद्माटवी-
प्रान्तानन्तवशान्तरे मम मनोहंसश्चिरं नन्दतु ॥ १ ॥
हित्वा चण्डि ! हिरण्यदारणपटुप्रोद्दामदन्ताङ्गुलिः
स्फालत्कल्पसुमेरुसादरसटाटोपं नृसिंहं सुराः ।
मातस्तत्पशुपाशपेशलपटुश्रीपादसंसेविनं
सेवन्ते करिवैरिणं किमरिभिर्भीतिर्भवत्सेविनाम् ॥ २ ॥
चण्डि ! त्वद्विषयान्तरक्षणपदं श्रोत्रान्तरं चोद्यतं
तत्त्वं पुरुषप्रकृत्यनुगतं ब्रह्मादिभिर्गीयते ।

तस्माद्देवि ! समस्तदैवतसुधासारैकधामस्फुरत्-
श्रीमत्पादसरोजचुम्बनपरं मामद्य सम्भावय ॥ ३ ॥
मन्निद्रा यदि वास्तु तत्कुलपथाचाराद्वरं मास्तु वा
कीर्त्तिः केशवकौशिकार्चनकरी नैवास्तु सत्सन्निधिः ।
मातर्ब्रह्महरिस्मरारिहुतभुग्दैत्यारिसेवापद-
श्रीमत्पादसरोजचिन्तनविधौ चित्तं सदैवास्तु नः ॥ ४ ॥
निर्दिष्टोऽस्मि यदि त्वदीयपदयुक्पूर्वापरीभावने
निर्दिष्टस्य तदा ममापि विरलं किंवास्तु सिद्धास्पदम् ।
तस्माद्देवि ! कृपाभवाञ्छितभवं श्रीपादपद्मद्वयं
मच्चित्ते च्युतसम्पदि प्रसरतु क्षेमङ्करि ! क्षम्यताम् ॥ ५ ॥
स्वात्मानं परिरभ्य भूतपतिरप्युन्मादमासादितः
स्वैरं जीवनरक्षणे स च कृतौ नैवाभविष्यत् प्रभुः ।
दैवाद्विच्युतचन्द्रचन्दनवनप्रागल्भगर्भस्रव-
न्माध्वीपूर्णभवत्पदैककमलामोदेन नास्वादितः ॥ ६ ॥
हाहा मातरनादिमोहजलधिव्याहारसिद्धाखिल-
ब्रह्मानन्दरसाभिषेकनिरसस्वान्तोदरैर्मादृशः ।
अस्माकं सुरवृन्दनिर्भरमनस्तापाभिभूतिक्षम-
श्रीमद्भक्तिरसातिदुर्दिनपरीणाहः सदा सर्पतु ॥ ७ ॥
यत्पादस्फुरदंशुजालजठराचण्डांशुकोटिस्खलत्-
स्वान्तध्वान्तविसारिनिर्मलचिदानन्दत्रयं दैवतम् ।
स्वर्गं संसृजते स्थितिं वितनुते सृष्टिं पुनर्लुम्पते
प्रोज्झित्वाञ्जननीलनीरजमहच्चित्ते तदेवास्तु नः ॥ ८ ॥
या शश्वन्महिषच्छलस्फुरमिलद्गर्भेद्विधारस्फुर-
द्भ्रान्तः प्रसरत्समस्तमशिरो दैत्यं समालम्बते ।
सा दुर्गा भयदुर्गदुर्गतिहरा लम्बान्तरत्रासिनी
दृप्यद्दैवतवैरिमारणपटुर्ज्जीयाज्जयाह्लादिनी ॥ ९ ॥

नृत्यत्खेटकचामराञ्जनचरच्चक्राद्यखड्गावर-
स्फायच्छैलशिलीमुखोच्छलदनल्पाजिच्युतास्त्रायुधौ।
वाञ्छावात-विसर्पिनर्त्तितशिरःसाटोपदुष्टासुर-
लुप्यत्खण्डविखण्डिताखिलशकुन्तच्छुत्पिपासाकुले: ॥१०॥
काञ्चीकल्पविरामकालकलितां तीव्रोरुसम्पादको-
न्मायन्माहिषतिर्य्यगायतशिरःशृङ्गान्तरालस्थले।
वर्णैर्वर्णसुपत्रमध्यकलिते रच्चाश्रुती मातृभिः
सेव्ये चारुवराङ्गने रणमुदा चूर्णायमानां स्मरेत् ॥ ११ ॥
ऊर्द्ध्वाधःक्रमसव्यवामकरयोश्चक्रं दरं कर्त्तृका
खेटं बाणधनुस्त्रिशूलभयकृन्मुद्रां दधानां शिवाम्।
श्यामां नीलघनोच्चकुन्तलचयप्रोन्नद्धजूटास्फल-
द्वीरास्फाललसत्करालवदनां घोराट्टहासोद्भटीम् ॥ १२ ॥
एवं ये भवदेवि! मूर्त्तिमनघां ध्यायन्ति दुर्गादिभिः
शक्राद्यैरपि पूजितां परपुरक्षोभादिकं कुर्वते।
राज्यं शत्रुजयः सदर्थधिषणा काव्यामृतं देशिकः
स्तम्भोच्चाटनमारणादिकृतिनां तेषां स्वयं जायते ॥ १३ ॥
स्तोत्रं ते चरणारविन्दयुगलध्यानावधानान्मया
मन्त्रोद्धारकुलोपचाररचितं गुप्तोपदेष्टा यदि।
ये शृण्वन्ति पठन्ति देवि! सहसा श्रीमोक्षकामादय-
स्तेषां हस्तगता भवन्ति जगतां मातर्नमस्ते जयः।

इति स्तुतिः समाप्ता।

चितामध्ये च यो दद्याद् बलित्रितयमुत्तमम्।
कालरात्रि! महाकालि! कालिके! घोरनिस्वने!।
गृहाणेमं बलिं मातर्देहि सिद्धिमनुत्तमाम्।
कालकायं बलिं दत्त्वा पञ्चगव्येन सुन्दरि!॥
अस्थिसंप्रोक्षणं कृत्वा पीठमन्त्रं न्यसेत्ततः।

भूर्जे वा वटपत्रे वा तत्र पीठमनुं न्यसेत् ॥
पीठमास्तीर्य्य तस्मिन् वै न्यसेद्वीरासनं ततः ।
वीरासनेन देवेशि ! रक्षां दिक्षु प्रकल्पयेत् ॥
कूर्चयुग्मद्वयं देवि ! मायायुग्मं ततः परम् ।
कालिके ! घोरदंष्ट्रे ! च प्रचण्डे ! चण्डनायिके ! ॥
दानवान् द्रावयेत्युक्त्वा हनेति द्वितयं ततः ।
शवशरीरमहाविघ्नं छेदय द्वितयं ततः ॥
द्विठान्ते वर्मशस्त्रान्ते वीराख्योऽयं मनुर्मतः ।
अनेन मन्त्रेण लोष्टं पार्श्वे दिक्षु विनिःक्षिपेत् ॥
तन्मध्ये भैरवो देवो न विघ्नैः परिभूयते ।
यदि प्रमादाद्देवेशि ! साधको भयविह्वलः ॥
ततस्तैस्तैः सुहृद्वर्गैः रक्षिता नाभिभूतयः ।
अर्केन्दुसितवाय्यालमूलैर्निर्मितवर्त्तिकाम् ॥
प्रदीपं तत्र संस्थाप्य अस्त्रं तत्र प्रपूजयेत् ।
हते तस्मिन् महादीपे विघ्नैश्च परिभूयते ॥
तदधश्चास्त्रमन्त्रेण निखनेत् कुलदीपकम् ।
तत्तत् कल्पविधानेन भूतशुद्धादिकं चरेत् ॥
सोढ़ां वा तारकं वापि विन्यस्य पूजनं ततः ।
मन्त्रध्यानपरो भूत्वा जपेन्मन्त्रमनन्यधी ॥
एकाक्षरी यदि भवेत् दिक्सहस्रं ततो जपेत् ।
द्व्यक्षरे चाष्टसाहस्रं त्र्यक्षरे त्वयुतार्द्धकम् ॥
अतःपरन्तु मन्त्रज्ञो गजान्तकसहस्रकम् ।
निशाप्रान्तं समारभ्य उदयान्तं समाचरेत् ॥
अन्यत्रापि । पञ्चोपचारेण पुरतो देवतां परिपूजयेत् ।
यद्यसत्यभयं वापि नेत्रे वस्त्रेण बन्धयेत् ॥
ततोऽर्द्धरात्रिपर्य्यन्तं यदि किञ्चिन्न पश्यति ।

जयदुर्गामनुनार्घ्यं तेनैव सर्षपान् क्षिपेत् ॥

जयदुर्गामन्त्रो यथा। तदुक्तं बृहन्मत्स्यसूक्ते।

तारो दुर्गे युगं रक्षि ततो ढान्तं सलोचनम्।
द्विठान्ता जयदुर्गेयं विद्या वेद्या दशाक्षरी ॥
तिलोऽसि सोमदैवत्यो गोसवःसृष्टिकारकः।
पितृणां स्वर्गतुष्ट्यर्थं मर्त्यानान्तु स रक्षकः ॥
भूतप्रेतपिशाचानां विघ्नेषु शान्तिकारकः।
इति क्षिप्त्वा तिलानात्मचतुर्भागे शिवादितः ॥
ततः सप्तपदं गत्वा पुनस्तत्रैव संविशेत्।
देवं तत्रापि संपूज्य पूजयेन्मनुमुत्तमम् ॥
निर्भयः प्रजपेद् यावत् सिद्धिरग्रे भवेन्नरः।
तत् सत्यं कारयित्वा च वरयेद्वरमुत्तमम् ॥
यदा वलिं प्रार्थयते नरं कुञ्जरमेव वा।
दिनान्तरे च दास्यामि स्वीकृत्य च गृहं व्रजेत् ॥
परेऽह्नि च ततो दद्यात् पिष्टेन नवकुञ्जरान्।

यवोद्भवेन धान्योद्भवेन वा। तदुक्तं तन्त्रान्तरे।

यत्र चेन्नमयं वापि शालिधान्योद्भवञ्च वा।
चन्द्रहासेन विधिवत् तत्तन्मन्त्रेण घातयेत् ॥

चन्द्रहासेनार्द्धचन्द्राकृतिखड्गेन इत्यर्थः।

नीलतन्त्रेऽपि। जपादौ तु वलिं दद्यात् पश्चादपि वलिं हरेत्।
जपान्ते जपमध्ये वा देहि देहीति भाषते ॥
तदापि च वलिं दद्यात् महिषं छागमेव वा।
न दिक्षु वीक्षणं किञ्चिन्न च बन्धुसमागमः ॥
जलादिदुर्गसर्पाणां दक्षिणां विभवावधि।
गुरवे गुरुपुत्राय तत्पत्नै वा प्रदापयेत् ॥
सम्यक् सिद्धैकमन्त्रस्य नासाध्यमिह किञ्चन।

बहुमन्त्ररतः पुंसः का कथा शिव एव सः ॥

श्मशानविशेषो यथा । तदुक्तं कुलसद्भावे ।

श्मशानालयमागत्य मुक्तकेशो दिगम्बरः ।
जपेदयुतसंख्यन्तु सर्व्वकामार्थसिद्धये ॥
तत्रैव प्रेतमारुह्य प्रजपेन्मन्त्रमुत्तमम् ।
अयुतं मैथुनीभूत्वा विभीः सत्यपरायणः ॥
स याति परमां सिद्धिं देवैरपि सुदुर्लभाम् ।
आकर्षणवशीकारमारणोच्चाटनादिकम् ॥
स्तम्भनं मोहनञ्चैव द्रावणं त्रासनं तथा ।
वाग्मित्वञ्च धनित्वञ्च बहुपुत्त्रत्वमेव च ॥
बहुवल्लभतामेति सर्व्वप्रियत्वमेव हि ।
स याति खेचरत्वञ्च देवैरपि सुदुर्लभम् ॥
न जरा न च मृत्युश्च न रोगो न च घातनम् ।
अथवा स भवेन्नित्यं कर्त्तुर्विंशतिसिद्धियुक् ॥
स्वदेहरुधिराक्तैश्च विल्वपत्रैः सहस्रशः ।
श्मशानेऽभ्यर्च्च्य देवीञ्च वागीशसमतां व्रजेत् ॥

कालीतन्त्रे च । महाचीनद्रुमलतामज्जाभिर्विल्वपत्रकम् ।
सहस्रं देवीमभ्यर्च्च्य श्मशाने साधकोत्तमः ॥
तदा राज्यमवाप्नोति यदि नैवं पलायते ।
अनादित्यं यथा दृष्ट्वा लक्षं जपति भूमिपः ॥
निर्म्मलाञ्च ततो दृष्ट्वा वश्यार्थमयुतं जपेत् ॥

भैरवतन्त्रेऽपि ।

श्मशाने योषितं मन्त्री संपूज्य ऋतुगां शुभाम् ।
रक्तचन्दनसिक्ताङ्गीं रक्तवस्त्रैरलङ्कृताम् ॥
तावत् पुष्पैर्मनुं प्रोच्य ततो ध्यायेच्च चण्डिकाम् ।
पूजयित्वा लभेत् राज्यं यदि न वितथायते ॥

मेषमहिषरक्तेन वाग्मित्वं तस्य जायते ।
धनित्वं जायते तस्य सर्वसिद्धिः प्रजायते ॥
वचसा स भवेज्जीवो धनेन च धनाधिपः ।
आज्ञया देवराजोऽसौ रूपेणैव मनोभवः ॥
बलेन पवनो ह्येष सर्वतत्त्वार्थसाधकः ।
साधितं शोधितं मांसं सास्थि दद्यात् सदा बलिम् ॥
मूषमांसं छागमांसं मैषं माहिषमेव च ।
सर्वं सास्थि प्रदातव्यं तथा लोमसमन्वितम् ॥
अजीवं स्वनखच्छिन्नं केशं संमार्जनास्पदम् ।
निवेदयेत् श्मशाने च सर्वसिद्धिप्रदं भवेत् ॥
नारीरजोऽन्वितं कृत्वा पत्राणां शतमुत्तमम् ।
प्रत्येकं प्रजपेन्मन्त्रं तत्त्वो होमं समाचरेत् ॥
युगानामयुतं देवि ! पूजिता दक्षिणा भवेत् ।
सर्वसिद्धिर्भवेत्तस्य वाग्मी धीरश्च जायते ॥
न तस्य दुर्लभं किञ्चित् पृथिव्यां तस्य जायते ।

कुलसद्भावेऽपि ।

रेतोयुक्तेन पुष्पेण चार्कस्यैव सहस्रशः ।
श्मशानेऽभ्यर्च्य कालीं तु सर्वसिद्धिं स विन्दति ॥
धनवान् बलवान् वाग्मी सर्वयोषित्प्रियः सुखी ।
जायते नात्र सन्देहो महाकालवचो यथा ॥
श्मशाने शयनं यस्य शवासनगतः पुमान् ।
असकृच्च जपेन्मन्त्रं सर्वसिद्धिप्रदो भवेत् ॥
तर्पयेच्च शवास्ये तु रक्तमांसादिभिस्तथा ।
त्रिभिर्मन्त्रमुदीर्य्यैवं सर्वसिद्धिर्भवेत्ततः ॥
तर्पयेच्च पयोभिश्च रक्तधारायुतै स्तथा ।
रेतोभिश्च तथा तद्वत् स्वकीयेन कचेन च ॥

मैथुनार्जितयोषायाः कुलप्रक्षालनेन च।
मेषमाहिषरक्तेन नररक्तेन चैव हि॥
मूषमार्जाररक्तेन वाग्मित्वं तस्य जायते।
वलित्वं जायते तस्य सर्वसिद्धिश्च जायते॥

भावचूड़ामणौ। सर्वसिद्धिप्रदं साक्षान्महापातकनाशनम्।
सर्वपापहरञ्चैव सर्वरोगविनाशनम्॥
नान्यत् सिद्धिप्रदं देवि! वीरसाधनवर्जितम्।
महाबलो महाबुद्धिर्महासाहसिकः शुचिः॥
महास्वच्छो दयावांश्च सर्वभूतहिते रतः।
तेषां कृते महादेवि! वीरसाधनमुत्तमम्॥

बृहत्श्रीक्रमसंहितायाम्।

नास्मात्परतरं किञ्चित् सत्वरं सिद्धिदायकम्।
सर्वसिद्धिर्भवत्येव अहोरात्रे कलौ युगे॥
द्वापरे तच्च मासे च त्रेतायां वत्सरेण च।
कृते च दशभिर्वर्षैः सत्ये सिद्धिर्न संशयः॥

अथाष्टम्यां चतुर्दश्यां कुजवारे वा प्रथमप्रहराभ्यन्तरे गुरुं देवीञ्च नत्वा वीरवेशो यात्रां कुर्य्यात्। तदुक्तं तन्त्रान्तरे।

धटीबन्धनवस्त्रञ्च मूलेन परिधाय च।
तवार्थेन पुनर्वस्त्रं मूलेनाङ्गविलेपनम्॥
कृतोष्णीशश्च मूलेन सिन्दूरेणोर्द्ध्वपुण्ड्रकम्।
इष्टदेवं गुरुं नत्वा यात्रा प्रहरमध्यतः॥
कार्य्या च साधकैः सार्द्धं हृदि मन्त्रं परामृषन्।
अक्षुब्धो भुक्तभोज्यस्तु यदि स्याद्वीरसाधकः॥
दिव्यो वा पशुभावो वा भुक्त्वा साधनमाचरेत्॥

अथ साधनस्थानम्। तदुक्तं भावचूड़ामणौ।

शून्यागारे नदीतीरे पर्वते निर्जनेऽपि वा।

बिल्वमूले श्मशाने वा तत्समीपे वनस्थले ।
अष्टम्याञ्च चतुर्दश्यां पक्षयोरुभयोरपि ॥
भौमवारे तमिस्रायां साधयेत् सिद्धिमुत्तमाम् ।
उपचारं समादाय कुलाम्रतरसन्तथा ॥
गुड़ार्द्रकरसेनैव सुरा तु ब्राह्मणस्य च ।
गौड़ी च क्षत्रियस्यैव माध्वी वैश्यस्य तत्र वै ॥
कदलीमधुसंमिश्रश्वानत्वचि रसैः सुरा ।
सर्वं शूद्रस्य संप्रोक्तं यत्र वा तद्रुचिर्भवेत् ॥
गृहीत्वा तत्र दातव्यं सर्वं नैव च संस्पृशेत् ।
अन्यत्रापि । द्विजानामनुकल्पन्तु न साक्षाच्च विकल्पितम् ॥

तदुक्तं रुद्रयामले ।

सत्यक्रमाच्चतुर्वर्णैः क्षीराज्यमधुपिष्टकैः ।
त्रेतायां पूजिता देवी घृतेन सर्ववर्णिभिः ॥
मधुभिः सर्ववर्णैश्च पूजयेद् द्वापरे युगे ।
पूजनीया कलौ देवि ! केवलैर्वासवैश्च तैः ॥
मासभक्तञ्च मुद्रान्नं धूपदीपादिकं तथा ।
तिलाः कुशाश्च सर्वाश्च स्थापनीयाः प्रयत्नतः ॥

अथ पूर्वोक्तान्यतमस्थानं गत्वा सामान्यार्घ्यं विधाय पूर्वमुखो मूलान्ते फट्कारं दत्त्वा यागभूमिं प्रोक्ष्य गुरुगणेशवटुकयोगिनीभ्यः पूर्वादितः संपूज्य पूर्वोक्तविधानेन मन्त्रं भूमौ विलिख्य ये चात्रेत्यादि पूर्वोक्तमन्त्रेण भूमौ पुष्पाञ्जलित्रयं दत्त्वा प्रणम्य श्मशानाधिपतिभ्यः पूर्ववद्बलिं दत्त्वा अघोरमन्त्रेण शिखाबन्धनं विधाय स्वदर्शनमन्त्रान्ते आत्मानं रक्ष रक्षेति हृदि हस्तं दत्त्वा हृद्रक्षां विधाय पूर्वोक्तक्रमेण भूतशुद्ध्यादिकं विधाय जयदुर्गामन्त्रेण दिक्षु सर्षपं विकीर्य

तिलोऽसीत्यादिना तिलान् विकीर्य्य विहितासनसमीपं गच्छेत् ।
तदुक्तं तन्त्रान्तरे ।

गुरुपूजादिकं सर्वं पूर्वोक्तमन्त्रमुच्चरेत् ।
ये चात्रेत्यादि मन्त्रेण भूमौ पुष्पाञ्जलिं क्षिपेत् ॥
श्मशानाधिपतीनान्तु पूर्ववद्बलिमाहरेत् ।
अघोरास्त्रेण मन्त्रेण शिखाबन्धनमाचरेत् ॥
सुदर्शनेन वा रक्षामुभाभ्यां परिकल्पयेत् ।
मायास्फुरद्द्वयं वर्म प्रस्फुरद्वितयं पुनः ॥
घोरघोरतरेत्यन्ते तनुरूपपदं ततः ।
चटयुग्मं तदन्ते च प्रचटद्वितयं पुनः ॥
हनयुग्मं समुद्धृत्य सहसारस्वरूपकम् ।
वर्मास्त्रान्तं महामन्त्रं सुदर्शनं प्रकीर्त्तितम् ॥
भूतशुद्धिं ततः कृत्वा न्यासजालं प्रविन्यसेत् ।
जयदुर्गाख्येन मनुना सर्षपान् दिक्षु निःक्षिपेत् ॥

अथ विहितशवो यथा । तदुक्तं भावचूड़ामणौ ।

यष्टिविद्धं शूलविद्धं खड्गविद्धं पयोमृतम् ।
रज्जुबद्धं सर्पदष्टं चण्डालं चाभिभूतिकम् ॥
तरुणं सुन्दरं शूद्रं रणे नष्टं समुज्ज्वलम् ।
पलायनविशून्यन्तु संमुखे रणवर्त्तिनम् ॥
एतेषामन्यतमं ग्राह्यमित्यर्थः ।

अथ निषिद्धशवो यथा । तदुक्तं तत्रैव ।

स्वेच्छामृतं द्विवर्षञ्च वृद्धं स्त्रियं द्विजं तथा ।
अन्नाभावे मृतं कुष्ठिनं सप्तवर्षाधिकं तथा ॥
एवं चाष्टशतं त्यक्त्वा पूर्वोक्तान्यतमं शवम् ।
गृहीत्वा मूलमन्त्रेण पूजास्थानं समानयेत् ॥

नीलतन्त्रे च । चाण्डालं चाभिभूतं वा शीघ्रं सिद्धिफलप्रदम् ।

कालीतन्त्रेऽपि। ब्राह्मणं गोमयं त्यक्त्वा साधयेद्वीरसाधनम्।

अथ शवसमीपं गत्वा ओं फट् इति शवमभ्युक्ष्य ओं हुं मृतकाय नमः फट् इति शवोपरि पुष्पाञ्जलित्रयं दत्त्वा स्पर्शपूर्वकं वक्ष्यमाणमन्त्रेण प्रणमेत्। तदुक्तं भावचूडामणौ।

प्रणवाद्यस्त्वमन्त्रेण शवञ्च प्रोक्षणञ्चरेत्।
प्रणवं कूर्चबीजञ्च मृतकाय नमः फट्॥
पुष्पाञ्जलित्रयं दत्त्वा प्रणमेत् स्पर्शपूर्वकम्॥
हे वीर! परमानन्द! शिवानन्द! कुलेश्वर!।
आनन्दभैरवाकार! देवीपर्य्यङ्कसंस्थित!॥
वीरोऽहं त्वां प्रपद्यामि उत्तिष्ठ चण्डिकार्चने।
प्रणम्यानेन मन्त्रेण क्षालयेत् तदनन्तरम्॥

अथ सुगन्धिजलेन शवं सुस्नाप्य वाससा जलमुद्धृत्य धूपैर्धूपितं गन्धचन्दनादिभिः शवं प्रलिप्य तत् कटिदेशे धृत्वा पूजास्थानं समानयेत्। तदुक्तं नीलतन्त्रे।

तारं कूर्चं मृतकाय नमोऽन्तं मन्त्रमुद्धरेत्।
शवस्नपनमन्त्रोऽयम् इत्यादि।
धूपैः सुधूपितं कृत्वा गन्धादिना प्रलिप्य च।
रक्ताक्तो यदि देवेश! भक्षयेत् कुलसाधनम्॥

ततः कुशशय्यायां पूर्वशिरः कृत्वा शवं स्थापयेत्। तदुक्तं तत्रैव।

कुशशय्यां परिस्कृत्य तत्र संस्थापयेत् शवम्।
एलालवङ्गकर्पूरजातीखदिरसारकैः।
ताम्बूलं तन्मुखे दत्त्वा शवं कुर्य्यादधोमुखम्॥
स्थापयित्वा तस्य पृष्ठं चन्दनेन विलेपयेत्।
बाहुमूलादि कट्यन्तं चतुरस्रं विभाव्य च॥
मध्ये पद्मं चतुर्द्वारं दलाष्टकसमन्वितम्।

ततश्चैनेयमजिनं कम्बलान्तरितं न्यसेत् ॥

तन्त्रान्तरे च। गत्वा शवस्य सान्निध्यं धारयेत् कटिदेशतः।

यद्युपद्रावयेदस्य दद्यान्निष्ठीवनं शवे ॥

पुनः प्रक्षालनं कृत्वा जपस्थानं समानयेत् ॥

ततो द्वादशाङ्गुलमानानि यज्ञकाष्ठानि दशदिक्षु संस्थाप्य पूजयेत् तत्र इन्द्रादिदशदेवताः।

विश्वमिन्द्राय संलिख्य सुराधिपतये ततः।

इमं बलिं गृह्ण युगं गृह्णापरयुगं ततः ॥

विघ्ननिवारणं कृत्वा सिद्धिं प्रयच्छ ठद्वयम्।

अनेन मनुना पूर्वं बलिं दद्याच्च सामिषम् ॥

साध्यनामादिकं कृत्वा पूर्ववद्बलिमाहरेत्।

सर्वेषां लोकपालानां ततः साधकसत्तमः ॥

तत्र अयं क्रमः। लं इन्द्राय सुराधिपतये ऐरावतवाहनाय वज्रहस्ताय शक्तिपारिषदाय सपरिवाराय नमः। इति संपूज्य बलिं दद्याद् यथा। ओं इन्द्राय सुराधिपतये इमं बलिं गृह्ण गृह्ण गृह्णापय गृह्णापय विघ्ननिवारणं कुरु सिद्धिं प्रयच्छ स्वाहा। एष बलिः इन्द्राय नमः वं वह्नये तेजोऽधिपतये मेषारूढाय शक्तिहस्ताय इत्यादि पूर्ववत् संपूज्य बलिं दद्यात्। ओं वह्नये तेजोऽधिपतये इत्यादि पूर्ववत्। यं यमाय प्रेताधिपतये दण्डहस्ताय महिषवाहनाय इत्यादिना संपूज्य बलिं दद्यात् अनेन ओं यमाय प्रेताधिपतये इत्यादि पूर्ववत्। क्षां निरृतये रक्षोऽधिपतये स्ववाहनाय खड्गहस्ताय इत्यादि पूर्ववत् संपूज्य बलिं दद्यात् अनेन ओं निरृतये रक्षोऽधिपतये इत्यादि पूर्ववत्। वं वरुणाय जलाधिपतये मकरवाहनाय पाशहस्ताय इत्यादिना पूर्ववत्। वं वायवे वायवधिपतये अङ्कुशहस्ताय मृगवाहनाय इत्यादिना पूर्ववत् संपूज्य बलिं दद्यात्

अनेन। ओं वायवे वायुधिपतये इत्यादि पूर्ववत्। ओं कुवेराय यक्षाधिपतये गदाहस्ताय नरवाहनाय इत्यादिना संपूज्य बलिं दद्यात् अनेन। ओं कुवेराय यक्षाधिपतये इत्यादिना पूर्ववत् ओं ईशानाय भूताधिपतये शूलहस्ताय वृषवाहनाय इत्यादिना पूर्ववत्। निऋतिवरुणयोर्मध्ये ओं अनन्ताय नागाधिपतये चक्रहस्ताय रथवाहनाय इत्यादिना पूर्ववत् संपूज्य बलिं दद्यात् अनेन ओं अनन्ताय इत्यादि पूर्ववत्। इन्द्रेशानयोर्मध्ये आं ब्रह्मणे लोकाधिपतये पद्महस्ताय हंसवाहनाय इत्यादिना पूर्ववत् संपूज्य आं ब्रह्मणे इत्यादिना पूर्ववत्। शवाधिष्ठातृदेवताभ्यो बलिं दद्यात् चतुःषष्टियोगिनीभ्यो नमः। डाकिनीभ्यो नमः।

अथ पूजासामग्रीं समीपे भुवि चोत्तरसाधकञ्च संस्थाप्य मूलान्ते क्रीं फट् शवाय नमः इत्यादिना आसनं संपूज्य मूलमुच्चरन् अश्वारोहणक्रमेण शवोपरि उपविश्य स्वपादतले कुशान् दत्त्वा शवकेशान् प्रसार्य जुटिकां बध्वा गुरुं देवीञ्च नमस्कृत्य प्राणायामषड़ङ्गन्यासान् कृत्वा पूर्वोक्तवीरासनं दशदिक्षु मनुना लोष्ट्राणि निःक्षिप्य संकल्पं कुर्य्यात्। तदुक्तं भावचूड़ामणौ।

पूजाद्रव्यं सन्निधौ च दूरे चोत्तरसाधकम्।
समानगुणसम्पन्नं मान्त्रिकं विजितेन्द्रियम्॥
अभिषेकविधिं ज्ञात्वा देवतां भावयेत् पराम्।
संस्थाप्यात्मानमभ्यर्च्य स्वमन्त्रान्ते ततः परम्॥
फड़ित्यनेन मन्त्रेण तत्राश्वारोहणं विशेत्।
कुशान् पादतले दत्त्वा शवकेशान् प्रसार्य्य च॥
दृढ़ं निवद्ध्य जुटिकां कृतसङ्कल्पसाधकः॥

तन्त्रान्तरे। शवोपरि समारुह्य गुरुपूजादिकं चरेत्।
प्राणायामं विधायाथ दिक्षु लोष्ट्राणि निःक्षिपेत्॥

ततः स्ववामे शवसमीपे अर्घ्यपात्रादिकं संस्थाप्य शवशुटिकायां पीठपूजादिकं कृत्वा षोड़शोपचारैः देवीं संपूज्य शवमुखे देवीं कारणेन त्रिः सन्तर्पयेत्। तदुक्तं भावचूड़ामणौ।

तत्र देवीं सुसंपूज्य उपचारैः सुविस्तरैः।

नीलतन्त्रे च। शवास्ये विधिवद्देवीं देवताप्यायनं ततः।

ततः शवादुत्थाय तस्य संमुखं गत्वा वक्ष्यमाणमन्त्रं पठेत्। तदुक्तं भावचूड़ामणौ।

उत्थाय संमुखे स्थित्वा पठेद्भक्तिपरायणः।
ओं वशो मे भव देवेश! ममामुकपदं ततः॥
सिद्धिं देहि महाभाग! कृताश्रमपदां वर!।

ततो मूलमन्त्रं पठन् पट्टसूत्रेण शवपादद्वयं दृढ़ं निबध्य वक्ष्यमाणमन्त्रेण रक्तचन्दनादिना त्रिकोणचक्रं विलिखेत्।

तदुक्तं तन्त्रान्तरे।

मूलमन्त्रमुच्चरन् मन्त्री शवपादद्वयं ततः।
पट्टसूत्रेण बध्नीयात् येनोत्थातुं न शक्यते॥

भावचूड़ामणौ। ओं भीमभीरुभयद्राव! द्रव्यलोचनभावक!।
त्राहि मां देवदेवेश! शवानामधिपाधिप!॥
इति पादतले तस्य त्रिकोणं चक्रमुल्लिखेत्।
येनोत्थातुं न शक्नोति शवश्च निश्चलो भवेत्॥

शवहस्तद्वयं पार्श्वयोः प्रसार्य तदुपरि कुशान् दत्त्वा तत्र स्वपादौ निधाय पुनः प्राणायामं कृत्वा शिरसि गुरुं हृदि देवीञ्च ध्यात्वा ओष्ठाधरसंपुटौ विहितमालया विभोर्जपेत्। तदुक्तं तत्रैव। उपविश्य पुनस्तस्य बाहू निःसार्य पार्श्वयोः।
हस्तयोः कुशमास्तीर्य पादौ तत्र निधापयेत्॥
ओष्ठौ संपुटकौ कृत्वा स्थिरचित्तः स्थिरेन्द्रियः।
तदा देवीं हृदि ध्यात्वा मौलौ जपमथाचरेत्॥

अत्रापि श्मशानसाधनक्रमेण जपः कार्य्यः। यद्यर्द्धरात्रिपर्य्यन्तं किञ्चिन्न लक्ष्यते। तदा पूर्ववत् अर्घ्यं तिलान् विकिरन् सप्तपादगमनादिकं कृत्वा जपं कुर्य्यादिति।

चलासने भयं नास्ति भये जाते वदेत्ततः।
यद्यत् प्रार्थयसे देवि! दातव्यं कुञ्जरादिकम्॥
दिनान्तरे तु दास्यामि स्वनाम कथयस्व मे।
इत्युक्तः संस्कृतेनैव निर्भयस्तु पुनर्जपेत्॥
पुनश्चेत् मधुरं वक्ति वक्तव्यं मधुरं ततः।
ततः सत्यं कारयित्वा वरन्तु प्रार्थयेत्ततः॥
यदि सत्यं न करोति वरं वा न प्रयच्छति।
तदा पुनर्जपेद्धीमान् एकाग्रमानस स्तथा॥
नररूपं विना तत्र देवोऽपि नापसर्पति।
यतत स्तेन बोद्धव्यो नरो वा देवयोनयः॥
माता मातुःस्वसा वापि मातुलानी तथैव च।
आगत्य चिह्नं कुरुते माययाच्छाद्य विग्रहम्॥
उत्तिष्ठ वत्स! ते कार्य्यं सर्वं यातु न संशयः।
प्रभातसमयो जातस्त्वत्पिता क्रोशते गृहम्॥
प्रायो विमत्सरा लोका राजानो दण्डधारिणः।
कदाचित् केन वा दृष्टस्तदा किञ्चिद् भविष्यति॥
इत्यादि विविधैर्वाक्यैर्न च जापं परित्यजेत्।
मृताः पितृगणास्तत्र दूरदेशनिवासिनः॥
बान्धवास्तत्र गच्छन्ति देवरूपधरास्तथा।
स्त्रीपुत्रसेवकादींश्च गृहीत्वा नियतैः परैः॥
रुदन्तः पुत्रकाः सर्वे भ्रातरोऽनुजशिष्यकाः।
निजकान्ताङ्गसंस्पर्शं वस्त्राद्याभरणादिकम्॥
गृहीत्वा नीयते तत्र पानकैस्तद्भयं त्यजेत्।

बान्धवैस्तत्र दिवसे शङ्का तत्र प्रजायते ॥
यदि न चुभ्यते तत्र तदा किं वा न लभ्यते।
स्त्रीरूपधारिणी देवी द्विजरूपधरः पुमान् ॥
वरं गृह्णेति शब्दं वै त्रिरात्रान्ते वरं लभेत्।
साधुना साधुना वापि योषिच्चेद् वरदायिनी ॥
तदा वीरपतेस्तस्य किं न सिध्यति भूतले।
निष्पापपुरुषेणैव कुलीनेनैव संस्कृता ॥
असंस्कृतवरा देवी पापं युङ्क्ते न संशयः।
संमुखेऽसंमुखे चापि संस्कृतं वक्ति चापरम् ॥
सैव देवी न सन्देहः स देवो भैरवः स्वयम्।
न चेद्देवं भवेच्चैव मायाघटितविग्रहः ॥
वरं न वरयेत्तत्र न किञ्चित् प्रवदेत्ततः।
स चेत् संस्कृतमाख्यानं वक्ति वक्तव्यमीदृशम् ॥
न चेत् स्वयं कौलिकोऽपि वरं ग्राह्यं निराकुलम्।
अथवा उत्कटं किञ्चित् ज्योतिर्वा नीललोहितम् ॥
शब्दो वा जायते सम्यगमृतं वापि लभ्यते।
विचार्य्य तद्गृहीतव्यमेवं शिवेन भाषितम् ॥
एवं कृत्वा तु बहुधा न चाकृतविभुजयः।
अवश्यं तत्र दातव्यं न च प्रत्यक्षतां क्वचित् ॥
भैरवा वटुकाश्चैव कुलशास्त्रपरायणाः।
एतच्छास्त्रप्रसङ्गेन कृत्याकुटिलविग्रहाः ॥
पुत्रो भूत्वा हरेद्विद्यां नारी भूत्वा विमोहयेत्।
तस्मात्तत्तु भवेद्दोषात् विचारे यत्नमाचरेत् ॥
सत्ये कृते वरं लब्ध्वा संत्यजेच्च जपादिकम्।
फलं जातमिति ज्ञात्वा जुटिकां मोचयेत्ततः ॥

अन्यत्रापि। शवं प्रक्षाल्य संस्थाप्य बन्धनं मोचयेत् पदम्।

पदे चक्रं मार्जयित्वा पूजयित्वा जले क्षिपेत् ॥
शवं जलेऽथ गर्त्ते वा निःक्षिप्य स्नानमाचरेत् ।
ततस्तु स्वगृहं गत्वा वलिं दद्यात् दिनान्तरे ॥

अस्यां रात्रौ येषां देवानां यजमानोऽहं ते गृह्णन्तु इमं वलिम् । इति भावचूड़ामणौ ।

अथ तैस्तु चितृश्मशाननरकुञ्जरशूकरात् ।
दत्त्वा पिष्टमयानेवं कर्त्तव्यमुपवोधनम् ॥
परेऽह्नि नित्यमाचर्य्य पञ्चगव्यं पिवेत्ततः ।
ब्राह्मणान् भोजयेत्तत्र पञ्चविंशतिसंख्यकान् ॥
पञ्च पञ्च विहीनान् वा क्रमाच्चैव दशावधि ।
ततः स्नात्वा च भुक्त्वा च निवसेदुत्तमस्थले ॥
यदि न स्याद्विप्रभोज्यं तदा निर्धनतां व्रजेत् ।
तेन चेन्निर्धनस्तस्य तदा देवः प्रकुप्यति ॥
त्रिरात्रं वाथ षड़् रात्रं नवरात्रन्तु संयमेत् ।
स्त्रीशय्यां यदि गच्छेद्वै तदा व्याधि र्भवेत् च हि ॥
गीतं श्रुत्वा च वधिरो निश्चक्षुर्नृत्यदर्शनात् ।
यदि वक्ति दिने वाक्यं तदास्य मूकता भवेत् ॥
पञ्चदशदिनान्ते तु देहे देवस्य संस्थितिः ।
गोब्राह्मणानां निन्दाञ्च न कुर्य्याच्च कदाचन ॥
देवगोब्राह्मणादींश्च प्रत्यहं संस्पृशेत् शुचिः ।
प्रातर्नित्यक्रियान्ते तु विल्वपत्रोदकं पिवेत् ॥
ततः स्नायाच्च गङ्गायां प्राप्ते षोड़शवासरे ।
स्वाहान्तमूलमुच्चार्य्य तर्पणान्ते नमः पदम् ॥
एवं शतत्रयादूर्द्ध्वं देवान् वै तर्पयेज्जलैः ।
स्नानतर्पणशून्यस्य न स्याद्देवस्य तर्पणम् ॥
इत्यनेन विधानेन सिद्धिं प्राप्नोति मानवः ।

इह भुक्त्वा वरान् भोगान् अन्ते याति हरेः पदम्।
असाङ्गं वापि साङ्गं स्यात् निष्फलं सफलं भवेत्॥
ज्ञात्वा साधनमेवैतत् शक्तेः प्रियतरो भवेत्।
शवाभावे श्मशाने वा कार्य्यं वै वीरसाधनम्॥
यो भावो यस्य वै प्रोक्तस्तैर्भावैर्यदि नार्चयेत्।
दशाहक्रमयोगेन भ्रष्टो भवति साधकः॥
कुलमन्त्रं गृहीत्वा न यावत् बुद्धिः प्रजायते।
नोपदिश्येत्तत्र भावं न रूपं तत्र सन्दिशेत्॥

इति श्यामारहस्ये त्रयोदशः परिच्छेदः॥

अथ चतुर्दशः परिच्छेदः।

अथ प्रकारान्तरसाधनम्। तदुक्तं कालीतन्त्रे।
शृणु देवि! वरारोहे! वीरसाधनमुत्तमम्।
नृणां शीघ्रज्ञानार्थं प्रकारान्तरमुच्यते॥
चतुष्पथे चतुर्दिक्षु पुरुषं हृदयं खनेत्।
जीवितं ब्रह्मरन्ध्रे वै दीपं प्रज्वालयेदथ॥
मध्ये तथा खनेदेकं तत्र शुद्धासनं भवेत्।
पूर्वोक्तेन च मार्गेण तत्र संस्कारमारभेत्॥
महाकालादिदेवेभ्यो बलिं पूर्ववदाहरेत्।
कल्पोक्तपूजां संपूज्य जपेत् प्रयतमानसः॥
दन्ताक्षमालया चैव राजदन्तेन मेरुणा।
दिग्वासाः प्रजपेन्मन्त्रमयुतं सर्वदैवतम्॥
जपान्ते च बलिं दत्त्वा दक्षिणा विभवावधि।
सर्वसिद्धीश्वरो विद्वान् सर्वदेवनमस्कृतः॥

अथवा विजनेऽरण्ये अस्थिशय्यासनो नरः।
उदयान्तं दिवा जप्त्वा सर्वसिद्धीश्वरो भवेत्॥
विल्ववृक्षे निजक्रोड़े शवमारोप्य यत्नतः।
नृसिंहमुद्रया वीक्ष्य जपेन्मातृकया यदि॥
सहस्रं तत्र वै जप्त्वा सर्वसिद्धीश्वरो भवेत्।
वटमूले शवं नीत्वा तत्र देवीं प्रपूज्य च॥
सुप्त्वा तत्र मनुं जप्त्वा सर्वसिद्धीश्वरो भवेत्।
करकाञ्चीं समादाय मुण्डमालाविभूषितः॥
तेनैव तिलकं कृत्वा तत्तद्भस्मविभूषितः।
श्मशाने च सकृज्जप्त्वा सर्वसिद्धीश्वरो भवेत्॥
कुङ्कुमागुरुकस्तूरीरोचना घनचन्दनम्।
कर्पूरं पद्मरागञ्च केशरं हरिचन्दनम्॥
एकत्र साधितं कृत्वा प्रत्येकं साधयेत् सुधीः।
जिह्वाग्रे रुधिरं वीर आकाशे च समाहरेत्॥
तेनैव वटिकां कृत्वा भद्रकालीं ततो जपेत्।
नीलां नीलपताकाञ्च लोलजिह्वां करालिकाम्॥
ललाटे तिलकं कृत्वा साधको वीरभीः स्वयम्।
महाष्टमीनवम्यास्तु संयोगे पुरतः स्थितः॥
छागमहिषमेषाणां चतुर्दिक्षु शवान् क्षिपेत्।
कबन्धान् मुण्डपूजाञ्च दीपादिभिरलङ्कृताम्॥
मध्ये कबन्धमास्तीर्य्य तत्र गन्धर्वरूपधृक्।
ताम्बूलपूररक्तास्य मञ्जनाञ्जितलोचनम्॥
कृत्वा तत्र मनुं जप्त्वा सर्वसिद्धीश्वरो भवेत्।
वियत्त्रययुतं देवि! नेत्रान्तं चन्द्रभूषितम्॥
वीजं प्रत्येकदेवानामिति तासाञ्च पार्वति!।
मूलमन्त्रेण मन्त्रज्ञो जपेत् सार्द्धशतद्वयम्॥

जिह्वाग्रे रुधिरं गृह्ण चामुण्डे ! घोरनि:स्वने ! ।
वलिं छित्त्वा वरं देहि रुधिरं गगनेऽमले ॥
कालि ! कालि ! प्रचण्डोग्रे ! ततोऽस्त्रं कवचं तत: ।
कालिकेयं समाख्याता वीराणां हितकाम्यया ॥
कूर्चयुग्मं महादेवि ! लीलया कथितं तव ।
चन्द्रखण्डसमायुक्तं ततो नीलपदं तत: ।
पताके हुँ फड़न्ते च पूर्वकूटमनुर्मत: ॥
सुगुप्तेयं महाविद्या तव स्नेहादिहोदिता ।
जयश्रीकरणी देवी पताकेव रणस्थले ॥
तेन नीलपताकेयं योज्या वै नीलसाधने ।
उग्रचण्डा महाविद्या या पुरा कथिता प्रिये ! ॥
लोलजिह्वा तु सा प्रोक्ता संयोज्या नीलसाधने ।
या सा विद्या महातारा सा करालेति कीर्त्तिता ॥
भूमिपूरसमायुक्ता सामावस्या शुभोदया ।
भाद्रे पुष्करयोगे च तस्यां वीरवरोत्तम: ॥
विष्णुक्रान्तां समानीय नि:क्षिपेत् मन्त्रभूमिषु ।
तत्र तां साधितां कृत्वा तद्दिने मृतहट्टके ॥
तत्र प्रसारितं मत्स्यमेकं मूल्येन दापयेत् ।
तज्जलेनाभिषेकञ्च पूर्ववच्च शवोपरि ॥
साधितां विजयां तस्य उदरे सुखवर्त्मना ।
क्षिप्त्वा तत्र खनेन्मत्स्यमञ्जनाञ्जितलोचन: ॥
तिलकी पूर्वद्रव्येण उत्थाय च मनुं जपेत् ।
स्वयं वै तत्र भगवान् भैरवो लगुड़ाङ्कित: ॥
भ्रमातीतस्ततो वीर स्तं विलोक्य जपेन्मनुम् ।
यदि भाग्यवशाद्देवि ! लगुड़स्तत्र लभ्यते ॥
तदा स्वयं भैरवोऽसौ स्वयं वीरेश्वरो भवेत् ।

मत्स्यमानीय देवेशि ! निःक्षिपेत् पितृकानने ॥
तत्रासक्तज्जपित्वा च देवतामेलनं भवेत् ।
तत्र नत्वा महादेवं महादेवीञ्च भाविनि ! ॥
तद्भस्मतिलकं कृत्वा स्वयं वीरेश्वरो भवेत् ।
निशायां मृतहट्टे च उन्मत्तानन्दभैरवः ॥
दिग्वासा विमली भस्मभूषणो मुक्तकेशकः ।
कृपाणखड्गहस्तश्च जपेन्मातृकया यदि ॥
तदा तस्य महादेवि ! सर्वसिद्धिः प्रजायते ।
डाकिनीं योगिनीं वापि अन्यां वा भूतकाङ्गनाम् ॥
तत्र चानीय संपूज्य सर्वसिद्धीश्वरो भवेत् ।
सर्वेषां जीवहीनानां जन्तूनां नीलसाधने ॥
ब्राह्मणं गोमयं त्यक्त्वा साधयेद्वीरसाधनम् ।
मृतासनं विना देवि ! पूजयेत् पार्वतीं शिवाम् ॥
तावत्कालं वसेद्वीरे यावदाहूतसंप्लवम् ।
महाशवाः प्रशस्ताः स्युः कालीकावीरसाधने ॥
क्षुद्राः प्रयोगी कर्तॄणां प्रशस्ताः सर्वसिद्धिदाः ।
एवं नीलक्रमं देवि ! कथितञ्च तवानघे ! ॥
न कस्यचित् प्रवक्तव्यं मम प्रीत्या महेश्वरि ! ॥
श्रीदेव्युवाच । ज्ञातमेतन्मया देव ! त्वत्प्रसादान्महेश्वर ! ।
अशक्तानान्तु मे देव ! पुरश्चरणमुच्यताम् ॥

भैरव उवाच ।

श्मशानेषु पुरश्चर्या कथिता देवि ! दुर्लभा ॥
अथवाऽन्यप्रकारेण पुरश्चरणमुच्यते ।
कुजे वा शनिवारे वा नरमुण्डं समायुतम् ॥
पञ्चगव्येन मिलितं चन्दनाद्यैर्विशेषतः ।

निक्षिप्य भूमौ हस्तार्द्धमानतः कानने वने॥
तत्र तद्दिवसे रात्रौ सहस्रं यदि मानवः।
एकाकी प्रजपेन्मन्त्रं स भवेत् कल्पपादपः॥
अथवान्यप्रकारेण पुरश्चरणमिष्यते।
शवमानीय तद्द्वारि तेनैव परिखन्यते॥
तद्दिनात् तद्दिनं यावत् जपेदष्टोत्तरं शतम्।
स भवेत् सर्वसिद्धीशो नात्र कार्य्या विचारणा॥
अथवान्यप्रकारेण पुरश्चरणमिष्यते।
अष्टम्याञ्च चतुर्दश्यां पक्षयोरुभयोरपि॥
सूर्य्योदयात् समारभ्य यावत् सूर्य्योदयान्तरम्।
तावज्जप्त्वा निरातङ्कः सर्वसिद्धीश्वरो भवेत्॥
अथवान्यप्रकारेण पुरश्चरणमिष्यते।
चन्द्रसूर्य्यग्रहे चैव ग्रासावधि विमुक्तितः॥
यावत्संख्यं मनुं जप्त्वा तावद्धोमादिकं चरेत्।
सूर्य्यग्रहणकालाद्धि नान्यः कालः प्रशस्यते॥
अत्र यद्यत् कृतं सर्वमनन्तफलदं भवेत्।
तावदिति जपदशांशहोमादिकमित्यर्थः॥
ग्रहणे चन्द्रसूर्य्यस्य शुचिः पूर्वमुपोषितः।
नद्यां समुद्रगामिन्यां नाभिमात्रोदके स्थितः॥
यदा शुद्धोदके स्नात्वा शुचौ देशे समाहितः।
स्पर्शाद्विमुक्तिपर्य्यन्तं जपं कुर्य्यादनन्यधीः॥
अनन्तरं दशांशेन क्रमाद्धोमादिकं चरेत्।
तदन्ते महतीं पूजां कुर्य्याद् ब्राह्मणभोजनम्॥
ततो मन्त्रस्य सिद्ध्यर्थं गुरुं संपूज्य तोषयेत्॥
अथ कालीतन्त्रे। शरत्काले चतुर्थ्यादि नवम्यन्तं विशेषतः।
भक्तितः पूजयित्वा च रात्रौ तावत् सहस्रकम्॥

जपेदेकाकी विजने केवलं तिमिरालये ।
अष्टम्यादिनवम्यन्तमुपवासपरो भवेत् ॥
अन्यत्र गुरुमार्गस्य लङ्घनं नैव कारयेत् ।
अथवान्यप्रकारेण पुरश्चरणमिष्यते ॥
अष्टमीसन्धिवेलायां अष्टोत्तरलतागृहम् ।
प्रविश्य मन्त्री विधिवत् ताः समभ्यर्च्य यत्नतः ॥
पूर्वोक्तफलमासाद्य पूजादिकं समाचरेत् ।
केवलं कामदेवोऽसौ जपेदष्टोत्तरं शतम् ॥
तासान्तु पत्रमूलेन उग्रां संपूज्य कर्णिके ।
मन्त्रसिद्धिर्भवेत् सद्यो लतादर्शनपूजनात् ॥
अथवान्यप्रकारेण पुरश्चरणमिष्यते ।
आकृष्णयोः कुलागारे भावयेन्मन्त्रमेव च ॥
प्रपूज्य तत्र संस्कारं कृत्वा तस्यै निवेद्य च ।
किञ्चित् जपं मनुं नीत्वा देवताभावतत्परः ॥
तां विसृज्य नमस्कृत्य स्वयं जप्त्वा सुसंयतः ।
प्रातः स्त्रीभ्यो बलिं दत्त्वा मन्त्रसिद्धिर्न संशयः ॥
अथवान्यप्रकारेण पुरश्चरणमिष्यते ।
गुरुमानीय संस्थाप्य देववत् पूजनं विभोः ॥
वस्त्रालङ्कारहेमाद्यैः सन्तोष्य गुरुमेव च ।
तत्सुतं तत्सुताञ्चैव तत्पत्नीञ्च विशेषतः ॥
पूजयित्वा मनुं जप्त्वा सर्वसिद्धीश्वरो भवेत् ।
अथवान्यप्रकारेण पुरश्चरणमिष्यते ॥
सहस्रारे गुरोः पादपद्मं ध्यात्वा प्रपूज्य च ।
केवलं देवभावेन जप्त्वा सिद्धीश्वरो भवेत् ॥
गुरवे दक्षिणां दद्याद् यथाविभवमात्मनः ।
गुरोरनुज्ञामात्रेण दुष्टमन्त्रोऽपि सिध्यति ॥

गुरुं विलङ्घ्य शास्त्रेऽस्मिन् नाधिकारः सुरैरपि।
एषाञ्च मन्त्रतन्त्राणां प्रयोगः क्रियते यदि॥
गुरुवक्त्रं विना देवि! सिद्धिहानिः प्रजायते।
एतत्तन्त्रञ्च मन्त्रञ्च शिष्येभ्योऽपि न दर्शयेत्।
अन्यथा प्रेतराजस्य भवनं याति निश्चितम्॥

अथ कालिकादर्शनार्थं साधनान्तरमालिख्यते। प्रदोषे शून्यगृहं गत्वा उत्तराभिमुख उपविश्य भूतशुद्ध्यादिकं न्यासान्तं विधाय सिन्दूरेण नवकोणवृत्ताष्टदलवृत्तचतुरस्रचतुर्द्वारात्मकं यन्त्रं विलिख्य संमुखे कुमार्य्याः शक्तिवीजं लिखित्वा पुरतः संस्थाप्य तत्र पीठपूजां विधाय द्वादश प्राणायामं कृत्वा देवीं ध्यायेद् यथा।

नृकपालसमारूढ़ां नरमालाविराजिताम्।
कृष्णाभ्रसन्निभां रक्तवासोपरि विभूषिताम्॥
चतुर्बाहुधरां देवीं दिव्यालङ्कारशोभिताम्।
निशामुखं समारुह्य यावद् यामद्वयं भवेत्॥
तावत्कालं जपेन्मन्त्रं कालिकादर्शनोत्सुकः।
चन्दनावीतन्टशिरः शवोपरि विराजितः॥
घृतप्रदीपमालाभिस्तथैव परिवेष्टितः।
मुण्डोपरि भवेन्मुण्डो भयमोहविवर्जितः॥
ऊर्द्ध्वास्यः प्रजपेन्मन्त्रं दीपालोकनतत्परः।
मुण्डोपरि भवेन्मुण्डस्तद्दीपञ्च निधापयेत्॥
पूजयेन्मूलमन्त्रेण कुर्य्याद्देव्या विलक्षणः।
सिन्दूरमण्डलं कृत्वा नवकोणसमन्वितम्॥
शक्तिवोजन्तु तन्मध्ये लिखित्वान्यैः समाहृतम्।
बहिरष्टदलं पद्मं तेनैव कारयेद् बुधः॥
तत्रावाह्य जगद्धात्रीं कालिकां कृष्णविग्रहाम्।

पूजयेद्दिग्विदक्ष्वे नवरात्रं समाहितः ॥
ततस्तुष्टा जगद्धात्री कालिका परमेश्वरी ।
सर्वसम्पत्तिदा देवी साधकस्यानुकम्पया ॥
नेदं प्रकाशयेद् मन्त्रं प्राणैः कण्ठगतैरपि ।
शिष्याय भक्तिहीनाय भैरवेन हि भाषितम् ॥

इति श्यामारहस्ये चतुर्दशः परिच्छेदः ।

अथ पञ्चदशः परिच्छेदः ।

अथ काम्यहोमार्थं कुण्डनियमो यथा । तदुक्तं यामले ।
शान्त्यै चोक्तं तथारोग्ये कुण्डञ्च चतुरस्रकम् ।
आकर्षणे त्रिकोणं स्यात् उच्चाटे वर्त्तुलं तथा ॥
मारणे च तथा योज्यं वर्त्तुलं मन्त्रिभिः सदा ॥
देव्युवाच । देवदेव ! महादेव ! भक्तानां प्रीतिवर्द्धन ! ।
कालिका या महाविद्या निर्दिष्टा न प्रकाशिता ॥

श्रीमहादेव उवाच ।

लक्षं लक्षसहस्राणि वारितासि मया पुनः ।
स्त्रीस्वभावान्महादेवि ! पुनस्त्वं परिपृच्छसि ॥
अत्यन्तदुर्लभं देवि ! कवचं सर्वकामदम् ।
तथापि कथयाम्यद्य तव प्रीत्या वरानने ! ॥
उक्तं पुरा महादेवि ! श्रूयतां तत् कृपामयि ! ।
कवचाज्ञानतो देवि ! विद्यासिद्धिर्न जायते ॥

श्रीदेव्युवाच । कथ्यतां कवचं देव ! यदि स्नेहोमयि प्रभो ।
अन्यथा जगतां नाथ ! प्राणांस्त्यजामि निश्चितम् ॥

श्रीमहादेव उवाच ।

कवचं कथयिष्यामि सुगोप्यमतिदुर्लभम् ।
गोपनीयं प्रयत्नेन स्वयोनिवद्वरानने ! ॥
पूर्वस्यां पातु कालो च कपालो दक्षिणेऽवतु ।
कुल्ला रक्षतु पाश्चात्ये कुरुकुल्ला तथोत्तरे ॥
विरोधिनी तथैशान्यां विप्रचित्ताग्निकोणके ।
नैऋते पातु चोग्रा च वायावुग्रप्रभावतु ॥
दीप्ता तु रक्षतां शीर्षे नीलाव्यान्मुखमण्डले ।
घना रक्षतु कण्ठे च बलाका हृदयेऽवतु ॥
नाभौ मात्राजङ्घयोश्च मिता मुद्रावतु ध्वजे ।
ब्रह्माण्याद्या महादेव्यः सर्वत्र पान्तु सर्वदा ॥
श्लोकत्रयं महापुण्यं यज्ज्ञात्वा मत्समो भवेत् ।
तव स्नेहान्महादेवि कथयामि सुदुर्लभम् ॥

श्रीपरमशिव उवाच ।

सर्पिःसागरविस्फुरन्मणिमयद्वीपे कदम्बान्विते
गेहे रत्नमये शवस्य हृदये रत्नाकृतेशानने ।
वर्गाद्याननवामलोचनमयीं श्रीदक्षिणां कालिकां
सद्यश्छिन्नशिरःकरां भगवतीं ध्यायन्ति पुण्याशयाः ॥
मद्याघूर्णितलोचनत्रयमहाशोभामयीं योषितां
लक्षैः सेवितपादपद्मयुगलां श्रीभैरवीद्योतिताम् ।
श्रीमत्कालमुखे सुखं निदधतीं चान्द्रीं कलां बिभ्रतीं
तां ध्यायन्ति सुसिद्धये भगवतीं तद्भावनानन्दिताः ॥
मांसासृग्दुग्धखण्डच्छुरितमधुमहापानमत्तां हसन्तीम्
अट्टाट्टं कालकालं क्रहकहहंडमिति प्रोल्लसन्तीं सखीषु ।

न्त्यप्रोद्दामहासोन्मदमुदितमहाभैरवानन्दवीचीं
मातङ्गं खण्डयन्तीमभयवरकरां कालिकां तां भजामः ॥
इदन्तु दिव्यं कवचं मनोज्ञं देयं कदाचिद्‌ गुरवेऽपि नैव ।
महद्भयात्‌ स्नेहरसेन दत्त्वा हानिः शरीरेण च साधकेषु ॥

यस्मादिदन्तु कवचं लभ्यते बहुपुण्यतः ।
तेन दत्तन्तु सकलं सद्‌गुरुं परमं प्रिये ! ॥
यस्मै तस्मै न दातव्यं प्राकृतेभ्यो विशेषतः ।
प्रकाशे सिद्धिहानिः स्यात्‌ तस्माद्‌ यत्नेन गोपयेत्‌ ॥
गुरुपादप्रसादेन यदि काली प्रलभ्यते ।
जप्त्वा कालीं महाविद्यामिदन्तु कवचं पठेत्‌ ॥
अज्ञात्वा कवचं देवि ! कालिका चेत्‌ प्रजप्यते ।
स नाप्नोति फलं तस्मात्‌ परत्र नरकं व्रजेत्‌ ॥
सर्वत्र सुलभा विद्या कवचन्तु सुदुर्लभम्‌ ।
शरीरधनदारेण गुरुं सन्तोष्य तत्‌ पठेत्‌ ॥
सफला रजनीपूजा दिवापूजा च निष्फला ।
तस्मात्‌ सर्वप्रयत्नेन रजन्यां कवचं स्मरेत्‌ ॥
विवादे च रणे द्यूते विद्यायां कवितागमे ।
राजगेहे विचारे च सर्वत्रेदं पठेन्नरः ॥
मोहनस्तम्भनाकर्षमारणोच्चाटनं तथा ।
कवचस्मरणाद्देवि ! जायन्ते सर्वसिद्धयः ॥
अथवा किमिहोक्तेन सत्यं सत्यं मम प्रिये ! ।
प्रत्यक्षा दक्षिणा काली वरं यच्छति सुन्दरि ! ॥
गुरौ च कवचे तन्त्रे यन्त्रे देवीं सदा भजेत्‌ ।
गुरुस्त्राता महादेवः कवचं यः प्रयच्छति ॥
इदन्तु कवचं प्राप्य हेलनं कुरुते तु यः ।
अचिरान्मृत्युमाप्नोति मम तुल्योऽपि साधकः ॥

स माता जनकश्चैव स गुरुः स च पूजितः।
स सर्वदः स आचार्य्यः कवचं यः प्रयच्छति ॥

इति श्रीरुद्रयामले महातन्त्रे श्रीदक्षिणकालिकायाः
परमशिवोक्तं सर्वसिद्धिदं कवचं समाप्तम् ॥

नमामि कृष्णरूपिणीं कृष्णाङ्गयष्टिधारिणीम्।
समग्रतत्त्वसागरमपारपारगह्वराम् ॥
शिवाप्रभां समुज्ज्वलां स्फुरच्छशाङ्कशेखराम्।
ललाटरत्नभास्करां जगत्प्रदीप्तिभास्कराम् ॥
महेन्द्रकश्यपार्चितां सनत्कुमारसंस्तुताम्।
सुरासुरेन्द्रवन्दितां यथार्थनिर्मलाद्भुताम् ॥
अतर्क्यरोचिरूर्जितां विकारदोषवर्जिताम्।
मुमुक्षुभिर्विचिन्तितां विशेषतत्त्वसूचिताम् ॥
मृतास्थिनिर्मितस्रजां मृगेन्द्रवाहनाग्रजाम्।
सुशुद्धतत्त्वतोषणां त्रिवेदपारभूषणाम् ॥
भुजङ्गहारहारिणीं कपालखण्डधारिणीम्।
सुधोर्मिकोपकारिणीं सुरेन्द्रवैरिघातिनीम् ॥
कुठारपाशचापिनीं कृतान्तकामभेदिनीम्।
शुभां कपालमालिनीं सुवर्णकल्पशाखिनीम् ॥
श्मशानभूमिवासिनीं द्विजेन्द्रमौलिभाविनीम्।
तमोऽन्धकारयामिनीं शिवस्वभावकामिनीम् ॥
सहस्रसूर्य्यराजिकां धनञ्जयोग्रकारिकाम्।
सुशुद्धकालकन्दलां सुभृङ्गवृन्दमञ्जुलाम् ॥
प्रजापिनीं प्रजावतीं नमामि मातरं सतीम्।
स्वकर्मकारणे गतिं हरप्रियाञ्च पार्वतीम् ॥
अनन्तशक्तिकान्तिदां यशोऽर्थभुक्तिमुक्तिदाम्।

पुनःपुनर्जगद्धितां नमाम्यहं सुरार्चिताम् ॥
जयेश्वरि ! त्रिलोचने ! प्रसीद देवि ! पाहि माम् ।
जयन्ति ते स्तुवन्ति ये शुभं लभन्त्यमोच्चतः ॥
सदैव ते हतद्विषः परं भवन्ति सज्जुषः ।
नराः परे शिवेऽधुना प्रसाधि मां करोमि किम् ॥
अतीव मोहितात्मनो वृथा विचेष्टितस्य मे ।
कुरु प्रसादितं मनो यथास्मि जन्मभञ्जनः ॥
तथा भवन्तु तावका यथैव घोषितालकाः ।
इमां स्तुतिं ममेरितां पठन्ति कालिसाधकाः ।
न ते पुनः सुदुस्तरे पतन्ति मोहगह्वरे ॥

इति श्रीब्रह्मकृतकालीस्तवः समाप्तः ।

इति श्रीपूर्णानन्दगिरिपरिव्राजकपरमहंसविरचितं श्यामारहस्यं समाप्तम् ॥

योगिनीतन्त्रम्।

पण्डितकुलपतिना

वि, ए, उपाधिधारिणा

श्रीजीवानन्दविद्यासागरभट्टाचार्य्येण

संस्कृतं प्रकाशितञ्च।

द्वितीयसंस्करणम्।



कलिकातानगरे

कलिकाता यन्त्रे

मुद्रितम्।

इं १८९७।

पण्डितकुलपतिः

श्रीजीवानन्दविद्यासागर बि, ए,

PANDIT KULAPATI

JIBANANDA VIDYASAGARA, B. A.

Superintendent, Free Sanskrit College, Calcutta.

योगिनीतन्त्रम्।

प्रथमः पटलः।

ॐ नमो महाभैरवाय।

कैलासशिखरारूढं शङ्करं परमेश्वरम्।
पप्रच्छ गिरिजाकान्तं पार्वती वृषभध्वजम्॥
श्रीदेव्युवाच। भगवन्! सर्वधर्मज्ञ! सर्वज्ञानमय! प्रभो!।
सूचितं योगिनीतन्त्रं तन्मे वद जगद्गुरो!॥
माहात्म्यं कीर्त्तितं तस्य पुरा श्रीशैलमन्दिरे।
वाराणस्यां कामरूपे नेपाले मन्दराचले॥
ईश्वर उवाच। शृणु देवि! प्रवक्ष्यामि योगिनीतन्त्रमुत्तमम्।
पावनं परमं धन्यं मोक्षैकफलदायकम्॥
गोपितव्यं प्रयत्नेन मम त्वं प्राणवल्लभे!।
यथान्यो लभते नैवं तथा कुरु प्रियंवदे!॥
एतत्तन्त्रं वरारोहे! सुरासुरसुदुर्लभम्।
काङ्क्षन्ति देवताः सर्वाः श्रोतुं तन्त्रमनुत्तमम्॥
यक्षाद्याः परमेशानि! न तेभ्यः कथितं मया।
कथयामि तव स्नेहात् बद्धोऽहं परमं त्वया॥
विद्युत्कान्तिसमानाभदन्तपंक्तिबलाकिनीम्।
प्रावृट्सम्भूतसुस्निग्धनवमेघसमद्युतिम्॥
मुण्डमालावलीरम्यां मुक्तकेशीं दिगम्बराम्।
लोलजिह्वां घोररावामारक्तलोचनत्रयाम्॥

कोटिकोटिकलानाथविगलन्मुखमण्डलाम् ।
अमाकलासमुल्लासकिरीटोज्ज्वलमण्डलाम् ॥
शवद्वयकर्णभूषां नानामणिविभूषिताम् ।
सूर्य्यकान्तेन्दुकान्तौघप्रोल्लसत्कर्णभूषणाम् ॥
शतहस्तसहस्रैस्तु कृतकाञ्चीं हसन्मुखाम् ।
सृक्कद्वयगलद्रक्तधाराविस्फुरिताननाम् ॥
खड्गमुण्डवराभीतिसंशोभितचतुर्भुजाम् ।
दन्तुरां परमां नित्यां रक्तमण्डितविग्रहाम् ॥
शिवप्रेतसमारूढ़ां महाकालोपरिस्थिताम् ।
वामपादं शवहृदि दक्षिणे लोकलाञ्छितम् ॥
कोटिसूर्य्यप्रतीकाशं समस्तभुवनोज्ज्वलम् ।
विद्युत्पुञ्जसमानाभज्वलज्जटविराजितम् ॥
रजताद्रिसमं देवं स्फटिकाचलविग्रहम् ।
दिगम्बरं महाघोरं चन्द्रार्कपरिमण्डितम् ॥
नानालङ्कारभूषाढ्यं भास्वत्स्वर्णतनुरुहम् ।
योगनिद्राधरं शम्भुं स्मेराननसरोरुहम् ॥
विपरीतरतासक्तां महाकालेन सन्ततम् ।
अशेषब्रह्माण्डभाण्डप्रकाशितमहोज्ज्वलम् ॥
शिवाभिर्घोररावाभिर्वेष्टितां प्रलयोदिताम् ।
कोटिकोटिशरच्चन्द्रन्यक्कृतानखमण्डलाम् ॥
सुधापूर्णशीर्षहस्तयोगिनीभिर्विराजिताम् ।
आरक्तमुखमद्याभिर्मत्ताभिरन्विताम् तथा ॥
घोररूपैर्महानादैश्चण्डतापैश्च भैरवैः ।
गृहीतशवकङ्कालजयशब्दपरायणैः ॥
नृत्यद्भिर्वादनपरैरनिशञ्च दिगम्बरैः ।
श्मशानालयमध्यस्थां ब्रह्माद्युपनिषेविताम् ॥

अधुना शृणु देवेशि ! तन्त्रराजं सुदुर्लभम् ।
कथयामि तव स्नेहात् न प्रकाश्यं कथञ्चन ॥
अतीव स्नेहबद्धेन भक्त्या दासोऽस्मि ते प्रिये ! ।
गुरुमूलमिदं शास्त्रं गुरुमूलमिदं जगत् ॥
गुरुरेव परं ब्रह्म गुरुरेव शिवः स्वयम् ।
गुरुर्यस्य वशीभूतो देवास्तं प्रणमन्ति च ॥
अपि व्याधिगलत्पादप्रक्षालनजलं यदि ।
पिबेदमृतभावेन यः स देवीपुरं व्रजेत् ॥
सुरां यद्यप्यसंस्कारां गुर्वनुज्ञाविधः पिबेत् ।
प्रायश्चित्तं न तत्रापि वेदेऽपि स्थित एव हि ।
अपि तन्त्रविरुद्धं वा गुरुणा कथ्यते यदि ।
अथवा स्वमतं वेदैर्महारुद्रवचो यथा ॥
सर्वं गुर्वाज्ञया कार्य्यं तत्त्वस्यागमनं विना ।
अद्वैतं देवतैश्वर्य्यं नाद्वैतं गुरुणा सह ॥
नाद्वैतं भवते कार्य्यं न ममास्तीह भुवने ।
गुरुर्गतिर्गुरुर्देवो गुरुर्देवो तथा प्रिये ! ॥
स्वर्गलोके मर्त्यलोके नागलोके च वर्त्तते ।
अल्पज्ञोऽनल्पविज्ञो वा गुरुरेव सदागतिः ॥
गुरुवद्गुरुपुत्रेषु गुरुवत्तत्सुतादिषु ।
गुरुपत्नी महेशानि ! गुरुरेव न संशयः ॥
गुरोरुच्छिष्टवत् प्रिये ! तत्सुतोच्छिष्टमेव च ।
भोजनीयं न सन्देहो विकारश्चेदधोगतिः ॥
गुरूच्छिष्टं महादेवि ! ब्रह्मादीनां सुदुर्लभम् ।
गुरूच्छिष्टं तथा प्रोक्तं महापूतं परात् परम् ॥
गुरुणा गुरुपत्न्या वा गुरुपुत्रेण वा प्रिये ! ।
भुक्तान्नं मुष्टिमात्रं वा योऽश्नीयाद्हर्षविंशति ॥

चिरजीवी जरारोगविमुक्तोऽन्ते शिवो भवेत् ॥
गुर्वन्तिके यदि वसेत् पञ्चाशद्वर्षमुत्तमे ! ॥
भैरवाचारसम्पन्नस्तत्पादपरिचारकः ।
इह भुक्त्वा वरान् भोगान् अन्ते देवीगणो भवेत् ॥
रूपयौवनसम्पन्नैः रुद्रकन्यागणैः सह ।
असौ विहरति वीरो यावच्चन्द्रार्कतारकम् ॥
प्रातरुत्थाय यो मर्त्यो गुरौ दण्डनतिं चरेत् ।
तत्सुतं तत्तनयां वा प्रणमेद्विधिपूर्वकम् ॥
स सिध्यति वरारोहे ! नात्र कार्य्या विचारणा ।
यत्राशायां गुरोः स्थानं नित्यं प्रातश्च तन्मुखः ॥
गुरुं तद्दयितापुत्रपुत्रीरुद्दिश्य मानवः ।
प्रणमेद्भक्तिसंयुक्तः स सिद्धो नात्र संशयः ॥
गुरोः स्थानं हि कैलासं गृहं चिन्तामणेर्गृहम् ।
वृक्षालो कल्पवृक्षाली लता कल्पलता स्मृता ॥
जलखातञ्च सर्वं हि गङ्गातुल्यं प्रकीर्त्तितम् ।
गुरुगेहे स्थिता दास्यो भैरव्यः परिकीर्त्तिताः ॥
भृत्यान् भैरवरूपांश्च भावयेत् मतिमान् सदा ।
प्रदक्षिणं कृतं येन गुरोः स्थानं महेश्वरि ! ।
प्रदक्षिणीकृता तेन सप्तद्वीपा वसुन्धरा ॥
श्रीदेव्युवाच। गुरुः को वा महादेव ! वद मे करुणामय ! ।
तत्त्वोऽप्यधिक एवायं गुरुस्त्वया प्रकीर्त्तितः ॥
ईश्वर उवाच। आदिनाथो महादेवि ! महाकालो हि यः स्मृतः।
गुरुः स एव देवेशि ! सर्वमन्त्रेऽधुना परः ॥
शैवे शाक्ते वैष्णवे च गाणपत्ये तथैन्दवे ।
महाशैवे च सौरे च स गुरुर्नात्र संशयः ॥
मन्त्रवक्ता स एव स्यात् नापरः परमेश्वरि ! ।

मन्त्रप्रदानकाले हि मानुषे नगनन्दिनि ! ॥
अधिष्ठानं भवेत्तत्र महाकालस्य शङ्करि ! ।
अतस्तु गुरुता देवि ! मानुषे नात्र संशयः ॥
मन्त्रदाता शिवः पद्मे यज्ज्ञानं कुरुते गुरोः ।
तज्ज्ञानं कुरुते देवि ! शिष्योऽपि शीर्षपङ्कजे ॥
अतएव महेशानि ! एक एव गुरुः स्मृतः ।
अधिष्ठानं भवेत्तस्य मानुषस्य महेश्वरि ! ॥
माहात्म्यं कीर्त्तितं तस्य सर्वशास्त्रेषु शङ्करि ! ।
विशेषं मनु वच्यामि माहात्म्यं गुरुगोचरम् ॥
पशुमन्त्रप्रदाने तु मर्य्यादा दश पौरुषी ।
वीरमन्त्रप्रदाने तु पञ्चविंशति पौरुषी ॥
महाविद्यासु सर्वासु पञ्चाशत् पौरुषी मता ।
ब्रह्मयोगप्रदाने तु मर्य्यादा दश पौरुषी ॥
ब्रह्मयोगो महादेवि ! भैरवाड़ायां प्रकीर्त्तितः ।
गुरुपादोदकं पुण्यं सर्वतीर्थावगाहनम् ॥
सर्वतीर्थावगाहे तु यत् फलं प्राप्नुयान्नरः ।
तत्फलं प्राप्नुयान्मर्त्यो गुरुपादकणाजलात् ॥
स स्नातः सर्वतीर्थेषु योऽभिषेकं समाचरेत् ।
पीतं पूतञ्च कुरुते सर्वपापेभ्य एव हि ।
विशेषतो महामाये ! तत्चणाच्छिवतां व्रजेत् ।
गुरोः पादरजो मूर्द्ध्नि धारयेद् यस्तु मानवः ॥
सर्वपापविनिर्मुक्तः स शिवो नात्र संशयः ।
तेनैव रजसा देवि ! तिलकं यस्तु कारयेत् ॥
चतुर्भुजो न सन्देहः स वैकुण्ठपतिर्भवेत् ।
तद्रजो भच्यते येन एकस्मिन् दिवसेऽपि च ॥
कोटिमहायज्ञफलं लभते स न संशयः ।

इति ते कथितं देवि ! रहस्यं गुरुगोचरम् ।
गोपनीयं प्रयत्नेन स्वकीयं कुलपौरुषम् ॥

इति श्रीयोगिनीतन्त्रे सर्वतन्त्रोत्तमोत्तमे देवीश्वरसंवादे चतुर्विंशतिसाहस्रे प्रथमः पटलः ।

द्वितीयपटलः ।

श्रीदेव्युवाच । परमानन्दसन्दोह ! चराचरजगद्गुरो ! ।
श्रुतं ते गुरुमाहात्म्यं गुह्याद् गुह्यतरं हि यत् ॥
मयात्र श्रोतुमिच्छामि कालीं सकलतारिणीम् ।
कथिता सा महाविद्या सिद्धविद्या च यामले ॥
महामहाब्रह्मविद्या चामुण्डा तन्त्रगोचरे ।
श्रावयस्व महादेव ! रहस्यं कृपया शिव ! ॥
ईश्वर उवाच । महामहाब्रह्मविद्या विद्येयं कालिका मता ।
यामासाद्य च निर्वाणमुक्तिमेति नराधमः ॥
अस्या उपासकाश्चैव ब्रह्मविष्णुशिवादयः ।
रहस्यं कथ्यते देवि ! सर्वलोका उपासकाः ॥
कालिकायाः प्रसादेन सर्वे मुक्त्यादिभागिनः ।
सा कालिनां सहस्राणि जप्यानाञ्च हि कोटिशः ॥
तेषां भाग्यवशेनापि कालिसाधनतत्परः ।
काली च जगतां माता सर्वशास्त्रेषु निश्चिता ॥
कालीमन्त्रं जपेद् यो हि कालिपुत्रो न संशयः ।
त्यजसि त्वं परश्चैतत् पुमांसं परमं तथा ॥
सदाशत्वं कचित्काले त्यजसि त्वं जगन्मयि ! ।
कालिविद्यां समासाद्य न त्यजति कदाचन ॥
गतं शूद्रस्य शूद्रत्वं ब्राह्मणानाञ्च विप्रता ।
मन्त्रग्रहणमात्रे तु सर्वे शिवसमाः किल ॥

नगरी निर्वाणस्था गङ्गां प्राप्य यथैव ताः ।
कालीमन्त्रग्रहादेव सर्वे शिवसमाः किल ॥
अपि चेत् त्वत्समा नारी मत्समः पुरुषोऽस्ति चेत् ।
तस्यैव जननी धन्या पिता तस्य सुरोत्तमः ॥
तस्यैव पितरः स्वर्गं यान्ति यस्मात् सुदुर्लभम् ।
येन भाग्यवशाद्देवि ! काली सा वा समाश्रिता ॥
आशंसन्ति हि पितरो नराणां पुण्यकर्मणाम् ।
कदास्माकं कुले पुत्रः कालीमन्त्रमुपाश्रयेत् ॥
तदा मुक्तिपुरीं प्राप्य विरराम सदैव हि ।
काली तारा तथा छिन्ना गुरुश्च भूपतिस्तथा ॥
एकत्वेन च बोद्धव्यं भिन्नत्वे नरकं व्रजेत् ।
ताराशिष्यस्त्यजेत् कालीं कालीशिष्यस्तु तारिणीम् ॥
छिन्नमहिषमर्दिन्याः कदाचित् पूजनं स्मृतम् ।
यदि वा पूज्यते देवि ! नान्यद्दै न प्रपूजयेत् ॥
कालीत्वेन च संभाव्य अन्यत्र पूजयेत् शिवे ! ।
या काली परमा विद्या सैव तारा न संशयः ॥
एतयोर्भेदभावेन नानामन्त्रा भवन्ति हि ।
उक्तं तत्कालिकाकल्पे ताराकल्पे च ते मया ॥
श्रीदेव्युवाच । नानाविधानं देवेश ! कथयस्व प्रियंवद ! ।
विशेषतो महादेव ! रहस्यं जपमर्मणः ॥
ईश्वर उवाच । वर्णमाला शुभा प्रोक्ता सर्वमन्त्रप्रदीपनी ।
तस्याः प्रतिनिधिर्देवि ! महाशङ्खमयी शुभा ॥
महाशङ्खं करे यस्य तस्य सिद्धिरदूरतः ।
तदभावे वीरवन्द्ये ! स्फाटिकी सर्वसिद्धिदा ॥
मणिसंख्यां महादेवि ! मालायाः कथयामि ते ।
पञ्चविंशतिभिर्मोक्षं पुष्टिस्तु सप्तविंशभिः ॥

त्रिंशद्भिर्धनसिद्धिः स्यात् पञ्चाशन्मन्त्रसिद्धये ।
अष्टोत्तरशतैः सर्वा सिद्धिरेव महेश्वरि ! ॥
एतत् साधारणं प्रोक्तं विशेषं कामिनां शृणु ।
दन्तमाला जपे कार्य्या गले धार्य्या शुभा नृषु ।
दशनैर्यदि कर्त्तव्या दन्तसंख्या तथा प्रिये ! ॥
सर्वसिद्धिप्रदा माला राजदन्तेन मेरुणा ।
अन्यत्रापि च देवेशि ! मेरुत्वेनैवमादिशेत् ॥
सङ्कल्पवाक्ये तु यत्संख्या संख्या तु जपहोमयोः ।
तत् शृणुष्व महेशानि ! क्रमेण कथयामि ते ॥
शतं सहस्रमयुतं लक्षं कोटिस्तथैव च ।
सर्वत्र परिसंख्येयमविशेषं महेश्वरि ! ॥
विशेषे तु महेशानि ! विशेषमाचरेत् क्वचित् ।
शतादि प्रतिसंख्यायामष्टोत्तरं जपेत् प्रिये ! ॥
आद्यन्तपर्वद्वितयं हित्वा चाष्टकपर्वभिः ।
जपान्ते च तथा मालां शिवस्य धारयेत्ततः ॥
रक्तपुष्पार्घ्यजोवेन घटवाद्यपुरःसरम् ।
देव्यै समर्पयेद्धीमान् फलं तज्जपकर्मणः ॥
साङ्गोपाङ्गेन देवेशि ! रहस्यं जपकर्मणः ।
उक्तं सरस्वतीतन्त्रे तस्माज्जानीहि कामिनि ! ॥
करमाला महेशानि ! शिवशक्तिक्रमेण च ।
शृणुष्व परमेशानि ! सर्वतन्त्रप्रसिद्धये ॥
अनामामध्यमारभ्य कनिष्ठादित एव च ।
तर्जनीमूलपर्य्यन्तं प्रजपेद्दशपर्वभिः ॥
मध्यमाया मूले पर्वणि मेरुत्वेन समाचरेत् ।
अष्टोत्तरं जपेद्देवि ! आद्यन्तद्वितयं त्यजेत् ॥
शिवमाला समाख्याता शक्तिमालां शृणुष्व मे ।

अनामामध्यमारभ्य कनिष्ठादित एव च ॥
तर्जनीमूलपर्य्यन्तं प्रजपेद्दशपर्वसु।
मध्यमाद्वितयं पर्वं तर्जन्याः परमेश्वरि ! ॥
मेरुं जानीहि देवेशि ! तद्द्वयं न स्पृशेत् क्वचित्।
अष्टोत्तरजपे पर्वं आद्यन्तद्वितयं त्यजेत् ॥
नित्यं जपं करे कुर्य्यात् न तु काम्यं कदाचन।
काम्यमपि करे कुर्य्यान्मालाभावे च मत्प्रिये ॥
नित्यकर्मार्च्चितजपो नित्यजापः स ईरितः।
स्नानं सतर्पणं होमोवलिस्तृप्तिश्च नित्यभाक् ॥
अनुलोमविलोमेन सर्वमालासु संजपेत्।
केवलञ्चानुलोमेन प्रजपेत् करमालया ॥
पुंमन्त्रं प्रजपेद्देवि ! शिवसम्भवमालया।
शक्तिमन्त्रं जपेद्देवि ! शक्तिसम्भवमालया ॥
चन्द्रमन्त्रं विना देवि ! सावित्रीं वेदमातरम्।
सावित्रीं प्रजपेद्देवि ! करेण शिवमालया ॥
चन्द्रमन्त्रं जपेद्देवि ! करेण शक्तिमालया।
सावित्री जपने शस्ता सर्वदा करमालया ॥
स्फाटिकी मौक्तिकी कौषी शस्तापि शङ्खसम्भवा।
वैष्णवे तुलसीमाला गजदन्तैर्गणेश्वरे ॥
त्रिपुराजपने शस्ता रुद्राक्षै रक्तचन्दनैः।
श्मशानधुस्तूरवीजैः शस्ता धूमावतीजपे ॥
करपर्वसमुद्भूता नाद्या संग्रथिता सती।
शस्ता च वगलामुख्याः सत्यं सत्यं महेश्वरि ! ।
असङ्कल्पिते सत्यं यन्न्यूनाधिकमथापि वा।
न सम्यक् फलभाग्भूयात् तस्मान्नियममाचरेत् ॥
ताम्रपात्रं सदूर्वञ्च सतिलं जलपूरितम्।

सकुशं सफलं देवि ! गृहीत्वाचम्य कल्पित: ॥
अभ्यर्च्य च शिर:पद्मे श्रीगुरुं करुणामयम् ।
यद्वाशावदनो वापि देवेन्द्रवदनोऽपि वा ॥
मासं पक्षं तिथिञ्चैव देवपर्वादिकं तथा ।
आद्यन्तकालमुच्चार्य्य गोत्रं नाम च कामिनाम् ॥
क्रियाद्वयं करिष्येऽहमैशान्यामुत्सृजेत् पय: ।
चान्द्र: सौरस्तु सर्वत्र चान्द्र: स्यात्तिथिचोदने ॥
चान्द्रोऽपि मुख्य: सर्वत्र गौणस्तु क्रूरकर्मणि ।
ऋणदाने तथादाने पौष्टपथ्यादिषु प्रिये ! ॥
स्नानदाने तथा दाने पौष्टपद्यादिषु प्रिये ॥ इति पाठान्तरम्
मासो नाक्षत्रिक: प्रोक्त: सावनो वर्षपर्वणि ।
एवं युगे युगे प्रोक्त: कलौ सौरस्तु सर्वत: ।
सौरे मासि शुभा दीक्षा न चान्द्रे न च तारके ॥
न सावनो महेशानि । यस्मात् सा विफला भवेत् ।
क्रियावतो वेदमयी चान्द्रमासेऽपि शस्यते ॥
शुक्लपक्षे शुभं सर्वमशुभञ्च सितेतरे ।
प्रात:कालं समारभ्य यावन्मध्यन्दिनं रवे: ॥
तावत्कर्माणि कुर्वीत य: सम्यक् फलमीहते ।
क्रूरकर्माणि कुर्वीत शेषेऽपि परमेश्वरि ! ॥
गते तु प्रथमे यामे तृतीयप्रहरावधि ।
कालो नक्तं जपस्योक्तं पूजाकालमिति शृणु ।
सार्द्धयामे गते नक्तं सार्द्धयामे स्थिते सदा ।
पूजाकालो भवेद्यामश्चतुर्वर्गप्रद: सदा ॥
श्लिष्टे द्वे घटिके ये तु रात्रेर्मध्यमयामयो: ।
सा महारात्रिरुद्दिष्टा तत्कृतं चाक्षयं फलम् ॥
यद्यज्जप्तं हुतं यद्यत् कृतञ्च मोक्षसाधनम् ।

तत्सर्वमक्षयं याति तथानन्ताय कल्पते ॥
न नक्तं वैष्णवे सौरे महासौरे च पैतृके।
न मध्याह्नं विना देवि! शशाङ्कग्रहणादिना ॥
दीक्षा कार्य्या प्रयत्नेन शुक्लपक्षविभेदतः।
मुक्तिकामः कृष्णपक्षे भुक्तिकामः सिते तथा ॥
भूतिकामे च कर्त्तव्यः कृष्णस्यापञ्चमादिनात्।
शुभे काले शुभं सर्वमशुभञ्चार्त्तिभिश्चरेत् ॥
उपरागे महातीर्थे कालदोषो न विद्यते।
वाराणस्यां विशेषेण सर्वदा सर्वमाचरेत् ॥
सदाकृतयुगं तत्र सर्वदा उत्तरायणम्।
विशेषश्च दिवारात्रौ सन्ध्यायाञ्च महानिशि ॥
प्रत्यक्षं दृश्यते वह्नौ मूर्त्यावर्त्ते पुनः शिवे!।
काश्याञ्च नोदेति कदा सन्धियोगाद्वरानने! ॥
द्वित्रिंश्यां क्रोशतः काशी पञ्चक्रोशी भवान्तरे।
आयामप्रस्थतो देवि! नित्येयं नित्यदा शुभे! ॥
इयं निर्वाणनगरी परं ज्योतिर्मयी शिवे!।
ब्रह्माण्डं स्थापयेत्तत्र सकूटं वस्तुमानवम् ॥
यत्र भ्रमणतो देवि! चानिर्वाणमवाप्नुयात्।
सर्वस्वेनापि कर्त्तव्यं वाराणस्यां द्विजार्पणम् ॥
वाराणस्यां द्विजस्थानं ब्रह्मयोगारतिस्तथा।
निष्कामे कर्मबन्धश्च सर्वं निर्वाणकारणम् ॥
गङ्गादिमुक्तिक्षेत्रादौ ज्ञानादियोगतस्तथा।
मृतं पूतं नयेत् काश्यां मुक्तो ममोपदेशतः ॥
न वासोऽन्यत्र ये यस्मान्न मुक्तिः कालिकां विना।
तत्र यद्यत् कृतं कर्म तदनन्तफलं लभेत् ॥
अक्षयं हि भवेत् सर्वं दृढां सिद्धिमवाप्नुयात्।

तत्र सांयोगिकं पुण्यं तत्र चैव विमुच्यते ॥
तत्राहं तत्स्वरूपेण पुष्णामि नान्यथा शिवे ! ।
स्वल्पत्वे तिथिकालत्वे क्रियाकालगतिर्भवेत् ॥
काले खलु समारभ्यं अकालेऽपि समापयेत् ।
सन्ध्यायां पतितायान्तु गायत्रीं दशधा जपेत् ॥
ततः कालोचितां सन्ध्यां कृत्वा कर्म समापयेत् ।
इत्येवं कथितं तुभ्यं यत् पृष्टं गिरिसम्भवे ! ।
इतः परतरं किञ्चित् तद्ब्रूयां तव मानसे ॥

इति योगिनीतन्त्रे सर्वतन्त्रोत्तमोत्तमे देवीश्वरसंवादे चतुर्विंशतिसाहस्रे द्वितीयः पटलः ।

तृतीयः पटलः ।

श्रीदेव्युवाच । भगवन् ! प्रमथाधीश ! देवदेव ! जगद्गुरो ! ।
युद्धस्य वारणं देव ! ज्वरादिवारणं तथा ॥
क्षिप्रं भवेत् कथं नाथ ! कृपया परया वद ।
नान्यः त्राता च जगतां त्वां विना परमेश्वर ! ॥
ईश्वर उवाच । कथयामि तव स्नेहात् कवचं वारणं महत् ।
युद्धस्य च ज्वरादेश्च क्षिप्रं हि नगनन्दिनि ! ॥
प्राकृतेनैव वाक्येन कथयामि शृणुष्व तत् ॥

ॐ नमो भगवति ! वज्रशृङ्खले ! हन्तु भक्षयतु खादतु रक्तं पिव कपालेन रक्ताक्षि ! रक्तपटे ! भस्माक्षि ! भस्मलिप्तशरीरे ! वज्रायुधप्राकारनिचिते ! पूर्वां दिशं बन्धतु दक्षिणां दिशं बन्धतु पश्चिमां दिशं बन्धतु नागार्थं धनाय ग्रहपतीन् बन्धतु नागपतिं बन्धतु प्रेतभूतगन्धर्वादयो ये ये केचित् पुत्रकास्तेभ्यो रक्षतु ऊर्द्ध्वं रक्षतु अधो रक्षतु खनिकां बन्धतु जलमहाबले ! ह्येहि कोटिकोटिशतावलिवज्राग्निवज्रप्रकारे ! हुं फट् क्रीं क्रीं श्रीं फट्

हुं हुं क्रूं फं फं सर्वग्रहेभ्यः सर्वदुष्टोपद्रवेभ्यो क्रीं अशेषेभ्यो मां रक्षतु।

इतीदं कवचं देवि! सुरासुरसुदुर्लभम्।
ग्रहज्वरादिभूतेषु सर्वकर्मसु योजयेत्॥
न देयं यत्र कुत्रापि कवचं मन्मुखात् च्युतम्।
दत्ते च सिद्धिहानिः स्यात् योगिनीनां भवेत् पशुः॥
दद्याच्छान्ताय वीराय सत्कुलीनाय योगिने।
सदाचाररताय च निर्जिताशेषशत्रवे॥

श्रीदेव्युवाच। श्रुतं हि कवचं दिव्यं त्वन्मुखाम्भोजनिर्गतम्।
इदानीं श्रोतुमिच्छामि जगद्वश्यकरं परम्॥

ईश्वर उवाच। शृणु देवि! प्रवक्ष्यामि जगन्मोहकरं महत्।
नारदेन पुरा पृष्टं मयि कैलासमूर्द्धनि॥
कथितं कवचं तस्मै सर्वमोहकरं मया।
तेनैव कवचेनैव नारदो ब्रह्मसम्भवः॥
मोहयामास त्रैलोक्यं भित्त्वा हि कलहप्रियः।
तदसम्भवमालोक्य विष्णुराह विधेः सुतम्॥
कथं वा मोहितं सर्वं वद मे कारणं मुने!।
तत्सर्वमभवद्विष्णो विष्णुराह समुद्रजाम्॥
कैलासशिखरासीनं महादेवं जगद्गुरुम्।
पप्रच्छ नारदो धीमान् सर्वलोकहिते रतः॥

नारद उवाच। कालिकाया महाविद्यां श्रूयतां महतीं प्रभो!।
किमेतस्याः फलं देव! किमेतन्मोहनं भवेत्।
केनोपायेन समरे त्राणं मे वद शङ्कर!॥

ईश्वर उवाच। त्रिकाले गोपितं देवि! कलिकाले प्रकाशितम्।
काली दिगम्बरी देवी जगन्मोहनकारिणी।
तच्छृणुष्व मुनिश्रेष्ठ! त्रैलोक्यमोहनन्त्विदम्॥

अस्य कालभैरव ऋषिरनुष्टुप्छन्दः श्मशानकाली देवता सर्वत्र मोहने विनियोगः। ऐँ क्रौँ हुँ क्रः स्वाहा विवादे पातु मां सदा। क्रीं दक्षिणकालिकादेवतायै सभामध्ये जयप्रदा। क्रौँ क्रौँ श्यामाङ्गि ! शत्रुं मारय मारय क्रीं क्लीं त्रैलोक्यवशमानय क्रीं श्रीँ क्रीं मां रक्ष रक्ष विवादे राजगेहे च द्राविंशत्यक्षरा धरा।

ब्रह्मराक्षसे वेताले सर्वत्र रक्ष मां सदा।
कवचैर्वर्जितं यत्र तत्र मां पातु कालिका॥
सर्वत्र रक्ष मां पातु देवी ममाग्रस्वरूपिणी।
एतेषां परमं मोहं भवज्ञाग्ये प्रकाशितम्॥
सदा यस्तु पठेद्वापि त्रैलोक्यं वशमानयेत्।
इदं कवचमज्ञात्वा पूजयेद्घोरकामिनीम्॥
सर्वदा स महाव्याधिपीड़ितो नात्र संशयः।
अल्पायुः स भवेद्रोगी कथितं तव नारद !॥
धारणं कवचस्यास्य भूर्जपत्रे विशेषतः।
समन्त्रकवचं धृत्वा इच्छासिद्धिः प्रजायते॥
शुक्लाष्टम्यां लिखेन्मन्त्री धारयेत् स्वर्णपत्रके।
कवचस्यास्य माहात्म्यं नालं वक्तुं महामुने !॥
शिखायां धारयेद् योगी फलार्थी दक्षिणे भुजे।
इदं कल्पद्रुमं देवि ! तव स्नेहात् प्रकाश्यते।
गोपनीयं प्रयत्नेन पठनीयं महामुने !॥

विष्णुरुवाच। इत्येवं कवचं नित्यं महालक्ष्मीः प्राप्यताम्।
अवश्यं वशमायाति त्रैलोक्यं ते चराचरम्॥
शिवेन कथितं पूर्वं नारदे च फलेप्सिते।
तत्पाठान्नारदेनापि मोहितञ्च चराचरम्॥

श्रीदेव्युवाच। पुरामुने ! जगद्वन्द्य ! प्रमथेश ! वरप्रद !।

नराणामुपकाराय ब्रूहि योगं सुविस्तरम् ॥
येनाशु लभते राज्यं येनाशु लभते सुतम् ।
येनाशु लभते ज्ञानं येनाशु लभते धनम् ।
येनाशु लभते कीर्त्तिं येनाशु लभतेऽखिलम् ॥

ईश्वर उवाच । शृणु देवि ! प्रवक्ष्यामि यन्मां त्वं परिपृच्छसि ।
उक्तं फेत्कारिणीतन्त्रे नीलतन्त्रे च विस्तरम् ॥
इदानीं विस्तराद्देवि ! कथयामि शुचिस्मिते ! ।
उदेति पश्चिमे भानुश्चन्द्रो वा पतते भुवि ॥
यदि शुष्यति पाथोधिर्न मिथ्या च कदाचन ।
योगराजो महेशानि ! अव्यर्थोऽयं सदैव हि ॥
विष्णुचक्रं यथाऽव्यर्थं त्रिशूलञ्च यथा मम ।
कुलिशं देवराजस्य तथा योगो मयोदितः ॥
यथैव निश्चितं देवि ! ब्रह्मणः कमलासनम् ।
तथैव निश्चितो देवि ! योगोऽयं नात्र संशयः ॥
कल्पवृक्षो यथा देवि ! आकाङ्क्षापरिपूरकः ।
अयं योगवरो देवि ! तथैव परिकीर्त्तितः ॥
राज्यार्थञ्च कुलार्थञ्च सुतार्थं स्वर्णपत्रके ।
आयामप्रस्थितो देवि ! षोड़शाङ्गुलसम्मिते ॥
यज्ञार्थञ्च धनार्थञ्च कीर्त्त्यर्थं राजते शुभे ।
तथा मानमिते देवि ! तद्वत्ताम्रे विनाशने ॥
स्वर्णे वा परमेशानि ! अन्यार्थं भूर्जपत्रके ।
लिखेन्मन्त्रं वरारोहे ! तारिण्याः सर्वसिद्धिदम् ॥
राज्यार्थी च धनार्थी च पुत्रार्थी कीर्त्तिकाम्यकः ।
बुध्यर्थी विलिखेद्देवि ! लेखन्या सुमनोहरम् ॥
स्वर्णयष्ट्याष्टाङ्गुलायाः कनिष्ठायाः प्रमाणतः ।
ज्ञानार्थं कुशमूलेन चान्यार्थं दूर्वया लिखेत् ॥

आचम्य पुरतो देवि ! नत्वा च गुरुपादुकाम् ।
उत्तराशामुखो भूत्वा पूजयित्वा च तारिणीम् ॥
कुङ्कुमं रोचना जटामांसी चन्दनमेव च ।
काश्मीरं कस्तुरीं लाचां सिन्दूरञ्च वरानने ! ॥
सर्वमेकीकृतेनादौ षट्कोणचक्रमालिखेत् ।
तन्मध्ये विलिखेत्तारां सार्द्धवेदाचरीं पराम् ॥
सार्द्धपञ्चाचरीं वापि तन्मयो वेदमध्यगम् ।
साध्यं लिखेत्तच्च साध्यं शृणुष्व शम्भुवल्लभे ! ॥
अमुकस्यामुकं वाक्यं वशीकुरु च कुर्विति ।
अमुकस्यामुकं ज्ञानं सिद्धिं कुरु च कुर्विति ॥
अमुकीनां शुभं पुत्रमुत्पादयोत्पादयेति च ।
अमुकस्यामुकं धनं देहि देहीति कामिनि ! ॥
एवमेव क्रमेणैव साध्यं संलिख्य यत्नतः ।
क्लीवहीनान् दीर्घवर्णान् षट्कोणे षट् समालिखेत् ॥
वृत्तमष्टदलं पद्मं सुदृष्टं सुमनोहरम् ।
अष्टपत्रं लिखेत्तत्र किञ्जल्कयुगलं युगम् ॥
अष्टपत्रे अष्टवर्णान् वक्ष्यमाणान् लिखेत्ततः ।
वाग्भवं भुवनेशानीं कामं हुं प्रणवं तथा ॥
मायामन्त्रं ततः स्वाहा पूर्वादिक्रमतो लिखेत् ।
चतुरस्रं चतुर्द्वारमेवं यन्त्रं समालिखेत् ॥
शनाशौ च सिद्धयोऽपि अन्यत्र त्वमृतोदये ।
गुरौ शुक्रे तथा सोमे मङ्गले वा बुधेऽह्नि च ॥
तारायां सानुकूलायां भजेन्मन्त्रं समाहितः ।
पीतवस्त्रेण संवेष्ट्य जतुना परिवेष्टयेत् ॥
पट्टवस्त्रेण रक्तेन बध्नीयात् साधकोत्तमः ।
स्वर्णपीठेषु संस्थाप्य संख्यानमाचरेत् कृती ॥

भूमिस्पृष्टं न तत् कुर्य्यात् न निर्माल्येन संस्थतम्।
विदीर्णं लङ्घितं वापि नैव कुर्य्यात् कदाचन॥
आयामे प्रस्थितो देवि! षोड़शाङ्गुलमानतः।
घटं कुर्य्यात् प्रयत्नेन सर्वदृष्टिमनोहरम्॥
राज्यार्थी काञ्चनेनैव पुत्रार्थी रजतेन च।
ताम्रेण चैव युद्धार्थी मृदान्यत्र घटञ्चरेत्॥
तत्र मुक्तां प्रवालञ्च मणिं रजतकाञ्चने।
धान्यं क्षिप्त्वा मुखं तस्य पल्लवैः प्रतिपादयेत्॥
क्षौमयुग्मेन रक्तेन प्रच्छाद्य प्रयतः सुधीः।
अष्टाङ्गुलस्वर्णपत्रे चतुरस्रं समन्ततः॥
तत्र मन्त्रं लिखित्वैव घटे संस्थाप्य यत्नतः।
चतुःषष्ट्युपचारेण यजेत्तारां परां शिवाम्।
राजके पुष्पके देवि! षोड़शाच्छादनं कुले॥
किञ्जल्कैर्मण्डितं देवि! बलिमादाय पूर्ववत्।
निवेदयेन्महाभक्त्या बलिमन्त्रेण मन्त्रवित्॥
पञ्चामृतैः पञ्चगव्यैः स्नापयित्वा च पूजयेत्।
अष्टोत्तरसहस्रन्तु हुत्वा साधकसत्तमः॥
तत्पुटोपरि देवेशि! पुष्पाक्षतं विनिक्षिपेत्।
भूमिं ग्राममितां दद्याद्राज्यमिच्छति कामुकः॥
दक्षिणां युद्धकामी च काञ्चनाश्वौ महेश्वरि!।
शालग्रामशिलामेकां स्वर्णरेखाद्यलङ्कृताम्॥
ज्ञानसिद्धैः प्रदद्यात्तु अन्यत्र गाञ्च काञ्चनम्।
भोजयेद् ब्राह्मणान् धीरः कुमारीः कल्पपल्लवे!॥
ततस्तु साधयेद् यन्त्रं पुरुषो दक्षिणे भुजे।
नारी वामभुजे चैव शिरसि कण्ठगोचरे॥

इत्येवं कथितं रम्यं न देयं प्राणसङ्कटे।

इति योगिनीतन्त्रे महातन्त्रराजे देवीश्वरसंवादे चतुर्विंशतिसाहस्रे तृतीयः पटलः।

चतुर्थपटलः।

देव्युवाच। देवदेव! जगद्वन्द्य! सुरासुरनमस्कृत!।
इदानीं श्रोतुमिच्छामि वीरषट्कर्मसाधनम्॥
धन्यं पुण्यवतां राज्ञां राज्यादिकवयोजुषाम्।
स्त्रियास्तु सिद्धसंस्थानां सर्वभोगविलासिनाम्॥
श्रीईश्वर उवाच। शान्तिवश्यस्तम्भनानि विद्वेषोच्चाटने तथा।
मारणं परमेशानि! षट्कर्मेदं प्रकीर्त्तितम्॥
तारिणीं कालिकां छिन्नामधिकृत्य जगन्मयि!।
कथयामि तव स्नेहात् अतः सिद्धिकरं परम्॥
रतिर्वाणी रमा ज्येष्ठा मातङ्गी कुलकामिनी।
दुर्गा चैव भद्रकाली कर्मादौ कर्मसिद्धये॥
षोड़शैरुपचारैश्च यजेद्वीरः स्वशक्तितः।
शून्यागारे महारण्ये देवतायतनेऽपि वा॥
पञ्चकर्म प्रकुर्वीत मारणन्तु शवोपरि।
तदभावे पितृभूमौ वासांसि कथयामि ते॥
मुख्यं दिगम्बरं ज्ञेयं द्वीपिचर्म द्वितीयकम्।
तदभावे रक्तक्षौमं नान्यद्वस्त्रं प्रकल्पयेत्॥
स्वर्णमादौ द्वितीये च राजतं स्तम्भने शिला।
विद्वेषोच्चाटने ताम्रं कपालं मारणे शुभम्॥
विप्रान्योऽपि नरः प्रोक्तो युवा च कृष्णवर्णकः।
षड्भिश्चाव्याधिमृतो माला तस्य शुभावहा॥
अभावे स्फाटिकी जप्या इन्द्राद्यैर्वा जपेत् प्रिये!।

मृदौ वा कोमले वापि विष्टरे वा सुरेश्वरि ! ॥
मुण्डे वा योनिके देवि ! त्वचि व्याघ्रस्य वा प्रिये ! ।
एकहस्ते द्विहस्ते वा चतुर्हस्ते समन्ततः ॥
स्थिरासनञ्चरेत् सम्यक् स्वाभयं तत्र चिन्तयेत् ।
भये जाते महेशानि ! भैरवोक्तमनुं जपेत् ॥
विषयुग्मं वज्रजाले हनयुग्ममतःपरम् ।
सर्वभूतानतः कूर्चमन्त्रान्तो भैरवो मनुः ॥
ततो भूतवलिं दद्यात् साधको धर्मसम्मितम ।
अश्वत्थेन महेशानि ! तद्धर्मकीलकञ्चरेत् ॥
सूर्य्यवारादियोगेन पञ्च कर्म समाचरेत् ।
शनौ च मारणं देवि ! निश्चितं वीरवन्दिते ! ॥
रात्रियोगे च कर्त्तव्यं सर्वकर्म शुचिस्मिते ! ।
प्राग्विद्वान् प्रजपेत् सम्यक् स्वमन्त्रमयुतं शवे ॥
प्रयोगस्य फलावाप्तौ स्वस्वरक्षाकरं महत् ।
ततः साध्यदिने मन्त्री याममात्रे गते निशि ॥
मादिभिः पञ्चभिर्द्रव्यै यजेत् कुलविनाशिनीम् ।
दिग्वासा गलिताशेषचिकुरः कुलकौलिकः ॥
शक्तियुक्तो जपेद्विद्यां सदा त्वां मनसा स्मरेत् ।
लक्षसङ्ख्यं महेशानि ! शक्तिपूजा पुरःसरम् ॥
प्रत्यहं भोजयेद्विप्रान् कौलिकाद्यान् दिनान्तरे ।
मांसं मद्यं तथा मत्स्यं हुनेदङ्गौ शतं शतम् ॥
दक्षिणां गुरवे दद्यात् गुरुरूपेण शाम्भवि ! ।
एवमुक्तविधानेन दिग्भ्यो वा वीरपुङ्गवः ॥
यदि कुर्य्यात् महेशानि ! देवानपि तथा नयेत् ।
नापेक्षा जायते कान्ते ! चावश्यं फलभाग्भवेत् ॥
महाप्रयोगे देवेशि ! कृष्णच्छागं वलिं हरेत् ।

पूजान्ते सततं देवि ! तन्मांसैर्वह्निमर्च्चयेत् ॥
विधिः सर्वत्र कथितो दिव्यवीरपशुक्रमात् ।
क्रमेण फलमाप्नोति व्यत्यये पातकी भवेत् ॥
इत्येवं कथितं तुभ्यं सम्यक् षट्कर्मगोचरम् ।
गोपनीयं खले दुष्टे पशुपामरसन्निधौ ॥
श्रीदेव्युवाच। सुरायाः किंविधा देव ! शक्तिर्वा कीदृशी शुभा ।
षट्कर्मसु यथायोग्यं वद मे करुणानिधे ! ॥
ईश्वर उवाच। माध्वी शान्तिकरी प्रोक्ता वश्ये च स्फाटिकी शुभा
स्तम्भने डाकिनी ज्ञेया विद्वेषे पैष्टिकी मता ॥
उच्चाटने तथा गौड़ी मारणे भैरवी मता ।
एतासां लक्षणं देवि ! कथितं कुलमोहने ! ॥
पद्मिनी शान्तिदा प्रोक्ता वश्ये च शङ्खिनी मता ।
स्तम्भनोच्चाटने देवि ! प्रशस्ता नागवल्लभा ॥
मारणे च तथा शस्ता डाकिनी शत्रुमृत्युदा ।
गौराङ्गी दीर्घकेशी या सदा चामृतभाषिणी ॥
रक्तनेत्रा सुशीला च पद्मिनी साधने शुभा ।
मन्त्रसिद्धिकरी ह्येषा शङ्खिनी सापि भाविनि ! ॥
दीर्घाङ्गी सा शङ्खिनी स्याज्जगद्रञ्जनकारिणी ।
समाङ्गी शूद्रदेही च न खर्वा नातिदीर्घका ॥
दीर्घकेशी शतपुष्टा मृदुभाषा च नागिनी ।
कृष्णाङ्गी च कृशाङ्गी च दन्तुरा मदतापिता ॥
ह्रस्वकेशी दीर्घघोणा सदा निष्ठुरवादिनी ।
सदा क्रुद्धा दीर्घदेहा महारावपरायणा ॥
निर्लज्जा हास्यहीना च निद्रालुर्बहुभक्षिका ।
इयं सा डाकिनी प्रोक्ता मृत्युयोगे प्रशस्यते ॥
एतास्तु शक्तयो देवि ! सर्वजातिसमुद्भवाः ।

सापत्याश्च सुरत्यश्च जातपुत्रादिकाः शुभाः।
ग्राह्या कुलरसैः पूज्या भक्तिभावेन कामिनी॥

देव्युवाच। केन केन च मन्त्रेण मन्त्री षट्कर्मभाग्भवेत्।
तत्तन्मतं महेशान! यद्यहं तव वल्लभा॥

ईश्वर उवाच। एकाक्षरं कालिकायास्तारायास्तु त्रिवीजकम्।
वज्रवैरोचनीयो यो मनुरेकादशाक्षरः॥
सर्वतेजोऽपहारी च मनुराख्यात एव च।
बहुनात्र किमुक्तेन शृणु मत्प्राणवल्लभे!॥
केवलं शक्तियुक्तश्च जपेद्देवीं समाहितः।
अवश्यं फलमाप्नोति नान्यथा वीरवन्दिते!॥
खलो यदि फलप्राप्तः सफलो यदि निष्फलः।
भवेदेतत् महेशानि! तदा सर्वं वृथा भवेत्॥
अहं धाता तथा पाता रक्षाम्युद्योगिनः शिवे!
तथापि न हि सिद्धिः स्यात् चित्रमेतन्नगात्मजे!॥
एवन्तु मारणं देवि! विशेषात् कथयामि ते।
सान्तं वह्निसमायुक्तं वामनेत्रविभूषितम्॥

क्रीं हुं हुं अमुकं मारय मारय स्वाहा। कूर्चयुग्मं ततो देवि! अमुकं मारय,मारय।

चतुर्दशाक्षरो मन्त्रः स्वाहान्तः शत्रुनाशकः।
खादिराङ्गारमादाय कुजाष्टम्यां विशेषतः॥
लेखयेत् पुत्तलीं शत्रुस्वरूपां लौहपात्रके।
निशायां मस्तके नेत्रे ललाटे हृदये करे॥
नाभौ गुह्ये कटौ पृष्ठे क्रमोक्तेन पदद्वये।
मन्त्रवर्णान् समालिख्य प्रतिष्ठां तत्र कारयेत्॥
संहारमुद्रां बध्वा तु ध्यायेद्देवीं जयप्रदाम्।
दीर्घाकारां कृष्णवर्णां सदोर्द्धस्तनमस्तकाम्॥

नृमुण्डयुगलं हस्ते चर्वयन्तीं दिगम्बरीम् ।
शत्रुनाशकरीं देवीं ध्यायेच्छत्रुक्षयाय च ॥
एवं ध्यात्वेष्टकाचूर्णैर्वामहस्तेन शङ्करि ! ।
ॐ शत्रुनाशकर्त्र्यै नम इति दत्त्वा महेश्वरि ! ।
हरिद्राचूर्णसहितां धारां दद्यादनेन तु ।
अमुकस्य शोणितं पिब पिबेति तत्परम् ।
मांसं खादय खादय क्रौं नम इति मन्त्रतः ॥
मध्याह्ने मध्यरात्रौ तु पूजयित्वा शताष्टकम् ।
जपेदेकादशाहे च रोगः स्यात् नात्र संशयः ॥
दण्डाधिकैकविंशाहे मृत्युरेव रिपोर्ध्रुवम्
अथवान्यप्रकारेण शत्रुक्षयमहं वदे ॥
पुष्करोशक्लात् समादाय पूजयेदुष्णवारिणा ।
विपरीतक्रमेणैव जपपूजादिकं चरेत् ॥

महादेवाय नम इति पुष्करोशक्लात् समाहरेत् । शिवाय नम इति मन्त्रेण गठनञ्च समाचरेत् । पशुपतये नम इति प्राणान् संस्थापयेत्ततः ।

लौहपात्रे महेशानि ! खादिराङ्गारयोगतः ।
शत्रुप्रतिकृतिं लिख्य तत्र संस्थापयेच्छिवम् ॥
ततो ध्यायेत् महारुद्रं ध्यानं शृणु समाहितः ।
शत्रोर्वक्षःस्थितं रुद्रं ज्वलदग्निसमप्रभम् ॥
वामहस्तधरं केशं दक्षिणप्राणकर्षणम् ।
नरचर्माम्बरं देवं महाव्यालादिवेष्टितम् ।
पिनाकधृगिहागच्छ इत्यादिना आवाह्य यत्नतः ।
शूलपाणये नम इति स्नापयेत् साधकोत्तमः ।
महेश्वराय नम इति पाद्यादिना प्रपूजयेत् ।
ईशानादिं तथा मूर्त्तिं व्युत्क्रमेण प्रपूजयेत् ।

अग्निकोणादिपर्य्यन्तं सूर्य्यरीत्या महेश्वरि ! ॥
यः शिवः मनन ॐ मूलमष्टाविंशति संजपेत् ।
हुं क्षमयेति वामेन करेण तु विसर्जयेत् ।
अजित केशव विष्णो हरे सत्य जनार्दन ! ।
हंस ! नारायण ! स्वाहा मन्त्रमेव सकृज्जपेत् ॥

हुँ नमो भगवते वासुदेवाय स्वाहा इति यः शिवः नम इत्यपि सकृज्जपेत् ।

एवमेकादशाहेन शत्रून्मादनमञ्जसा ।
अवश्यं जायते देवि ! सत्यं सत्यं त्रिलोचने ! ॥
कथयामि महादेवि ! वैरस्तम्भनमुत्तमम् ।
कुम्भकारस्य पयनादानयेत् पिठरं जलम् ॥
एकः स्वयं द्विकः स्फुटं यत् कृतं साधकोत्तमः ।
आनीय च ऊखामध्याङ्गस्म पर्य्युसितं तथा ॥
निःक्षिप्य पिठरे शुष्कनालिकापत्रविस्तरम् ।
भस्मोपरि च संस्थाप्य वाटिकायाः सुरेश्वरि ! ॥
ऐशान्यां विवरं कृत्वा शनैर्वारि महेश्वरि ! ।
पुनर्मध्याह्नकाले च निर्जने सति भाविनि ! ॥
चतुर्दिक्षु वाटिकाया गर्त्तस्य निकटात् प्रिये ! ।
तत्तावतीमहं भूमिं चौरेभ्यो रक्षयामि च ॥
प्रफुल्लमनसा देवि ! भूमौ परिग्रहञ्चरेत् ।
तावतीञ्च ततो भूमिं वामावर्त्तेन भाविनि ! ॥
परिक्रम्य पुनस्तत्र गर्त्तस्य निकटं व्रजेत् ।
तत्रैव निर्जने गर्त्ते शलाकां लौहनिर्मिताम् ॥
रोपयित्वा तदुपरि पिठरं सशरावकम् ।
संस्थाप्य मृद्भिः संपूर्य तद्गत्तं गृहमाव्रजेत् ॥
शतिस्तम्भं भवेद्देवि ! चौरादीनां तथा खलु ।

अयं योगवरो देवि ! दुर्लभो वसुधातले ॥
पिशाचभूतवेतालकुश्माण्डब्रह्मरक्षसाम् ।
दानवानां तथान्येषां गतिस्तत्र प्रजायते ॥
धनपुत्रसमृद्धिस्तु वर्द्धतेऽहर्निशं तथा ।
दिने दिने धर्मवृद्धिर्जायते नात्र संशयः ॥

इति योगिनीतन्त्रे देवीश्वरसंवादे चतुर्विंशतिसाहस्रे चतुर्थः पटलः ।

पञ्चमः पटलः ।

श्रीदेव्युवाच । भगवन् सर्वधर्मज्ञ ! लोकानुग्रहकारक ! ।
साधनं सर्वमन्त्रस्य सर्वाशापरिपूरकम् ॥
शय्यायां साधनमादौ वक्ष्येऽहं परमाद्भुतम् ।
सार्द्धयामगतायान्तु निशायां साधकोत्तमः ॥
भूत्वा दिगम्बरः सम्यगाचम्य विधिवत्तदा ।
अभ्युक्ष्य मूलमन्त्रेण शय्यायां तत्र संविशेत् ॥
गुरुं परगुरुञ्चैव परापरगुरुं तथा ।
परमेष्टिगुरुञ्चैव वामेऽभ्यर्च्य गणेश्वरम् ॥
दक्षिणे च भ्रुवोरूर्द्ध्वं श्मशानवासिने नमः ।
ततो मायमासनाय नम इत्यर्च्चयेच्छिवे ! ॥
शय्यां शय्यातले देवि ! प्रणवं वाग्भवञ्च फट् ।
लिखित्वाचम्य यत्नेन स्वमन्त्रोक्तविधानतः ॥
प्रणवं मणिधराञ्चैव वज्रिणि चेन्महापदम् ।
प्रतिसरे रक्ष रक्ष मां हुँ फट् स्वाहया युतम् ॥
अनेन मनुना देवि ! शिखां बध्वा विधानतः ।
अङ्गन्यासकरन्यासौ मातृकान्यासमेव च ॥
भूतशुद्ध्यादिकं कृत्वा हृत्पद्मे परमां शिवाम् ।
ध्यात्वा भक्त्या समभ्यर्च्य मानसैः साधकोत्तमः ॥

शय्यातले प्रणीयतां मन्त्रोपरि वरानने ।।
प्रणवञ्च ततो देवि ! वटुकेभ्यो नमस्तथा ॥
इति मन्त्रेण मनसा वटुकं पाद्यादिभिर्यजेत् ।
ततस्तु वह्निवीजेन समन्ताज्जलधारया ॥
वह्निप्राचीरमाचिन्त्य सङ्कल्पञ्च समादरात् ।
जपं कृत्वा समर्प्याथ विधिना परमेश्वरि ! ॥
पुनः सङ्कल्प्य देवेशि ! कुर्य्यात् सर्वक्रमं शिवे ! ।
होमञ्च तर्पणञ्चैव अभिषेकं ततःपरम् ॥
विप्रस्य भोजनञ्चैव अभावे द्विगुणं जपेत् ।
काञ्चनं दक्षिणां दत्त्वाच्छिद्रावरणञ्चरेत् ॥
संप्रोच्य वटुकं देवि ! क्षमस्वेति विसर्जयेत् ।
एवमुक्तं महादेवि ! शय्यासाधनमुत्तमम् ॥
मन्त्रसिद्धिकरं शीघ्रमस्मत्सायुज्यदायकम् ॥
अथ शृणु त्रिवाटस्य चतुर्वाटस्य साधनम् ।
गत्वा तु त्रिपथं वापि चतुष्पथं वरानने ! ॥
प्रणमेद् गुरुमभ्यर्च्य मणिधरीति च मन्त्रतः ।
बध्वा ग्रन्थिन्तु वस्त्रान्ते निर्भयः साधकोत्तमः ॥
श्मशानवासिनो ये ये देवा देव्यश्च भैरवाः ।
दयां कुर्वन्तु ते सर्वे सिद्धिदाश्च भवन्तु मे ॥
प्रणमेत् प्रणवाद्येन मनुनानेन भक्तितः ।
ततः पूर्वमुखो वापि उत्तराशामुखोऽपि वा ॥
उपविश्य समाचम्य स्वस्तिवाच्य महेश्वरि ! ।
स्थानं सम्मार्ज्य तत्रैव प्रेतवीजं लिखेत् सुधीः ॥
वीजोपरि महादेवि ! विहितासनमास्तरेत् ।
तत्रोपविश्य देवेशि ! हृदीष्टदेवतां स्मरेत् ॥
यथेष्टमनसाराध्यमष्टासु च बलिं हरेत् ।

काल्यादिभ्यो महेशानि ! पूजयित्वा विधानतः ॥
कालो कपालिनी कुल्ला कुरुकुल्ला विरोधिनी ।
विप्रचित्ता तथा नीला वलाका च मुनिद्विषः ।
प्रणवाद्या ङेन्नमोऽन्ताः पूजावल्यादिकाः स्मृताः ॥
सङ्कल्पप्राष्टोत्तरशतं जप्त्वाच्छिद्रावधारणम् ।
कृत्वा स्थानं परित्यज्य देवीं स्मृत्वा गृहं व्रजेत् ॥
एवमुक्तं साधनं ते सर्वसिद्धिनिषेवितम् ।
यस्मै कस्मै न दातव्यं साधकानां परं हितम् ॥
अतःपरमहं वच्ये विल्वमूलस्य साधनम् ।
विल्वमूलं महेशानि ! समन्तात् षोड़शं करम् ॥
मम जटास्वरूपं हि पर्णं जानीहि सुन्दरि ! ।
ऋग्यजुःसामसदृशं पत्नत्रयं वरानने ! ॥
शाखा हि सर्वशास्त्राणि जानीहि मीनलोचने ! ।
कल्पवृक्षसमो विल्वो ब्रह्मविष्णुशिवादयः ।
महालक्ष्मीर्विल्ववृक्षो जातः श्रीशैलपर्वते ॥

श्रीदेव्युवाच । कथं सा विष्णुवनिता विल्ववृक्षो बभूव ह ।
वृत्तान्तं परमाश्चर्यं वद मे करुणामय ! ॥

श्रीईश्वर उवाच ।

शृणु देवि ! प्रवक्ष्यामि वृत्तान्तं परमाद्भुतम् ।
सत्ये तु पूजयामास लिङ्गं रामेश्वराभिधम् ॥
ज्योतीरूपं मदीयांशं प्रार्थ्य ब्रह्मादिभिः सह ।
तत्र मेऽनुग्रहात् वाणी सर्वेषां प्रियतां गता ॥
विष्णोरतिप्रिया नित्यं साभूत् सरस्वती सदा ।
तादृक् प्रीतिर्न लक्ष्म्याश्च जायते केशवस्य च ॥
इति चिन्तापरा लक्ष्मीर्ययौ श्रीशैलमुत्तमम् ।
प्राप्य मल्लिङ्गमेकान्ते तपस्तेपेऽतिदारुणम् ॥

तथापि यदि नैवाभूत् कृपा मे परमेश्वरि ! ।
तदा सा वृक्षरूपेण स्थिता लिङ्गाग्रतः सती ॥
पत्रैः पुष्पैः फलैः स्वीयैः पूजयामास सन्ततम् ।
कोटिवर्षं महेशानि ! ततो मेऽनुग्रहोऽभवत् ॥
तेनैवानुग्रहेणैव विष्णोर्वक्षःस्थिता भवेत् ।
सदैव परमेशानि ! विहरेत् सा सदैव हि ॥
अतस्तु कारणाद्देवि ! तद्रूपेण हरिप्रिया ।
सदैवापूजयत् मां सा मद्भक्ता सातुला शिवे ! ॥
अतस्तु वृक्षमास्थाय तिष्ठामि च दिवानिशम् ।
सर्वतीर्थमयी देवि ! सर्वदेवमयः सदा ॥
श्रीवृक्षः परमेशानि ! अतएव न संशयः ।
तत्फलैस्तत्प्रसूनैर्वा तत्पत्रैर्यः प्रपूजयेत् ॥
तत्काष्ठचन्दनैर्वापि स मे भक्तः स मे प्रियः ।
तत्काष्ठचन्दनं भाले यो धारयति संभ्रमात् ॥
तत्तनूं शिवबुद्ध्या वा नमेद्देवि ! मुदान्विता ।
अतस्तच्चन्दनं देवि ! धारयेन्न कदाचन ॥
तत्पत्रं तत्प्रसूनं वा कदापि धारयेन्न हि ।
विल्वमूले महेशानि ! प्राणांस्त्यजति यो नरः ॥
रुद्रदेही भवेत् सत्यं पापकोटियुतो हि सः ।
अतस्तत्साधनं देवि ! सर्वेषां प्रियकारकम् ॥
यत्र गत्वा विल्वमूलं प्राग्वद्गुरुचतुष्टयम् ।
अभ्यर्च्य यत्नतो देवि ! क्षेत्रपालं प्रपूज्य च ॥
क्षेत्रपाल ! महाभाग ! श्मशानाधिप ! सुव्रत ! ।
सिद्धिं देहि जगत्कर्त्ता देहि स्थानं नमोऽस्तु ते ॥
अनेन प्रणवाद्येन मनुना प्रार्थयेत्ततः ।
ततः स्थानन्तु संपूज्य लिखेत्तत्र वरानने ! ॥

वाग्भवं प्रेतवीजञ्च पुनर्वाग्भवमेव च ।
तदन्ते मूलमन्त्रञ्च विलिखेत् साधकोत्तमः ॥
पूजयित्वा च काल्याद्याः पूर्ववत् परमेश्वरि ! ।
संकल्पग्राष्टोत्तरयुतं जप्वाच्छिद्रावधारयेत् ॥
परित्यज्य ततः स्थानं गुरुं स्मरन् गृहं व्रजेत् ।
इत्येवं कथितं तुभ्यं सारात् सारं परात् परम् ॥
गोपनीयं सदा भद्रे ! विशेषात् पशुसंकुले ।
इदानीं शृणु देवेशि ! मुण्डसाधनमुत्तमम् ॥
यत् कृत्वा साधको याति महादेव्याः परं पदम् ।
नरमहिषमार्जारमुण्डत्रयं वरानने ! ॥
अथवा परमेशानि ! नृमुण्डत्रयमादरात् ।
शिवासर्पसारमेयनृणां भवा महेश्वरि ! ॥
नरमुण्डं तथा मध्ये पञ्चमुण्डानितीरितान् ।
अथवा परमेशानि ! नराणां नरमुण्डकान् ॥
तथा शतं सहस्रं वाऽयुतं लक्षं तथैव च ।
नियुतञ्चाथवा कोटिं नृमुण्डान् परमेश्वरि ! ॥
नरमुण्डं स्थापयित्वा प्रोथयित्वा धरातले ।
वितस्तिप्रमितां देवीं तस्योपरि प्रकल्पयेत् ।
आयामप्रस्थितो देवि ! चतुर्हस्तौ समाचरेत् ॥
सहस्रं लक्षपर्य्यन्तं षोड़शीं हस्तसम्मिताम् ।
ततःपरं महादेवि ! शतहस्तमिताञ्चरेत् ॥
तस्यास्तु भूतनाथादीन् चतुर्दिक्षु समर्चयेत् ।
पूर्वोक्तभूतनाथाय नमो मन्त्रेण देशिकः ॥
पाद्यादिभिः पूजयित्वा वलिं दद्यात् प्रयत्नतः ।
एवन्तु दक्षिणे देवि ! श्मशानाधिपमादरात् ॥
तद्वच्च पश्चिमे भागे कालभैरवमुत्तमम् ।

श्मशानमुत्तरे तद्वत् पूजयित्वा वलिं ददेत् ॥
वेदीमध्ये प्रेतवीजं फट्कारं तदनन्तरम् ।
पाद्यादिभिरनेनैव कुण्डेभ्यः परिपूजयेत् ॥
नैऋत्यां क्रों चण्डिकायै वीजं विलिख्य साधकोत्तमः ।
तत्रैव पूजयेद्भक्त्या भारतीं स्वस्वविग्रहाम् ॥
वाग्वेवता ङेयुता च नमोऽन्तवाग्भवादिना ।
अनेन मनुनाभ्यर्च्य वलिं तस्यै निवेदयेत् ॥
हे वीर ! शवदेवेश । मुण्डरूप । जगत्पते ! ।
दयां कुरु महाभाग ! सिद्धिदो भव मज्जपे ॥
वेदिकोपर्य्यनेनैव पुष्पाञ्जलित्रयं क्षिपेत् ।
शवं कुर्य्याद् वह्निसंस्थं पाशमिन्दुकलान्वितम् ॥
मायावीजं कूर्चवीजं फट्कारं तदनन्तरम् ।
पाद्यादिभिरनेनैव कुण्डेभ्यः परिपूजयेत् ॥
नैऋत्यां क्रीं चण्डिकायै नमो मन्त्रेण देशिकः ।
वायव्ये क्रीं भद्रकाल्यै नमो मन्त्रेण तत्परम् ॥
ईशाने क्रीं दयायै नमो मन्त्रेण शाम्भवि ! ।
अग्नौ क्रीं चण्डोग्रायै नमो मन्त्रेण साधकः ॥
पूजयित्वा वलिं दत्त्वा उत्थाय संमुखे ततः ।
श्मशानवासिनो ये ये देवा देव्यश्च भैरवाः ॥
दयां कुर्वन्तु ते सर्वे सिद्धिदास्ते भवन्तु मे ।
अनेन प्रणवाद्येन पुष्पाञ्जलित्रयं क्षिपेत् ॥
ततः स्थानन्तु संस्पृश्य वशो भव वदेदिति ।
विष्टरासनमास्तीर्य्य उपविश्य महेश्वरि ! ॥
अष्टाधिकायुतं जपं कृत्वाच्छिद्रावधारयेत् ।
स्थानं परिस्खल्य नत्वा देवीं ध्यायन् गृहं व्रजेत् ॥
पुरश्चर्य्याविधौ देवि ! शेषं शृणुष्व शाम्भवि ! ।

कीलकं नैव कुर्य्यात्तु त्रिमुण्डोपरि कर्हिचित् ॥
शून्यागारे नदीतीरे पर्वते वा चतुष्पथे ।
विल्वमूले श्मशाने वा निर्जने चैकलिङ्गके ॥
एतेषु प्रोथयेन्मुण्डान् सर्वकामार्थसिद्धये ।
एवं वा प्रोथयित्वा च नारं मुण्डं विधानतः ॥
अनेन सर्वसिद्धीशो बहुभिः किमु सुव्रते ! ।
इत्येवं कथितं देवि ! मुण्डानां साधनं शिवे ! ।
यत् कृत्वा सर्वसिद्धानामधिपो भुवि जायते ॥

इति योगिनीतन्त्रे सर्वतन्त्रोत्तमोत्तमे देवीश्वरसंवादे चतुर्विंशतिसाहस्रे पञ्चमः पटलः ।

अथ षष्ठः पटलः ।

देव्युवाच । भगवन् ! सर्वधर्मज्ञ ! सर्वागमविशारद ! ।
गुरुस्त्वं सर्वमन्त्राणां करुणामयसागर ! ॥
सर्वधर्मज्ञता यूयं योगिहृत्पद्मभास्कराः ।
दिव्यभावो वीरभावो महत्त्वेन प्रदर्शितः ।
त्वया तत्र विशेषेण वद मे चन्द्रशेखर ! ॥
ईश्वर उवाच । दिव्यवीरविभेदेन योगद्वयं समीरितम् ।
तद्‌योगादभवत् कौलो दिव्यवीरो महेश्वरि ! ॥
तद्‌योगं हि विना देवि ! तत्कर्म यः समाचरेत् ।
समायोगी यजेद्देवि ! मुमुक्षुः कुलकामिनि ! ॥
तावच्च ते प्रवक्ष्यामि श्रुत्वा कर्णेऽवतंसय ।
आत्मानं परमं ब्रह्म चिन्तयेदथवा न चेत् ॥
आत्मदेहं स्वेष्टरूपं सदैव परिचिन्तयेत् ।

ब्रह्माण्डञ्च तथा सर्वं स्वेष्टरूपं विभावयेत्।
दिव्ययोगमिदं देवि! सावधानेन गोपय॥
वीरयोगं शृणुष्वेमं सर्वदेवनमस्कृतम्।
विन्दुत्रयं कलाक्रान्तं प्रथमं परिचिन्तयेत्॥
तत्तस्माद्भावयेज्जातं स्त्रीरूपं षोड़शाब्दिकम्।
वालार्ककोटिसंज्योतिः प्रकाशितदिगम्बरम्॥
मूर्द्धादि स्तनपर्य्यन्तमूर्द्ध्व विन्दोः समुद्भवम्।
विन्दुयावन्मध्यदेहं कण्ठादिकटिशीर्षकम्॥
स्तनद्वयेन भासन्तं त्रिवलीपरिमण्डितम्।
योन्यादिकञ्च पादान्तं कामान्तं परिचिन्तयेत्॥
नानालङ्कारभूषाढ्यं ब्रह्मेशविष्णुवन्दितम्।
एवं कामकलारूपं स्वात्मदेहं विचिन्तयेत्॥
सदैव परमेशानि! वीरयोगमिमं शृणु।
संक्षेपात् कथयिष्यामि तयोराचारमुत्तमम्॥
मद्यं मांसं तथा मत्स्यं मुद्रा मैथुनमेव च।
इदमाचरणं देवि! पशोर्न दिव्यवीरयोः॥
स देवाचारवान् भूयात् दिव्यो वीरो महेश्वरि!।
यदि दैवात् महेशानि! मद्यादि च न लभ्यते॥
कस्मिन्नहनि देवेशि! तदात्मानं समाचरेत्।
तथापि न हि वक्तव्यमिदमाचमनं शिवे!॥
महामद्यं विना कौलः क्षणादूर्द्ध्वं न तिष्ठति।
तस्मात् मद्यादिकं देवि! सेवितव्यं दिने दिने॥
अनुष्ठानविधिं वक्ष्ये शृणु त्वं पर्वतात्मजे!।
गुरुणा दीक्षितो भूत्वा कौलन्यासं समाचरेत्॥
तद्विधिश्चोत्तरे तन्त्रे एतत् स्यात्तु कुलार्णवे।
मयोक्तं तत्क्रमेणैव अभिषेकद्वयं चरेत्॥

नाम लब्ध्वा गुरोश्चापि वृणुयाद् योगमुत्तमम् ।
दिव्यं वा वीरयोगं वा यथा कर्मानुसारतः ॥
तत्क्षणात् प्रियतामेत्य मुक्तो भवति कालतः ।
यस्तु दिव्यो भवेत् सत्यं स विष्णुर्नात्र संशयः ॥
यो रुद्रो भविता शेषे वीर एव न संशयः ।
यत्र देशे नरस्तिष्ठेद् दिव्यो वा वीरपुङ्गवः ॥
तत्तत्कुलं वा देवेशि ! स देशः क्षितिराट् स्वयम् ।
सिद्धिक्षेत्रं समुद्दिष्टं समन्ताद्दशयोजनम् ॥
तत्रैव सर्वतीर्थानि तत्र गङ्गा सरिद्वरा ।
योगिनीदुर्लभाप्येतड्डाकिनीभिः सरीसृपैः ॥
ब्रह्मराक्षसवेतालैः कुष्माण्डैर्भैरवैः शिवैः ।
गुह्यकैर्दानवैर्वापि मारीभिर्यक्षकिन्नरैः ॥
रोगैर्दुष्टमृगैश्चैव दुर्भिक्षैः सर्पसंकुलैः ।
अवश्यं मङ्गलं तत्र तत्पुरीपरिवर्द्धनम् ॥
सुभिक्ष्यं क्षेममारोग्यमेवं ते धर्मकोषकः ।
स्फुरन्ति सर्वशास्त्राणि सर्वस्मादपि नित्यशः ॥
ब्रह्मविष्णुशिवादीनां सुप्रियः साधकोत्तमः ।
तरवोऽपि हि जीवन्ति पशुः पक्षी स जीवति ॥
कुलधर्मे मनो यस्य स्वधर्मश्च व्यवस्थितः ।
यत्र कुत्र मृतो देवि ! दिव्यो वा वीरपुङ्गवः ॥
तत्रैव परमं ज्ञानं कर्णमूले ददाम्यहम् ।
कुलधर्ममिमं देवि ! संसेव्यं सनिरन्तरम् ॥
कुलधर्मपरा देवि ! सर्वे च त्रिदिवौकसः ।
मुनयो मानवो नागाः सिद्धगन्धर्वकिन्नराः ॥
ऋषयो वसवो दैत्या येऽपि स्युः कुलपुङ्गवाः ।
कुलधर्मप्रसादेन ते सर्वे कुलनायकाः ॥

इन्द्राद्याः खेचरारूढ़ा भवेयुश्चिरजीविनः।
ये यथा मां प्रपद्यन्ते ते तथा फलभागिनः॥
ब्राह्मणः क्षत्रियो वैश्यो ब्रह्मचारी गृही तथा।
वानप्रस्थो यतिश्चैव भवेयुस्ते कुलानुगाः॥
तेषां विधिं शृणुष्वाद्यमतत्त्वं कुलनायिके!।
गुड़ार्द्रकरसेनैव सुरा तु ब्राह्मणस्य च॥
नारिकेलोदकं कांस्ये क्षत्रियस्य वरानने!।
वैश्यस्य माक्षिकं प्रोक्तं कांस्यस्थं वरवर्णिनि!॥
मांसं मत्स्यन्तु सर्वेषां लवणार्द्रकमीरितम्।
भर्ज्जधान्यादिकं यद्यच्चर्वणीयं प्रचक्षते॥
सा मुद्रा कथिता देवि! सर्वेषां नगनन्दिनि!।
ब्राह्मणी ब्राह्मणस्यैव क्षत्रिया क्षत्रियस्य च॥
वैश्या वैश्यस्य देवेशि! मैथुने यद्विधिः स्मृतः।
वैश्या वा ब्राह्मणी क्षत्रा त्रिवर्णानां महेश्वरि!॥
क्षत्रिया ब्राह्मणस्यापि कथिता वरवर्णिनि।
शूद्रा वा ब्राह्मणादीनां त्रिवर्णानामभावतः॥
ब्रह्मक्षत्रविशाञ्चैव आश्रमिणामिदं स्मृतम्।
त्रिवर्णविहितानाञ्च यतीनां शृणु सम्प्रति॥
सहस्रारोपरि विन्दौ कुण्डल्या मेलनं शिवे!।
मैथुनं परमं द्रव्यं यतीनां परिकीर्त्तितम्॥
अवधूताश्रमी यो हि तस्य वक्ष्ये विधिं शृणु।
पौष्टिकादीनि सर्वाणि मद्यानि तस्य शाम्भवि!॥
मत्स्यं मांसं तस्य देवि! जलभूचरखेचरम्।
पूर्वोक्ता च भवेन्मुद्रा देवता सादरान्विता॥
मातृयोनिं परित्यज्य मैथुनं सर्वयोनिषु।
क्षतयोनिस्ताड़ितव्या अक्षतां नैव ताड़येत्॥

अक्षतातांड़नाद्देवि ! सिद्धिहानिः प्रजायते ।
द्वादशाब्दाधिका योनिर्यावत् षष्टिः प्रजायते ॥
तावत्तु मैथुनं तस्या यावत्तु स्यात् स्वयम्भवा ।
अवधूतसमाचाराः शूद्रे सर्वाः प्रकीर्त्तिताः ॥
विशेषं मैथुने तस्य कथयामि शृणुष्व मे ।
ब्राह्मणीं क्षत्रियां वैश्यां त्यक्त्वा तु सर्वजातिषु ॥
मैथुनं प्रचरेद्धीमान् देवताभावचेष्टितम् ।
गृहमेधी भवेच्छूद्रो नान्याश्रमी भवेत् कदा ॥
शूद्रवदन्यजातीनामाचारोऽयं प्रकीर्त्तितः ।
गुरुवद्दे त्रिवर्णे तु तथा मातामहे कुले ॥
मैथुनं सुसमुद्दिष्ट मवधूताश्रमेऽपि च ।
काली तारा छिन्नमस्ता सुन्दरी भैरवी तथा ॥
मातङ्गी च तथा विद्या धूमावती तथा ।
एतासां साधकाचार श्चावधूतसमः स्मृतः ॥
सर्वाश्रमे सर्ववर्णे सर्वयोगे तथा शिवे ! ।
सर्वस्थानेषु सर्वत्र न विशेषं क्वचिद्भवेत् ॥
आनन्दं ब्रह्मणो रूपं तच्च देहे व्यवस्थितम् ।
एवं विप्रो देवतायै स्वगात्ररुधिरं ददेत् ॥
शक्तिनाशविकारोऽस्ति स्वदेहरुधिरार्पणे ॥
तस्याभिव्यञ्जनं द्रव्यं दीयते कालयोगिभिः ।
शुद्धादि सकलं देवि ! व्यञ्जकस्यापरार्द्धकम् ॥
केवलेनाद्ययोगेन साध्यः काल्याद्युपासकः ।
भैरवाय द्वियोगेन शिवत्वञ्च तृतीयकम् ॥
चतुर्थे सर्वसिद्धीश-श्चित्र-मेतन्नगात्मजे ! ।
परेण परतां याति मम तुल्यो न संशयः ॥
सेविते कुलतत्त्वे तु कुलतत्त्वसुदर्शिनः ।

ज्ञायन्ते न भैरवास्ते वेशास्तत्समदर्शिनः ॥
तमःपरिवृतं वेश्म यथा दीपेन दृश्यते ।
तथा मायावृते वृत्ते ज्ञानदीपेन दृश्यते ॥
निरस्तभेदवस्तु स्यान्मेध्यामेध्यादिवस्तुषु ।
जीवन्मुक्तो देहभावो देहान्ते चेममाप्नुयात् ॥
पीत्वा कुलरसं वीरो ब्रह्मध्यानमुपाश्रयेत् ।
ब्रह्मध्यानं महेशानि ! ब्रह्मनिर्वाणकारणम् ॥
तच्छृणुष्व महेशानि ! सारात्सारं परात्परम् ।
स्वकीयजीवदेहादि ब्रह्माण्डोऽनन्त एव च ॥
एवं हि सकलं देवि ! देहे महार्णवादि यत् ।
न चिन्तनीयं तत् सर्वं नास्तीति परिभावयेत् ॥
मातृस्वीयकं महातेजश्चैतन्यव्यापकं यथा ।
अहमेव जालरूपश्चाधारदेहवर्जितः ॥
आत्मानमपि देवेशि ! तदभेदेन चिन्तयेत् ।
ब्रह्मध्यानमिदं प्रोक्तमेतत् स्थिरतराय च ॥
सेवन्ते योगिनो द्रव्यं नान्यथा तु कदाचन ।
क्षणं ब्रह्माहमस्मीति यः कुर्य्यादात्मचिन्तनम् ॥
तत्र दद्यात् फलं देवो तस्यान्ते नैव गम्यते ।
मया वा ब्रह्मणा वापि विष्णुनपि कथञ्चन ॥
अतएव महेशानि ! नित्यकर्म न लोपयेत् ।
द्रव्याभावे महेशानि ! जलेनापि समाचरेत् ॥
अथवा मनसा नित्यं कुलयोगं समाचरेत् ।
वक्ष्येऽयुतविधिं भद्रे ! शृणुष्व कमलानने ! ॥
कुण्डल्या मिलनादिन्दोः स्रवते यत् परामृतम् ।
पिवेद्योगी महेशानि ! सत्यं सत्यं शिवः स्वयम् ॥
कुलयोगं महापानमिदमेव स्मृतं ध्रुवम् ।

पापपुण्यं पशुं हत्वा ज्ञानखड्गेन शाम्भवि ! ॥
परमात्मनि नयेच्चित्तं पलानीति निगद्यते।
मनसा सेन्द्रियं सर्वं संयम्यात्मनि योजयेत् ॥
मत्स्याशी स भवेद्‌योगी मुक्तबन्ध स्तव प्रिये ! ।
अशेषब्रह्माण्डभाण्डं परब्रह्मणि संनयेत् ॥
परशक्त्यात्मसंयोगो न वीर्य्यं मैथुनं मतम् ।
एवं ते कथितं देवि ! सारात्सारं परात्परम् ॥
गोपनीयं गोपनीयं मम सर्वस्वसाधनम् ॥

इति श्रीयोगिनीतन्त्रे महातन्त्रराजे देवीश्वरसंवादे
चतुर्विंशतिसाहस्र्ये षष्ठः पटलः ।

अथ सप्तमः पटलः ।

श्रीदेव्युवाच । नमस्तुभ्यं महादेव ! संसारार्णवतारक ! ।
जायाशेष ! जगन्नाथ ! भक्तवत्सल ! ईश्वर ! ॥
परमानन्दसन्दोह ! कारणानाञ्च कारण ! ।
दिव्यवीरप्रभेदेन श्रुतं योगद्वयं मया ॥
इदानीं श्रोतुमिच्छामि विद्यां स्वप्नावतीं शुभाम् ।
मृतसञ्जीवनीं विद्यां तथा मधुमतीमपि ।
आसफलं साधनञ्च वद मे परमेश्वर ! ॥

श्रीईश्वर उवाच ।

शृणु देवि ! प्रवक्ष्यामि यन्मां त्वं परिपृच्छसि ।

ओं क्रीं स्वपुरावाहि कालि स्वप्ने कथयामुकस्यामुकं देहि क्रीं स्वाहा ।

प्रणवं पूर्वमुद्धृत्य मायावीजं तदन्तरम् ।

तदन्ते स्वपुरावाहि कालि सम्बोधनद्वयम् ॥
स्वप्ने कथय तत्पश्चादमुकस्यामुकं ततः ।
देहिपदात् कालीवीजमन्ते वह्निवधूस्तथा ॥
इयं स्वप्नावतीविद्या त्रैलोक्ये चातिदुर्लभा ।
महाचमत्कारकरी महाकालेन भाषिता ॥
अष्टोत्तरशतं नित्यं जपेद्वर्षचतुष्टयम् ।
ततः सिद्धा भवेद्विद्या स्वप्ने तिष्ठति नित्यशः ॥
स्वप्ने दर्शयते सर्वं यद्यन्मनसि कल्पते ।
मृतसञ्जीवनीं विद्यामतः शृणु नगात्मजे ! ॥
अमृतं वीजमाभाष्य मृतसञ्जीवनीति च ।
स्वसन्धातं ततः पश्चान्मृतमुत्थापय द्वयम् ॥
वृहद्भानुबधूमन्ते त्रैलोक्ये चापि विश्रुता ।
सप्तमेयं महाविद्या सारात्सारतरं स्मृतम् ॥
नित्यमष्टोत्तरशतं जपमात्रेण शाम्भवि ! ।
सिद्धिदा सा भवेद्विद्या मृतसञ्जीवनी ततः ॥
कालालयं गतो यो वा चिताधूमागतोऽपि वा ।
मन्त्रं जपन् स्पृशेच्छवं तदा देवि ! वरानने ! ॥
चिरजीवी भवेत् सत्यं नात्र कार्य्या विचारणा ।
वक्ष्ये मधुमतीं विद्यां सर्वरञ्जनकारिणीम् ॥
ओमधुमति इत्युक्त्वा स्थावरजङ्गमाकर्षिणीति च ।
ठ ठ स्वाहा महाविद्या वसुचन्द्राक्षरी परा ।
त्रैलोक्याकर्षिणी विद्या प्रोक्तेयं देवदुर्लभा ॥
एकवर्षं जपेन्नित्यं शतमष्टोत्तरं नरः ।
ततः सिद्धा महाविद्या सर्वज्ञानप्रकाशिनी ॥
आकर्षयेत् सुमेरुञ्च दिशः सागरमेव च ।
नदीं रत्नानि च पुरीं स्त्रियः शैलान् वनस्पतीन् ॥

अलभ्यानि च द्रव्याणि पातालादिस्थितान्यपि ।
पुरस्थानञ्च वृत्तान्तं राज्ञाञ्च विद्विषामपि ॥
नक्तं तल्पशतजपात् सिद्धिं प्राप्नोति साधकः ॥
श्रीदेव्युवाच । देवदेव ! जगद्धाम ! प्रसीद सुमुख ! प्रभो ! ।
यत् पृष्टं यच्छ्रुतं नाथ ! श्रोतुमिच्छामि सम्प्रति ।
पद्मावतीमहाविद्यां सर्वविद्याविनोदिनीम् ॥
श्रीईश्वर उवाच ।
कथयामि वरारोहे ! विद्यां पद्मावतीं शुभाम् ।
प्रणवं पूर्वमुद्धृत्य मायाबीजं तदन्तरम् ॥
पद्मावतीपदं देवि ! सम्बुद्ध्यन्तं समुद्धरेत् ।
त्रैलोक्यवार्त्तामन्ते च कथय द्वन्द्वमुच्चरेत् ॥
स्वाहान्तेयं महाविद्या कथिता कल्पवल्लरी ।
अष्टोत्तरशतं नित्यं जपेद्वर्षद्वयं प्रिये ! ॥
ततः सिद्धा महाविद्या सर्वं वदति साधके ।
तल्पे स्थित्वा नक्तयोगे जपेत् मन्त्रं शताष्टकम् ॥
जगद्धितस्य वृत्तान्तं तज्जानाति दिने दिने ।
ब्रह्मविष्ण्वादिकानाञ्च त्रैलोक्यस्यापि शङ्करि ! ।
वृत्तान्तं कथयेत् स्वप्ने विद्या पद्मावती शुभा ॥
श्रीदेव्युवाच । श्रुतञ्च साधनं पुण्यं महाकालेन भाषितम् ।
इदानीं श्रोतुमिच्छामि वशीकरणमुत्तमम् ॥
अल्पसाध्यं महादेव ! द्रुतसिद्धिकरं महत् ॥
श्रीईश्वर उवाच ।
तवानुरोधाद्देवेशि ! कथयामि शृणुष्व तत् ।
पुरा ते कथितं देवि ! योगिनां ज्ञानसम्भवम् ! ॥
संक्षेपादधुना देवि ! विस्तरात् कथयामि ते ।
गोपितव्यं प्रयत्नेन सर्वदा पशुसङ्कुले ॥

कुजवारे नक्षयोगे अमायाञ्च तिथौ नरः ।
शत्रुनाम लिखित्वा तु वामपादतले न्यसेत् ॥
तत्पादोपरि देवेशि ! वाग्भवं प्रजपेत् सुधीः ।
अष्टोत्तरशतं देवि ! तदा वादी वशो भवेत् ॥
अतिमूको भवेच्छत्रुर्विवादे व्यवहारके ।
तार्क्ष्यं दृष्ट्वा यथा सर्पो जड़ो भवति कामिनि ! ॥
तथैव तत् समालोक्य जड़ो वादी न संशयः ।
तथान्यत् संप्रवक्ष्यामि वशीकरणमुत्तमम् ॥
येन योगप्रभावेण भुवनं वशमानयेत् ।
प्रणवं पूर्वमुद्धृत्य सुन्दरी भैरवी तथा ॥
योगिनीपदतो देवि ! राजा प्रजा महारथी ।
वशङ्करि तथा प्रोच्य अं इं उं ऋं तथा वदेत् ॥
षड्विंशत्यक्षरो मन्त्रः कथितः कल्पपादपः ।
अनेन मनुना देवि ! तैलञ्च चन्दनञ्च वा ॥
शताष्टजप्तं तत्तैलं मुखे दद्यात् वरानने ! ।
तच्चन्दनेन तिलकं भाले दद्यान्नगात्मजे ! ॥
जगद्वश्यक्रियामेतां कृत्वा साधकसत्तमः ।
चेत्तु पश्यति यं देवि ! स वशो नात्र संशयः ॥
एवमेव विधानेन देवेन्द्रमपि मोहयेत् ।
किं पुनर्मानवान् देवि ! सार्वभौमान् नराधिपान् ॥
अथोच्यते महादेवि ! वशीकरणमुत्तमम् ।
सर्वेषां जगतां देवि ! मोहनं परमाद्भुतम् ॥
मन्त्रमादौ प्रवक्ष्यामि सर्वतन्त्रेषु गोपितम् ।
प्रणवं पूर्वमुद्धृत्य वदेद्राजमुखीपदम् ॥
पुनाराजमुखी प्रोच्य मायाबीजद्वयं वदेत् ।
कामबीजं ततः पश्चाद्देवी देवीद्वयं द्वयम् ॥

महादेवीपदं पश्चाद्देवि ! देवाधिदेवीच ।
सम्बोधनान्तं देवेशि ! पदमेतच्चतुष्टयम् ॥
सर्वजनस्याभिमुखं मम वशं कुरु कुर्विति ।
स्वाहान्तोऽयं महामन्त्रः सर्ववश्यप्रदो महान् ॥
इति मन्त्रेण शय्यास्थः प्रातःकाले महेश्वरि ! ।
त्रिवारं दक्षहस्तेन मुखं संमार्जयेत् क्रतो ॥
एवन्तु प्रत्यहं कुर्य्याज्जगद्वश्याय कामिनि ! ।
अवश्यं जायते वश्यं जगदेतच्चराचरम् ॥
श्रीदेव्युवाच । श्रुतमेतत् महादेव ! त्वत्प्रसादात् पुरातनम् ।
स्वप्नावती च या विद्या कथितावगता मया ॥
इदानीं श्रोतुमिच्छामि विशेषं तत्र यद्भवेत् ।
तद्वदस्व महादेव ! यदि तेऽनुग्रहो मयि ॥

श्रीईश्वर उवाच ।

कथयामि शृणु प्राज्ञि ! विद्यां स्वप्नावतीं पराम् ।
प्रणवं पूर्वमुद्धृत्य बधूवीजं समुद्धरेत् ॥
मायावीजं ततः स्वाहा मन्त्रमेतत् नगात्मजे ! ।
दिवा भुक्त्वा हविष्यान्नं रात्रौ जप्त्वा सहस्रकम् ॥
ततः शुद्धायां शय्यायां तदा स्वप्ने हि पश्यति ।
मनसा चिन्तितं यद्यत् तत् सर्वं परमेश्वरि ! ॥
अथापरं प्रवक्ष्यामि स्वप्नप्रबोधमुत्तमम् ।
येन विज्ञानमात्रेण सर्वं जानाति निश्चितम् ॥
प्रणवं प्राक् समुच्चार्य्य हिलि क्रूं शूलपाणये ।
स्वाहान्तोऽयं महामन्त्रः प्रोक्तस्ते कमलेक्षणे ! ।
विधानं पूर्ववत् सर्वं जपान्ते प्रार्थनं शृणु ॥
ओं नमो जगत्त्रिनेत्राय पिङ्गलाय महात्मने ।
वामदेवस्वरूपाय स्वप्नाधिपतये नमः ॥

स्वप्ने कथय मे तत्त्वं सर्वं कार्य्यं शुभाशुभम्।
इति मन्त्रेण संप्रार्थ्य सर्वं जानाति भावतः॥
एतत्ते कथितं देवि! स्वप्नबोधमनुत्तमम्।
रहस्यं परमं रम्यं वशीकरणमुत्तमम्॥
सर्वमेतत् महादेवि! सर्वज्ञानप्रदायकम्।
निरन्तरं महादेवि! सेवितः सिद्धशङ्करैः॥
मधुमत्याः प्रसादेन सर्वोक्तां सर्वयोनिषु।
याचन्तं परमेशानि! तस्मात्त्वां समुपाश्रयेत्॥
स्वप्नावत्यादिविद्याया यो जपः कथितः प्रिये!।
वर्षसंख्याक्रमेणैव सिद्धिकामाश्च शाम्भवि!॥
त्वां जपन्तु ततो देवि! फलसिद्धिः समीरिता।
सिद्धविद्याप्रभावेण स्युः सुसिद्धाः सुरासुराः॥
इति ते कथितं सम्यग्रहस्यं परमाद्भुतम्।
गोपनीयं खले दुष्टे पशुपामरसन्निधौ॥
अन्यथा कुरुते यस्तु स भक्ष्यो डाकिणीगणैः।
तस्मात् सर्वप्रयत्नेन गोपनीयं विशेषतः॥
दद्याच्छान्ताय दान्ताय सत्कुलीनाय योगिने।
भक्ताय पापहीनाय साधकाय महात्मने॥

इति योगिनीतन्त्रे महातन्त्रराजे देवीश्वरसंवादे
चतुर्विंशतिसाहस्रे सप्तमः पटलः।

अथ अष्टमः पटलः।

श्रीदेव्युवाच। श्रुतं हि साधनं सर्वं त्वन्मुखाम्भोजनिर्गतम्।
देवदानवगन्धर्वसिद्धचारणसेवितम्॥
परमानन्दसन्दोहं सानन्दादिविभूतिदम्।

परं पारं परं पुण्यं पवित्रं परमं महत् ॥
योगिन्युत्पत्तिकथनं त्रैलोक्यस्यापि दुर्लभम् ।
कथयस्व महादेव ! केवलानन्दहृंहितम् ॥

ईश्वर उवाच ।

पूर्वं यदावयोर्वृत्तं सर्वं तद्विस्मृतम् शिवे ! ।
अत्यन्तगुह्यं परमं देवासुरभयङ्करम् ॥
प्राचीनमतिगोप्यं हि सारात्सारं परात्परम् ।
शृणु वक्ष्यामि चार्वङ्गि ! समासेन शिवप्रिये ! ॥
गोपनीयं त्वया भद्रे ! योनिः परनरे यथा ।
ब्रह्माण्डस्यायुषः शेषे सर्वसत्त्वविवर्जितम् ॥
भूम्यादिपञ्चतत्त्वे तु केवले संस्थिता शिवे ! ।
त्वां मां विना महेशानि ! नासीत् किञ्चिज्जगत्त्रये ॥
एतस्मिन्नन्तरे त्वां वै पप्रच्छाहं प्रहासतः ।
ममाधिका योग्यता वा तवापि वा महेश्वरि ! ॥
इदानीं परमेशानि ! नभोब्रह्माण्डमण्डले ।
स्थातुं स्थानं न कुत्रास्ति कुत्र स्थास्यामि भाविनि ! ॥
यद्यन्मया कृतं सर्वं तत् सर्वं गतमेव हि ।
विविक्तोऽहं सदा दिव्ये भवसंसारकर्मणि ॥
स्थातुं स्थानमिदानीं त्वं कल्पयस्व महेश्वरि ! ।
इति श्रुत्वा तदा देवी क्रोधेनारुणलोचना ॥
उवाच मां सुनिष्ठुरं दुराचारादिदारुणा ।
यद्यत् कृतं त्वया देव ! मामुपाश्रित्य सर्वदा ॥
मां विना ते महादेव ! शवत्वमिति निश्चितम् ।
योगे हिते महेशानि ! मया सर्वमिदं ततम् ॥
कल्पितं वत्सरूपेण योग्यता का तवास्ति ते ।
कारणावस्थयापन्ना सदाहं धातुरूपिणी ॥

न कार्य्यं नैव यत् किञ्चित् वह्नौ वाहं चरं परम्।
कार्य्यभावसमापन्ना सदा प्रकृतिरूपिणी॥
तदा ब्रह्मादयः सर्वे सर्वेऽप्याविर्भवन्ति हि।
मम मायामयमिदं विश्वं देवचराचरम्॥
विक्षेपावरणे मासारम्भो मे परमेश्वर!।
इति श्रुत्वा वचस्तेऽहं वज्रतुल्यं सुदारुणम्॥
नोवाच किञ्चित्तां देवीं स्थिरत्वमभवत्तदा।
वारितोऽहं सदा देवि! दुःखेनान्तरजेन च॥
ततः स्थिरीकृत्य हृदि उपायं तव निग्रहे।
जगाम पश्चिमे भागे ब्रह्माण्डस्य वरानने!॥
गत्वा तत्र महादेवि! निर्जने दारुणं पुरः।
स्वदेहभस्मना दैत्यं प्रागदृष्टं श्रुतं तथा॥
दानवेन्द्रं महाघोरं घोरनामानमद्भुतम्।
कोटियोजनविस्तीर्णं द्वात्रिंशल्लक्षप्रस्थितम्॥
कोटिहस्तं महारौद्रं कोटिलोचनमुज्ज्वलम्।
पञ्चाशल्लक्षवदनं ज्वालावलिसमाकुलम्॥
तस्मै दत्त्वा महासिद्धीरणिमाद्या महेश्वरि!।
सर्वभावैर्मत्सदृशं विधाय तं सुदारुणम्॥
उल्लासमनसा देवि! आगतोऽहं तवान्तिकम्।
सोऽपि तस्थौ दानवेन्द्रः शय्यां कृत्वा जलार्णवे॥
गेण्डुके द्वे विधायैव सुवेलवेलपर्वतौ।
तदा मम मनो ज्ञात्वा त्वमवादीश्च मां प्रति॥
इदानीं ब्रह्माण्डभाण्डं जीवहीनं प्रजायते।
आज्ञापय महादेव! पश्यामि सकलं शिव!॥
तदा विहस्य मनसा तवोत्कण्ठाञ्च वर्द्धयन्।
उवाच त्वामहं भद्रे! आगच्छ पश्चिमां दिशम्॥

सर्वत्रान्यत्र देवेशि ! दृष्ट्वा पश्चाद् द्रुतं मयि ।
स्त्रीणां स्वभावो देवेशि ! य एवाधः स्थितो भवेत् ॥
तत्रैव महती श्रद्धा दृष्ट्वा ज्ञातुं सदा भवेत् ।
इति ज्ञात्वा मयोक्तं तन्निषेधवचनं शिवे ! ॥
ततः प्रयोजनाभावात् तव स्वभावतः शिवे ! ।
न गतान्यत्र देवेशि ! मम च प्रत्यगन्तिके ॥
महद्ग्रामे च कान्तारे तत्र केदारकेश्वरः ।
तत्र गत्वा महादेवी जगन्मोहनकारिणी ॥
विव्याध दैत्यराजेन्द्रं कामवाणान् सहस्रशः ।
अत उत्थाय दैत्येन्द्रः कामवाणेन विह्वलः ॥
करान् प्रसार्य्य सकलान् आह चाटुवचो भृशम् ॥
घोर उवाच । क्रोड़े मे त्वं समागच्छ भव सर्वेश्वरी मुदा ।
त्राहि मां कामजलधौ निमग्नं स्वाङ्गदानतः ॥
कञ्चित् कालं न जीवामि त्वां विनाहं कथञ्चन ।
आलिङ्ग्य पतिभावेन जीवनं रक्ष सुन्दरि ! ॥
इत्यादि चाटुवाक्यैस्त्वां मुहुर्मुहु र्जगाद च ।
ततः सा त्वमवादीश्च सकटाक्षं शुचिस्मितम् ॥

श्रीदेव्युवाच ।

त्वं सर्वदैत्येन्द्रः सर्वभोक्ता त्वं वै बली देवनिकाय एव ।
त्वं वीर्य्यवान् सर्वविनाशनश्च त्वां वै वरामो यदि तत् करोषि ॥
मदीयवृत्तान्तमिह शृणुष्व नावस्थितिः क्वापि भवेन्न यस्मात् ।
पुरा प्रतिज्ञा हि मया कृता या तां पालय त्वं यदि मां ग्रहीतुम् ॥
मनस्तु चैवं खलु दैत्यराज ! यो मां विनिर्जित्य रणे स्थितः स्यात् ।
स मे हि भर्त्ता न चान्य एव तदादितो युद्धमितः श्रयस्व ॥

ईश्वर उवाच ।

एवं ब्रुवाणां त्वां देवि ! क्रोधेन महता वत ।

उच्चैर्निर्भर्त्सयामास प्रलयाम्भोधिघर्घरम् ॥
ततः समुत्थितो घोरः कालरुद्रश्च न्यकृतः ।
समाहर्त्तुं तदा दैत्यो धावतिस्माखिलं जगत् ॥
तथापि त्वां गृहीतुं स क्षमो नाभूत् कथञ्चन ।
तदा क्रोधेन महता जघ्ना च दानवेश्वरः ॥
हस्तामर्षवशात्ते च पर्वताः सूक्ष्मतां गताः ।
पादाघातादुपरता मग्नाश्चैव जलार्णवे ॥
तद्वहभ्रमवातेन प्रोच्छलज्जलमण्डलम् ।
ऊर्द्धाधश्च कटाहान्तं महाभीमतरङ्गकम् ॥
ब्रह्माण्डं परिसंव्याप्य भ्रमते स निरन्तरम् ।
धर्त्तुं कामो महामायां तां धर्त्तुं न क्षमोऽभवत् ॥
अग्रेऽपि त्वां पश्यतिस्म केवलं देवपुङ्गवः ।
यद्यद्युद्धं कृतं तेन कथितुं नैव शक्यते ॥
यद्यत् क्षिप्तं त्वयि शिवे ! तत् सर्वं भस्मसाद्गतम् ।
यत्तेजसा महेशानि ! तत्रापि क्रोधमूर्च्छितः ॥
अभून्निरन्तरं दैत्यो घोरो घोरपराक्रमः ।
आश्चर्य्यं शृणु देवेशि ! युद्धवृत्तं महोज्ज्वलम् ॥
जलजातात् कटाहात्तु बुद्धिरुत्पद्यते भृशम् ।
एवमेकाहतो युद्धं कोटिवर्षमभूत् तदा ॥
दिव्यं तत्र महेशानि ! युद्धकाले भयातुरः ।
अहं योगं समाश्रित्य सूक्ष्मसूक्ष्मतरं वपुः ॥
विधाय परमेशानि ! त्वामाश्रित्य स्थितः सदा ।
कथञ्चिदपि न प्राप्य त्वां धर्त्तुं दैत्यराट् तदा ॥
चिन्तयामास च खलु त्वां हन्तुं विविधक्रमम् ।
वर्द्धयित्वा शरीरं स्वं घर्षयित्वा च बाहुना ॥
कटाहे मारयिष्यामि महादुष्टां च त्वामहम् ।

इति सञ्चिन्त्य मनसा वर्द्धयित्वा कलेवरम् ॥
पूरितं तेन ब्रह्माण्डं घोरो हर्षमुपागमत् ।
उवाच त्वां तदा दैत्यः हता यास्यसि कुत्र वा ॥
भवती भग्नमालोक्य दैत्यं ब्रह्माण्डपूरितम् ।
त्वयोक्तोऽसौ घोरदैत्यस्तिष्ठ तिष्ठ सुदुर्मते ! ॥
कथं व्यस्तो भवान् जातो निहन्मि त्वामहं मुदा ।
अधुनैव महादुष्ट ! जानासि न हि मां कदा ॥
मत्तः सृष्टिः समुत्पन्ना मय्येव प्रविलीयते ।
मयैव पाल्यते सर्वं मम मायामयं जगत् ॥
मत्तो नान्यत् किञ्चिदस्ति ब्रह्मैवाहं सनातनः ।
शृणु मूढ़वरास्माकं परमं मङ्गलं महत् ॥
दुष्टभावेन वा दैत्य ! शिष्टभावेन वा पुनः ।
भजन्ते मां यथा यो हि तथा कामं ददामि ते ॥
निदानन्तु प्रयच्छामि महाफल मनुत्तमम् ।
त्वयाहं सेविता दैत्य ! बहुकालं न संशयः ॥
ममास्ति मेकचित्तेन ममेहा त्वकरोद्‌यतः ।
शिवोऽसि नात्र सन्देहो मत्कृते यद्‌भ्रमस्तव ॥
इदानीं पश्य मद्रूपं ब्रह्मानन्दं परं पदम् ।
यद्‌दृष्टवान् पुनः कोऽपि कदाप्याविर्भवेत् किल ॥
ध्यात्वा यत् परमं रूपं शिवं न्यूनमिति प्रभो ! ।
तद्रूपं परमं धाम कालीरूपमिति शृणु ॥
इतःपरतरं रूपं ब्रह्मणो नास्ति कुत्रचित् ।
इत्युक्ताहं तदा देवि ! भवानी भवमोचनी ॥
ध्यात्वा यत् परमं रूपम् अहं कालीति वादिनी ।
असकृत् परमेशानि ! जाता त्वं कालिका तदा ॥
कृष्णवर्णा महाघोरा महाकालोपरिस्थिता ।

मुण्डमालावलीरम्या मुक्तकेशी स्मितानना ॥
लोलजिह्वा रक्तघोरलोचनत्रयराजिता ।
अमाकलासमुल्लासा किरीटोज्ज्वलविग्रहा ॥
शिवाकोटिसहस्रैस्तु तेजोमण्डलसम्भवैः ।
महारावैश्चतुर्दिक्षु याता घोरपराक्रमैः ॥
रश्मिवृन्दसमुद्भूता योगिन्यः कोटिकोटिशः ।
समन्ताद् घोररूपस्था महायुद्धमहोत्सुकाः ॥
प्रतिलोमकूपमध्ये ब्रह्माण्डं कोटिकोटिशः ।
भासन्ते सततं देवि ! सर्वाः सूर्य्यमयाः पुनः ॥
एवं तां कालिकां दृष्ट्वा मूर्च्छितो दानवेश्वरः ।
प्रतीतोऽसौ महाकाल्या दृष्ट्वा श्रीमुखमण्डलम् ॥
तत्क्षणाद्दानवाधीशो ब्रह्मज्ञानमवाप्तवान् ।
ततस्तं दानवाधीशं ज्ञाने भक्तं सुनिर्मलम् ॥
जिह्वया लोलया काली कर्त्तयित्वे रणान्तरे ।
ब्रह्माण्डसहितं माता चर्वयित्वा स्मृता क्षणात् ॥
चकार लीलया काली घोरवाद्यमहोत्सुका ।
नानायन्त्रस्य वृहतः पताका व्यापिका सदा ॥

इति योगिनीतन्त्रे देवीश्वरसंवादे चतुर्विंशति-
साहस्र्ये अष्टमः पटलः ।

अथ नवमः पटलः ।

ईश्वर उवाच ।

तद्दृष्ट्वा तु महाश्चर्य्यं भयविह्वलमानसः ।
अहं जगाम सहसा तत्र कान्तारमुत्तमम् ॥
सुषुम्नावर्त्मना देवि ! तत्र गत्वा मया किल ।

संदृष्टञ्च श्रुतं यद्यत् कथितुं नैव शक्यते ॥
सर्वाश्चर्य्यमयं देवि ! न दृष्टं न श्रुतं क्वचित् ।
अतीव वृहदाकाराः ब्रह्माण्डाः कोटिकोटिशः ॥
चरन्ति सर्वदा देवि ! कः संख्यातुं क्षमो भवेत् ।
कोटिकोटिमुखा देवि ! कोटिकोटिभुजा स्तथा ।
एवञ्च विविधाकारा ब्रह्मविष्णुशिवादयः ॥
महदैश्वर्य्यसम्पन्नाः प्रतिब्रह्माण्डवासिनः ।
सर्वाश्चर्य्यमयं देवि ! दृष्ट्वा कुशलमानसः ॥
सर्वं मे विस्मृतं जातं कोऽहं चिन्तापरायणः ।
अहं कः कुत्र आयातः को न पृच्छति कुत्रचित् ॥
एवं नानाविधं देवि ! भुवने विस्मृतः सदा ।
नानास्थानसम्भ्रमञ्च स्मर्थ्यञ्च नास्ति मे कदा ॥
ततश्च कोटिवर्षान्ते प्राप्तं ते हृदयाम्बुजम् ।
तत्र गत्वा मया सर्वं दृष्टमाश्चर्य्यसुन्दरम् ॥
तत् सर्वं परमेशानि ! कथितुं नैव शक्यते ।
यद्धर्मार्थोदयं शास्त्रं कारणं सुखमोक्षयोः ॥
परमात्मागमो वेदा जीवो दर्शनमिन्द्रियः ।
देहः पुराणमङ्गानि स्मृतयो यानि यानि च ॥
तत्रैव शर्वशास्त्राणि लोमादीनि वरानने ! ।
जीवात्मनो यथा भेद स्तथा वेदागमेष्वपि ॥
पत्राग्रे पत्रमध्ये च पत्रान्ते हृदयाम्बुजे ।
दृष्टा वर्णावली यातु तीव्रतेजोमयी शुभा ॥
शिक्षा कल्पो व्याकरणं निरुक्तम्छन्द एव वा ।
अन्यानि सर्वशास्त्राणि क्षुद्राणि यानि कानि च ॥
किन्तु पूर्णवलालोके जातोऽहं कथितं तव ।
ततो मया श्रुतं देवि ! कर्णिकान्तर्महोज्ज्वलम् ॥

कोटिकोटिदिवानाथनिशानाथसमुज्ज्वलम् ।
कोटिकोटिमहावह्नितेजोमण्डलमण्डितम् ॥
तन्मध्ये तु मया दृष्टं वर्णपुञ्जं महोज्ज्वलम् ।
सूर्य्यकोटिसमाभासं चन्द्रकोटिसुशीतलम् ॥
वह्निकोटिमहोज्ज्वलं परं ब्रह्ममयं ध्रुवम् ॥
सर्वज्ञानमयं देवि ! सर्वाश्चर्य्यमयं सदा ।
सर्वयज्ञमयं देवि ! सर्वतीर्थमयं सदा ॥
सर्वपुण्यमयं देवि ! सर्वधर्ममयं तथा ।
ब्रह्मज्ञानमयं देवि ! ब्रह्मानन्दमयं तथा ॥
प्रमाणं सर्वशास्त्राणां वेदादीनां महेश्वरि ! ।
प्रमाणं सर्वसत्त्वानां ब्रह्मतेजः परं हितम् ॥
सर्वमायाबहिर्भूतं सर्वमायानिकृन्तनम् ।
सर्वानन्दमयं देवि ! ब्रह्मानन्दमयं सदा ॥
पूर्णानन्दमयं देवि ! ब्रह्मनिर्वाणमुत्तमम् ।
सर्वमायामयं देवि ! सर्वविद्यामयं पुनः ॥
सर्वतपोमयं देवि ! सर्वसिद्धिमयं तथा ।
सर्वमुक्तिमयं देवि ! सर्ववेदमयं तथा ॥
सर्वलोकमयं देवि ! सर्वभोगमयं तथा ।
सर्वशास्त्रमयं देवि ! सर्वयोगमयं तथा ॥
दृष्टागममिमं तत्र मम ज्ञानाब्धिसागरे ।
गतसर्वव्यथोऽद्राक्षं यथा सूर्य्योदयोज्ज्वलम् ॥
अभ्यस्तं हि मया सर्वं महाकालीप्रसादतः ।
दृष्टाभ्यस्तं मया सर्वं तत्क्षणान्नात्र संशयः ।
ततः किञ्जल्कपुञ्जेषु गत्वा दृष्टं मया किल ॥
वर्णपुञ्जमयं देवि ! सूर्य्यकान्तिसमप्रभम् ।
न्यायोमीमांसकं सांख्यं पातञ्जलं तथा पुनः ॥

वैशेषिकं तथा पूर्वं मया ज्ञातं हि तत्क्षणात् ।
ततो वर्णावलीं दृष्ट्वा कर्णिकाप्रान्तदेशतः ॥
शतसूर्य्यसमाभासा सर्वरञ्जनकारिणी ।
आयुर्वेदभिषग्वेदा मयाभ्यस्ता स्तदैव हि ॥
तदन्तरे महादेवि ! दृष्ट्वा वर्णावलीं शुभाम् ।
सहस्रादित्यसङ्काशा शूद्रवर्णा महोज्ज्वला ॥
स्मृतीतिहासौ देवेशि ! पुराणानि मया पुनः ।
मयाभ्यस्तं हि तत् सर्वं तत्क्षणान्नात्र संशयः ॥
तथापि भ्रमदेहो मे न शुध्यति कदाचन ।
तदन्तरे मया दृष्टं सूर्य्यकोटिसमप्रभम् ॥
ब्रह्मज्ञानं मया देवि ! ब्रह्मतेजःपरीवृतम् ।
वेदान्तमिति विख्यातं वर्णपुञ्जमहाप्रभम् ॥
मयाभ्यस्तं तत्क्षणात्तन्महदेभ्यश्च मोहतः ।
तदन्तरे मया दृष्टं वर्णपुञ्जसमुज्ज्वलम् ॥
कोटिसूर्य्यप्रतीकाशं चन्द्रकोटिसुशीतलम् ।
सर्वज्ञानमयं देवि ! सर्वतीर्थमयं सदा ॥
सर्वयज्ञमयं देवि ! सर्वधर्ममयं तथा ।
प्रमाणं सर्वसत्त्वानां शास्त्रादीनां महेश्वरि ! ॥
वेदचतुष्टयं सामाथर्वऋग्यजुरुत्तमम् ।
मयाभ्यस्तं हि तत् सर्वं तत्क्षणान्नात्र संशयः ॥
तथापि न च तृप्तिर्मे जायते न च तत्क्षणात् ।
सर्वज्ञानसर्वतत्त्वसर्वसिद्धिमयोद्यहम् ॥
तदा नमस्कृतां देवि ! ते त्वां कालीं सनातनीम् ।
शिवाभिर्योगिनीभिश्च नृत्यन्तीं ब्रह्मरूपिणीम् ॥
स्थित्वा स्थित्वा संमुखे मे दृष्ट्वा श्रीमुखमण्डलम् ।
तत उड्डीनमासाद्य द्विदले चागतं मया ॥

आज्ञाचक्रे भ्रुवोर्मध्ये महाकाल्या महेश्वरि ! ।
तदा मम स्मृतिर्जाता ब्रह्मविष्णुकृते पुनः ॥
तन्नृत्यसमये काल्या द्वयोश्चिबुकयोः स्थितौ ।
च्युतौ स्वेदौ महेशानि ! ताभ्यां जातौ गुणोचितौ ॥
ब्रह्मा विष्णुश्च तौ दृष्ट्वा भयकम्पितविग्रहौ ।
तदा तौ च गतौ तूर्णं नासिकारन्ध्रयोर्द्वयोः ॥
काल्यास्तदागतो धाता पिङ्गलायां महेश्वरि ! ।
ईड़ायाञ्च ततो विष्णु स्तत्र गत्वा च तौ शुभौ ॥
महाविड़म्बितौ भूतौ दृष्ट्वाश्चर्य्यमनेकशः ।
रुदन्तौ सततं देवि ! विस्मृतं किं भविष्यति ॥
एवमादि रुदन्तौ तौ गच्छन्तौ च इतस्ततः ।
तावीश्वरौ महेशानि ! महादुःखेन दुःखितौ ॥
ज्ञात्वा मया महेशानि । प्रागतं विष्णुमन्दिरम् ।
तस्मै दत्तं मया ज्ञानं मन्त्रं परममङ्गलम् ॥
तत्क्षणान्मम तुल्योऽसौ वामाङ्गे केवलो मम ।
तस्मै दत्तं सर्वशास्त्रं वाङ्मात्रेणागमं विना ॥
गरुड़स्थो महाविष्णुर्हृष्टपुष्टो बभूव ह ।
तमादाय गतस्तत्र ब्रह्माण्डे परमेश्वरः ॥
गत्वा तस्मै मया दत्तं मन्त्रं परमम‌द्भुतम् ।
महाज्ञानी महादेवि ! तत्क्षणात् स पितामहः ॥
मम तुल्यो जायतेऽसौ दक्षाङ्गे मम केवलः ।
स विधिः परमेशानि ! मम शासनतस्तदा ॥
दत्तं तस्मै सर्वशास्त्रं विशारदश्च विष्णुना ।
गतव्यथ स्तदा ब्रह्मा हृष्टः पुष्टः सदैव हि ॥
अत आदिगुरुस्त्वं हि वर्त्तसे मम सर्वदा ।
तदङ्गीकृत्य तज्ज्ञानं सह ताभ्यां महेश्वरि ! ॥

परं काल्या मया यातं तेन तेन पथा तथा ।
शिवाभिर्योगिनीभिश्च महान्टत्यपरायणा ॥
शतकोटिदिव्यवर्षं नृत्यतिस्म परात्मिका ।
नानावाद्यमहोल्लासा नानालङ्कारगाथिका ॥
चन्द्रसूर्य्यवह्निसोम्यैर्विचित्रैश्च प्रसूनकैः ।
उत्थितैः पतितैः पुष्पैर्दिव्यगन्धैर्महोत्सका ॥
वीक्षणागोचरैर्देवि ! सदान्टत्यपरैः रहः ।
शतशो ब्रह्माण्डसमा पताकाभिश्च रञ्जिता ॥
विचित्राभिश्च बहुभिर्दृष्टा कान्ताभिरिव च ।
अतस्तोतुं समारब्धा वयं कालीं करालिकाम् ॥
साश्रुपुलकगद्गदोक्त्या नतशीर्षाः पुटैः करैः ।
तदादौ विधिरस्तौषीत् सर्वशास्त्रेण भक्तितः ॥
कोटिवर्षं महेशानि ! तमुवाच तदा परा ।
यद्गुणस्त्वमहो धातः ! सर्वशास्त्रार्थविस्मृतः ॥
अनुसन्धानवेत्तासि सृजकस्त्वं सदा भव ।
इत्याज्ञप्त स्ततो धाता कृतकृत्योऽभवत्तदा ॥
ततोऽस्तौषीन्महाविष्णुः सर्ववेदेन शाम्भवि ! ।
दशकोव्ययनानाञ्च ततस्तमब्रवीच्छिवा ॥
वेदज्ञोऽसि महाविष्णो ! मन्त्रज्ञोऽसि गुणालयः ।
धर्मज्ञोऽसि पालकस्त्वं भव सृष्टेश्च रक्षकः ॥
इत्याज्ञाञ्च शिरे कृत्वा कृतार्थोऽसौ जगद्धितः ।
ततोऽहं परमां नित्यां कालीं ब्रह्मसनातनीम् ॥
तुष्टाव परया भक्त्या आगमेन महेश्वरि ! ।
विंशकोटिवत्सराणां मामुवाच तदा तु सा ॥
काल्युवाच । आगमज्ञो महाप्राज्ञो निर्मायोऽसि सदाशिव ! ।
सगुणस्त्वं महायोगी सृष्टिसंहारको भव ॥

एवमाज्ञां शिरे कृत्वा पुनस्तुष्टाव तामहम् ।
पञ्चकोटिदिव्यवर्षं मामुवाच ततस्तु सा ॥
आगमे संस्तुता तेऽहं तुष्टा तेऽस्मि सदाशिव ! ।
किं प्रार्थ्यते महादेव ! ददामि नात्र संशयः ॥

ईश्वर उवाच ।

तिष्ठामि सततं मात स्त्वदीयचरणाम्बुजे ॥

श्रीकाल्युवाच ।

घोरनाम्ना दानवेन यादृग्युद्धं कृतं मया ।
तत्कोटिकोट्यंशयुद्धं करिष्यत्येव यो मया ॥
महिषीगर्भसंभूत स्तव रेतःसमुद्भवः ।
भविष्यसि त्वं देवेश ! महिषासुरनामधृक् ॥
आसुरं भावमासाद्य महायुद्धं करिष्यसि ।
तदा त्वां नाशयित्वाहं भद्रकालीस्वरूपतः ॥
वामाङ्गुष्ठं पदाब्जस्य स्थापयिष्यामि ते हृदि ।
इदानीं त्वं महादेव ! मम पादतले सदा ॥
तिष्ठ त्वं शवरूपेण मम चासनतां व्रज ।
इत्याज्ञप्ता वयं देव्याः पतिताः पदसन्निधौ ॥
दण्डवत्प्रणिपातेन लक्षवर्षं गतं तदा ।
तत्रैवान्तरगात् काली चिद्रूपा ब्रह्मनिष्कला ॥
इत्येवं कथितं तुभ्यं योगिन्युत्पत्तिविस्तरम् ।
गोपनीयं प्रयत्नेन सर्वेषां साधनोत्तमम् ॥

इति योगिनीतन्त्रे देवीश्वरसंवादे चतुर्विंशति-
साहस्र्ये नवमः पटलः ।

अथ दशमः पटलः ।

ईश्वर उवाच ।

उत्थाय च पुनर्देवि ! न त्वां दृष्ट्वा वयं पुनः ।
वदन्तो भृशदुःखार्त्ता निमग्नाः शोकसागरे ॥
हा मातस्ते मुखाम्भोजं कोटिचन्द्रार्कन्यक्कृतम् ।
कीदृक् चरणरागं ते कृपासागरसञ्चयम् ॥
विस्तृतं परमं रूपं महामायाविमोहनम् ।
किंभूतं नखचन्द्राणां ज्योतिः परममङ्गलम् ॥
कोटिकोटिनिशानाथविगलन्मुखमण्डलम् ।
किंभूतं किं भवेन्मातः ! क्व यातमिदमद्भुतम् ॥
हाहा मातरिदं रूपं सच्चिदानन्दमव्ययम् ।
अस्माकं मातृभावेन न पश्यामः पुनश्च तत् ॥
मातृतातविहीनाश्च भ्रमन्ति बालका यथा ।
रुदित्वा च रुदित्वा च वयं सर्वे तथा स्थिताः ॥
इत्यादि विविधैर्देवि ! विलापैः परमेश्वरि ! ।
नीता वयं पञ्चलक्षं वर्षाणामम्बुजेक्षणे ! ॥
रुदित्वा पुनरुत्थाय रुदन्तो भृशमुच्चकैः ।
मातर्मातः ! क्व याता त्वम् अस्माकं किं भविष्यति ॥
वयन्ते कथमुत्पाद्य निःक्षिप्ता दुस्तरार्णवे ।
दया नास्ति अहो मातर्वयन्ते दीनबालकाः ॥
न पालयसि चेदस्मान् को वास्मान् पालयिष्यति ।
त्वां विना जननी नास्ति नास्माकं भाव एव च ॥
त्वामदृष्ट्वा मरिष्यामः सत्यमेव सुनिश्चितम् ।
मातृतातविहीनस्य बालकस्य च जीवनम् ॥
कथं भवति हे मातर्ज्ञायतां स्वयमेव हि ।

निरुत्सुका चिदस्माकं कृपां तस्यां ततः कुरु ।
सोवाच योगिनी वाणीं महामृतप्रवर्षिणीम् ॥

श्रीकाल्युवाच ।

मा भयार्त्ता महेशान ! ब्रह्मविष्णुमहेश्वराः ।
तिष्ठामि सततं तेषामित्याह खलु सा तदा ॥
सच्चिदानन्दरूपाहं ब्रह्मैवाहं स्फुरत्प्रभम् ।
मम नाशो नास्ति कदा निःसन्देहास्तु तिष्ठत ॥
यद्रूपं दृष्टमस्माकं युष्माभिः परमं मतम् ।
ध्यात्वा तद्रूप ममलं जपं कुरुत मे मनुम् ॥
तदेव मङ्गलं तुभ्यं भविष्यति महाप्रभम् ।
इदानीं ब्रह्मणो देहे विश विष्णो ! स्थिरोभव ॥
अहो महेश ! देवेश ! ब्रह्मदेहे प्रविश्यताम् ।
यावत् सृष्टिं करोतीश इमां ज्ञानक्रियामयीम् ॥

ईश्वर उवाच ।

इत्युक्त्वा सा महाकाली ददावस्मासु शाम्भवि ! ।
इच्छाज्ञानक्रियाशक्तीः सर्वकार्य्यार्थसाधनीः ॥
इच्छा तु विष्णवे दत्ता क्रियाशक्तिस्तु ब्रह्मणे ।
मह्यं दत्ता ज्ञानशक्तिः सर्वशक्तिस्वरूपिणी ॥
तदोवाच महाकाली शृणुध्वं परमेश्वराः ! ।
अहं विशामि युष्मासु पूर्णरूपेण शङ्करे ॥
अयमेव गुरुर्देवः श्रीशिवः परमेश्वरः ।
अयं हि वक्ता शास्त्राणां नाप्यन्योऽपि विधिर्हरिः ॥
श्रोत्री याहं हि युष्माकं सर्वेषां नात्र संशयः ।
मोहयिष्यामि ब्रह्माणं विष्णुं वापि महेश्वरम् ॥

ईश्वर उवाच ।

इत्युक्त्वा सा महाकाली अस्मासु प्रविवेश ह ।

अयञ्च माधवो देहे प्रविष्टो ब्रह्मणस्तदा ॥
ततस्तं मोहयामास ब्रह्माणं ब्रह्मविग्रहम् ।
ततो ब्रह्मा स्वयं ज्ञात्वा स्वयं जुहोति चाव्ययम् ॥
स्वयम्भूरिति विख्यातिं तदा प्राप्तो न संशयः ।
किं करोमि क्व गच्छामि इति चिन्तासमाकुलः ॥
एवमेव विधातासावुषित्वा परिवत्सरम् ।
जलमेव ससर्जादौ व्यापकं परमं महत् ॥
गुणाभिमानं तत्तोयं कारणार्णवमुल्वणम् ।
तत्र स्थित्वा हेमरूपमसृजद्वार्थसञ्चयम् ॥
तद्वीर्य्यवुद्दुदं यावदनीकं जातमन्तिके ।
तत्तद्ब्रह्माण्डमाख्यातं प्लवते कारणार्णवे ॥
तत्तद्ब्रह्माण्डरचार्थं ब्रह्माण्डानां वियोगताम् ।
करोमि सततं देवि! रुद्रमूर्त्तिधरः स्वयम् ॥
शूलपाणि महादेवि! प्रतिब्रह्माण्डपार्श्वतः ।
एकैकरुद्ररूपेण तिष्ठामि सततं शिवे! ॥
यथा ब्रह्माण्डयोश्चापि संयोगो जायते न हि ।
तथा करोमि सततं स्थित्वा तत्कारणार्णवे ॥
एवमेव वयं सर्वे ब्रह्मविष्णुमहेश्वराः ।
प्रतिब्रह्माण्डमध्ये तु तिष्ठामो नात्र संशयः ॥
ततो ब्रह्मा जगद्धाता प्रतिब्रह्माण्डमध्यतः ।
प्रविश्यैकैकरूपेण अन्यतत्त्वचतुष्टयम् ॥
भूमिमग्निं तथा वायुमाकाशञ्च ससर्ज सः ।
एतैस्तु पञ्चभिस्तत्त्वैः सर्वां सृष्टिमकारयत् ॥
ततस्तु भगवान् विष्णुरिच्छया ब्रह्मणस्तदा ।
ब्रह्मदेहात् समुद्भूय पालयामास तां सदा ॥
सृष्टिं ब्रह्माज्ञया देवि! प्रतिब्रह्माण्डमध्यतः ।

पृथक् पृथक् समास्थाय विष्णुरूपं महाभुजम् ॥
प्रतिब्रह्माण्डमध्ये तु संहरामि पुनः पुनः।
अहं हि परमेशानि! ब्रह्मदेहं समाश्रितः॥
एवं किञ्चिन्न स्मरति ब्रह्मा किञ्चिन्महेश्वरि!।
सर्वकार्यं ममैवैतज्जानाति हि जगन्निधिः॥
जलादिसकलं तत्त्वं ब्रह्माण्डादिकविस्तरम्।
देवादिसकलं देवि! दिग्विदिक् च चराचरम्॥
कार्यञ्च कारणं देवि! तथा विष्णोः समुद्भवः।
सर्वं जानाति हि ब्रह्मा मत्कृतं मायया पुनः॥
किन्तु सर्वं हि मिथ्यैव मातुर्माया हि केवलम्।
तां मायां हि भजन्ते ये मायामेतां तरन्ति ते॥
तुष्टा चेत् परमा माया मुक्तिमात्रं प्रयच्छति।
रुष्टा चेत् सैव माता मे भूमियोगं प्रयच्छति॥
भुक्तिर्मुक्ति स्तस्य पादे वश्यैव चाश्रयाचिता।
यस्य तुष्टा महादेवि! मम माता हि कालिका॥

श्रीदेव्युवाच।

श्रुतं हि सकलं देव! त्वत्प्रसादात् महेश्वरः।
अश्रुतं सर्ववृत्तान्तं ब्रह्मादीना मगोचरम्॥
इदानीं श्रोतुमिच्छामि यत् प्रोक्तं कारणार्णवम्॥
किमाधारं महादेव! तदाधारञ्च किं वद।
सीमानं वद देवेश! यदि स्नेहोऽस्ति मां प्रति॥

ईश्वर उवाच।

शृणु देवि! प्रवक्ष्यामि गुह्याद् गुह्यतरं शुभम्।
अतिगोप्यं सुगोप्यं हि ब्रह्मविष्ण्वाद्यगोचरम्॥
महार्णवो भवेत् देवि! महाकालो महेश्वरः।
शून्यरूपं हि क्रीड़ार्थं भर्त्तारं पर्य्यकल्पयत्॥

सैव काली जगन्माता महाकालतुला तु सा ।
भूत्वार्द्धतेजसी रूपा महाकालञ्च बिभ्रती ॥
शून्यरूपा कृष्णवर्णा मत्ता स्यादूर्द्ध्वतेजसी ।
सीमा पृष्टा त्वया देवि ! सीमा ब्रह्मैव केवलम् ॥
तेजोरूपं ब्रह्मतेजः प्रकाशरूपकं तथा ।
तत्प्रकाशं महादेवि ! व्याप्यव्यापकवर्जितम् ॥
नाधेयञ्चैव नाधारमद्वितीयं निरन्तम् ।
इदं हि सकलं देवि ! सर्वं मायामयं पुनः ॥
मिथ्यैव सकलं देवि ! सत्यं ब्रह्मैव केवलम् ।
इदं हि कथितं तुभ्यं सारात्सारं परात्परम् ॥
गुह्याद् गुह्यतरं गुह्यं गुह्याद् गुह्यं महेश्वरि ! ।
इदं हि परमं ज्ञानं सर्वमायानिकृन्तनम् ॥
सर्वज्ञानमतं भेदं महामार्त्तण्डविग्रहम् ।
कोटिकोटिमहादानात् कोटिकोटिमहातपात् ॥
कोटिकोटिमहाज्ञानात् कोटिकोटिमहाव्रतात् ।
कोटिकोटिमहातीर्थावगाहाच्च महेश्वरि ! ॥
बहुजन्मव्यतीते तु यदि शृणोति कर्हिचित् ।
तदा मुक्तो भवेत् देवि ! संसारे न पुनर्भवेत् ॥
इत्येवं कथितं तुभ्यं गोपयस्व स्वयोनिवत् ।
यथान्यो लभते नैवं तथा कुरु प्रयत्नतः ॥
गोपनीयं प्रयत्नेन मम सर्वस्वमुत्तमम् ।
दद्याच्छान्ताय धीराय योगिने कुलयोगिने ॥
ज्ञानिने देवदेवेशि ! अन्यथा नरकं व्रजेत् ।
कथितं सारभूतं ते खेलत्खञ्जनलोचने ! ॥
ब्रह्मज्ञानं मया देवि ! किं भूयः श्रोतुमिच्छसि ।
नातःपरतरं किञ्चित् विद्यते मम मानसे ।

गोपनीयं सदा भद्रे ! पशुपामरसन्निधौ ॥

इति योगिनीयन्त्रे देवीश्वरसंवादे चतुर्विंशतिसाहस्रे दशमः पटलः ।

अथ एकादशः पटलः ।

श्रीदेव्युवाच । देवदानवगन्धर्वसुरेशपरिपूजित ! ।
गणेशनन्दिचन्द्रेशगोविन्दविधिवन्दित ! ॥
योगीन्द्रवन्दितपद ! सर्वलोकगुरो ! हर ! ।
या प्रोक्ता परमा विद्या काली कलुषनाशिनी ॥
यद्यत् मन्त्रं साधनञ्च पूजनञ्च पुरष्क्रियाम् ।
मुद्रां बलिं तथा होमं भावं स्थानं तथैव च ॥
ध्यानं स्तोत्रञ्च कवचम् अस्याः श्रुतं पुरा मया ।
इदानीं श्रोतुमिच्छामि स्थानं भेदं महेश्वर ! ॥
कुत्र वा प्राप्यते मोक्षः कुत्र वा सिद्धिरुत्तमा ।
झटित्येव महादेव ! कृपया वद शङ्कर ! ॥
यदाश्रितो द्रुतं लोकः स्वकार्य्यफलभाग्भवेत् ।
प्रयासस्य च बाहुल्यं हित्वा हि परमेश्वर ! ॥

ईश्वर उवाच ।

शृणु देवि ! प्रवक्ष्यामि स्थानं परमदुर्लभम् ।
द्रुतसिद्धिकरं देवि ! महामोक्षफलप्रदम् ॥
कालिकायाः श्मशानाद्धि नान्यत् स्थानं प्रशस्यते ।
तत्र यद्यत् कृतं कर्म तदनन्तफलं लभेत् ॥
तत्र चैका पुरश्चर्य्या कृता चेत् परमेश्वरि ! ।
न तु मैवं महादेवि ! भावयुक्तः सशक्तिकः ॥
अवश्यं मन्त्रसिद्धिः स्यात् नात्र चित्रं कथञ्चन ।

अनन्तफलदा पूजा सर्वत्रैव जले स्थले ॥
दिव्यभावेन वा देवि ! वीरभावेन चेद्भवेत् ।
शाक्तं वा वैष्णवं वापि शैवं वान्यं तथा पुनः ॥
वाराणस्यां जपेद् यो हि मासमात्रं वरानने ! ।
प्रातःकालं समारभ्य यावन्मध्यन्दिनं भवेत् ॥
अवश्यं मन्त्रसिद्धिः स्यात् सत्यमेव सुसिद्धिदे ! ।
निर्वाणं तस्य देवेशि ! अवश्यं जायते शिवे ! ॥
महाश्मशानं देवेशि ! आनन्दकाननं तथा ।
अविमुक्तं महादेवि ! तथा गौरीमुखं पुनः ॥
वाराणसी महाक्षेत्रं कालीरूपं परात्परम् ।
तत्र यद्यत्कृतं देवि ! किं तस्य कथयामि ते ॥
कामरूपे महापूजा सर्वसिद्धिफलप्रदा ।
नेपालस्य काञ्चनाद्रिं ब्रह्मपुत्रस्य सङ्गमम् ॥
करतोयां समाश्रित्य यावद्दिक्करवासिनीम् ।
उत्तरस्यां कुञ्जगिरिः करतोयात्तु पश्चिमे ॥
तीर्थश्रेष्ठादिक्षुनद्री पूर्वस्यां गिरिकन्यके ! ।
दक्षिणे ब्रह्मपुत्रस्य लाक्षायाः सङ्गमावधि ॥
कामरूप इति ख्यातः सर्वशास्त्रेषु निश्चितः ।
ऋणानि त्रीण्यपाकर्त्तुं यस्य चित्तं प्रसीदति ॥
स गच्छेत् परया भक्त्या कामाख्यायोनिसन्निधिम् ।
तीर्थयात्रां समासाद्य यद्येकोऽप्यत्र गच्छति ॥
पदे पदेऽश्वमेधस्य फलं प्राप्नोति मानवः ।
त्रिंशद्योजनविस्तीर्णं दीर्घेण शतयोजनम् ॥
कामरूपं विजानीहि त्रिकोणाकारमुत्तमम् ।
ईशाने चैव केदारो वायव्यां गजशासनः ॥
दक्षिणे सङ्गमे देवि ! लाक्षाया ब्रह्मरेतसः ।

त्रिकोणमेवं जानीहि सुरासुरनमस्कृतम् ॥
तत्र ये मानवाः सन्ति ते देवा नात्र संशयः ।
तत्र यद्यज्जलं देवि ! तत्सर्वं तीर्थमेव हि ॥
उपवीथिश्च वीथिश्च उपपीठञ्च पीठकम् ।
सिद्धपीठं महापीठं ब्रह्मपीठं तदन्तरम् ॥
विष्णुपीठं महादेवि ! रुद्रपीठं तदन्तरम् ।
नवयोनिरिति ख्याता चतुर्दिक्षु समन्ततः ॥
तत्र तत्र महापूजा चोत्तरोत्तरफलाधिका ।
द्विगुणं द्विगुणं भद्रे ! फलमेवं सुनिश्चितम् ॥
सर्वेषाञ्चैव विद्यानां सर्वमन्त्रस्य शाम्भवि ! ।
पूजने जपने चैव द्विगुणं द्विगुणं फलम् ॥
नवयोनिः समाख्याता कामाख्यायोनिमण्डलम् ।
आयोनिमहिपर्य्यन्तमाविद्यागन्धमादनम् ॥
पञ्चक्रोशमिदं देवि ! सर्वेषामेव दुर्लभम् ।
ब्रह्मविष्णुसुरेशाद्यैः सेवितं परमाद्भुतम् ॥
देवा मरणमिच्छन्ति का कथा मानुषेषु च ।
योनिपीठे महेशानि ! पञ्चक्रोशमिते शिवे ! ॥
ये गच्छन्ति शिवाकारा ये मृतास्तेऽपुनर्भवाः ।
ये च सूर्य्याकारं क्लेशं न प्राप्नुवन्ति कर्हिचित् ॥
योनिपीठे च निष्पापा ये वसन्ति नरोत्तमाः ।
ते सर्वे शङ्करा जातास्त्रिनेत्राश्चन्द्रमूर्द्धजाः ॥
सर्वेषाञ्चैव विद्यानां सर्वमन्त्रस्य चेश्वरि ! ।
पूजनं जपनञ्चैव कुरुते साधकोत्तमः ॥
अणिमाद्यष्टसिद्धीनामाश्रयो जायते नरः ।
तन्मध्ये च महादेवि ! गिरिर्नीलाचलोज्ज्वलः ॥
ब्रह्मविष्णुशिवाकारः सर्वशक्तिमयः पुनः ।

तन्मध्ये परमेशानि ! मनोभवगुहा परा ॥
मनोभवगुहामध्ये रक्तपानीयरूपिणी ।
कोटिलिङ्गसमाकीर्णा कामाख्या कल्पवल्लरी ॥
तत्तेजसा तु सन्दीप्ता मनोभवगुहा सदा ।
अस्याः स्पर्शनमात्रेण लौहो याति सुवर्णताम् ॥
चतुर्हस्तप्रमाणानि समन्तात् पर्वतात्मजे ! ।
अस्याः स्पर्शनमात्रेण शिवत्वमेति मानवः ॥
निष्पापो जायते देवि ! तत्क्षणान्नात्र संशयः ।
अत्र यद्यत् कृतं कर्म तदनन्तफलं भवेत् ॥
तन्मध्ये परमेशानि ! समन्ताद्द्वादशाङ्गुलम् ।
आपातालाद् ह्रदं देवि ! प्रोच्छलज्जलमण्डलम् ॥
तज्जलं परमेशानि ! ब्रह्मविष्णुशिवात्मकम् ।
ऐश्वरं तज्जलं देवि ! कारणार्णवसंज्ञकम् ॥
बहु किं कथ्यते देवि ! तज्जलं परमामृतम् ।
सङ्केतेनैव कथितं मातर्जानीहि सुन्दरि ! ॥
काङ्क्षन्ति सततं देवि ! तज्जलं च चराचराः ।
तज्जलस्पर्शमात्रेण तद्ध्रदस्पर्शनेन च ॥
तत्क्षणान्मानवो देवि ! देवो भवति निश्चितम् ।
पुण्यपापविनिर्मुक्तो जीवन्मुक्तो भवेद्ध्रुवम् ॥
तद्ध्रदे पूजयेद् यो हि तज्जलेन महेश्वरि ! ।
जिह्वाकोटिसहस्रैस्तु वक्त्रकोटिशतैरपि ॥
वर्णितुं नैव शक्नोमि तत् फलं गिरिनन्दिनि ! ।
ह्रदे हस्तं विनिःक्षिप्य जलमध्ये महेश्वरि ! ॥
अष्टोत्तरशतजपान्महासिद्धीश्वरो भुवि ।
मन्त्रसिद्धिर्भवेत्तस्य तत्क्षणान्नात्र संशयः ॥
शैवो वा वैष्णवो वापि शक्तो वान्यो महेश्वरि ! ।

जपन्ति ये हि मन्त्रं ते सिद्धिमायान्ति तत्क्षणात् ॥
अष्टोत्तरशतेनापि नात्र कार्य्या विचारणा।
कुशाग्रैरुत्थितं तोयं यः पितृभ्यः प्रयच्छति ॥
गयाश्राद्धं कृतं तेन नियुताब्दं महेश्वरि!।
एतत्ते कथितं देवि! कामाख्यायोनिमण्डलम् ॥
संक्षेपेण महेशानि! वक्ष्याम्येवं विशेषतः।
किन्त्वस्य कथ्यते देवि! माहात्म्यं ते यशस्विनि!॥
यत्र कोटियोगिनीभिः काली वसति तारिणी।
छिन्नमस्ता भैरवी सा सप्तसप्तविभेदिता ॥
धूमा च भुवनेशानी मातङ्गी कमलालया।
भगक्लिन्ना भगाधारा तथा चैव भगन्दरी॥
दुर्गा च जयदुर्गा च तथा महिषमर्दिनी।
उपविद्याश्च याः प्रोक्ताः सर्वाभिस्ताभिरेव च ॥
ब्रह्मविष्णुमहेशाद्यैर्महाकाली वसेत् सदा।
ब्रह्मसुखाश्रयं पीठमुग्रताराधिदैवतम् ॥
तत् पीठं विविधं प्रोक्तं गुप्तं व्यक्तं महेश्वरि!।
व्यक्ताद् गुप्तं पुण्यतरं दुरापं साधकोत्तमैः ॥
सर्वत्र लभ्यते देवि! कुलद्वयविशारदैः।
मनोभवगुहावक्त्री देवीशिखरसुन्नतम् ॥
तन्महोग्रमिति ख्यातं पीठं परमदुर्लभम्।
सिद्धिकाली ब्रह्मरूपा देवता भुवनेश्वरी ॥
निवसेत्तत्र या काली घोरदैत्यविनाशिनी।
तत्पीठोपरि संविश्य दशधा च जपेन्मनुम् ॥
तदा मन्त्रविशुद्धिः स्यात् तद्देहेन शिवो भवेत्।
यत्क्षणं ते मया प्रोक्तं कृदमध्ये सुलोचने!॥
पादहीनं तत् फलं स्यात् पूर्णं शिवजपार्चने।

अर्द्धं जालन्धरे ज्ञेयमुड्डीयाने तदर्द्धकम् ॥
अवश्यं तन्त्रसिद्धिः स्यान्नेपाले तिथिवासरात् ।
नीलकण्ठसमीपे तु नात्र कार्य्या विचारणा ॥
जपेन देवदेवेशि ! कथितं ते मया मुदा ।
त्रयोदशाहे महासिद्धिरेकाम्रकानने तथा ॥
दशलक्षेण गङ्गायां सिद्धिरावश्यकं शिवे ! ।
राढ़ायां विकटाख्यायां द्रुतञ्च पर्वतात्मजे ! ॥
लक्षत्रयेण सिद्धिः स्यात् सत्यमेव सुसिद्धिदे ! ।
पुष्कराख्ये च लक्षेण प्रयागे विंशलक्षतः ॥
कोटिजपाद्द्रोणगिरौ ज्वालायाञ्च द्विलक्षतः ।
तथैव विरजे क्षेत्रे लक्षद्वादशतः शिवे ! ॥
हिमालये त्रिलक्षेण केदारे पञ्चलक्षतः ।
कैलासे दशलक्षेण जयन्त्यां पञ्चलक्षतः ॥
उज्जयिन्यां दशाहेन मासेन मन्दराचले ।
अवश्यं मन्त्रसिद्धिः स्याज्जपनात् पूजनाच्छिवे ! ॥
इत्येवं कथितं तुभ्यं यत् पृष्टं गिरिसम्भवे ! ।
मातृजारसमं देवि ! सर्वदा परिगोपयेत् ॥
इति योगिनीतन्त्रे देवीश्वरसंवादे चतुर्विंशतिसाहस्रे
एकादशः पटलः ।

अथ द्वादशः पटलः ।

श्रीदेव्युवाच । भोः स्वामिन् ! परमानन्द ! योगिनामभयप्रद ! ।
कामाख्यायोनिमाहात्म्यं यदुक्तं मे त्वया शिव ! ॥
सत्यं सत्यं न सन्देह आश्चर्य्यं सर्वमेव हि ।

तत्त्वेन तन्मया ज्ञातं कलौ किं न सुसिद्धिदम् ॥
न पश्यामो वश्यिज्ञामं मन्त्रसिद्धिन्तथैव च ।
किमेतत् कारणं नाथ ! वद मे करुणामय ! ॥

ईश्वर उवाच ।

नरकासुरनामा तु विष्णुवीर्य्यसमुद्भवः ।
पृथिवीगर्भसम्भूतो दानवानामधीश्वरः ॥
तस्मै विष्णुर्ददौ राज्यं कामरूपं महाफलम् ।
पृथिवीवचनात् सोऽपि दानवो युद्धदुर्धरः ॥
किरातैर्घटितं जित्वा रणे कामन्टपोऽभवत् ।
पुनश्च भगवान् तस्मै निवासाय ददौ मुदा ॥
प्राग्ज्योतिषपुरं ख्यातं कामाख्यायोनिमण्डलम् ।
जित्वाऽभिषेचनं राज्ये विष्णुः शक्तिं ददावपि ॥
ततस्तु दर्शयामास मनोभवगुहां हरिः ।
सुस्नातं नारकं तद्वद्विधेयामास वै तदा ॥

विष्णुरुवाच ।

कामाख्यायाश्च माहात्म्यं सर्ववेदार्थसम्मतम् ।
ब्रह्मत्वं ब्रह्मणा प्राप्तं विष्णुत्वञ्च मया पुनः ॥
शिवत्वञ्च शिवेनैव कामाख्यायाः प्रसादतः ।
तस्माद्योनिं पूजयस्व यत्नात् सर्वात्मभिस्त्वमूम् ॥
यदा ते सुमुखी माता तदा ते सर्वसम्पदः ।
यदा ते विमुखी माता तदा ते न शुभं सुत ! ॥
तदैवाहञ्च त्यक्ष्यामि पुत्रत्वं वेद्म्यहं पुनः ।
इति ज्ञात्वा पूजयस्व विशेषेण वदामि किम् ॥

ईश्वर उवाच ।

इत्युक्त्वा स ययौ विष्णुर्वैकुण्ठं स्वनिकेतनम् ।
नरकः पालयामास विष्णूक्तं यद्यदेव हि ॥

एतस्मिन्नन्तरे देवि ! वृत्तान्तं शृणु दारुणम् ।
ब्रह्मणो मानसः पुत्रो वशिष्ठोऽतीव सद्यतिः ॥
तारामाराधयामास तदा नीलाचले मुनिः ।
तत्रैवैकदिने देवि ! जप्तुं चैव सुरेश्वरीम् ॥
कामाख्यामण्डले तारां पुरद्वारे समागतः ।
तत्र तं वारयामास नरको ब्रह्मसम्भवम् ॥

नरक उवाच ।

इदानीं तिष्ठ विप्र ! त्वं नागच्छ मण्डलान्तरे ।
इदानीं पूज्यते देवी पूजान्ते त्वं गमिष्यसि ॥
इत्युदीरितमाकर्ण्य नरकस्य मुनीश्वरः ।
द्वादशादित्यसङ्काशो बभूव क्रोधमूर्च्छितः ॥
उवाच नरकं विप्रो वशिष्ठस्ताम्रलोचनः ॥

वशिष्ठ उवाच ।

रे पापिष्ठ ! किमुक्तं ते अयोग्योऽहं सुदुर्मते ! ।
कामाख्यापूजने काले मा लभेम गृहान्तरे ॥
गन्तुं योन्यन्तरे मूढ़ ! भूत्वापि ब्रह्मसम्भवः ।
इदानीं पश्य वीर्य्यं मे तव नाशकरं महत् ॥
इत्युक्त्वा च वशिष्ठोऽसौ जग्राह पाणिना जलम् ।
कमण्डलोर्महादेवीं शशाप दारुणं मुनिः ॥

वशिष्ठ उवाच ।

अहञ्च ब्राह्मणो मातः ! कामाख्ये ! ब्रह्मसम्भवः ।
हित्वा त्वां हि व्रजाम्यद्य न किञ्चिदुच्यते त्वया ॥
ब्रह्मवधोद्भवं पापं सत्यं तेऽद्य भविष्यति ।
एवमत्र महापीठे जपनात् पूजनादपि ॥
सिद्धि र्न जायते कर्हिं काले मद्वचनात् पुनः ॥

ईश्वर उवाच ।

दत्त्वेमं दारुणं शापं त्यक्त्वा तज्जलमुत्तमम् ।
नीलाचलं परित्यज्य गतोऽसौ खाण्डवं गिरिम् ॥
ततः सा परमा विद्या कामाख्या विश्ववन्दिता ।
महाज्योतिर्मयी देवी सर्वप्रकाशरूपिणी ॥
दह्यतेऽहर्निशं तारा तत्रैव स्वाङ्गतेजसा ।
तत्क्षणात् परिसन्दग्धा गता कैलासमन्दिरम् ॥
तदैव परमेशानि ! मनोभवगुहा पुनः ।
महान्धकारपटलैरावृता तद्वियोगतः ॥
हाहाकारः सर्वलोके मूर्च्छितो दानवेश्वरः ।
ततस्तां परमां मायां विषण्णवदनां पुनः ॥
दृष्ट्वाहं परिप्रपच्छ कामाख्यां परिसादरम् ।
कथं शिवे ! समायाता त्यक्त्वा तद्योनिमण्डलम् ॥
विषण्णवदना भूत्वा कामाख्ये ! वद कारणम् ।
त्वं देवि ! परमाराध्या स्थीयतां मे हृदि स्वयम् ॥
सर्वं प्रतिकरोम्येव विषण्णवदने ! कथम् ॥

कामाख्या उवाच ।

वशिष्ठो ब्रह्मणः पुत्त्रस्तारामाराधितुं मुनिः ।
मद्योनिमण्डले नाथ ! द्वारं मे समुपागतः ॥
प्रातस्तस्मिन् ब्राह्मणो मामर्चितुं समुपागतः ।
द्वारपालोऽभवद्राजा यावन्मे पूजनं भवेत् ॥
तावत् कोऽपि न क्षमो हि गन्तुं मद्योनिमण्डलम् ।
एवं नित्यं नियमितं नरकेनासुरेण च ॥
अतस्तं वारयामास नरको ब्रह्मनन्दनम् ।
ततस्तेनैव मुनिना शापो दत्तः सुदारुणः ।

शापं शृणु महादेव ! कथने रोदनं मम ॥
ब्रह्मविष्णुसुरेशाद्यैः काङ्क्षते यत् परं स्थलम् ।
तत् मम विहतं देव ! को वोपायोऽस्ति मे वद ॥
हित्वा त्वां हि व्रजाम्यद्य न किञ्चिदुच्यते त्वया ।
ब्रह्मवधोद्भवं पापं सत्यं तेऽद्य भविष्यति ॥
एकमत्र महापीठे जपनात् पूजनादपि ।
सिद्धिर्न जायते कर्हि काले मद्वचनात् पुनः ॥
एवमेव मुनेः शापादागताहं तवान्तिकम् ।
कमुपायं करिष्यामि वद मे करुणामय ! ॥

ईश्वर उवाच ।

एवमुक्त्वा रुदन्तीं तामाश्वास्य च पुनः पुनः ।
आगत्याहं योनिपीठे जजाप कालिकामनुम् ॥
शापोद्धाराय देवेशी तस्माच्छापाद्विमोचिता ।
कामाख्यां स्थापयामास पूर्ववद्योनिमण्डले ॥
ततः सा परमा माया महाहर्षमुपागता ।
किन्तु कलौ महेशानि ! वर्षाणाञ्च शतत्रयम् ।
ब्रह्मशापो महेशानि ! फलिष्यति सुनिश्चितम् ॥
देव्युवाच । वशिष्ठेन पुरा शप्ता कामाख्या कामवासिनी ।
नरकस्य प्रसङ्गेन तत् सर्वं कथितं मयि ॥
इदानीं श्रोतुमिच्छामि शापोद्धारस्य ते कथा ।
कथं शापश्च ज्ञातव्यस्तस्यापि लक्षणं वद ॥
यच्छ्रुत्वा साधवः सर्वे दयामेष्यन्ति सर्वदा ॥

ईश्वर उवाच ।

कुमतेः पुरभूपस्य राज्यनाशो यदा भवेत् ।
तद्दिनात् परमेशानि ! ब्रह्मशापः प्रवर्त्तते ॥
ततोऽतीव दुराचारो कामरूपे भविष्यति ।

प्रजापीड़ा रोगस्तथा बहुदोषो भविष्यति ॥
सदा युद्धं महामाये ! सदा दुर्वृत्तमेव च ।
देवदानवगन्धर्वाः सदा पीड़ापरायणाः ॥
कुपूर्वकुलटाचन्द्रमिते शाके दिवानिशम् ।
सौमारैश्च कुवाचैश्च यवनैर्युद्धमुल्वणम् ॥
भविष्यति कामपृष्ठे बहुसैन्यसमाकुलम् ।
ततो रणे च सौमारं जित्वा यवन वाञ्छितम् ॥
वर्षमेवाकरोद्राज्यं मकारादिर्महीपतिः ।
तत्सहायं समासाद्य कुवाचः स्वीयराज्यभाक् ॥
वर्षान्ते यवनं हित्वा सौमारो राज्यनायकः ।
कुमारीचन्द्रकालेन्दौ गते शाके महेश्वरि ! ॥
कामरूपे मणेः पृष्ठसंयोगं सम्भविष्यति ।
कामरूपे तथा राज्यं द्वादशाब्दं महेश्वरि ! ॥
कुवाचसङ्गतो भूत्वा यवनश्च करिष्यति ।
षष्ठवर्गपञ्चमादिस्ततः शरीरमिच्छति ॥
शासितव्यं कामरूपं सौमारैश्च कुवाचकैः ।
यवनश्च कुवाचश्च सौमारश्च तथा प्लवः ॥
कामरूपाधिपो देवि ! शापमध्ये न चान्यकः ।
एवमेव बहुविधं वच्ये लक्षणमीश्वरि ! ॥
क्रियते सत्कारकरं प्रत्यक्षं परमेश्वरि ! ।
वशिष्ठस्य तपस्यादावग्निः शाम्यति कामिनि ! ॥
भविष्यन्ति च तरवः शालाख्यपर्वतोपरि ।
स्वर्गद्वारे शिलापाते चैके वैपुरसन्निधौ ॥
कामाख्याया मठे भग्ने उर्वश्या सहशङ्कमः ।
ब्रह्मपुत्रस्य देवेशि ! सूक्ष्मधारा तु तस्य च ॥
षोड़शाब्दे गते शाके भूमहीरिपुसुल्वके ।

विगतो भविता नूनं सौमारकामपृष्ठयोः ॥
षण्मासं तत्र सम्पूज्य उत्तराकालकोषयोः ।
गमिष्यन्ति च राजानः सर्वे युद्धविशारदाः ॥
कुवाचैर्यवनैश्चान्द्रैर्बहुसैन्यसमाकुलैः ।
त्रिभिर्म्लेच्छैः समाकीर्णं महायुद्धं भविष्यति ॥
अश्वमुण्डैर्नरमुण्डैर्गजमुण्डैर्विशेषतः ।
लौहित्योरक्तपूर्णश्च भविष्यति न संशयः ॥
तदैव परमा माया योगिनीगणवन्दिता ।
कामाख्या वर्णकश्यामा बलिहस्ता हसन्मुखी ॥
लोलजिह्वा मुण्डमाला दिग्वस्त्रा परमा स्थिता ।
पर्वताग्रं समाश्रित्य रक्तपानं करिष्यति ॥
ततः कुवाचो यवनं हित्वा सौम्यविनाशितः ।
करतोयानदीं यावत् करिष्यति महद्रणम् ॥
दशाहं तत्र संस्थाय यास्यति पुनरालयम् ।
ततो विप्रो नृपो भूत्वा कामरूपनिवासिनः ॥
करिष्यति जनान् देवौ जपपूजादितत्परान् ।
एवं वर्षत्रयं राज्यं कृत्वा दण्डी द्विजो नृपः ॥
भविष्यति महामाये ! योनिमण्डलसन्निधौ ।
ततो द्वादशदले नाभिः कल्पते पूर्वभूमिपः ॥
ऐशानीमागतः कामानेकच्छत्रं करिष्यति ।
तद्राज्यं सकलं देवि ! धर्मेण पालयिष्यति ॥
तत्पत्नी श्यामवर्णा स्यात् सदाराधितपार्वती ।
सवितं तनयं साध्वी राजानं राजपुत्त्रकम् ॥
तज्जन्मदिवसाद्देवि ! यावत् स्याद्द्वादशं दिनम् ।
तावत् स्वर्णाचले स्वर्णमणिराविर्भविष्यति ॥
तेनैव धनिनः सर्वे कामरूपनिवासिनः ।

भविष्यन्ति तदैव स्याद् वशिष्ठशापमोचनम्॥
ततस्तेजांसि भूयांसि कामाख्यायोनिमण्डले।
कामाख्यासन्निधाने च भविष्यति कलौ युगे॥
मन्त्रसिद्धिश्च भविता तदैव योनिमण्डले।
यथोक्तफलदा देवि! कामाख्या हि भविष्यति॥
जड़ीभवद्ब्रह्मशापाद् वर्षाणाञ्च शतत्रयम्।
कामाख्या देववन्द्याङ्घ्रिकमला लज्जिता स्वयम्॥
पूर्ववत् सकलं देवि! ततस्तु सम्भविष्यति।
एवं कामपरित्राणं संक्षेपात् कथितं मया॥
किं श्रोतव्यमितो देवि! गिरिजे! कथ्यतां त्वया॥

इति श्रीयोगिनीतन्त्रे देवीश्वरसंवादे चतुर्विंशति-
साहस्रे द्वादशः पटलः।

अथ त्रयोदशः पटलः।

श्रीदेव्युवाच। देवेश! परमेशान! सर्वज्ञ! सर्वपूजित!।
क्व गच्छसि मुहुर्नाथ! कृपया वद शङ्कर!॥

ईश्वर उवाच।

कौञ्चाख्याने च देशे च योनिगर्त्तसमीपतः।
साध्वी सती ब्राह्मिका हि रेवती जनविश्रुता॥
म्लेच्छदेहोद्भवा या तु योगिनी सुन्दरी मता।
तत्कुचौ कठिनौ द्वन्द्वौ योनौ तस्याश्च पीनता।
भिक्षाचारप्रसङ्गेन गच्छामि च दिवानिशम्।
तत्सन्निधौ महेशानि! तया मे रमणं महत्॥
देव्युवाच। कुत्रासीत् किं तपस्तप्तं कथं प्राप्तं महीतलम्।

त्वया सार्द्धं रतिर्यस्या नाल्पस्य तपसः फलम् ।
तथापि च कृपा तस्यां लक्ष्यते महती मया ।
इदानीं किमभूत् सा हि कृपया परया वद ॥
ईश्वर उवाच ।
नगेन्द्रतनये ! बाले ! शृणु मत्प्राणवल्लभे ! ।
तत् साध्वीचरितं किञ्चित् कथयामि शुचिस्मिते ! ॥
रसक्रीड़ा कृता सार्द्धमेकाम्रकानने मुदा ।
वेदाङ्गसम्भवा साध्वी योगिनी सा सुरी मता ॥
नाभूत्तस्याः सुतृप्तिर्मे मत्क्रियायां नगात्मजे ! ।
मामाप्तुमुत्कटं तप्तमस्मिन् मे चेत्रकामदे ॥
एकाम्रगहने देवि ! पर्वते तीर्थसङ्कुले ।
तत्रैको ब्राह्मणो यातो भिक्षार्थं तामुवाच ह ॥
न दत्तमुत्तरं तस्मै भिक्षा तिष्ठतु दूरतः ।
ततः शशाप विप्रस्तां म्लेच्छतां याहि दुर्मदे ! ॥
इत्युक्त्वा स ययौ विप्रो म्लेच्छत्वमाप योगिनी ।
अतोऽर्थिनं समर्थश्चेत् याचितं न ददाति चेत् ॥
स दुर्गतिमवाप्नोति समर्थो विनयं चरेत् ।
तस्यास्तु तपसा देवि ! क्रीतोऽहमभयं सदा ॥
अतस्त्वया रतिर्याता मम कामिनी सर्वदा ।
तस्याः पुत्रो विनुसिंहो मदौरससमुद्भवः ॥
एकेन जितवान् कामान् सौमारान् गौड़पश्चमान् ।
विनिर्जित्य नृपान् सर्वान् एकः श्रीमान् महासतिः ॥
तस्यापि बहवः पुत्राः पृथिवीपरिपालकाः ।
कुवाचा धार्मिकाः सर्वे राजानो युद्धदुर्मदाः ॥
तपः कर्त्तुं विनुसिंहो योगमाश्रित्य विह्वले ।
तिष्ठत्यव्यक्तरूपेण पह-आकल्पमम्बिके ! ॥

कालात् सा माधवी देवी महेहे नीचतां गता।
यथा जाया नन्दिमाता तथेयं योगिनी मता॥
यथा पुत्त्रो भृङ्गरीटस्तथा विनुर्ममात्मजः।
विनुसिंहोऽपि कल्पान्ते परां सिद्धिमवाप्स्यति॥
तद्वंशजास्तु राजानः सर्वे कैलासवासिनः।
भविष्यन्ति महात्मानो गणेशाः सर्वशालिनः॥
रूपयौवनसम्पन्नैर्देवकन्यागणैः सह।
विहरन्ति सदा देवि! क्रीड़न्ते भैरवा यथा॥
यदा यदा ब्रह्मशापः कामाख्यायां भवेत् पुनः।
तदा तदाऽवतीर्य्यासौ स्वस्य कामस्य पालकः॥
तथा तद्वंशजाः सर्वे भवेयुः कामपालकाः।
कल्पान्तमेवं देवेशि! यावच्छापो विमुच्यते॥
तावदेव महामाये! तद्वीर्य्ये क्रीड़ति ध्रुवम्।
कल्पमेवं महेशानि! कलौ वर्षशतत्रयम्॥
वर्षाणां परमेशानि! भुक्तिशापं परात्मिका।
कामाख्या हि महामाये! तदन्ते सकलं भवेत्॥
एवन्ते कथितं देवि! ब्रह्मशापविमोचनम्।
कामाख्याया महेशानि! साकल्येन मया ध्रुवम्॥
तावद्यस्य ब्रह्मशापो निष्कृतिस्तस्य दूरतः।
तत्त्वकेणापि दष्टस्य प्रतीकारो हि तत्क्षणात्॥
ब्रह्मशापप्रसक्तस्य कल्पान्ते स्यात् प्रतिक्रिया।
नरकान्निष्कृतिर्नास्ति तस्याभावान्न संशयः॥
एवं तद्वंशजाः सर्वे पीड्यन्तेऽहर्निशं प्रिये!।
नानाविधमहोत्पातै र्यावत् स्यात् सासपौरुषम्॥
तस्मात्तु ब्राह्मणं देवि! नावमन्येत कुत्रचित्।
सर्वदेवमयो विप्रो ब्रह्मविष्णुशिवात्मकः॥

ब्रह्मतेजःसमुद्भूतः सदा प्राकृतिको द्विजः ।
ब्राह्मणे भुंज्यते यत्र तत्र भुङ्क्ते हरिः स्वयम् ॥
तत्र ब्रह्मा च रुद्रश्च खेचरा ऋषयो मुनिः ।
पितरो देवताः सर्वे भुञ्जते नात्र संशयः ॥
सर्वदेवमयो विप्र स्तस्मात्तं नावमानय ।
ब्राह्मणञ्च कुमारीञ्च शक्तिमग्निं श्रुतिञ्च गाम् ॥
नित्यमिच्छन्ति ते देवा पूजार्थं कर्मभूमिषु ।
पूजितैका कुमारी चेद्द्वितीयं पूजनं भवेत् ॥
कुमारीपूजनफलं मया वक्तुं न शक्यते ।
कुमार्य्यश्च शक्तयश्च सर्वमेतच्चराचरम् ॥
एका चेद्युवती देवि ! पूजिता स्यात्सलोकिता ।
सर्वा एव परा देव्यः पूजिताः स्यु र्न संशयः ॥
हुतमेकगुणं वह्नौ दत्तमेकगुणं द्विजे ।
लभ्यते कोटिगुणितं विश्वासान्नात्र संशयः ॥
अविश्वासे शतगुणं फलमेव सुनिश्चितम् ।
गोग्रासं पावनं लोके सर्वपापनिकृन्तनम् ॥
कुमार्य्यै चैव यद्दत्तं तथा शक्त्यै महेश्वरि ! ।
सततञ्चैव तेषान्तु कल्पकोटिशतायुतैः ॥
धर्मयोनिर्हि ते देवा धर्मो यज्ञादिको मतः ।
परलोके महाबन्धुर्धर्मो नास्त्यत्र संशयः ॥
कर्मण्येव कृते देवि ! वैदिके बहुजन्मनि ।
ततश्चागमिके धर्मे धर्मेणैव प्रवर्त्तते ॥
तत्र सम्प्राप्यते मुक्तिः कर्मबन्धविनाशिनी ।
ततस्तु बहुजन्मान्ते ज्ञानमासाद्य मुच्यते ॥
कर्मणा लभते भक्तिं भक्त्या ज्ञानमुपालभेत् ।
ज्ञानान्मुक्तिर्महादेवि ! सत्यं सत्यं मयोच्यते ॥

ज्ञानभावे समुत्पन्ने सम्प्राप्य ज्ञानकामिनीम्।
तदा योगी विमुक्तः स्यादित्याह भगवान् शिवः॥
न कर्मणः समारम्भान्नैष्कर्म्यं पुरुषोऽश्नुते।
तस्मात् कर्म महामाये! सर्वदा समुपाचरेत्॥
वैदिकं तान्त्रिकं वापि यदि भाग्येन लभ्यते।
न वृथा गमयेत् कालं द्यूतक्रीड़ादिना सुधीः॥
गमयेद्देवतापूजाजपयज्ञस्तवादिना।
द्विविधश्चैव तत् कर्म वाह्यान्तरविभेदतः॥
वाह्यञ्चानियमासक्तं मानसं न तथा पुनः।
अशुचिर्वा शुचिर्वापि यत्र कुत्र स्थलेऽपि वा॥
गच्छं स्तिष्ठन् स्वपन् वापि यदा यदा वरानने!।
कुर्य्याच्च मानसं धर्मं न दोषो मानसे क्वचित्॥
सर्वेषां कर्मणां श्रेष्ठं जपज्ञानं महेश्वरि!।
जपयज्ञो महेशानि! मत्स्वरूपो न संशयः॥
जपयज्ञे हि तिष्ठेद्यो वाह्ये वा चान्तरेऽपि वा।
सर्वदा परमेशानि! जीवन्मुक्तो न संशयः॥
वैदिकास्तान्त्रिका ये ये धर्माः सन्ति महेश्वरि!।
सर्वे ते जपयज्ञस्य कलां नार्हन्ति षोड़शीम्॥
ग्रहभूतपिशाचाद्या यक्षरक्षोगणाश्च ये।
व्याघ्राद्या जन्तजो देवि! तथैव कुपितान्तराः॥
डाकिन्यो गुह्यकाश्चैव गन्धर्वाश्च सरीसृपाः।
दानवा भैरवा दुष्टा ये वै श्मशानवासिनः॥
केऽपि नेच्छन्ति तं देवि! जापिनं भयविह्वलाः।
न स्पृशन्ति च पापानि कदापि साधकं प्रिये!॥
फलमेतद्वाचिकस्य जपस्य परिकीर्त्तितम्।
उपांशुः स्यात् शतगुणः सहस्रो मानसो मतः॥

मन्त्रमुच्चारयेद्वाचा वाचिको जप ईरितः ।
किञ्चित् सुश्रवणोपेत उपांशुः परिकीर्त्तितः ॥
निजकर्णागोचरो यो मानसः परिकीर्त्तितः ।
वाचिकस्तु जपो वाह्यो मानसोऽभ्यन्तरो मतः ॥
उपांशुर्मिश्र एव स्यात्त्रिविधोऽयं जपः स्मृतः ।
जपेन देवता नित्यं स्तूयमाना प्रसीदति ॥
प्रसन्ना विपुलान् कामान् दद्यान्मुक्तिञ्च शाश्वतीम् ।
साधनञ्च जपञ्चैव ध्यानञ्चैव वरानने ! ॥
नाल्पेन तपसा देवि ! केनापि कुत्र लभ्यते ।
यदि भाग्येन देवेशि ! बहुजन्मार्जितेन च ॥
प्राप्यते यत्र तच्चेत्तु जन्मनाप्येकमोक्षभाक् ।
ब्रह्मज्ञानञ्च यत् प्रोक्तं समाधिस्तत् प्रकीर्त्यते ॥
इत्येवं कथितं रम्यं समासेन महेश्वरि ! ।
इतःपरं महादेवि ! किं पुनः श्रोतुमिच्छसि ॥

इति श्रीयोगिनीतन्त्रे देवीश्वरसंवादे चतुर्विंशति-
साहस्रे त्रयोदशः पटलः ॥

अथ चतुर्दशः पटलः ।

श्रीदेव्युवाच । भो देव ! परमानन्द ! महायोगेश्वर ! प्रभो ! ।
शुश्रूषा यत्र मे देव ! कृपया कथ्यतां गुरो ! ॥
श्रुतं विप्रस्य चरितं रेतसस्ते सनातन ! ।
प्लवस्य यवनस्यैव सौमारस्य महेश्वर ! ॥
तेषां रेतःसमुद्भूता म्लेच्छास्ते कामपालकाः ।
कथं जाता महादेव ! वद मे करुणामय ! ॥

ईश्वर उवाच ।

शाल्वपुत्राश्च वाह्लीका मृता: कौरवसंयुगे ।
नान्यो वंशधर: कश्चित्तद्वंशे तु त्रिलोचने ! ॥
तदा वाह्लीकरमणी कौर्मिर्गुणवती शुभा ।
युवती सुन्दरी रम्या तप:शीला महामति: ॥
पुत्रेच्छया गता काशीं तपस्तेपे दिवानिशम् ।
स्थित्वा विश्वेश्वराग्रे तु द्वारे मे मुक्तिमण्डपे ॥
तदा वलिसुतो वाणो महाकालो महावल: ।
तद्द्वारपालको देवि ! शुशुभे तां निरीक्ष्य च ॥
मदधीकारमादाय भैरव: काममोहित: ।
कपालमाली मदिरामोदितोन्मत्तवेशवान् ॥
तपस्विवेशमास्थाय निर्लज्जो रतिनायक: ।
कौर्मेर्जातो महादेवि ! बन्धुकामलकादिभि: ॥
भैरवो विपुलस्तत्र ततो जातो महाङ्कुश: ।
कौर्मे: सुतो महादेवि ! महाकालस्य रेतस: ॥
वात्सल्यं तत्र दृष्ट्वाहं तत्पुत्रो भैरवस्य च ।
तयाऽनिशं रतिश्चापि महाङ्कुशमहाभुजम् ॥
राज्याप्तिं सह तस्यापि कौर्मेश्चेष्टाच्च शाम्भवि ! ।
कामरूपान्तकं शाल्वं राज्यं दत्त्वा महाङ्कुशे ॥
कौर्मियोनिं समासाद्य कुलाचारपरायण: ।
समर्चयन् यथा काश्यां तथा तत्रापि सर्वदा ॥
तत्पूजा तत्र महती भविष्यति दिवानिशम् ।
महाङ्कुश: समुद्भूय काश्यामास्कन्दनं कृत: ॥
तत: प्रवेतिनाम्ना च जगाम मणिमण्डपम् ।
एवन्ते कथितं देवि ! चरितं प्रवसम्मतम् ॥
जीवनं चरितं किञ्चित् कथयामि शृणुष्व तत् ।

आसीत्त्रेतायुगे राजा बाहुर्धर्मपरायणः ॥
महाधीशो ! महायोद्धा सूर्य्यवंशसमुद्भवः ।
पितृशत्रून् विनिर्जित्य सप्तद्वीपां वसुन्धराम् ॥
बुभुजे परमं कामं योगध्यानं सुविस्तृतम् ।
बहुकाले महामाये ! ततः स्वमदमोहितः ॥
मत्तोऽधिकोऽधिको राजा नासीद्भूमण्डलेऽधुना ।
निपात्य पितृशत्रून् यः पितृश्राद्धं कृतं हि यत् ॥
एवं जातः स्वाहङ्कारः सर्वनाशकरो हि यत् ।
तस्मात्तु पापसञ्चारो जातस्तस्य महाभुजः ॥
पापात्मा यो भवेद्राजा राजतां न कदाचन ।
अहङ्कारो युद्धचर्य्यः सदा नैवाव्यवस्थितिः ॥
महापापानि सर्वाणि साङ्गान्येतानि निश्चितम् ।
तस्य तेनैव भावेन राजलक्ष्मीर्विनिश्च्युता ॥
आविर्भूतौ हैहयश्च तालजङ्घा नृपोत्तमाः ।
मन्त्रयित्वा च राजानो लङ्घयित्वाम्बुधिं तदा ॥
व्याजतः करदानस्य प्रापुरुत्तरकोशलम् ।
आदौ पराजितस्तेभ्यो बाहुर्मासेन निष्क्रमन् ॥
जितराज्यो बाहुराजः सस्त्रीको वनमाययौ ।
ममार तद्वने बाहुः समस्तं निष्प्रभं तदा ॥
तेन विसर्जितौ भूपौ तालजङ्घीयहैहयौ ।
अवसानाद्वशिष्ठस्य चाश्रमं जग्मतुस्तदा ॥
पुनश्च तौ हि राजानौ यवनौ प्राणकातरौ ।
वशिष्ठं शरणं यातौ रक्षरक्षेतिवादिनौ ॥
ततस्तान् यवनान् विप्रो वशिष्ठस्त्वभयं ददौ ।
एतस्मिन्नन्तरे भूपः सगरः खड्गमूर्च्छितः ॥
तान् नृपान् हन्तुकामस्तु वशिष्ठान्तिकमाययौ ।

सत्तथा भूपमालोक्य वशिष्ठो ब्रह्मसम्भवः ॥
उवाच सगरं देवि ! धर्मज्ञं बाहुनन्दनम् ।
मा हिंसीर्बाहुनन्दन ! अभयं दत्तवानहम् ॥
तच्छ्रुत्वा चकितो राजा बाहुजो भविता कृती ।
ब्रह्मवाक्यं वृथा न स्यात् प्रतिज्ञा मेऽपि पूर्वजा ॥
इदानीं किं करोम्यद्य सङ्कटं समुपस्थितम् ।
इति सञ्चिन्त्य तत् सर्वं वशिष्ठमभ्यवेदयत् ॥
हनामि मानुषगणान् प्रतिज्ञा मे कृता पुरा ।
तत्र तद्वचनं श्रुत्वागतोऽस्मि किं करोम्यतः ॥
तद्वाक्यमन्यथा कर्त्तुं मया नोक्तं सदा मुने ! ।
यद्युपायं न करोषि श्रेयो मे मरणं तदा ॥
एवं श्रुत्वा वशिष्ठोऽसौ सत्वरं प्रत्यभाषत ॥

वशिष्ठ उवाच ।

मा विषादं गच्छ सखे ! कर्त्तव्यं यच्छृणुष्व मे ।
तवारातीनिमान् सर्वान् मुण्डयित्वा शिरांसि तु ॥
वेदाचारवहिर्भूतान् कारयामास दूरतः ।
हिमाद्रिपश्चिमे भागे देशे तु यवनो नृपः ॥
इत्थं मे वचनं तिष्ठेत् प्रतिज्ञापि च ते शिशो ! ।
शिरसः कृन्तनं यद्वि मुण्डनं तद्वदेव हि ॥
वेदेऽपि स्थिरमेवं हि समानं समुदाहृतम् ॥

ईश्वर उवाच ।

इत्थं तद्वचनं श्रुत्वा सगरोऽपि तथाकरोत् ।
तेऽपि वै क्षत्रियाः सर्वे हैहयास्तालजङ्घकाः ॥
विडम्बिता विहीनास्ते सदा मुण्डितमस्तकाः ।
सुषमसुनिमाश्रित्य तदाचारविराजिताः ॥
सुषमस्योपदेशात्ते तपस्तेपुः सदाश्रिताः ।

यमाश्रित्य महादेवि ! म्लेच्छाचारपरायणाः ॥
तामसास्ते महादेवि ! तामसं भावमाश्रिताः ।
संयोगश्च वियोगश्च मन्त्राणाञ्च द्विधा गतिः ॥
सात्त्विकी राजसी देवि ! संयोगः फलदायकः ।
वाह्यान्तरवियोगेन संयोगो हि अनुत्तमः ॥
तामसे तु वियोगः स्याद् वाह्यः सिद्धिफलप्रदः ।
तामसः परलोकस्य वाह्यस्तद्धर्म ईश्वरः ॥
तेषान्तेनैव भावेन प्रसादो मेऽभिजायते ।
मया दत्तो वरस्तेभ्यो शृणु कामयितुं वरम् ॥
भुङ्क्ष्वेदानीमिदं राज्यं यवन ! तिष्ठ एव च ।
कालं तथेन्द्रष्टनवान् गते शाके कलौ युगे ॥
पुण्यदेशाधिपा यूयं भविष्यथ सुनिश्चितम् ।
एवमेव महेशानि ! कामरूपाधिपाः शिवे ॥
यवनो मत्प्रसादेन तथान्यपुण्यभूमिषु ।
बहुभूपसमाकीर्णः कलौ भुङ्क्ते महीं मुदा ॥
एवन्ते कथितं देवि ! वृत्तान्तं यावनं सदा ।
इदानीं श्रूयतां युद्धे सौमारचरितं तथा ॥
एकादशरिपुग्रस्तः खाण्डवं वनमाययौ ।
विहाय देवराजानं कौशाङ्ग्या सहितः स्वयम् ॥
गतेषु बहुकालेषु क्रीड़या देवभूभुजः ।
तौर्य्यत्रिके सम्यगिच्छा जाता बहुविधास्तथा ॥
रम्भां तिलोत्तमां काञ्चीं कुरङ्गाचीं मनोहराम् ।
आदिदेश समानीय नृत्यं कर्त्तुञ्च रम्भया ॥
ततस्तेन वृताः सर्वा वेश्या जग्मुर्मुदान्विताः ।
नानाविधिविधानेन इन्द्रं तुतोष मोहिनी ॥
मोहिता चापि कौशाङ्गी देवराजेन सङ्गता ।

तासां नृत्यप्रगीतेन कामभ्रंशो भविष्यति ॥
एतस्मिन्नन्तरे देवि ! स्वर्गवेश्या मनोहरा ।
तया रतिं समकरोत् स राजा हृष्टमानसः ॥
या काली परमा विद्या ब्रह्मरूपा सनातनी ।
कामाख्या सैव देवेशि ! सर्वसिद्धिविनोदिनी ॥

श्रीदेव्युवाच ।

कथं काली ब्रह्मरूपा कामाख्याभून्महेश्वर ! ।
सर्वं मे कृपया नाथ ! वदस्व चन्द्रशेखर ! ॥

ईश्वर उवाच ।

यदा सृष्टिः कृता धात्रा स्वयमेव स्वयम्भुवा ।
तदाहङ्कारदोषेण पूरितोऽसौ पितामहः ॥
अहङ्कारो नाशकरः सर्वस्यैवेति चेश्वरि ! ।
तमहङ्कारमादाय स्थितो ब्रह्मा जगन्निधिः ॥
विस्मृत्य सर्ववृत्तान्तं कालिकोक्तं हि यत् पुरा ।
केवलाहङ्कारयुतो धात्रा भूतो हि सर्वदा ॥
सर्वकामालयं विश्वं कस्य वा किं कृतं भवेत् ।
तथापि मायया देवि ! ब्रह्माहङ्कारमोहितः ॥
तं तथाभूतमालोक्य ब्रह्मणः परमेश्वरि ! ।
तद्देहात् कल्पयामास तदहङ्कारतः शिवे ! ॥
दैत्यं परमदुर्द्धर्षं केशिनामानमुद्धतम् ।
निःसृत्य ब्रह्मणो देहाद्द दैत्यः परमदारुणः ॥
धारयतिस्म तदा देवि ! ब्रह्माणं ग्रासितुं ततः ।
ततः पलायनञ्चक्रे विष्णुना स पितामहः ॥
ततः केशी महादैत्यः पुरञ्चक्रे च भारते ।
केशिपुरमिदं ख्यातं तत्र स्थित्वा हि दानवः ॥
बुभुजे सकलं देवि ! भूर्भुवः स्वश्चराचरम् ।

ब्रह्मशब्दजपादेवं सदाब्रह्माण्डमण्डले ॥
ततो ब्रह्मा जगद्धाता विष्णुना निरहङ्कृतिः ।
अस्तौषीज्जगतां मातां कालीं विघ्नविनाशिनीम् ॥

ब्रह्मविष्णू ऊचतुः ।

नमः परमकल्याणीं प्रणवात्मानमीश्वरीम् ।
निजबीजस्वरूपाञ्च कामबीजस्वरूपिणीम् ॥
मुण्डमालावलीरम्यां ललज्जिह्वां सनातनीम् ।
मायाबीजस्वरूपाञ्च कूर्चबीजस्वरूपिणीम् ॥
वन्देऽहं जगतां मातां कालीं कमललोचनाम् ।
घोररावां शिवसङ्गीं मुक्तकेशीं दिगम्बरीम् ॥
नमामि कालिकां मातां महाविघ्नविनाशिनीम् ।
प्रणमामि सदा ह्यद्यां तां मातां भुवनेश्वरीम् ॥

ईश्वर उवाच ।

एवं स्तुता तदा देवी ब्रह्मणा विष्णुनापि च ।
सहसाकाशवाणी वै किमिच्छसि पितामह ! ।
भो विष्णो ! त्वं महावाहो ! किमिच्छसि च तद्वद

ब्रह्मविष्णू ऊचतुः ।

जगद्दैत्यवरश्चैकः केशिनामा महासुरः ।
आवयोः सकलं नीतं नित्यं तत् तेन मण्डलम् ॥
हत्वेदानीं तमसुरमावां स्थापय पूर्ववत् ।
देहि दास्यं पदाम्भोजे माहात्म्यं तन्निवेदनम् ॥

श्रीकाल्युवाच ।

शृणु ब्रह्मन्नहो वाक्यं अहङ्कारो गतस्तव ।
इदानीं परिसंज्ञातं ते यान्ति च तवाधिकाः ॥
सर्वमायामयं विश्वं किं त्वेवान्यस्य पङ्कजे ।
अहङ्कारात्समोचित्वा विघ्नं दत्तं दुरासदम् ॥

माया तुभ्यं जगद्धातस्तवाहङ्कारनिर्मितम् ।
केशिदैत्यस्वरूपोहि हन्मि तन्तु स्थिरोभव ॥
मा भयं कुरु भो विष्णो ! स्थिरोभव महामते ! ॥

ईश्वर उवाच ।

एवमासाद्य आश्वास्य ब्रह्मविष्णुपरात्मिका ।
हुङ्कारेणैव तं भस्मीचकार दानवोत्तमम् ॥
केशीं महासुरं काली विधिमाह ततस्तु सा ॥
काल्युवाच । अहङ्कारात् पातकं ते जातं ब्रह्मन् ! महत्तरम् ।
तत्पापस्यापनोदाय क्रियते पर्वतोत्तमः ॥
केशिदैत्यभस्मना च गोग्रासं बहुना घृतम् ।
तद्ग्रासभस्मना नित्यं गौस्ते पापं क्षयिष्यति ॥

ईश्वर उवाच ।

एकीकृत्य च तद्भस्म केशिदैत्यशरीरजम् ।
कमण्डलुजलक्षेपाच्चकार पर्वतं विधिः ॥
नात्युच्छ्रितं नातिनिम्नं गोग्रासं बहुना घृतम् ।
तद्ग्रासभस्मना गोश्च तुष्टिः पुष्टिर्भवेद् ध्रुवम् ॥
अतो गोवर्द्धनं नाम पर्वताय ददौ विधिः ।
यथा यथा चात्ति गौश्च तद्ग्रासं पर्वतोत्तमे ॥
तथा तथा क्षयं याति पातकं ब्रह्मणः शिवे ! ।
तावत्तु निष्कृतिर्धातुर्यावद् गोवर्द्धनो गिरिः ॥
तदन्ते निष्कृतिस्तस्य ब्रह्मणः परमेश्वरि ! ।
एवमेवापराधस्ते प्राधान्ये यदि जायते ॥
तत्फलं पीड़नं तस्य सर्वेषाञ्च त्रिलोचने ! ।
ततो ब्रह्मा जगद्धाता विष्णुश्च जगतां पतिः ॥
पुनश्च तत्क्रमेणैव अस्तौषीत् परमेश्वरीम् ।
ततः काली जगन्माता तावुवाच किमिच्छथः ॥

ददामि वत्सौ ! तत्सर्वं भवन्तौ कातरौ कथम् ॥
ब्रह्मविष्णू ऊचतुः ।
आवयोर्जगताञ्चैव मङ्गलाय पदाम्बुजतम् ।
महामुक्तिप्रदञ्चैव त्वदीयमतिनिर्मलम् ॥
अदृश्यमपि गोप्यं हि मातराकारवर्जितम् ।
कथं तत् पूजयिष्यावः सर्वं मङ्गलदायकम् ॥
भूमौ स्थानं कल्पयस्व जपितुं त्वत्पदाम्बुजम् ।
सर्वदा पूजयिष्यावो महामङ्गलकारणम् ॥
आवयोश्चैव सर्वेषां महामुक्तिफलाय च ।
तदावयोर्दानवाद्यैरशुभैः किं करिष्यति ॥
अवश्यं नौ तरिष्यावो दुस्तरात् त्वत्पदार्चनात् ॥
काल्युवाच । शृणु वत्स ! महाविष्णो ! वचनं परमं महत् ।
जलहुङ्कारवीजेन चकार भस्म दानवम् ॥
केशीमन्त्रं महावीजं शब्दब्रह्मस्वरूपकम् ।
महातेजोमयं विद्धि तद्वीजं परमं पदम् ॥
केशिपुरे च तद्वीजं केशिहन्त्वा व्यवस्थितम् ।
आपातालं क्रोशमात्रं तद्वीजं तेजसावृतम् ॥
अतो हि पूज्यं तत्स्थानं महातेजोमयं ध्रुवम् ।
तत्स्थानं त्वं समादाय मां पूजय यदीप्सितम् ॥
अतिसङ्गुप्तभावेन ईप्सितं प्राप्यते फलम् ।
देवदानवगन्धर्वैरन्यैरपि महामते ! ॥
यथा न ज्ञायते कश्चित् तथार्चनां कुरुस्व मे ।
सर्वापद्भ्यः परित्राणं त्वां करिष्यामि सर्वदा ॥
क्रीड़ास्थानमिदं विष्णो ! उक्तं तुभ्यं मया सदा ।
इच्छाशक्तिस्तु दत्ता वै आद्यञ्चैव मया पुरा ॥
महालक्ष्मीस्वरूपेण सेवते ब्रह्मसंस्थिता ।

सैव वृन्दास्वरूपेण पुरेऽत्र सम्भविष्यति ॥
केशिपुरं समा व्याप्य ततो वृन्दावनाभिधम् ।
केशिपुरस्य भविता तया ते क्रीड़नं ध्रुवम् ॥
भूत्वा वृन्दातरुर्लक्ष्मीरत्र स्थास्यति सर्वदा ।
दैत्यविघ्नं हि भविता सर्वदैत्यनिसूदनी ॥
भो ब्रह्मन् ! शृणु वत्स तद्वचनं मे शुभोदयम् ।
केशिदैत्यबधार्थाय यत्र मे पूजनं कृतम् ॥
युवाभ्यां तत्र पश्य त्वं जातं मे योनिमण्डलम् ।
मम तेजःसमुद्भूतं जानीहि योनिमण्डलम् ॥
सर्वेषामुद्भवस्थानं योनिरेव न संशयः ।
जानीहि प्रकृतिं देव ! योनिं मे यां तु मामकीम् ॥
सम्पूज्य योनिं देवेश ! सृष्टिं कुरु यथार्थतः ।
कुत्रापि च भयं न स्यात् तव क्वापि पितामह !॥
अधिष्ठानमस्ति मम तत्र पीठे न संशयः ।
जानीहि तदधिष्ठातृरूपं मेऽति सुशोभनम् ॥
नित्यं पूजय तद्रूपं कामाख्यायोनिमण्डले ।
योनिमण्डलमासाद्य कामाख्यां यस्तु पूजयेत् ॥
सर्वसिद्धीश्वरो भूत्वा परत्रेष्टशो मोदते ।
न भयं तस्य कुत्रापि कस्मादपि प्रजायते ॥
तवान्येषां हितार्थाय स्थापितं योनिमण्डलम् ।
पृथिव्यां भारते वर्षे कामरूपं महालयम् ॥
नवयोनिसमाकीर्णं महामुक्तिफलप्रदम् ।
नवयोन्यात्मके ब्रह्मन् ! कामरूपे मनोहरम् ॥
कामाख्यातेजसा देवि ! दीप्यते योनिमण्डलम् ।
किञ्चिदानीं भवत्पापं प्रपश्यामि कथञ्चन ॥
अहङ्कारात् समुत्पन्नं त्रिविधं पातकं तव ।

कायिकं वाचिकञ्चैव मानसञ्च तथा पुनः ॥
तत्पापाद्‌ योनिपीठं मे न पश्यसि कदाचन ।
तत्पापं ध्यानधाराभिर्वह्नीभूतं दिवानिशम् ॥
तत्र वाचनिकं पापं गोवर्द्धनात् प्रकाश्यते ।
तत्तयस्य प्रशमनं वदामि तच्छृणुष्व मे ॥
नक्षत्रलोकान्नक्षत्रमेकं तत्र निपात्य च ।
श्रेष्ठतामेहि हे देव ! दृष्ट्वा पीठं तपः कुरु ॥
यावद्राक्षसीज्योतिस्तु मिलितं योनितेजसि ।
तावत् कुरु तपो घोरं तदन्ते पातकद्वयम् ॥
प्रशाम्यति न सन्देहो वसतिं कुरु सत्वरम् ।
तत्र तपोवशात् तत्तु केनापि नहि वीक्ष्यते ॥
अपराधाच्छ्रेयसस्तु भवेद्दै गतिरीदृशी ।
नक्षत्रस्थापनात्तत्र पृथक् जातिषु निश्चयम् ।
स्थानं तन्नास्यते वत्स ! सर्वलोके निरन्तरम् ॥

ईश्वर उवाच ।

इत्युक्त्वा विरराम़ासौ गगनस्था परात्मिका ।
कालीं परमकल्याणीं तां नत्वा विधिकेशवौ ॥
विस्मयाविष्टमनसौ राज्यं तच्चक्रतुस्तु तौ ।
इत्येवं कथितं गुह्यं यत् पृष्टं गिरिसम्भवे ! ।
प्राचीनमतिगोप्यं हि वृत्तान्तं कुलनायिके ! ॥

इति श्रीयोगिनीतन्त्रे देवीश्वरसंवादे चतुर्विंशतिसाहस्रे
चतुर्दशः पटलः ।

अथ पञ्चदशः पटलः ।

ईश्वर उवाच ।

कौशाङ्गी तं समालोक्य मनो दधे तथा तु सा ॥
कामरूपेषु विभ्रान्ता स्खलिता नृत्यगीतयोः ।
रतिर्धैर्य्यं तयोर्जातं तस्यास्तत्स्खलने पुनः ॥
ततस्तस्या मनो ज्ञात्वा कौशाङ्गी क्रोधमूर्च्छिता ।
उवाच निष्ठुरां वाणीं शृणु देवि ! मनोहराम् ॥
भूत्वा वेश्या महादुष्टा मदविक्षिप्तमानसा ।
अतः प्रचलितं चित्तमावयोरतिकर्मणि ॥
अहो याहि भुवं वेश्ये ! राजानं पतिमाप्नुहि ।
एवमुक्तं दुष्टशापं कौशाङ्गीमुखनिःसृतम् ॥
श्रुत्वा च मूर्च्छिता भूत्वा कौशाङ्गी चरणेऽपतत् ।
विललाप बहुविधं धृत्वा च चरणे मुहुः ॥
ततो जगाद कौशाङ्गी द्वात्रिंशद्वायनं भुवि ।
भुक्त्वा शापं मनोहरे ! पुनः सौख्यं गमिष्यसि ॥
मन्दाकिन्यां त्यक्ततनुं ततस्तां मानवीश्रिताम् ।
कङ्कती मोहिनी रम्या धार्त्तराष्ट्रं पतिं गता ॥
कौरवे च कुरुक्षेत्रे हते नारीशतं मृतम् ।
तूर्णञ्च कङ्कती सागाचन्द्रचूड़ं गिरिं भिया ॥
अत्युच्चशिखरे तस्य सा तस्थौ भृशदुःखिता ।
प्राप्यत्तुं स्वर्गवेश्या सा द्वितीयदिवसे निशि ॥
कामबाणैः सदा विद्धा मूर्च्छिता तापमागता ।
ततो रथे समारूढो गत्वापश्यत् तु सुन्दरीम् ॥
सालङ्काराञ्च कुशदेःपात् स्मृत्वा तत्पूर्वकारणम् ।
बोधयित्वा च सर्वं तां कान्तां कामविमोहिताम् ॥

रतिं धृत्वा गतस्तस्याः सुतोऽभूच्च अरिन्दमः ।
कङ्कत्याः परमेशानि ! पर्वते गन्धमादने ॥
अतो जग्राह तामिन्द्री द्वितीयदिवसे ऋतौ ।
ततः सोऽरिन्दमश्चाभूत् म्लेच्छाचारपरायणः ॥
व्याधवृत्तिरतो घोरः सर्वदा प्राणिहिंसकः ।
सर्वमांसादनो देवि ! किरातो घटितो यथा ॥
सर्वपुण्यबहिर्भूतः सर्वपापसमाकुलः ।
मद्यमांसभगामोदी कदाचारपरायणः ॥
ईदृशं तं सुतं दृष्ट्वा कङ्कती भृशदुःखिता ।
तपस्तेपेऽतिगाढ़ञ्च सारात्सारं चतुष्टयम् ॥
ततस्तां देवराजोऽसावुवाच तत्पुरःस्थितः ॥

इन्द्र उवाच ।

कथं तप्तं तपो वाचं त्वया कङ्कति ! मे वद ।
तपसा तेऽतिसन्तुष्टो यदिच्छसि ददामि च ॥

कङ्कती उवाच ।

सुतस्ते ईदृशो जातः सदा पापपरायणः ।
द्रष्टुं न शक्ता देवेश ! यथेच्छसि तथा कुरु ॥
देवाधिदेव ! देवेश ! सुतस्तेऽयं सुराधिप ! ।
भवेत् सत्यं न सन्देहस्त्वयन्तु च नराधमः ॥
अतस्त्वं देवतानाथ ! पिताऽस्यायं सुतस्तव ।
यथेच्छसि कुरु तथा मां तु नय द्रुतं प्रभो ! ॥
किङ्करीं त्वत्पार्श्वदेशे किङ्करीत्वे नियोजय ।
देवाधीश ! एष काम्यो नान्यः काम्यः कदाचन ॥

इन्द्र उवाच ।

शृणु प्रेयसि ! मद्वाक्यं शापकालो गतस्तव ।
त्वरितो नेष्याम्यधुना त्वामहं सुस्थिरा भव ॥

पुत्त्रस्य पापयोगेन वंशनाशकरोऽभवत् ।
अतः शताष्टविंशे च पुरुषे च्यविते सति ।
सौमारवासिनो भूत्वा वंश्या मे राजपुङ्गवाः ॥
पुण्यश्लोका धर्म्ममयाः सदाचारपरायणाः ।
न्यायबुद्धिमहोत्साहा देवविप्रपरायणाः ॥
भविष्यन्ति न सन्देहो भ्रष्टत्वन्तु नयाधुना ।
गच्छन्ति चापि वैकुण्ठे सर्वे स्युर्विष्णुवल्लभाः ॥
लयमेष्यन्ति तत्रैव यावदाभूतसंप्लवम् ॥

ईश्वर उवाच ।

ततस्तन्तु समादायागच्छदिन्द्रो निजालयम् ।
तथा काले तु सौमारः कामरूपाधिपोऽभवत् ॥
पूर्व्वभागे च सौमारः कुवाचः पश्चिमे तथा ।
दक्षिणे यवनस्तद्वदुत्तरे प्लव एव च ॥
एवमेव महादेवि ! ते सर्वे कामपालकाः ।
एवन्ते कथितं देवि ! सौमारचरितं हि तत् ॥
इतः किमिच्छसि श्रोतुं यत्त्वया नैव संश्रुतम् ।

इति श्रीयोगिनीतन्त्रे देवीश्वरसंवादे चतुर्विंशति-
साहस्र्ये पञ्चदशः पटलः ।

अथ षोड़शः पटलः ।

श्रीदेव्युवाच । श्रुतं हि पूर्ववृत्तान्तं सर्व्वेषामप्यगोचरम् ।
इदानीं श्रोतुमिच्छामि कालीरूपाऽभवत् कथम् ॥

ईश्वर उवाच ।

शृणु देवि ! परं गुह्यं ब्रह्मादीनामगोचरम् ।

सारात् सारतरं देवि ! भक्तिमुक्तिप्रदायकम् ॥
एकदा ब्रह्मविष्णू तौ विरोधन्तौ परस्परम् ।
ईश्वरोऽहमीश्वरोऽहमुक्तवन्तौ जलार्णवे ॥
तयोः शान्त्यै महेशानि ! प्रादुर्भूतं जलार्णवे ।
अप्रमेयं महालिङ्गं मदीयं पावनं परम् ॥
ज्ञानाज्ञानमयं दिव्यं दुर्निरीक्ष्यं भयङ्करम् ।
तन्मध्येऽहं रुद्ररूपो बभ्राम वृषवाहनः ॥
तौ दृष्ट्वा तु तदाश्चर्य्यं भयकम्पितविग्रहौ ।
स्तुत्वा च विविधैः स्तोत्रैरूचतुर्मां पुनश्च तौ ॥

ब्रह्मविष्णू ऊचतुः ।

इत्युदीरितमाकर्ण्य स्थगितौ ब्रह्मकेशवौ ।
निगूढं ध्यानतो ज्ञात्वा सन्तुष्टो माधवोऽभवत् ॥
उद्विग्नमानसो ब्रह्मा ध्यात्वा सन्मानमाप्तवान् ।
केवलं रुद्ररूपं मां ज्ञात्वाऽसौ कमलासनः ॥
विचिकित्सापरो भूत्वा विष्णुमाह तदा विधिः ॥

ब्रह्मोवाच ।

भो विष्णो ! मत्कपालाद् यो जातो रुद्रोऽप्यसौ मतः ।

ईश्वर उवाच ।

एवमुक्त्वा चोपहासं कृत्वा धात्रा विगर्हितम् ।
चकार बहुधा देवि ! विघ्नं दत्तं सुदारुणम् ॥
मया तस्मै ब्रह्मणे तद्विगर्हितविनिर्मितम् ।
तद्विघ्नमसुरो भूत्वा मध्याह्नसमये रविः ॥
जातो देहात् स त्रिपुरनाम्ना च दानवः शिवे ! ।
सर्वेषां सकलं नीतमिन्द्रादीनां महेश्वरि ! ॥
तेन दैत्येन देवेशि ! ततो विष्णोर्हि तत् जगत् ।
गरुड़ञ्च विना लक्ष्मीमन्यत् सर्वं हृतं बलात् ॥

हृतं तेनैव दैत्येन ब्रह्मणः कमलासनम् ।
ततः पलायिता देवा ब्रह्मविष्णुपुरोगमाः ॥
हिमालयं समासाद्य विष्णुराह तदा विधिम् ॥
विष्णुरुवाच । शिवनिन्दा कृता धातस्त्वया पूर्वं जलार्णवे ।
तेनैव चापराधेन वयं सर्वे प्रपीड़िताः ।
ततस्तु परमेशानं स्तोष्याम्यत्र गिरौ पुनः ॥
तदैव मङ्गलं लेभे भूयो मे रोचते हृदि ॥

ईश्वर उवाच ।

समाश्रित्य तपस्तेपुर्ब्रह्मविष्णुपुरोगमाः ।
हिमालये तदा देवाः प्रसादो मेऽभवत् तदा ॥
पृथिवीञ्च रथं कृत्वा चक्रे चन्द्रदिवाकरौ ।
ब्रह्माणं सारथिं कृत्वा वेदान् रज्जूस्तथैव च ॥
देवान् कृत्वा रथाङ्गानि अश्वांश्चैव रथान् पुनः ।
धनुः कृत्वा सुमेरुञ्च ज्याञ्च कृत्वा तु वासुकिम् ॥
विश्वञ्च सकलं कृत्वा रथस्थं यच्चराचरम् ॥
वाणं विष्णुं विधायैव त्रिपुरं भस्मसात् कृतम् ।
चराचरेण सहितं देवदैत्यादिभिः सह ॥
मया तत्र महेशानि ! पुनः सृष्टिः कृता ततः ।
यत्र भस्म कृतं देवि ! जगदेतच्चराचरम् ॥
महत् श्मशानन्तु विद्धि सर्वेषां लयकारणम् ।
मृतानां सर्वदेवानां तेजस्तत्र व्यवस्थितम् ॥
पञ्चक्रोशात्मकं भूत्वा तेजस्तु जगतां तथा ।
निर्माय मायया देहं त्रैपुरं तस्य वर्चसि ॥
तत्र मृत्युच्छलेनाहं तुष्टाव परमेश्वरीम् ।
तत्तेजसि महाकाल्याः परा चैतन्यरूपिणी ॥
ततस्तेजसि सा काली प्रादुर्भूता परा कला ।

महादीपप्रमाणन्तु तेजः कालीति कीर्त्तितम् ॥
मुखमात्रं समादृष्टं महाकाल्यास्तु तेजसि ।
अतो गिरिमुखं नाम मुनिभिः परिगीयते ॥
तद्दृष्ट्वा परमेशानि ! आनन्दश्चैव जायते ।
आनन्दकाननं तस्माद् गीयते वेदवादिभिः ॥
कालीमयं हि तत्तेजः सकलं संवभूव ह ।
यथा तु सागरे गच्छन् शीकरः सागरो भवेत् ॥
तथा सूर्य्यादितेजो हि कालीतेजो वभूव ह ।
यथा नानाजलं देवि ! गङ्गायां पतितं यदि ॥
गङ्गैव जायते सर्वं तथा तेजः सुरेश्वरि ! ।
सर्वं काल्यभवत् पूर्णं नास्ति भेदो महेश्वरि ! ॥
सर्वं तदमृतं देवि ! जानीहि सुरसुन्दरि ! ।
तामसीमनिशं देवि ! शिरसा धारयाम्यहम् ॥
ततो हि शङ्करत्वं मे निश्चितं सत्यमेव हि ।
तां कालीं शिरसाधाय पञ्चक्रोशमयीं सदा ॥
अहर्निशं पूजयामि परमानन्दसंहितः ।
अतो विश्वेश्वरत्वं मे सदैव नात्र संशयः ॥
ब्रह्मविष्ण्वादिकानाञ्च ईश्वरो यः सुरेश्वरि ! ।
विश्वेश्वरः स एव स्यान्नापरः परमेश्वरि ! ॥
केवलानन्दवान् भूत्वा पूजयामि परं सदा ।
तत्र तस्याः कृपा जाता वाग्भवा याऽशरीरिणी ॥
श्रीदेव्युवाच । भो देव ! परमानन्द ! ममानन्दः कृतस्त्वया ।
अतः काश्यां मृतानां त्वमानन्दं देहि सर्वदा ॥

ईश्वर उवाच ।

इति श्रुत्वा वचस्तस्या मग्नोऽहममृतार्णवे ।
ददामि परमं ब्रह्म सुषम्नोः कर्णगोचरे ॥

वाराणस्यां सदा देवि ! स्थित्वा ध्यानपराः शिवे ।।
जले स्थले चान्तरीचे वाराणस्यां मृतास्तु ये ॥
ददामि परमं ब्रह्म तेषां हि कर्णगोचरे ।
हित्वा हि सकलं कर्म सुकृतं दुष्कृतं हि ते ।
प्राप्स्यन्ति ब्रह्म निर्वाणं ममोपदेशतः क्षणात् ॥
तत् सर्वं सुकृतं कर्म दुष्कृतं वा महेश्वरि ! ।
भवेद्भस्म महाकाल्याः प्रसादात् ज्ञानयोगतः ॥
काशीलग्नं हि यत्किञ्चित् काशी भवति तत्क्षणात् ।
काशीस्पर्शनमात्रात् ते पूर्णानन्दमयाः सदा ॥
शूली कर्म दहेत् काशीतेजःस्पर्शात् क्षणात्तथा ।
तूलराशिं दहेत्त्वग्निः किञ्चित्कालाद्यथा शिवे ! ॥
तथा दहेत् कर्मराशिं काशीजन्मैकतो नृणाम् ।
काशीस्थानं पुण्यचयं किं वाहं कथयामि ते ॥
अपि चेत् त्वत्समा नारी मत्समः पुरुषोऽस्ति चेत् ।
तदा काशीफलं किञ्चिद् देवि ! वक्तुं क्षमो भवेत् ॥
अण्डजा उष्मजाश्चैव उद्भिज्जाश्च जरायुजाः ।
ते सर्वे मुक्तिमायान्ति काश्याञ्चेद् भाग्यतो मृताः ॥
इयं वाराणसी देवि ! महातेजोमयी शुभा ।
युगभेदाज्जनैरेव दृश्यते हि चतुर्विधा ॥
कृते रत्नमयी काशी त्रेतायां स्वर्णजा स्मृता ।
द्वापरे सा शिलारूपा कलौ भूमिमयी शुभा ॥
नातःपरतरं क्षेत्रं त्रिषु लोकेषु विद्यते ।
सत्यं सत्यं महादेवि ! शपथेन वदामि ते ॥
संसारवर्त्मना देवि ! मुक्तिमिच्छति यः पुनः ।
पाषाणेश्वरलोभित्वात् तिष्ठेत् काश्यां स यन्त्रितः ॥
स एव पण्डितो ज्ञानी स एव कुलपावनः ।

प्राणान्तेऽपि महादेवि ! काशीं न निस्त्यजेद्बुधः ॥
स एव परमो मूर्खः स एव कुलनाशकः ।
वृथैव मूर्खलोकेन काशीं प्राप्य समुज्झितम् ॥
बहुभिर्जन्मभिः पुण्यैर्यदि काशीं लभेत् जनः ।
तदा नैव त्यजेत् काशीं प्राणान्तेऽपि कदाचन ॥
अनायासेन संसारसागरं यस्तितीर्षति ।
स गच्छेदपि यत्नेन मम वाराणसीं पुरीम् ॥
अन्नं दद्यादन्नपूर्णा ज्ञानं दद्यात् सरस्वती ।
प्राणान्ते मुक्तिदाताऽहं काश्यां स्थित्वा सदैव हि ॥
एवन्ते कथितं देवि ! यत् पृष्टं गिरिजे ! मयि ।
परमं पावनं मोक्षं किमतः श्रोतुमिच्छसि ॥

इति श्रीयोगिनीतन्त्रे देवीश्वरसंवादे चतुर्विंशति-
साहस्र्ये षोड़शः पटलः ।

अथ सप्तदशः पटलः ।

श्रीदेव्युवाच । गुरुस्त्वं सर्वलोकानां परमेश ! पुरातन ! ।
जगद्वन्द्य कलाधीश ! वद कोलानिपातनम् ॥

ईश्वर उवाच ।

शृणु देवि ! प्रवक्ष्यामि कोलासुरनिपातनम् ।
महाकालीप्रसङ्गेन वृत्तान्तमिदमद्भुतम् ॥
पापं जातं ब्रह्मशापाद्द विष्णोरतुलतेजसः ।
पीड़ितस्तेन पापेन तपश्चक्रे स सर्ववित् ॥
हिमालयान्तिके गत्वा तत्पापक्षयकात्मकः ।
अष्टाक्षरीं महाविद्यां महाकाल्याः सदा जपन् ॥

दशवर्षसहस्रान्ते तुतोष सा महेश्वरी ।
तस्याः सन्तोषमात्रेण विष्णोर्हृदयपङ्कजात् ॥
कोलानामासुरो भूत्वा निर्गतः सहसा हि सः ।
तेन दैत्येन बलिना सर्वं नीतं दुरात्मना ॥
इन्द्रादिसकलान् देवान् विनिर्जित्य महासुरः ।
हृत्वा च वैष्णवं धाम ब्रह्मणः कमलासनम् ॥
इदानीं रे वत्स ! विष्णो ! हन्मि कोलान् सबान्धवान् ।
कोलानगरमास्थाय कुमारीरूपमास्थिता ॥

ईश्वर उवाच ।

एवं श्रुत्वा कोलावाणीं ब्रह्मविष्ण्वादयः सुराः ।
आनन्दजलधौ मग्नाः शिखिवन्नन्तुर्घनात् ॥
अतः काली करालास्या द्विजबालास्वरूपतः ।
गत्वा कोलापुरं देवि ! कोलासुरसमीपतः ॥
तमयाचत तद्भक्ष्यं कुमारी दैत्यपुङ्गवम् ॥

काल्युवाच ।

मातृतातविहीनाहं सहायपरिवर्जिता ।
क्षुधिताहं महाराजन् ! भोज्यं मह्यं प्रदीयताम् ॥

ईश्वर उवाच ।

ततः कोलासुरो देवि ! मायया परिमोहितः ।
दयया तां करे धृत्वा विवेशान्तःपुरे स्वयम् ॥
उवाच भोज्यं दास्यामि तुभ्यं यत्ते स्वभीप्सितम् ।
अत्रोपविश बाले ! त्वं आसने मणिरञ्जिते ॥
इत्युक्त्वासौ ददौ भोज्यं नानाविधमनेकशः ।
भुक्त्वा सा सकलं देवि ! पुनर्देहीतिवादिनी ॥
पुनर्ददौ बहुतरं तच्चापि बुभुजे स्वयम् ।
नाहं तृप्ता वदन्तीं तां कोलोवाच तदाऽसुरः ॥

यथा वृत्तिर्भवेद्‌ बाले ! तावच्च तत्तथा कुरु ।
इत्युदीरितमाकर्ण्य काली बालास्वरूपिणी ॥
कोषं हयं हस्तिनञ्च रथं सैन्यं सबान्धवम् ।
क्षणेन बुभुजे काली कोलासुरं महाबलम् ॥
कालरुद्रो यथा काले क्षणाद्‌युगत्रयं नयेत् ।
तथा कोलापुरं शून्यं कृतं काल्या क्षणाच्छिवे ! ॥
हृतारयस्ततो देवा ब्रह्मविष्णुमुखास्तथा ।
निरन्तरं पुष्पवृष्टिं चक्रुस्ते ननृतुः परम् ॥
जगुः सुललितं गीतं देवगन्धर्वकिन्नराः ।
विद्याधरीदेवपत्नीकिन्नरीभिः समन्ततः ॥
पूजितास्तैः कुमारी सा कुसुमैर्नन्दनोद्भवैः ।
सर्वलोकैः पूजिता च कुमारी सा गृहे गृहे ॥
ततः साऽन्तर्हिता देवी कुमारी ब्रह्मविग्रहा ।
एवं तेऽद्य मया प्रोक्तं कोलासुरनिसूदनम् ॥
ब्रह्मशापो दुराधर्षः कोऽप्यतस्तं न चाचरेत् ।
वाग्वज्रञ्च ब्राह्मणानां सदा जानीहि कामिनि ! ॥
अतोऽविद्यः सविद्यो वा ब्राह्मणः सर्वदा भवेत् ।
सन्तोष्य ब्राह्मणान् देवि ! तुष्टा वयं सदा सुराः ॥
वितुष्टे ब्राह्मणे देवि ! वितुष्टा वयमेव हि ।
यद्यकार्य्यशतं देवि ! ब्राह्मणः स्वयमाचरेत् ।
आत्मनो हितकामेन तथापि तं न चोत्सृजेत् ।
नापमानश्च कर्त्तव्यः सर्वदा सुरपुङ्गवे ॥
ब्राह्मणः सर्वदेवात्मा मोक्षतेजःसमो हि सः ।
अप्रसूतिश्च सा काली कुमारीरूपधारिणी ॥
ततःप्रभृति देवेशि ! कुमारी पूज्यते सुरैः ।
ब्रह्मविष्णुमहेशाद्यैः कुमारी पूज्यते सदा ॥

अन्यैः सर्वैः प्रपूज्येत ब्रह्माण्डतलगोचरैः।
कुमारीपूजनफलं वक्तुं नार्हामि सुन्दरि!॥
जिह्वाकोटिसहस्रैस्तु वक्त्रकोटिशतैरपि।
तस्माच्च पूजयेद् बालां सर्वजातिसमुद्भवाम्॥
जातिभेदो न कर्त्तव्यः कुमारीपूजने शिवे!।
जातिभेदान्महेशानि! नरकान्न निवर्त्तते॥
विचिकित्सापरो मन्त्री ध्रुवञ्च पातकी भवेत्।
देवीबुद्ध्या महाभक्त्या तस्मात्तां परिपूजयेत्॥
सर्वविद्यास्वरूपा हि कुमारी नात्र संशयः।
एका हि पूजिता बाला सर्वं हि पूजनं भवेत्॥
यदि भाग्यवशाद्देवि! वेश्याकुलसमुद्भवाम्।
कुमारीं लभते कान्ते! सर्वस्वेनापि साधकः॥
यत्नतः पूजयेत्तान्तु स्वर्णरौप्यादिभिर्मुदा।
तदा तस्य महासिद्धिर्जायते नात्र संशयः॥
महासिद्धिर्भवेद्यस्य स एव श्रीसदाशिवः।
लक्षणं तस्य वक्ष्यामि तच्छृणुष्व प्रियंवदे!॥
सक्तस्य महेशानि! काञ्चनं परिजायते।
सर्वसिद्धियुतो भूत्वा क्रीड़ते भैरवो यथा॥
स्वर्गे मर्त्त्ये च पाताले गतिस्तस्य सुनिश्चितम्।
हठात्तु जायते सर्वं यद्यन्मनसि वर्त्तते॥
कायव्यूहं समासाद्य सर्वत्र व्यापको भवेत्।
अव्याहतास्त्रः सर्वत्र यथा पुरन्दरः शिवे!॥
देवदानवगन्धर्वनागकिन्नरकामिनी।
विद्याधरी राजनारी सेवते तं दिवानिशम्॥
अन्ते च प्राप्यते तेन परं निर्वाणमुत्तमम्।
कुमारीपूजने काले साधकः शिवतां व्रजेत्॥

कुमारी पूज्यते यत्र स देवः चितिपावनः ।
महापुण्यतमं भूयात् समन्तात् क्रोशपञ्चकम् ॥
कुमारीपूजनं तत्र कुर्य्याच्च परमेश्वरि ! ।
स्फुरत्येव महज्ज्योतिः प्रत्यक्षं भारते भुवि ॥
विश्वम्भरो नाम राजा चैत्रवंशसमुद्भवः ।
अपूजयत् कुमारीं तां वेश्याकुलसमुद्भवाम् ॥
काञ्चीनाम्नीं कृष्णवर्णां सर्वलक्षणपूरिताम् ।
पूजाकाले महादेवि ! काञ्ची जाता स्फुरत्प्रभा ॥
तत्प्रभापटलाच्छन्नो राजा मोक्षमवाप्तवान् ।
सम्यक् प्रपूरिता तत्र काञ्ची ज्योतिर्मयी प्रभा ।
भूत्वा नित्या हि तत्स्थाने गृह्णाति पूजनं सदा ॥
काञ्चीनाम्नी पुरी जाता तत्स्थानन्तु महाफलम् ।
मोक्षदा सा पुरी ज्ञेया पञ्चक्रोशमयी शुभा ॥
गृहव्यापारादिकञ्च तत्र यद्यत् कृतं भवेत् ।
तत् सर्वं पूजनं तस्याश्चित्रमेतन्नगेन्द्रजे ! ॥
अथ काञ्चीपुरी देवि ! युता वाराणसी शुभा ।
एवन्तु पूजिता बाला काम्पिल्लेन महात्मना ॥
काम्पिल्ले नगरे पूर्वं तामुद्धृत्य वरानने ! ।
अद्यापि दृश्यते लोके शिलारूपेण तिष्ठता ॥
सर्वपुण्यतमं वासं सर्वतीर्थसमाकुलम् ।
सर्वयज्ञयुतं देवि ! महर्षीणाञ्च वेष्टितम् ॥
सर्वाश्चर्य्यसमाक्रान्तं काम्पिल्ले नगरे परम् ।
ये वसन्ति महादेवि ! काम्पिल्लनगरे पुरे ॥
इह भुक्त्वा वरान् भोगान् मम तुष्टिप्रदायकान् ।
सर्वसम्पत्समाकीर्णानन्ते देव्याः प्रसादतः ॥
उत्तरं ब्रह्मलोके वै देव्याः स्थानं समाप्नुयुः ।

यदि कामी भवेत् कोऽपि वैकुण्ठं परमं व्रजेत् ॥
मल्लोकं वा महेशानि ! यथा मे मणिमन्दिरम् ।
एवं तेऽद्य मया प्रोक्तं कुमारीचरितं शिवे ! ॥
किञ्चिदेव महामाये ! पुनः किं परिकथ्यते ॥

इति श्रीयोगिनीतन्त्रे देवीश्वरसंवादे चतुर्विंशति-
साहस्रे सप्तदशः पटलः ।

अथ अष्टादशः पटलः ।

श्रीदेव्युवाच । श्रुतं कुमारीचरितं पूर्वं हि देववाञ्छितम् ।
इदानीं श्रोतुमिच्छामि कहोलचरितं परम् ॥
आज्ञापय महादेव ! कृपया परया हि तत् ।
हितं हि सर्वलोकानां योगिनां हृदयार्थदम् ॥
ईश्वर उवाच । वेदवेदान्तवेदाङ्गसर्वशास्त्रस्वरूपभाक् ।
सर्वयागी सर्वतीर्थपूतः सर्वाघवर्जितः ॥
सर्वविद्यासर्वमन्त्रज्ञाता सिद्धऋषीश्वरः ।
सर्वतथ्ये ऋषिश्रेष्ठः परिबभ्राम मेदिनीम् ॥
चिन्तामवाप महतीमतीवोद्विग्नमानसः ।
सहस्रसूर्य्यसङ्काशः स एवासीत् पुरा शिवे ! ॥
चिन्तया परया सोऽभूत् परिव्याप्तो निरन्तरम् ।
तदाकाशसमुद्भूता श्रुता वाणी महर्षिणा ॥
कहोल ! याहि पूर्वं त्वं शङ्करं देवशङ्करम् ।
स गुरुः सर्वसत्त्वानां सकलं ते करिष्यति ॥
श्रुत्वा तां गागनीं वाणीं परमानन्दसंप्लुतः ।
गत्वोवाच कहोलोऽसौ वृत्तान्तं सकलं हि तम् ॥

ततस्तस्मै मया दत्ता विद्या काली परा कला ।
चन्द्राचरी सर्वज्ञानभानवी चिन्मयी शुभा ॥
दत्तश्च परमाचारः श्रीमदागमसम्मतः ।
कथितञ्च मया तस्मै कहोल ! पुत्र ! तच्छृणु ॥
अनेनाचारयोगेन गत्वा कालीं दिगम्बरीम् ।
भावयित्वा पूजयेद् यः सर्वाज्ञानविनाशिनीम् ॥
ततस्ते संशया नष्टा भवेयुर्भुवनेश्वरि ! ।
इत्याज्ञप्तः कहोलः स ऋषिर्वेदविशारदः ॥
गत्वा काशीं यजेत् कालीं पञ्चाचारयुतो मुदा ।
तस्य ते संशया विघ्नाः पलायन्ते दिने दिने ॥
ऋषेस्तस्य कहोलस्य वेदमूर्त्तेर्महामतेः ।
ततस्तस्मिन् कृपा जाता महाकाल्या ऋषेः शुभा ॥
तथा च कृपया देवि ! कहोल ऋषिसत्तमः ।
आत्मानं कालिकारूपं परं ब्रह्म सनातनम् ॥
जज्ञौ मायाविनिर्मुक्तमद्वैतं परमं शिवे ! ।
सर्वमायाविनिर्मुक्तो जातः स ऋषिरुत्तमः ॥
सर्वं ब्रह्ममयं दृष्ट्वा जगदेतच्चराचरम् ।
आत्मदेहादिकं किञ्चिज्जानाति न च कर्हिचित् ॥
तेनैव ब्रह्मज्ञानेन देहकर्मादिकं खलु ।
भस्मीभूतं महेशानि ! ऋषेस्तस्य महात्मनः ॥
ब्रह्मभूतः कहोलर्षिर्महाकाल्याः प्रसादतः ।
अत्याचारेषु सर्वेषु रतः स्यात् स्फुरते हि सः ॥
एवमेव महाकाल्या कहोल ऋषिराहृतः ।
चकार दीनं तमृषिं स्वीयदेहे तु कारणे ॥
यं यं भावमुपाश्रित्य यजेत् कालीं हि साधकः ।
प्राप्नुयादचिरादेव महाकाल्याः प्रसादतः ॥

श्रीदेव्युवाच। श्रुतं कहोलचरितं पूर्वं विस्मयकारकम्।
देवासुरमुनीन्द्राणामृषीणां भावितात्मनाम्॥
इदानीं श्रोतुमिच्छामि गङ्गां त्रैलोक्यपावनीम्।
कां विद्यां प्राप्य सा जाता तां वदस्व मयि प्रभो!॥

श्रीईश्वर उवाच।

शृणु देवि! प्रवक्ष्यामि यन्मां त्वं परिपृच्छसि।
श्रवणात् सर्वपापानि नाशमायान्ति नान्यथा॥
मन्त्रमादौ प्रवक्ष्यामि त्रैलोक्यपावनाभिधम्।
महादेव्या महाकाल्या महादेवेन भाषितम्॥
निजवीजं समुद्धृत्य सम्बोधनपदद्वयम्।
पुनश्च निजवीजं हि विद्यायशस्करी परा॥
एनां विद्यां समाराध्य गङ्गा त्रैलोक्यपावनी।
मम जटातटे स्थित्वा जपेद्विद्यामहर्निशम्॥
तेन सा पावनी गङ्गा मोक्षदा सर्वदेहिनाम्।
सिद्धमन्त्रस्वभावेन कालीतेजोऽतिवृंहिता॥
अतः सा पावनी भूत्वा मोक्षदा स्यात् शिवे! सदा।
अतो हि सर्वतीर्थानां सा विद्या सर्वपूजिता॥
माहात्म्यं किमु वक्ष्यामि गङ्गायाश्च सुरेश्वरि!।
यन्नामस्मरणादेव पापिनो मुक्तिभागिनः॥
गङ्गा गङ्गेति यो ब्रूयात् पापिनामपि पातकी।
तेषाञ्च पातकं हित्वा स गच्छेद्वैष्णवीं पुरीम्॥
यानि कानि च पापानि प्रोक्तानि ते महेश्वरि!।
प्रायश्चित्तविहीनानि प्रायश्चित्तपराण्यपि॥
तानि सर्वाणि नश्यन्ति गङ्गाजलाभिषेकतः।
नगरीं यां सदा देवि! शुभा गङ्गा प्रवाहयेत्॥
सर्वं गङ्गा भवत्येव मन्त्रमाहात्म्यतः शिवे!।

यत्र देशे वसेद्गङ्गा स देशः पुण्यभाजनः ॥
पुण्यक्षेत्रं समुद्दिष्टं पवित्रं योजनद्वयम् ।
तत्र यत् क्रियते कर्म गङ्गायां नात्र संशयः ॥
गङ्गायां यत् कृतं देवि ! तदक्षयफलं भवेत् ।
सङ्गमं वा विहीनं वा कथितं शम्भुवल्लभे ! ॥
तत्रस्थाः प्राणिनः सर्वे देवलोकविनिःसृताः ।
भुक्त्वा च विविधान् भोगान् कृत्वा च सुकृतं सदा ॥
अनायासेन यास्यन्ति स्थानं परमदुर्लभम् ।
यत्र गङ्गाप्रवाहोऽस्ति देवर्षिगणसंस्तुते ! ॥
गङ्गायां त्यजति प्राणान् यस्तु पुण्यस्वभावतः ।
ज्ञानतो मोक्षमाप्नोति वैकुण्ठं तत्प्रभावतः ॥
स्वर्लोकाद्या महेशानि ! गङ्गा पापविनिर्जिता ।
गङ्गामुद्दिश्य यो गत्वा पथि प्राणान् विमुञ्चति ॥
विष्णुलोकं बहुगुणं पापी चेत् सोऽपि गच्छति ।
तत्तीरे यस्त्यजेत् प्राणान् न्यायतोऽन्यायतोऽपि वा ॥
सोऽपि स्वर्गमवाप्नोति सर्वसम्भारसंयुतम् ।
यावदस्थीनि गङ्गायां निक्षिप्यन्ते मृतस्य च ॥
तावद्वर्षसहस्राणि स्वर्गलोके महीयते ।
गङ्गाजलसमायोगान्म्रियते यत्र कुत्रचित् ॥
सर्वपापविनिर्मुक्तो विष्णुलोके महीयते ।
गङ्गातीरे चतुर्हस्ते पिण्डं दद्यात् समाहितः ॥
पितॄणां निष्कृतिं कृत्वा विष्णुलोके वसेन्नरः ॥
गङ्गायां तर्पणं देवि ! पुण्यवान् यः समाचरेत् ।
महाहृष्टिर्भवेत् सत्यं पितॄणाञ्च शताब्दिकम् ॥
ऋषीणां देवतानाञ्च तथैव समुदाहृतम् ।
दिवा वा यदि वा रात्रौ सन्ध्यायां वा महानिशि ॥

स्नानं दानं तपो होमं तर्पणं पूजनं शिवे !।
सर्वं कुर्य्यात्तु गङ्गायां कालभेदं न चाचरेत् ॥
कालभेदं समाचर्य्य यदि कर्म त्यजेत् शिवे !।
ततस्तु स्थावरो भूयादरण्ये तदनन्तरे ॥
दावाग्नीनां शिखा तस्य दग्ध्वा मृतन्त्वनेकधा ।
तदन्ते परमेशानि ! चाण्डालो नित्यदुःखितः ॥
जायते सप्तजन्मानि तदन्ते रजको भवेत् ।
जन्मत्रयं महेशानि ! तदन्ते शूद्रयोनिषु ॥
दशजन्म महेशानि ! ततो वैश्यत्वमाप्नुयात् ।
चतुर्जन्मव्यतीते तु क्षत्रियत्वं त्रिजन्मतः ॥
ब्राह्मणत्वं ततः प्राप्य लभेत् पुण्यगतिं नरः ।
गङ्गायां हरते यो हि यत्किञ्चित् परमेश्वरि !॥
तस्य मोहान्धतमसो रौरवान्नास्ति निष्कृतिः ।
आभूतसंप्लवं देवि ! कथितं ते सुरेश्वरि !॥
तस्यास्तीरे च गङ्गायाः प्रतिगृह्णाति यो नरः ।
श्वपचो जायते नित्यं दशजन्मानि कामिनि !॥
ततो दारिद्र्यदोषेण परिभ्रमति मेदिनीम् ।
सप्तजन्म महादेवि ! तदन्ते निष्कृतिं लभेत् ॥
एवन्ते कथितं तस्या मन्त्रमाहात्म्यमुत्तमम् ।
कालिकाया महेशानि ! गङ्गामाहात्म्यकारणम् ॥

इति श्रीयोगिनीतन्त्रे देवीश्वरसंवादे चतुर्विंशति-

साहस्र्ये अष्टादशः पटलः ।

अथ ऊनविंशः पटलः ।

श्रीदेव्युवाच । भो देव ! परमानन्द ! करुणामयवारिधे ! ।
अपारे घोरसंसारे पतितानां महार्णवे ॥
यो मृतः कः समुद्धर्त्ता चास्ते ब्रह्माण्डमण्डले ।
गुरुस्त्वं सर्वसत्त्वानां ब्रह्मादीनां यतो भवान् ॥
पृच्छामि त्वामतो नाथ ! कृपया परया वद ।
श्रुतं सर्वं जगन्नाथ ! त्वन्मुखाम्भोजनिर्गतम् ॥
इदानीं श्रोतुमिच्छामि यत्र मे मानसं गतम् ।
कां विद्यं समुपाश्रित्य करालभैरवः स्वयम् ॥
क्रोधवक्त्रो भैरवोऽभूत् सर्वसत्त्वभयप्रदः ।
विद्रवन्ति भयार्त्ता वै यस्माद्देवासुरादयः ॥
स्वां स्वां श्रियञ्च सत्त्वञ्च पलायन्ते इतस्ततः ।
तां विद्यां श्रोतुमिच्छामि वद नाथ ! दिगम्बर ! ॥
ईश्वर उवाच । अतिगुह्या महाविद्या गुह्याद्गुह्यतरा हि सा ।
ब्रह्मविष्णुशिवादीनां सर्वस्वं जीवनावधि ॥
कथितुं नैव शक्नोमि तां विद्यां परमेश्वरि ! ।
कथ्यते नाममात्रं हि ज्ञायतां कुलभैरवि ! ।
यत्र वै परमेशानि ! सुन्दरी वरदायिनी ॥
विद्या राज्ञी घोरकाली अनिरुद्धसरस्वती ।
गृहीत्वा तां महाविद्यामादिनाथः स भैरवः ॥
महाकालभैरवाद्यैर्यद्गुरोः श्रीमुखाच्छिवे ! ।
प्राप्तिमाचान्महादेवि ! करालभैरवः सदा ॥
मेने स पूतमात्मानं सर्वस्मादधिकं स्वयम् ।
सर्वसंसारनिर्मुक्तो ब्रह्मादिसुरवन्दितः ॥
स तूदयाचले पूर्वं तपस्तेपेऽतिदुष्करम् ।

भूत्वाङ्घ्रिचरणौ देवि ! वर्षाणां नियुतद्वयम् ॥
हिमाचले चैकलक्षं लक्षञ्च मन्दराचले ।
कनकाश्रमे तथा लक्षमुड्डीयाने द्विलक्षकम् ॥
पञ्चविंशतिलक्षञ्च तथा जालन्धरे शिवे ! ।
पुण्यशैले तथा लक्षं पञ्चविंशतिमानतः ॥
पञ्चविंशतिलक्षञ्च कामाख्यायोनिमण्डले ।
एवं तप्तं तपोह्येवं कोटिवर्षं सुदुष्करम् ॥
कष्टेन महता देवि ! करालभैरवेण ते ।
तथापि तं प्रति प्रीता माभूत् काली कदाचन ॥
ततः स भैरवो देवि ! गुरोरन्तिकमन्वगात् ।
निवेदयामास तथा वृत्तान्तं तपसः शिवे ! ॥
श्रुत्वा श्रीमदादिनाथो महाकालो महेश्वरः ।
मन्नाथः परमेशानि ! भावनावशतां गतः ॥
विना च परमाचारं न हि सिद्धिर्भवेत् किल ।
कथं त्वां परमाचारं कथयामि समासतः ॥
स एव परमाचारः कालीहृदयसङ्गतः ।
गुह्यातिगुह्यगुह्येति ब्रह्मादीनामगोचरः ॥
परो मुक्तिप्रदः साक्षात् सर्वसिद्धिवरप्रदः ।
कालीप्रत्यक्षवीजोऽयं मम सर्वस्व एव च ॥
केवलं कथितं सर्वं शिवेन मत्समो भवेत् ।
सत्त्वशान्तो महायोगी गोपितस्तेन यत्नतः ॥
आचारार्थं स्वीयपादं कालरुद्रे समर्पितम् ।
मम स्वस्वपदं शम्भुर्निरुद्धे गोऽप्यचेतसः ॥
परं सङ्गोप्यते नैव तथाचारं समाचरेत् ।
सदाचारस्य निगूढं तत्त्वज्ञानं महामतिः ॥
सर्वेषामधिपो भूतो विश्ववन्द्यः सदाशिवः ।

अजरामरतां प्राप्तो महाशान्तः परेश्वरः ॥
तदाचाररतं नित्यं शान्तं दृष्ट्वा मया पुनः ।
पदं मदीयं गुरुतां दत्त्वा तस्मै समासतः ॥
अहन्तु तस्य देहे वै तिष्ठामि सर्वदा मुदा ।
सर्वेषान्तु सहस्रारे तिष्ठामि कमले परे ॥
शिवस्य सकलं प्राप्य तिष्ठामि सर्वदा ह्यहम् ।
शिवः शिवोऽहन्तु शिवो न भेदः कुत्रचित् सदा ॥
ब्रह्मविष्णुशिवादीनां गुरुरत्र ततः शिवः ।
सोऽपि शान्तो महायोगी आचारक्षम एव सः ॥
नान्यः कश्चित् क्षमः क्वापि तदाचारः कदाचन ।
शिवस्य कृपया चैव केवलं साधकः क्षमः ॥
क्षमा गिरिसुता देवी नान्यः कश्चित् कदाचन ।
ऊर्द्ध्वतोऽयं भीमकर्मा करालभैरवः सदा ॥
तमेव परमाचारं विद्यान्नास्य तमो भवेत् ।
यथा मे कालिकाराध्या तथाचारोऽयमेव हि ॥
विद्याराज्ञीं समाराध्यां दातुं योग्यः कदाप्यहम् ।
योग्यो न परमाचारं दातुं कालीहृदङ्गमम् ॥
इति सम्भाव्य मन्नाथः करालभैरवं प्रति ।
आज्ञापयामास गच्छ पुत्रि ! त्रिलोचनं प्रति ॥
देवी शिवं समारुह्य तथापि करुणामयि ! ।
याता मातुः कालिकायास्ततः स भैरवः स्वयम् ॥
त्यक्त्वा तपस्तु सकलं भावयन्नन्तरात्मना ।
यद्यज्जप्तं तपो ह्येवं यातु यातु वृथा हि तत् ॥
मम भाग्यवशात् सा हि गुर्वाज्ञा विफला भवेत् ।
अतः शरीरं त्यक्ष्यामि न वक्ष्यामि कदाचन ॥
प्रतिज्ञामीदृशीं कृत्वा देहं सन्त्यक्तुमुद्यतः ।

तदाकाशसमुद्भूता वाणी सेयं समीरिता ॥
श्रुत्वा तेन करालेन भैरवेण महात्मना ।
तामाज्ञां कथयामीशे ! श्रुत्वा कर्णे तवांशजम् ॥
गुर्वाज्ञा विफला यातु तव वै भैरवोत्तमः ।
विनाचारं तपस्तप्तं त्वयात्मज्ञानतः सदा ॥
कथं तुभ्यं महासिद्धिं दर्शनं वा ददाम्यहम् ।
पुनर्याहि महाकालभैरवं भवनाशनम् ॥
आदिनाथं तव गुरुं वृत्तान्तं कथयेद्दृशम् ।
तदावश्यं महाचारं तुभ्यं स तु प्रदास्यति ॥
तेनैवाचारतो देव ! ममाराधनसुव्रत ! ।
अचिरात्तं प्रदास्यामि यद्यन्मसि वर्त्तते ॥
कालीतारामहामन्त्रं शुभं मन्त्रञ्च वै ध्रुवम् ।
कुलाचारं विना यो हि जपेत् स नारकी भवेत् ॥
कथं सिद्धिर्भवेत् तस्य मुक्तिस्तिष्ठति दूरतः ।
एवमाज्ञां महाकाल्या लब्ध्वा स भैरवोत्तमः ॥
पुनर्गत्वा च श्रीनाथं आदिनाथं महाप्रभुम् ।
महाकालं महादेवं शून्यरूपं जगद्गुरुम् ॥
निवेदयामास तदा यद्यद्वाक्यं समीरितम् ।
जाता कृपा महाकाल्याः करालभैरवोऽधुना ॥
इति मत्वा निन्दितः स गुरुणा शून्यरूपिणा ।
तदा नियमपूर्वं हि करालभैरवोऽवदत् ॥
कुलाचारं परं गुप्तं कालीतन्त्रोदितं हि यत् ।
महाकालो जगन्नाथोऽभिषिक्तं तच्चकार ह ॥
शाक्ताभिषेकविधिना पूर्णाभिषेकतस्तथा ।
ददौ नाम करालाय क्रोधवक्त्रोऽतिविश्रुतः ॥
दिव्यभावं श्रावयित्वा वीरभावं तदन्तरम् ।

समदिरामतस्थमुद्रान्तु पात्रं कारणपूरितम् ॥
ददौ तस्मै महाकालः शून्यरूपी गुरुः स्वयम् ।
तदानीं शुशुभे सर्वं जगदेतच्चराचरम् ॥
क्रोधवक्त्रोऽपि नत्वा श्रीमहाकालीपदाम्बुजम् ।
महाकालो तदा देवि ! स्मृत्वा श्रीगुरुपादुकाम् ॥
गुर्वाज्ञया भावयुक्तः स्वीकृत्य कारणं परम् ।
नष्टपापः स्थिरमनाः परमानन्दपूरितः ॥
आनन्दजलधौ देवि ! निमग्नः क्रोधभूपतिः ।
शक्तिकोपे महेशानि ! भूयो नत्वा गुरोः पदम् ॥
अस्तौषीत् परया भक्त्या संसारसागरे स्थितः ॥

क्रोधवक्त्रभैरव उवाच ।

नमामि नाथं सुरकल्पवृक्षं गुरुं चिदानन्दमहावतारम् ।
नित्यं हि विज्ञानमानन्दरूपं परात्परं ब्रह्म शिवस्वरूपम् ॥
जगन्निवासं जगदादिमूलमज्ञातमेकं परमात्मसंज्ञम् ।
तेजोमयं निष्कलतत्त्वभावं क्रियाविहीनं परमं निरञ्जनम् ॥
प्रपञ्चहीनं परिपूर्णभावमाद्यन्तशून्यं प्रकृतेः परस्तात् ।
अरूपरूपं स्फुटमेव सत्यं कृपावतारं खलु शून्यरूपम् ॥
अनादिसंसारविनाशवीजं परं पवित्रञ्च ह्यगोचरं गुरुम् ।
शिवाह्वदः केवलनाममन्त्रात् प्रकाशभावं प्रणमामि नित्यम् ॥
अणोरणीयान्महतो महीयान् प्रपश्यति त्वादिविदेव वर्य्यः ।
यज्ज्ञानजं लोचनमेव सत्यं स च प्रविष्टस्त्वयि नाथ ! सत्यम् ॥
असारसंसारसमुद्रतारं वन्देऽहमाद्यं पुरुषं पुराणम् ।
तमेव कालीपरमार्थवीजं नमाम्यहं तच्चरणारविन्दम् ॥
स्तोत्रेणानेन यो भक्त्या त्वां स्तोष्यति च साधकः ।
प्रातर्मध्याह्नसायाह्ने तेषां मुक्तिप्रदा भव ॥

महाकालभैरव उवाच।

स्तोत्रेणानेन सन्तुष्ट: सदाहं तव पुत्रक।।
गच्छ शीघ्रं योनिपीठं देवीशिखरमाश्रित:॥
भज कालीं कुलाचारभाववेश्यापरायण:।
अचिराद्वाञ्छिता सिद्धिर्भविता ते न संशय:॥
वेश्यामध्यगतं वीरं कदा पश्यामि साधकम्।
एवं वदति सा काली तस्माद्वेश्यापरो भव॥
मन्त्राचारे हि सर्वत्र नि हि दोष: कदाचन।
तस्माद्भ्रान्तिं परित्यज्य कुलधर्मं समाश्रय॥
भ्रान्तिस्तत्र न कर्त्तव्या सिद्धिहानिर्यतो भवेत्।
विशुद्धचित्तो भूयाच्चेत् सिद्धि: स्यादपरार्द्धगा॥

ईश्वर उवाच। ततो नत्वा महाकालीं गुरुं बहुविधं मुदा।
योनिपीठं समासाद्य देवीशिखरमाश्रित:॥
उर्वशीमेनकारम्भापञ्चचूड़ातिलोत्तमा:।
पञ्चवेश्यारतो भूत्वा कुलाचारपरायण:॥
भावशुद्धां महाविद्यां जजाप क्रोधभूपति:।
विद्याराज्ञीं घोरकालीं अनिरुद्धसरस्वतीम्॥
अष्टोत्तरशतेनैव तस्य प्रत्यक्षतामियात्।
काली करालवदना तेजोरूपा सनातनी॥
तेजसा परिसञ्छाद्य ब्रह्माण्डमण्डलं सदा।
तद्दृष्ट्वा सुमहत्तेजो भैरवो भयविह्वल:॥
अनुपायो मूर्च्छित: सन् पपात पर्वताद् भुवि।
तत: काली जगन्माता कृपासागरसञ्चया॥
आश्वास्योवाच तं क्रोधं वाचाऽमृतसमानया॥

श्रीकाल्युवाच। समुत्थाय ततो देवीं भैरव: पुलकान्वित:।
अस्तौषीत् परया भक्त्या नानाविधविधानत:॥

मुहुर्मुहुर्ननामासौ ततः कालीमुवाच ह ॥
क्रोधवक्त्र उवाच। परं ब्रह्म परं धाम परमात्मा सनातनी।
मनोऽभीष्टं प्रयच्छ त्वं सर्वदा मे मनोमयि ! ॥
श्रीकाल्युवाच। ब्रह्मविष्ण्वादिकानाञ्च ब्रह्माण्डेतरवासिनाम्।
नित्यं निग्राहकस्त्वं हि भव भैरवसत्तम ! ॥
कुलाचारेण यः कोऽपि मामर्चयति पुत्त्रक ! ।
स मे पुत्त्रत्वमागच्छेत् सत्यं सत्यं न संशयः ॥
गृह्णातु वक्त्रं दास्यामि ब्रह्माण्डभयदो भवान्।
तव वक्त्रं कालरूपं सर्वनिग्राहकं परम् ॥

ईश्वर उवाच।

वक्त्रं दत्त्वा भैरवाय क्षणात् शान्तिमगात् शिवा।
महाकालो भैरवोऽपि वज्रपाणिर्बभूव सः ॥
करालभैरवं रूपं क्रोधवक्त्रो बभूव सः।
वज्रपाणिर्महाकालीप्रसादादीश्वराभिधः ॥
इति श्रीयोगिनीतन्त्रे पूर्वार्द्धं कथितं मया।
गोपनीयं सदा भद्रे ! योनिं परनरे यथा ॥

इति श्रीयोगिनीतन्त्रे देवीश्वरसंवादे चतुर्विंशति-
साहस्रे ऊनविंशतिः पटलः।

इति श्रीयोगिनीतन्त्रे पूर्वखण्डं समाप्तम्।

उत्तरखण्डम् ।

प्रथमः पटलः ।

ओं कामाख्यायै नमः ।

प्रधानसाधारविकल्पसत्त्वा स्वभावभावाद्भुवनत्रयस्य ।
सा विद्यया व्यक्तमपीह माया ज्योतिःपरा पातु जगन्ति नित्यम्॥

श्रीदेव्युवाच । उड्डीयानादिकं पीठं श्रुतं मे प्राणवल्लभ ! ।
इदानीं श्रोतुमिच्छामि कामरूपस्य निर्णयम् ॥
यदुक्तं मे त्वया नाथ ! घोरपापविनाशकम् ।
कामाख्यासंज्ञकं पीठं व्यक्तं कलियुगे गतम् ॥
कलिसर्पस्य दंष्ट्राणां विचित्राणां चिकित्सकम् ।
भेषजं परमं देव ! किं मे तत् कथ्यतां विभो ! ॥

श्रीभगवानुवाच । उड्डीयानस्य देवेशि ! प्रादुर्भावः कृते युगे ।
पूर्णशैलस्य सम्भूतिस्त्रेतायुगमुखेऽभवत् ॥
द्वापरे जालशैलस्य कामाख्यस्य कलौ युगे ।
घोरस्य कलिपापस्य विनाशाय महेश्वरि ! ॥
प्रतिवर्षे तव पीठमुपपीठं युगं युगम् ।
त्रयं त्रयं महाक्षेत्रं पुण्यारण्यं त्रयं त्रयम् ॥
प्रतिपीठे महादेवः प्रतिपीठे चतुर्भुजः ।
प्रतिपीठे स्थिता गङ्गा पार्वती प्रतिपीठके ॥
प्रतिपीठं प्रतिक्षेत्रं पुण्यारण्यन्तु पीठके ।
कलौ गृहात् सुदूरे च तीर्थबुद्धिः प्रजायते ॥
किन्तु तीर्थानि वै सन्ति भावनासिद्धिमन्दिरे ।

प्रतिपीठे पृथग्धर्म आचारश्च पृथक् पृथक् ॥
देशे देशे कुलाचारो न हन्तव्यश्च हेतुभिः ।
पृथक् पूजा पृथङ् मन्त्रो मर्त्ये च तारपीठकम् ॥
भद्रपीठं दाक्षिणात्ये मध्यदेशस्य पार्वति ! ।
जालन्धरन्तु पाश्चात्ये पूर्णपीठन्तु पूर्वतः ॥
ऐशान्यां पूर्वभागे च कामरूपं च जानीहि ।
जालन्धरन्तु वायव्ये कोल्लापूरन्तु उत्तरे ॥
ईशाने चैव विहारं महेन्द्रं उत्तरे कियत् ।
श्रीहट्टमपि पूर्वे च उपपीठान्यथो शृणु ॥
नौकायानेन देवेशि ! अष्टषष्टिस्तु योजनैः ।
प्रस्तारे ओड्रपीठस्य आयामेऽति गुणं भवेत् ॥
शकटाकारकं पीठं चतुष्कोणं सपीठकम् ।
चतुर्द्वारसमायुक्तं वायुविम्बेन चिह्नितम् ॥
तीर्थकोटिद्वययुतं सिन्धुभद्रकपीठकम् ।
यत्र सोमेश्वरं लिङ्गमादिपीठं तथा परम् ॥
कामधेनुश्च यत्रैव यत्र चक्रेश्वरो हरः ।
क्षेत्रं विरजःसंज्ञञ्च एकाम्रं तदनन्तरम् ॥
भास्करस्य महाक्षेत्रं यत्र मातङ्गशङ्करः ।
कुशस्थली महापुण्या दन्तकस्य वनं तथा ॥
सुमन्तश्च तथारण्यं शिवयूपश्च पूर्वतः ।
पश्चिमे धेनुकारण्ये उत्तरे तु गयाशिरः ॥
दक्षिणे चन्द्रभागा च ओड्रपीठं वरानने ! ।
त्रिंशद्योजनविस्तीर्णमायामे शतयोजनम् ॥
यत्र कामेश्वरी देवी योनिमुद्रास्वरूपिणी ।
भूगोलपीठकं नाम यत्र वै गोलकेश्वरः ॥
धर्मपीठं महापीठं यत्र कामेश्वरो हरः ।

अविमुक्तं महाक्षेत्रं हंसप्रपतनं तथा ॥
ब्रह्मयूपस्तु तत्रैव यत्र श्वेतवटः स्थितः ।
कुरुक्षेत्रन्तु तत्रैव यत्र मायात्मना नदी ॥
अयोध्यारण्यकं पुण्यं धर्मारण्यं तथा परम् ।
कचात्मकं महारण्यं यत्र पातालशङ्करः ॥
गण्डकी च नदी पूर्वे विष्णुयूपश्च पश्चिमे ।
दक्षिणे वृषभं लिङ्गं उत्तरे कदलीवनम् ॥
एतन्मध्यतमं पीठं चापाकारं मनोरमे ! ।
आननाभं तथा पद्मं रक्तवर्णं विभावयेत् ॥
एकादशशतायामं योजनानां तथा नव ।
अशीत्यष्टौ च प्रस्तारे त्रिकोणं पीठमुत्तमम् ॥
प्रवरं पीठकं तत्र पीठं चाशोकमेव च ।
सीतायाश्च महाक्षेत्रं अगस्त्यस्याश्रमस्तथा ॥
हरस्य परमं क्षेत्रं क्षेत्रत्रयमिदं प्रिये ! ।
माधवारण्यकं क्षेत्रं हरस्यारण्यकं तथा ॥
अरण्यञ्चैव भर्गस्य एतदारण्यकं त्रयम् ।
उत्तरे ब्रह्मक्षेत्रञ्च दक्षिणे सागरावधि ॥
पूर्वे तूदयकूटञ्च पश्चिमे श्रीपर्वतं प्रिये ! ।
एतन्मध्यतमं पीठं पुण्याख्यं नाम नामतः ॥
पादात् पादान्तरं यावन्मध्यहस्तद्वयान्तरम् ।
शिवरात्रौ च गमनं सौरमासेन मासकम् ॥
कामरूपं विजानीयात् षट्कोणात्मप्रगर्भकम् ।
तत् पुण्यं तत्समं वेत्थ नवव्यूहं त्रिमण्डलम् ॥
पर्वतैर्दशभिर्युक्तं वेदिमध्यं प्रकीर्त्तितम् ।
मध्यपीठं महापीठं यत्र कामेश्वरोऽभवत् ॥
तत्र पीठे हि देवेशि ! यत्र चम्पावती नदी ।

कन्याश्रमं महाक्षेत्रं यत्र रुद्रपदद्वयम् ॥
एकाम्रकं परं क्षेत्रं यत्र नागाङ्कशङ्करः ।
मानसं क्षेत्रकञ्चैव यत्र विश्वेश्वरो हरः ॥
नाटकारण्यकञ्चैव चम्पकारण्यकं तथा ।
पिच्छिला वा दक्षिणतो गौतमस्य महाबलम् ॥
पूर्वे स्वर्णनदीं यावत् करतोया च पश्चिमे ।
दक्षिणे मन्दशैलश्च उत्तरे विहगाचलः ॥
प्रस्तारे चैव मासार्द्धं योजनानाञ्च पञ्चकम् ।
अयुतत्रयञ्च त्रिस्रोतः पञ्चोद्भवं तथा दश ॥
अष्टकोणञ्च सौषारं यत्र दिक्करवासिनी ।
तस्मिन् वसति सा देवी ज्ञानाद्ध्यानाद्भवोऽपि वा ॥
तेऽपि देव्याः प्रसादेन स्थितिं गच्छन्ति नान्यथा ।
अथाद्यं मानवं पीठं सौमाराख्यान्तु कथ्यते ॥
वसत्यजेयं प्रत्यक्षं यत्र दिक्करवासिनी ।
दिक्करस्य च वायव्ये नीलपीठं सुदुर्लभम् ॥
यत्र कामेश्वरी देवी योनिमुद्रास्वरूपिणी ।
पारिजातं महाक्षेत्रं यत्रादित्यस्तु शङ्करः ॥
कौषेयस्य पुरं क्षेत्रं तथा चामरकण्टकम् ।
आरण्यमाश्विनञ्चैव गौतमारण्यकं शिवम् ॥
अरण्यं शिविनाथस्य शृणु पीठावधि प्रिये ! ।
पूर्वे सौरशिलारण्यं पश्चिमे स्वर्णदी शुभा ॥
दक्षिणे ब्रह्मयूपस्तु उत्तरे मानसं सरः ।
एतन्मध्यगतं पीठं भुक्तिमुक्तिप्रदायकम् ॥
सौमाराख्यं महापीठं षट्कोणन्तु त्रिमङ्गलम् ।
सहस्रयोजनव्यासं हयताम्रञ्च पञ्चमम् ॥
प्रस्तारे तु व्यासहीनं कोल्लपीठं प्रकीर्त्तितम् ।

सौमाराख्यं महापीठं शिवतल्लञ्च पीठकम् ॥
वक्रग्रेवेश्वरं लिङ्गं यत्र वै कमला शिला ।
केदारक्षेत्रं प्रथमं यत्र केदारशङ्करः ॥
यत्र पिण्डकरं क्षेत्रमरुणो यत्र तिष्ठति ।
दुर्गारण्यं सौमारण्यं भद्रारण्यं तथैव च ॥
अशीतियोजनं क्षेत्रं षट्त्रिंशद्योजनायुतम् ।
चौहाराख्यं महाक्षेत्रं यत्र गत्वा न शोचति ॥
ब्रह्मक्षेत्रं कलाक्षेत्रं रघुक्षेत्रं तथैव च ।
नन्दनं पारिजातञ्च शिवारण्यं तथा परम् ॥
देशारण्यं ततः प्रोक्तं सप्तपीठावधि प्रिये ! ।
पूर्वे तु हीरिका नाम नदी पुण्यतमा स्मृता ॥
पश्चिमे नाथकं लिङ्गमुत्तरे किलिपर्वतः ।
दक्षिणे नाथहृत्तस्तु पीठन्तु परिकीर्त्तितम् ॥
गोयानेन त्रिभिर्मासैस्तथा चैव दिनत्रयम् ।
मासहीनन्तु प्रस्तारे त्रिपीठं नाम नामतः ॥
वाराही प्रथमं पीठं द्वितीयं कोलपीठकम् ।
कुमारक्षेत्रं प्रथमं द्वितीयं नन्दनाह्वयम् ॥
तृतीयं शाश्वतीक्षेत्रं मातङ्गं प्रथमं वनम् ।
सिद्धारण्यं द्वितीयन्तु तृतीयं विपुलं वनम् ॥
कोटिकोटियुतं लिङ्गं कोटिकोटिगलैर्वृतम् ।
पञ्चतीर्थं भवेत् पूर्वे पश्चिमे धनदा नदी ॥
पत्राख्या दक्षिणे चैव उत्तरे कुरुवकावनम् ।
एतन्मध्यगतं देवि ! श्रीपीठं नाम नामतः ॥

इति योगिनीतन्त्रे सर्वतन्त्रोत्तमे द्वाविंशतिसाहस्रे कामरूप-
पीठाधिकारे प्रथमतमे द्वितीयभागे प्रथमः पटलः ।

अथ द्वितीयः पटलः ।

श्रीभगवानुवाच ।

नित्यं निर्वर्त्त्य स्वगृहे पितॄन् नान्दीमुखानपि ।
अभ्यर्च्य विधिवद्भक्त्या पश्चाद् यात्रां समाचरेत् ॥
उत्तरस्थगते शुक्रे सानुकूले शुभे ग्रहे ।
गुरुपित्रोरनुज्ञाप्य ब्राह्मणानां विशेषतः ॥
भोजयित्वा द्विजान् सप्त ततो यात्रां समाचरेत् ।
सिंहे धनुषि मेषे च न गच्छेत् पूर्वपीठकम् ॥
घटे च मन्मथे कुम्भे न गच्छेत् पश्चिमं बुधः ।
वृषेऽङ्गनायां मकरे न गच्छेद्दक्षिणालयम् ।
कर्कटे कीटमीने च न गच्छेदुत्तरं सुधीः ॥
चापे गव्यङ्गनायाञ्च न गच्छेद्वह्निकोणकम् ।
मकरे कर्कटे मीने नैरृत्यां परिवर्जयेत् ॥
वायव्यां कुम्भमेषे च चापे चैव विवर्जयेद् ।
सिंहे मीने कर्कटे च ऐशान्यां तु न चिन्तयेत् ॥
एतत् स्थूलं विजानीयाद् योगिनीं शृणु शङ्करि ! ।
न गच्छेन्मन्दवारे च पूर्वदेशं मम प्रिये ! ॥
पश्चिमं सवितुर्वारे दक्षिणं बुधवासरे ।
कुजवारे तथा नादयन्त्रे चापि दिशं भजेत् ॥
जीववारे तु नैरृत्यां वायव्यां भृगुवासरे ।
शनिवारे तथैशान्यां सोमे चैव विशेषतः ॥
पूर्वदेशं महेशानि ! प्रतिपन्नवमी तथा ।
न गच्छेद्यात्रिको यात्रां योगिनी सम्मुखा यतः ॥
चतुर्दशी तथा षष्ठी पश्चिमन्तु विवर्जयेत् ।
त्रयोदशी पञ्चमी च न गच्छेद्दक्षिणां दिशम् ॥

द्वितीयां दशमीं चैव वर्जयेद्राक्षसीं दिशम्।
पूर्णिमा सप्तमी चैव वायव्यां सर्वथा त्यजेत्॥
न गच्छेच्चैव ऐशान्याममावास्यां तथाष्टमीम्।
विष्कम्भः प्रीतिरायुष्मान् प्रतिपत्सु विवर्जयेत्॥
सौभाग्यं शोभनञ्चैव द्वितीयाञ्चातिगण्डके।
सुकर्मा च धृतिश्चैव तृतीयायां विजानीहि॥
गण्डो वृद्धिर्ध्रुवश्चैव व्याघातश्च तथैव च।
चतुर्थ्यां वर्जयेद्देवि! पञ्चम्यां हर्षणं तथा॥
वज्रं सिद्धिव्यतीपातौ षष्ठ्यां जानीहि शङ्करि!।
वरीयान् परिघश्चैव सप्तम्यां परिवर्जयेत्॥
शिवः सिद्धिश्च साध्यञ्च वर्जयेदष्टमीतिथौ।
नवम्यां शुभशुक्रञ्च दशम्यां ब्रह्म एव वा॥
एकादश्यां तथैन्द्रस्तु द्वादश्यां वैधृतिं त्यजेत्।
उत्तरात्रयं त्रयोदश्यां विशाखान्तु चतुर्दशीम्॥
मघार्द्रां भरणीञ्चैव पौर्णमास्यां विवर्जयेत्।
प्रतिपत्कृत्तिकायान्तु द्वितीयायान्तु ज्येष्ठके॥
न यात्रिके च नक्षत्रे प्रस्थाने न कदाचन।
यात्रायान्तु न दुष्टं स्यात् करणस्य विचिन्तनम्॥
जन्ममासे जन्मदिने जन्मनक्षत्रके तथा।
अष्टम्याञ्च नवम्याञ्च सदाकालेषु वर्जयेत्॥
आपत्काले च यात्रायामूषासम्यञ्च पश्चिमे।
गोधूलिसमये चैव पूर्वदेशे विजानीहि॥
मध्याह्ने दक्षिणे चैव अपराह्ने तथोत्तरे।
ऐशान्याञ्च तथा रात्रौ नैरृत्यां सन्ध्ययोर्द्वयोः॥
मध्यन्दिने तथाग्नेये वायव्यां प्रातरेव हि।
वारुणादिषु योगेषु यथाकाले समाचरेत्॥

विना जातं दिनं तत्र अष्टमी नवमीं विना ।
प्राचीदिशं समागच्छेद् यात्रां कुर्य्यादुदङ्मुखः ॥
उत्तरे दक्षिणामुखो यात्रां कुर्य्यात् सुसिद्धये ।
कुसुमं यावकः शङ्खो भेरी वाद्यञ्च भूमिपः ॥
गावः शतं रथं यानं दक्षिणे शुभगाः स्मृताः ।
सिद्धान्नं मांसपिण्डञ्च भक्तं भाजनजं गुरु ॥
मत्स्यपिण्डं परा हाराः सर्वाश्च दक्षिणे शुभाः ।
कन्याः वै मिथुनं वेश्या पूर्णकुम्भाः स्त्रियस्तथा ॥
चरन्तः पशुखगाश्च वामतः शुभकारकाः ।
अग्रे दधि फलं यात्रा शुभदा परिकीर्त्तिता ॥
तथा क्रौञ्चमयूराश्च युग्मं गच्छन्ति गच्छतः ।
तदा सिद्धिं विजानीयादन्यथा विघ्नमादिशेत् ॥
गृध्राः श्येनाश्च चिल्लाश्च पार्श्वं गच्छन्ति वै यदा ।
न कुर्य्याद् यात्रिको यात्रां वायसे वनसंस्थिते ॥
च्युतं निष्ठुरसम्भाषं गृहगोधारुतं तथा ।
क्रन्दनं कलहं श्रुत्वा न गच्छेत्तु कदाचन ।
गुर्वादित्ये गुरौ सिंहे शुक्रे चास्तमुपागते ॥
देवतादर्शनं यात्रां प्रतिष्ठां नैव कारयेत् ।
व्रतारम्भं तथोद्वाहं गृहं प्रासादिकं तथा ॥
वापीकूपतड़ागानि यन्त्रस्यारम्भकं तथा ।
नारोपयेद् यज्ञवृक्षमारामकरणं तथा ॥
देवव्रतं वृषोत्सर्गं यज्ञस्यारम्भकं तथा ।
कर्णवेधोपनयने स्त्रीणामानयनं त्यजेत् ॥
प्राग्दर्शनञ्च देवानां न कुर्वीत कदाचन ।
प्रागारम्भं व्रतानाञ्च यात्रां संवत्सरात् परम् ॥
तथा व्यालव्रतं यत्तु तथा नित्यं व्रजेच्च वै ।

न कालनियमस्तत्र तथा च रोहिणीव्रते॥
शिवरात्रिव्रते चैव प्रयागस्य च मुण्डने।
देशदाहे ग्रहाणाञ्च विशुभं कर्म आरभेत्॥
उज्जयिन्यामर्कशुद्धिर्मध्यदेशे विधोः शुभम्।
कुजशुद्धिस्तु नेपालेऽवन्त्यां च बुधस्य हि॥
गौड़े चान्ध्रे गुरोः शुद्धिः कामरूपे भृगोः स्मृता।
मथुरायामर्कजस्य राहोरङ्गे च वङ्गके॥
धनुर्वाणं तथा तद्वद् ओड्रपीठे व्यवस्थितम्।
जालन्धरे चतुर्हस्तं ऊर्मिकं हस्तपूर्णके॥
पंक्तिहस्तं कामरूपे सौमारे तारहस्तकम्।
कोल्लपीठे तुर्य्यहस्तं चौहारे द्विगुणं भवेत्॥
महेन्द्रे तु कलाहस्तं श्रीहट्टे वह्निहस्तकम्।
उपपीठे च पाताले हस्तमेव विजानीहि॥
रत्नपीठे तु षड्हस्तं लौहित्यां चैव उत्तरे।
बलदेवाश्रमे चैव तथा कन्याश्रमेषु च॥
न योगिनीमुखं गच्छेत् स्नानं ध्यानं विवर्जयेत्।
यानेनार्द्धफलं विद्यात्तथा च्छत्रे च पादुके॥
तीर्थयात्राफलं हन्ति सुरतैर्मांसभक्षणैः।
तीर्थे प्राप्यानुषङ्गेन तीर्थस्य च फलं लभेत्॥
स्नानेन तु तदाप्नोति स्नानहीने तु निष्फलम्।
तीर्थे चाचमनं वर्जेत् पादप्रक्षालनं तथा॥
शौचमाचमनञ्चैव अन्यतीर्थप्रशंसनम्।
अन्यतीर्थरतिञ्चैव सदा तीर्थेषु दूषणम्॥
न मलं निर्वपेत्तीर्थे न केशं निर्वपेत् क्वचित्।
न तीर्थतीरे निवसेद् दक्षिणे तु विशेषतः॥
दक्षिणे चैव तीर्थस्य न स्नायाद्धि कदाचन।

तीर्थं तथोत्तरे भागे अष्टकोटिसहस्रश: ॥
वसन्ति तत्र तीर्थानि पुण्यान्यायतनानि च ।
दक्षिणे कुण्डतीर्थस्य सरितां वामत: प्रिये ! ॥
तीर्थेषु ब्राह्मणं नैव परीक्षेच्च कदाचन ।
यत्तीर्थं यस्य देवस्य तत्तीर्थस्थद्विजा: सदा ॥
वन्दितव्याश्च पूज्याश्च तेषां वाक्येन पूतता ।
न कालनियम: श्राद्धे पिण्डे तु वर्जयेन्मधु ॥
तीर्थं गत्वा न दूरात्तु वसेत्तीरे विचक्षण: ।
ग्रहणे चैव तीर्थे च तथा च पितृवासरे ॥
यज्ञारम्भे समाप्तौ च भूकम्पे तु विशेषत: ।
ब्राह्मणे दानयोग्यं न श्राद्धयोग्यं न तद्भवेत् ॥
न दीयते महादानं निष्फलं परिकीर्त्तितम् ।
नावाहनं च चार्घ्यञ्च न चाग्नौकरणं तथा ॥
पवित्रसेचनेनैव तथाक्षय्यावधारणम् ।
तीर्थश्राद्धे न कुर्वीत वास:सूत्रप्रदापनम् ॥
तत: सप्तदशान् पिण्डान् पिण्डकालेषु निर्वपेत् ।
श्राद्धं समाप्य तत् पिण्डं न दद्याच्च कदाचन ॥
मज्जनं प्रतिकुण्डे च प्रतितीर्थे च मज्जनम् ।
दिवसे दश चाष्टौ च पञ्च सप्तत्रयं तथा ॥
अत: कृत्वाभिषेकञ्च तीर्थे च प्रतिपूजयेत् ।
लौहित्ये चैव शोणे च गयायां विरजेषु च ॥
कन्याश्रमेष्वगस्त्ये च पारिपात्रे तथैव च ।
सुकुराङ्गे च एकाम्रे मण्डलञ्च विवर्जयेत् ॥
पापराशिस्तु केशाग्रे प्रपलाय्य प्रतिष्ठति ।
तस्मात् शिखां परित्यज्य कर्णमूले च स्थापयेत् ॥
घाटान्ते चैव मासान्ते षण्मासान्ते च वत्सरे ।

अष्टावष्टौ समान्ते वा मुण्डनञ्च पुनश्चरेत् ॥
ततः कुशमयं विप्रं कृत्वा तीर्थे निधाय च।
उत्तराभिमुखो भूत्वा बान्धवान् स्नापयेद्‌बुधः ॥
कुशो निद्विति मन्त्रेण त्रिवारं स्नापयेत् कुशैः।
तत्तीर्थस्य तुरीयाङ्गं फलं प्राप्य न संशयः ॥
गृहीत्वा तु द्विजक्रोड़े नामोच्चारणमज्जनम्।
कृत्वा तीर्थफलस्यार्द्धं ब्राह्मणस्य विधीयते ॥
वरं विक्रयणं मातुर्वरं विक्रयणं पितुः।
न स्नापयेच्चासगोत्रं न तीर्थे तु प्रतिग्रहम् ॥
सिद्धक्षेत्रेषु तीर्थेषु नाशीः कुर्य्यात् परस्य च।
न गृह्णीयादितोऽन्यत्र तिलं गाञ्च विशेषतः ॥
न गृह्णीयाच्च शूद्रस्य यज्ञे पात्री भवेत् क्वचित्।
यस्य यज्ञस्य यत् पात्रं तस्य पापेन लिप्यति ॥
तस्मात् सर्वप्रयत्नेन परयज्ञं विवर्जयेत् ॥

इति योगिनीतन्त्रे द्वाविंशतिसाहस्रे कामरूपाधिकारे
द्वितीयभागे द्वितीयः पटलः।

अथ तृतीयः पटलः।

श्रीभगवानुवाच। कामरूपं महापीठं गुह्याद्‌गुह्यतमं परम्।
सदासौ संस्थितस्तत्र पार्वत्या सह शङ्करः ॥
नचिरात् पूजितो देवस्तस्मिन् पीठे प्रसीदति।
तत्तु पीठं प्रवक्ष्यामि शृणु त्वं साम्प्रतं प्रिये ! ॥
नदीशतं यात्राकालं लिङ्गकोटिगणावृतम्।
वायुकूटस्य चरमे धनुर्हस्तप्रमाणतः ॥

वायुरूपः स्थितश्चन्द्रस्तस्मान्निःसृत्य मारुतः।
तन्तु वायुं समभ्यर्च्य वायुलोकमवाप्नुयात्।
पूर्वं वायुगिरेः शैलश्चन्द्रकूट इति स्मृतः॥
मध्यतश्चैव गोदन्त ऋष्यक्रान्तस्तु दक्षिणे।
माधवश्चन्द्रकूटे तु गोदन्ते च जटाधरः॥
षण्मुखश्च जयन्तश्च अश्वक्रान्ते जनार्दनः।
तत्तद्बीजेन मन्त्रेण पूजयेन्मधुपायसैः॥
यो वसेद्वायुकूटे तु धनानामधिपो भवेत्।
चन्द्रशैले निवासस्तु क्षयी भवति नान्यथा॥
पापी भवति गोदन्ते अश्वक्रान्ते तु मुक्तिदः।
चन्द्रशैलस्य पूर्वे तु किञ्चिदाग्नेयगोचरे॥
लौहित्यमध्ये देवेशि! धनुस्त्रिंशत्प्रमाणतः।
इन्द्रशैल इति ख्यातस्तत्र वासे महाफलम्॥
इन्द्रचन्द्रस्य मध्ये तु किञ्चिद्दक्षिणगोचरे।
उत्तरे चन्द्रशैलस्य त्यजेत् षोढ़ा धनुर्बुधः॥
धनुस्त्रयञ्च प्रस्तारे धनुषः शतकं मतम्।
पञ्चविंशतिदैर्घ्येण चन्द्रकुण्डाह्वयं सरः॥
तत्र स्नात्वा च पीत्वा च नरः कैवल्यमश्नुते।
चन्द्रतीर्थं महातीर्थं तीर्थं पिण्डारकं समम्॥
स्नात्वा चानेन मन्त्रेण ब्रह्महत्यां व्यपोहति।
सुधीशवंशसम्भूत! माधवप्रीतिदायक!॥
सुधीश्रवणजाह्लाद! पापं हर! नमोऽस्तु ते।
भृगुः प्रायः सर्गयुतं आदिपंक्तिसमन्वितम्॥
तदूर्द्ध्वं च भृगुर्दण्डी जान्तं शक्तिसुरान्वितम्।
नादविन्दुसमायुक्तं पुनर्जान्तं सुभाविकम्॥
अष्टाक्षरञ्च ककोलमन्त्रेणार्घ्यं समापयेत्।

मेषे मीने पौर्णमास्यां जपन् काममनु निधि ॥
स्नात्वा ब्रह्मत्वमाप्नोति दुर्गतिञ्च न विन्दति ।
स्नानञ्च दिवसे कुर्य्यान्महापातकनाशनम् ॥
इत्यनेन तु मन्त्रेण यः स्नायाच्चन्द्रपाथसि ।
अवच्छिन्नामन्त्रभिस्तु यावत्तिष्ठति मेदिनी ॥
स एव चन्द्रभवनं गौरी ! याति परं पदम् ।
तस्य दक्षिणदिग्भागे चतुर्धनुःप्रमाणतः ॥
मानसं नाम तत्तीर्थं सर्वपापप्रणाशनम् ।
कार्त्तिके शुक्लपक्षे तु स्नानं तत्र समाचरेत् ॥
विष्णुलोकमवाप्नोति मन्त्रेण परमेश्वरि ! ।
तस्मान्न संशयस्तीर्थं विष्णुतुष्टिप्रदायकम् ॥
योगज्ञानाप्तये तुष्टिमर्घ्यं हर संरित्यते ! ।
तस्य दक्षिणदिग्भागे अष्टाविंशद्धनुर्मितम् ॥
अयुताख्यं सरस्तत्र स्नात्वायुतपदं व्रजेत् ।
वर्षासु चतुरो मासान् यस्तत्र स्नानमाचरेत् ॥
स याति ब्रह्मसदनं मध्याह्ने यदि शङ्करि ! ।
मन्त्रेण स्नानं कुर्य्यात्तु अर्घ्यभावेन साधकः ॥
अमृताख्यं महापिण्डं सिद्धं देवाभिवन्दितम् ।
अमृताधिवासं सर्वं प्राणिनां किल्बिषात् परम् ।
तद्दक्षिणे दशधनुर्ऋणमोचनकं सरः ॥
स्वाहाऋणत्रयान्मुक्तोभवबन्धो न जायते ।
भाद्रे ललितसप्तम्यां तत्र स्नात्वा दिवं व्रजेत् ॥
माघे मासि चतुर्दश्यां स्नात्वा मुक्तिञ्च विन्दति ।
ऋणग्रस्तनराः सर्वे त्रिभिः कर्मणि बन्धनात् ॥
ऋणत्रयान्मोचयित्वान्ते ऋणमोचनकं सरः ।
दक्षिणे अश्वक्रान्तस्य किञ्चिदाग्नेयगोचरे ॥

धनुरर्कप्रमाणेन अश्वक्रान्ताह्वयं सर: ।
नागलोकादुत्थितस्य कल्किरूपी जनार्दन: ॥
स्नात्वा तत्रैव विरजे अश्वतीर्थं चकार ह ।
उत्तरे वापि मार्गस्य तत्र वासं समाचरेत् ॥
गन्धतोयेन क्षीरेण मन्त्रेणानेन यत्नत: ।
ब्राह्मणासेविते पुण्ये वाराणस्या: कलाधिके ।
गृहाणार्घ्यं सस्त्रीकस्य मुक्तिं तत्र ददाम्यहम् ॥
अश्वक्रमेण सम्भूतपापविच्युतिकारक: ।
अयुतैकनिदानोऽयमश्वक्रान्ताय ते नम: ॥
इत्यनेन तु मन्त्रेण स्नात्वा यज्ञफलं लभेत् ।
अश्वमेधाधिकं पुण्यं मौषलस्नानमात्रत: ॥
विधिश्च स्नानमात्रेण राजसूयफलं लभेत् ।
दानमक्षयतां याति पितॄणां तर्पणं तथा ॥
विशाखस्थो यदा भानु: कृत्तिकासु च पूर्णिमा ।
स योग: पद्मको नाम अश्वक्रान्ते सुदुर्लभ: ॥
अन्तरीक्षाद्देवतीर्थं तत: पैतामहे शुभे ।
स्नानं येऽत्र करिष्यन्ति तेषां लोका महोदया: ॥
न स्पृहा तेषु पुण्यस्य कृतस्यापत्कृतस्य च ।
करिष्यन्ति महेशानि ! सत्यमेतदुदाहृतम् ॥
तीर्थानां परमं तीर्थं लोकेऽस्मिन् त्रिषु विद्यते ।
कार्त्तिकी तु विशेषेण पुण्या पापहरा परा ॥
मन्त्रैर्दानैस्तपोभिश्च यत् कृत्यं जायते द्विजै: ।
यदा तु स्नानमात्रेण शुभैरपि सुभावितै: ॥
दर्शनात् सुविनिष्क्रान्ता महापातकिन: प्रिये ! ।
उपपातकसंसर्गा: स्वयं यान्ति मुमुक्षया ॥
तत्रोपवासी यज्ञस्य पुण्डरीकस्य यत् फलम् ।

तत् प्राप्नोति नरः क्षिप्रमल्पायासेन शङ्करि!।
माघे स्नात्वा तिलान् यस्तु प्रयच्छति च सद्द्विजे॥
यथाशक्त्या च भक्त्या च स विभुर्भुवने वसेत्।
तत्रोपवासं स्नानञ्च तद्वै गव्याशनं तथा॥
यः करोतिः नरः सोऽपि मृतः स्वर्गमवाप्नुयात्॥
वसन्ति तत्समीपस्था ये तत्राचरजातयः।
तेऽपि तस्यानुभावेन स्वर्गं यान्ति न संशयः॥
ये यच्छन्ति द्विजेऽप्यर्थं धार्मिके ब्रह्मशान्तितः।
ते मृताः स्वर्गमारूढ़ाः पद्मासनचतुर्भुजाः॥
ब्रह्मणा सह सायुज्यं प्राप्नुवन्त्यपुनर्भवम्।
प्रायोपवेशं ये तत्र प्रकुर्वन्ति नरोत्तमाः॥
ते हंसयानेन नरा दिवं यान्त्यकुतोभयाः।
नृत्यन्ति पितरस्तेषां तुष्टाश्चैव पितामहाः॥
लभन्ते तर्पणात्तृप्तिं पितुर्दानात् त्रिपिष्टपम्।
स्पृष्टन्तु पापिनस्तत्र मुच्यन्ते भवबन्धनात्॥
अवगाहणाद् ब्रह्मणः स भवत्यनुचरः सदा।
अश्वक्रान्तमनुप्राप्य न स्नानेन मनः क्वचित्॥
भक्तो वा यदि वाऽभक्तो दिवा वा यदि वा निशि।
तत्तीर्थं सर्वतीर्थानां सदनप्रवरं मतम्॥
पापघ्नं पुण्यजननं प्राणिनां परिकीर्त्तितम्।
ये पुनर्भावितात्मानस्तत्र स्नात्वा जनार्दनम्॥
पूजयन्ति यथाशक्त्या ते प्रयान्ति त्रिपिष्टपम्।
ब्रह्मा विष्णुस्तथा रुद्रो नित्यं सन्निहितास्त्रयः॥
अश्वतीर्थे महेशानि! नान्यत् पुण्यतमं भुवि।
विरजामलतोयं तत् त्रिपु लोकेषु विश्रुतम्॥
ब्रह्मलोकस्य यत् स्थानं धन्याः पश्यन्ति तीर्थकम्।

ये तु वर्षशतं साग्रं अग्निहोत्रमुपासते ॥
कार्त्तिके वामदेशैकतीर्थे ते मुक्तिभागिनः ।
सर्वयज्ञफलं तुल्यं सर्वतीर्थफलप्रदम् ॥
सर्वेषाञ्चैव वेदानां समाप्तिस्तैश्च वै कृता ।
यैर्नत्वा ह्यश्वक्रान्ते च सन्ध्या च समुपासिता ॥
स्वपत्नीहस्तदण्डेन अश्वक्रान्तजनेन तु ।
भृङ्गारेण करङ्केण मृण्मयेनापि शङ्करि ! ॥
आनीय तज्जलं पुण्यं सन्ध्योपान्ते विचक्षणः ।
समाधिना समाधेयात् सप्राणायामपूर्विकम् ॥
तस्यां कृतायां यत् पुण्यं तत् शृणुष्व वरानने ! ।
तेन द्वादशवर्षाणि भवेत् सन्ध्या सुवन्दिता ॥
अश्वमेधफलं स्नाने पाने दशगुणं तथा ।
उपवासेऽप्यनन्तञ्च प्राप्नोति सुमहत् फलम् ॥
तीर्थान्तरे गवां कोटिं विधिवद् यः प्रयच्छति ।
एकाहं यो वसेत्तीर्थे स तत् पुण्यफलं लभेत् ॥
अर्द्धपादप्रमाणेन यस्तु स्वर्णं प्रयच्छति ।
स्वर्णमानफलं तत्र तस्मै दद्यामतःपरम् ॥
चन्द्रशैलं स्पृशन् धारा जाह्नवी सा प्रकीर्त्तिता ।
अश्वतीर्थं स्पृशन् धारा मज्जनेष्वभिधीयते ॥
इन्द्रशैलं स्पृशन् धारा सा विज्ञेया सरस्वती ।
अश्वक्रान्ते सङ्गमस्तु वर्षासु च प्रदृश्यते ॥
प्रयागं तद्विजानीयात् कार्त्तिके च विशेषतः ।
यस्तत्र मुण्डनं कुर्य्यात् प्रयागे मुण्डनं फलम् ॥
अद्यापि दृश्यते देवि ! गयाकुण्डे द्विधारकम् ।
इह लोके दरिद्रो यो भ्रष्टराज्योऽथवा पुनः ॥
अश्वक्रान्ते जले गत्वा वैष्णवीमन्त्रहं जपेत् ।

कृत्वा पूजोपहारञ्च देवानां पितृतर्पणम् ॥
कृत्वा पिण्डप्रदानन्तु सोऽचिराज्जन्मवर्जितः ।
एकचक्री भवेद्राजा सत्यमेतन्न संशयः ॥
इह जन्मनि सौभाग्यं धनं धान्यं वरस्त्रियः ।
भवन्ति विविधास्तस्य यैर्यात्रा कार्त्तिके कृता ॥
इदं यात्राविधानं यः कुरुते कारयेत् तथा ।
शृणोति वा स पापैस्तु सर्वैरेव प्रमुच्यते ॥
अगस्त्यागमनं येन कृतं जानन्ति मानवाः ।
ब्रह्मक्रियोपलाभेन बहुवर्षशतेन च ॥
यात्रां चैत्रीं तथा कुर्य्याद्देवसंस्कारमाप्नुयात् ।
किमत्र बहुनोक्तेन न तदस्तीति भाविनि ! ॥
प्राप्यं संप्राप्यते तेन पापं वा यन्न पश्यति ।
सर्वयज्ञफलं तुल्यं सर्वतीर्थफलप्रदम् ॥
सर्वेषाञ्चैव देवानामुपास्तिस्तेन वै कृता ।
यैर्गत्वा अश्वतीर्थे तु स्नात्वा सकृद् यथाविधि ॥
पुत्रिण्या वै दुहित्रा वा वसुभिः सहिताः कुले ।
शिखरिणीञ्च प्रदातॄणां युवतीनां न संशयः ॥
मोदते तत् तस्य तु वै सर्वाङ्गं परिपूरितम् ।
काशीवासे युगान्यष्टौ दिनैकं पुरुषोत्तमे ॥
तदेव कोटिगुणितं विरजामुखदर्शने ।
तत्सदृशं गुणं विद्यादश्वतीर्थे क्षणे क्षणे ॥

तद्दर्शनेन हि विराजति राजसूयः
स्नानं जले दशगुणं किल वाजपेयात् ।
गण्डूषमात्रमपि चार्हति चाश्वमेधः
सर्वक्रतोरधिकमप्यधिकं भवाम्भः ॥

इति योगिनीयन्त्रे द्वितीयभागे तृतीयः पटलः ।

अथ चतुर्थः पटलः ।

देव्युवाच । यदि प्रसन्नो मे नाथ ! तदेवं मे वद प्रभो ! ।
सुरेशानादिनाम्ना च कस्मिन् स्थाने भवान् स्थितः ॥
केषु केषु च होमेषु त्वां पश्यन्ति सदा द्विजाः ।
नाम्ना च कतमं स्थानं शोभते धरणीतले ॥
भगवानुवाच । पुष्करेऽहं सुरेशानो गयायां वै सुशर्मदः ।
कान्यकुब्जे वेदगर्भो भृगुकच्छे पितामहः ॥
कौवेर्य्यां सृष्टिकर्त्ता च नन्दिपुर्य्यां बृहस्पतिः ।
प्रभासे पद्मजन्मा च स्वर्गनद्यां सुरप्रियः ॥
द्वारवत्यान्तु वाग्देवो नाटके नाटकेश्वरः ।
नीलाचले च कामेशः पिङ्गलो हस्तिपर्वते ॥
कुशावर्त्ते तु विजयी जयन्तः पुष्कराचले ।
भस्माचले भयानन्दश्चन्द्रकूटे च माधवः ॥
अन्तर्गृहे पद्महस्तो मङ्गलायाञ्च त्र्यम्बकः ।
भद्रपीठे च दिव्येशो अश्वक्रान्ते जनार्दनः ॥
अहिच्छत्रे तुल्यानन्दः श्रीशैले तु जगत्प्रियः ।
पद्मपाणिः कुशहस्ते मानशैले मुनीश्वरः ॥
श्रीकण्ठे श्रीनिवासश्च काम्पिल्ये सिद्धिदायकः ।
कन्याश्रमे च रुद्रोऽहं मैनाके विश्वनादकः ॥
एकाम्रे चैव नागेशो विरजायां महेश्वरः ।
मूलिकाख्ये तथा विष्णुर्महेन्द्रे भार्गवस्तथा ॥
कौशिक्यान्तु तथा बोधिरयोध्यायान्तु भार्गवः ।
मणिकूटे हयग्रीवो वराहो विन्दुपर्वते ॥
जटाधरस्तु गोदन्ते गोमन्ते जाङ्गलेश्वरः ।
परमेष्ठो ब्रह्मपुत्रे विश्वशैले तु गह्वरः ॥

चित्रशैले तु चित्रेशो देविकायां चतुर्भुजः ।
वृन्दावने पद्मपाणिः कुशहस्तस्तु नैमिषे ॥
मन्दरे च महाबोधिर्गोपीन्द्रो हनुपर्वते ।
भागीरथ्यां पद्मगर्भः काम्पिल्ले कनकाप्रियः ॥
करणे चैव कामीरः कापोते हव्यवाहनः ।
वशिष्ठश्चार्बुदे चैव श्वेतनद्यां मनोभवः ॥
धवलायां पिनाकी च पिच्छिलायां त्रिविक्रमः ।
यज्ञगर्भस्तु आगस्त्ये उर्वश्यां मधुसूदनः ॥
रुक्मिणीशे हरिश्चैव पैत्रिके तु रुचिस्तथा ।
वामनश्च गोमन्ते च काश्यां विश्वेश्वराह्वयः ॥
प्रजापतिः प्रयागे च विदर्भायां द्विजप्रियः ।
गङ्गाधरो भद्रपीठे मातङ्गे चैव त्र्यम्बकः ॥
त्रिपुरारिर्नन्दिशैले पाण्डुशैले त्रिलोचनः ।
गङ्गाह्रदे त्रिलोकेशो भित्तिपूर्यां दिवाकरः ॥
वमटे मिङ्गिलानाथो दारुशृङ्गे कलानिधिः ।
दारुवने महालिङ्गः अशोके तु विनाशकः ॥
हरिसेनस्तुलुकायां पर्णाटे तु अनन्तकः ।
मार्कण्डेयो वटे चैव इन्दुद्वारे दिवाकरः ॥
गोकर्णे च विकर्णाख्यो मन्दारे मधुसूदनः ।
अष्टोत्तरशतं स्थानं मया ते परिकीर्त्तितम् ॥
यत्र वै मम सान्निध्यं नित्यन्तु तव सुव्रते ! ।
एतेषामपि यस्त्वेकं पश्येत् च भक्तिमान्नरः ॥
स्नानं विरजः संलब्ध्वा मोदते शाश्वतीः समाः ॥
मानसं वाचिकञ्चैव कायिकं यच्च दुष्कृतम् ।
तत् सर्वं वै शमं याति नात्र कार्य्या विचारणा ॥
यानि तानि च सर्वाणि गत्वा मां पश्यते नरः ।

भवते मोक्षमार्गी च यत्नाहं तत्र संस्थितः ॥
पुष्पोपहारै धूपैश्च ब्राह्मणानाञ्च तर्पणैः ।
ध्यानेन च स्थिरेणाशु प्राप्स्यते परमेश्वरि ! ॥
अश्वक्रान्तस्योत्तरत ऋणमोचनपश्चिमे ।
द्वाविंशतिधनुर्मानं क्षेत्रं परमदुर्लभम् ॥
क्षेत्रं द्विपञ्चकं नाम सर्वदेवनमस्कृतम् ।
पूजयित्वा तत्र रुद्रं ज्योतिर्ष्टोमफलं लभेत् ॥
षाण्मास्यं नियताहारो ब्रह्मचर्य्यासमाहितः ।
उषित्वा तत्र देवेशि ! प्राप्स्यते परमं पदम् ॥
कृते युगे पुष्कराणि त्रेतायां नैमिषं मतम् ।
द्वापरे तु कुरुक्षेत्रं अश्वतीर्थं कलौ युगे ॥
तस्मात् तदुत्तरे तीरे साधयेन्मानसेप्सितम् ।
द्वापरे तु कुरुक्षेत्रं सर्वपुण्यफलप्रदम् ॥
दुष्करं पञ्चके दानं पञ्चके सर्वदुष्करम् ।
यदन्यत्र कृतं पापं तीर्थे याति च लाघवम् ॥
तत्तीर्थे कृतमन्यत्र क्वचित् पापं व्यपोहति ।
द्वादशाहं दशाहं वा मासार्द्धं दशमेव वा ॥
रुद्रस्यार्द्धासनगता मेरुपृष्ठे यशस्विनी ।
महादेवं ततो देवी प्रणता परिपृच्छति ॥
देव्युवाच । जन्मान्तरसहस्रेषु यत् पापं पूर्वसञ्चितम् ।
कथं तत् क्षयमाप्नोति तन्ममाचक्ष्व शङ्कर ! ॥
भगवानुवाच । शृणु देवि ! प्रवक्ष्यामि गुह्याद्गुह्यमनुत्तमम् ।
सर्वतीर्थेषु विख्यातमश्वक्रान्तमतःपरम् ॥
यस्योत्तरे तु यत् क्षेत्रं मयाप्युक्तं विमुक्तकम् ।
एतदेव परं ज्ञानमेतदेव परं तपः ॥
एतदेव परं ब्रह्म एतदेव परं पदम् ।

यथा नारायणः श्रेष्ठो देवानां पुरुषोत्तमः ॥
यथेश्वराणां गिरिशः स्थानानामेतदुत्तमम्।
दत्तं जप्तं हुतं श्रेष्ठं तपस्तप्तं कृतञ्च यत् ॥
ध्यानमध्ययनं ज्ञानं सर्वं भवति चाक्षयम् ।
अश्वक्रान्ते परो योगो अश्वक्रान्ते परा गतिः ॥
अश्वक्रान्ते परो मोक्षस्तीर्थं नैवास्ति तादृशम् ।
मेरुमन्दरतुल्योऽपि राशिः पापस्य सर्वशः ॥
अश्वक्रान्तं समासाद्य सर्वो व्रजति संक्षयम् ।
अश्वक्रान्तस्थितैः पुण्यैः पांशुभिर्वायुनेरितैः ॥
यदि दुष्कृतकर्माणो यास्यन्ति परमां गतिम् ।
न सा गतिः कुरुक्षेत्रे गयाद्वारे च पुष्करे ॥
या गति र्विहिता पुंसां अश्वक्रान्तनिवासिनाम् ।
न दानैर्न तपोभिर्न यज्ञैर्नापि च विद्यया ॥
प्राप्यते गतिरुत्कृष्टा अश्वतीर्थे स लभ्यते ।
संसर्गाच्च भवेन्मोक्ष इतरासत्परिग्रहात् ॥
आगस्त्यादपि चाग्न्यादि इदमेव महत्तरम् ।
ब्रह्महाप्यति यो गच्छेदश्वक्रान्तं कदाचन ॥
अश्वक्षेत्रस्य माहात्म्याद् ब्रह्महत्या निवर्त्तते ।
न तस्य पुनरावृत्तिः कदाचिदपि दृश्यते ॥
उत्तरं दक्षिणं वापि पुण्यद्वारं विचिन्तयेत् ।
सर्वोऽप्यस्य शुभः काल अश्वक्रान्ते वरानने ! ॥
महादानेन तल्लाभो यत्फलं लभते नरः ।
अश्वतीर्थे तु काकिन्यां दत्तायां लभतेऽक्षयम् ॥
एकाहमुपवासं यः करोतीह मम प्रिये ! ।
फलं वर्षसहस्रस्य लभते मत्परायणः ॥
तीर्थान्तरे गवां कोटिं विधिवद् यः प्रयच्छति ।

एकाहञ्च वसेच्चात्र तयोस्तुल्यं फलं लभेत् ॥
प्रयागे माघमासे तु सम्यक् स्नानेन यत् फलम् ।
तत्फलं कोटिगुणितं अश्वतीर्थे क्षणे क्षणे ॥
षष्टिकोटिसहस्राणि षष्टिकोटिशतानि च ।
सेवनाच्चैव मध्याह्ने अपराह्णे च शङ्करि ! ॥
मेरुमन्दरतुल्यो हि राशिः पापस्य सर्वशः ।
अश्वक्रान्तं समासाद्य सर्वो व्रजति संक्षयम् ॥
कीटाः पतङ्गा मशकाश्च वृक्षा जले स्थले ये विचरन्ति जीवाः ।
मण्डूकमत्स्याः क्रमशोऽश्वतीर्थे त्यक्त्वा शरीरं शिवमाप्नुवन्ति ॥
यो वसेत् पञ्चके नित्यं स गच्छेत् परमां गतिम् ।
सर्वेषामेव लोकानां ब्रह्मलोकोपरिस्थितः ॥
यदीच्छेत् तत् पदं गन्तुं स वसेदत्र दुष्करम् ।
यथा सुराणां सर्वेषामादिस्तु मधुसूदनः ॥
तथैव सर्वक्षेत्राणामादिमञ्चकमुच्यते ।
अनुलोमविलोमाभ्यां तथा व्यस्तसमस्तयोः ॥
स्नातव्यं पञ्चकं यच्च अश्वतीर्थं वरानने ! ।
तथैवोत्तरमारण्यं तदेव फलमश्नुते ॥
विधिवद्गुह्यमानेषु सर्वतीर्थेषु यत् फलम् ।
पञ्चकालोकनादेव नरः प्राप्नोति तत् फलम् ॥
दशकोटिसहस्राणि तीर्थानां वै महीतले ।
सान्निध्यमश्वतीर्थे च मुक्तिद्वारसमीपतः ॥
यावत्तिष्ठन्ति गिरयो यावत्तिष्ठन्ति सागराः ।
तावत् पञ्चकसूतूनां ब्रह्मलोके महीयते ॥
जन्मान्तरसहस्रैश्च आजन्ममरणान्तिकम् ।
निर्दहेत् पातकं सर्वं सकृत् स्नात्वा तु शङ्करि ! ॥
योगाभ्यासेन यस्तिष्ठेत् सम्यग् वर्षत्रयं नरः ।

एकेन जन्मना मुक्तिं योगान्मोक्षञ्च विन्दति ॥
ऋणमोचनान्तं देवेशि! समन्तात् पञ्चकं स्मृतम्।
ब्रह्मणः सदनं भद्रे! प्रशस्तमपि सर्वतः ॥
यत्र स्नानं जपो होमः श्राद्धं दानादिकं स्मृतम्।
एकैकशो महेशानि! पुनाति सप्तमं कुलम् ॥
अश्वतीर्थसमक्षे तत् किञ्चित्पश्चिमगोचरे।
धनुरष्टप्रमाणेन सिद्धकुण्डमिहोच्यते ॥
अत्र स्नात्वोदकं पीत्वा मुच्यते सर्वपातकैः।
त्रिरात्रोपोषितेनात्र एकरात्रोषितेन वा।
द्विजातीनान्तु कथितं तीर्थानामिह सेवनम् ॥
यस्य वायुं शशी युङ्क्ते हस्तपादौ च संयतौ।
एनोलोपी ब्रह्मचारी तीर्थानां फलमाप्नुयात् ॥
सिद्धकुण्डं महाभोगं देवताभिः सुसंस्कृतम्।
पुनीहि सर्वपापेभ्यस्तीर्थवर्य्य! नमोऽस्तु ते ॥
इत्यनेन तु मन्त्रेण वैशाखे कृष्णपक्षके।
त्रयोदश्यां स्नानमात्रे पुनात्युभयतः कुलम् ॥
पश्चिमे तस्य तीर्थस्य किञ्चित्तु मरुगोचरे।
चतुःषष्टिधनुर्मानं तीर्थं ब्रह्मसरः स्मृतम् ॥
तत्र स्नात्वा पितॄन् भक्त्या तर्पयित्वा यथाविधि।
पापकर्तॄनपि पितॄन् तारयेन्नात्र संशयः ॥
स्नात्वा याति द्विजः सम्यक् ततः संस्कारतां व्रजेत्।
स्वयन्तु ब्रह्मणा सृष्टं ईश्वरप्रियकाम्यया ॥
स्वयन्तु ब्रह्मणा स्नातं तस्मात् नाशय पातकम्।
इत्यनेन तु मन्त्रेण स्नानं कृत्वा यथाविधि ॥
माघे मासि चतुर्दश्यां शुक्लपक्षे विशेषतः।
दत्त्वा दानञ्च विधिवद् ब्रह्मलोके महीयते

इन्द्रकूटस्य कौवेरे धनुरशीतिप्रमाणतः।
रामक्षेत्रं विजानीयात् तस्य कुण्डं कुले प्रिये!॥
विन्दुकुन्दप्रमाणन्तु स्नात्वाभ्यर्च्य पितॄनपि।
तीर्थेभ्यः परमं तीर्थं रामतीर्थं वरानने!॥
ब्राह्मणानर्चयित्वा तु ब्रह्मलोके महीयते।
तत्र तीरे महाभागे! श्रीरामेण महात्मना॥
पितरस्तर्पिताः सर्वे तीर्थवर्य्ये! नमोऽस्तु ते।
इत्यनेन तु मन्त्रेण वैशाखे कृष्णपक्षके।
तत्राभ्यर्च्य महादेवं गोसहस्रफलं लभेत्॥
तस्य पूर्वे नवधनुः सीतातीर्थं वरानने!।
तत्र स्नात्वा दिवं यान्ति सशरीरा द्विजातयः॥
क्रौञ्चञ्चापि महाश्राद्धे अक्षयं समुदाहृतम्।
सीतया रामभद्रेण निर्मितं तीर्थमुत्तमम्॥
तस्मात् पुनीहि मां पापैर्मोक्षं कुरु सुरार्चिते!।
मौनी भूत्वा त्रयोदश्यां तत्र स्नात्वा महाफलम्॥
मन्त्रेणानेन स्नात्वा तु रत्नेनार्घ्यं प्रदापयेत्।
मुच्यते सर्वपापेभ्यो ब्रह्मलोके वसेन्मृतः॥
दक्षिणे चैव सीताया धनुर्दशप्रमाणतः।
तत्राभिषेकमात्रञ्च विजयी सर्वदा भवेत्॥
तीर्थानां परमं तीर्थं विजयं नाम शोभितम्।
तत्र लिङ्गं महेशस्य विजयं नाम विश्रुतम्॥
षण्मासान्नियताहारो ब्रह्मचारी समाहितः।
उषित्वा तत्र देवेशि! मुच्यते सर्वपातकैः॥
तीर्थानां परमं तीर्थं योगतीर्थेति विश्रुतम्।
सर्वपापहरं शम्भोर्निवासं परमेष्ठिनः॥
दृष्ट्वा लिङ्गन्तु देवस्य योगीशं नाम विश्रुतम्।

ईप्सितान् लभते कामान् रुद्रस्य दयितो भवेत् ॥
द्वाविंशत्तु धनुर्मानं मुक्तितीर्थं विजानीहि ।
वक्ष्यमाणेन मन्त्रेण स्नात्वार्घ्यं विनिवेदयेत् ॥
मोक्षाभिकाङ्क्षिभिर्युक्तैर्वन्यते पूज्यतेऽनिशम् ।
योगकुण्डं महाभागे ! मां पुनात्वमरार्चिते ! ॥
तस्यातिदूरे लोकस्य द्वत्तं कुण्डमनुत्तमम् ।
तत्रापि स्नात्वा विधिवत् सन्तर्प्य पितृदेवताः ॥
ब्राह्मणेभ्यः प्रदायाथ दानानि विविधानि च ।
स्नात्वा कोलेन वीजेन तत्त्वेनार्घ्यं निवेदयेत् ॥
पश्चात् कोलेश्वरं दृष्ट्वा मुच्यते भवबन्धनात् ।
तिथिहस्तमितं कुण्डं देवगन्धर्वसेवितम् ॥
कुण्डे सिततृतीयायां ग्रामं धान्यं धनं लभेत् ।
इन्द्रशैलस्य यामे तु धनुर्द्वादशमानतः ॥
सूर्य्यतीर्थमिति ख्यातं तीर्थानां तीर्थमुत्तमम् ।
अष्टश्यमूर्त्तिं भगवान् तत्र ससरथेरितः ॥
आस्ते लोकहितार्थाय व्यापी योगतनुः स्वयम् ।
यदा हरस्य निरयनिवासं कृतवानिह ॥
तत्रैव देवताः सर्वास्तस्यां सेव्याः समागताः ।
भानुवीजेन स्नात्वा तु अर्घ्यं तारेण दापयेत् ॥
रामचैत्रं ततो गच्छेत् साधकः सिद्धिमानसः ।
दुर्गकूपद्वयं तत्र ब्रह्मयूपश्च तिष्ठति ॥
दुर्गकूपोदकं पीत्वा माघे मासि चतुर्दशी ।
भवेद्भक्त्या गर्भधरामन्त्राणामयुतं जपन् ॥
यूपं प्रदक्षिणीकृत्य यस्तु श्राद्धं प्रकल्पयेत् ।
पितॄंश्च तारयेत्तेन ब्रह्मलोके महीयते ॥
काकिनीश्च न्यसेत् कूपे सुवर्णं रजतं तथा ।

यस्य मित्रस्य यद्वित्तं शोधयेत् पूर्वजन्मनि ॥
ततो गच्छेदिन्द्रशैलं दक्षिणाभिमुखेन तु ।
मणीश्वरं ततः पश्येन्निरयाच्च प्रमुच्यते ॥
बधबन्धनयुक्तोऽपि युक्तो वाप्युपपातकैः ।
इन्द्रकूटस्थितं दृष्ट्वा मणिनाथं स वायुना ॥
क्षणेन मुच्यते देवि ! नात्र कार्य्या विचारणा ।
चरमे लोमतीर्थस्य धनुःपञ्चप्रमाणतः ॥
नागतीर्थं ततो जातं पृथिव्यां ख्यातिमागतम् ।
नागकुण्डेति वैकुण्ठः स्नात्वा नागान् समर्चयेत् ॥
पुण्यं तत् सर्वतीर्थेषु सर्पाणां विषनाशनम् ।
स्नानं कुर्वन्ति ये मर्त्या भक्त्या श्रावणपञ्चमीम् ॥
न तेषां तत्कुले सर्पाः पीड़ां कुर्वन्ति कर्हिचित् ।
श्राद्धं पितॄणां ये तत्र करिष्यन्ति नरा भुवि ॥
ब्रह्मा तुष्टः परं स्थानं दास्यते नात्र संशयः ।
चन्द्रादुत्तरतः शैलश्चतुःषष्टिप्रमाणतः ॥
तत्र जले गयाकुण्डं क्षेत्रं तीरे तदुच्यते ।
गयाशीर्षं पूर्वभागे धनुर्द्वाविंशमानतः ॥
यावल्लौहित्यपर्य्यन्तमुत्तरे ब्रह्मयोनिकम् ॥
गयातीर्थं परं गुह्यं पितॄणाञ्चातिवल्लभम् ।
कृत्वा पिण्डप्रदानन्तु न भूयो जायते नरः ॥
आगत्येऽस्मिन् गयायाञ्च तथा नीलाचले शुभे ।
यात्राभेदे ददेत् पिण्डं गयायाञ्च सकृत् प्रिये ! ॥
शोचन्ति पितरस्तस्य वृत्तोऽत्र शापविभ्रमः ।
गायन्ति पितरो गीतं कीर्त्तयन्ति महर्षयः ॥
गयां यास्यति यः कश्चित् सोऽस्माकं तारयिष्यति ।
एष्टव्या बहवः पुत्राः शीलवन्तो गुणान्विताः ॥

तेषां तत्समवेतानां यद्येकोऽपि गयां व्रजेत् ।
तस्मात् सर्वप्रयत्नेन ब्राह्मणस्तु विशेषतः ॥
यो दद्याद्विधिवत् पिण्डान् गयां गत्वा समाहितः ।
धन्यास्तु खलु ते मर्त्या गयायां पिण्डदायिनः ॥
कुलान्युभयतः सप्त समुद्धृत्य स चाप्नुयात् ।
परं पिण्डप्रदानं स दद्याद्वै पायसेन च ॥
कर्त्तव्यमृषिभिर्दृष्टं पिण्याकेन गृहे न तु ।
तिलपिण्याककं देयं भक्तिमद्भिर्नरैः सदा ॥
श्राद्धन्तु तत्र कर्त्तव्यमर्घ्यावाहनवर्जितम् ।
मूषिकगृध्रकाकाश्च नानुहृश्यं चरन्ति ते ॥
श्राद्धं तत्तीर्थकं प्रोक्तं पितॄणां तुष्टिदं परम् ।
कर्त्तुं तत्र प्रयत्नेन भुक्तिरेवाथ कारणम् ॥
भुक्त्या तुष्यन्ति पितरस्तुष्टाः कामान् ददन्ति च ।
आयुः पुत्रान् धनं धान्यं कामानन्यान् प्रयच्छति ॥
भक्त्या चाराधितं रुद्रं नृणां प्रीताः पितामहाः ।
अकालेऽप्यथवा काले गयाश्राद्धं सदा नरैः ॥
प्राप्य चैव सदा स्नानं कर्त्तव्यं पितृतर्पणम् ।
पिण्डदानञ्च तेनाप्तं पितॄणाञ्चातिवल्लभम् ॥
पितरो हि निरीक्षन्तो गगनं समुपागताः ।
आशया परया भक्त्या आशामेषां प्रपूरयेत् ॥
विलम्बो नैव कर्त्तव्यो न च विघ्नं समाचरेत् ।
अच्छिन्ना सन्ततिस्तेषां सदाकालं भविष्यति ॥
पितरः पुत्रदातारो वृद्धिश्राद्धाभिकाङ्क्षिणः ।
तेन ते सकलास्तुष्टाः पितरश्चैव कर्हिचित् ॥
अतः श्राद्धं पुरा प्रोक्तं स्वयमेव स्वयम्भुवा ।
ते सत्वरं तत्तत् कार्य्यं द्विजैः पितृपरायणैः ॥

तीर्थेऽच्चते गृहे वापि सङ्क्रान्तेऽपि ग्रहेऽपि वा ।
विषुवे तु तथा वापि जन्मनक्षत्रपीड़ने ॥
एते वै श्राद्धकालाः स्युः पुरा स्वायम्भुवोऽब्रवीत् ।
कृते श्राद्धे नवे पुंसां पीड़ा भवति देहजा ॥
इहामुत्र कृतं वापि सर्वं त्यजति दुष्कृतम् ।
यास्या न भवते पीड़ा ग्रहचौरनृपादिका ॥
दुष्कृतं नश्यते सर्वं परत्र च गतिं शुभाम् ।
लभते नात्र सन्देहः प्रजापतिवरो यथा ॥
कामेश्वरः सर्ववेदी अश्वक्रान्तस्तु कार्त्तिके ।
मातृमुख्यं गयाश्राद्धं पितृमुख्यन्तु अन्यतः ॥
पिण्डञ्च षोड़शं दद्याद् बहुलं कारयेत् सुधीः ।
पातयेत् क्षीरधाराञ्च आरोहेत् सोमपर्वतम् ॥
साक्षिणः सन्तु मे देवा ब्रह्मविष्णुमहेश्वराः ।
महागयां समासाद्य श्राद्धं कुर्य्याद्विचक्षणः ॥
ततो भेर्य्यादिशब्देन आरोहेत् शिविकां नरः ।
गृहं गत्वा समभ्यर्च्य गृहदेवीं यथाविधि ॥
ब्राह्मणान् भोजयेत् पश्चात् अक्षय्यमुपधारयेत् ।
भुञ्जीत ब्राह्मणैः सार्द्धं दक्षिणामुपपातयेत् ॥
अस्मिन् पिण्डप्रदानेन आगस्त्ये विरजेषु च ।
दशाश्वमेधिकश्चैव तथा विष्णुपदेषु च ॥
एकत्र पिण्डदः कश्चित् पुनः श्राद्धं विवर्जयेत् ।
पुनराकर्षणं कृत्वा शापः पतति मूर्द्धनि ॥
त्रिदिनं पातयेत् पिण्डं गयायाञ्च विशेषतः ।
ततो मातृगयायाञ्च एकाहमपि पातयेत् ॥
आगस्त्ये विरजे चैव पातयेच्च दिनत्रयम् ॥

इति श्रीयोगिनीतन्त्रे द्वितीयभागे चतुर्थः पटलः ।

अथ पञ्चमः पटलः ।

श्रीभगवानुवाच । ततः प्रभाते विमले साधकः सिद्धिमानसः ।
सोमशैलस्य ऐशान्यां दृष्टिमात्रान्तरे प्रिये ! ॥
मानशैलं ततो गत्वा गच्छेद्वाराणसीसरः ।
मणीश्वरस्य ऐशान्ये किञ्चित् पूर्वादिगोचरे ॥
धनुःसप्तान्तरे चैव कुण्डं वाराणसीयकम् ।
द्वाविंशद्धनुरायामं सर्वदेवैश्च संयुतम् ॥
देवी त्रिपथगा तत्र गोमती च सरस्वती ।
करतोया दिव्यनदी लोहित्यो घर्घरस्ततः ॥
सरयू धूतपापा च नर्मदा च महानदी ।
दृशद्वती देविका च तथा चर्मण्वती नदी ॥
कृष्णवेणी तथा पुण्या शोणः श्येनो महानदः ।
कावेरी यमुना चैव ये चान्ये नानुकीर्त्तिताः ॥
मम प्रीत्यर्थमायान्ति कुण्डं वाराणसीयकम् ।
उदधि र्गह्वरश्चैव क्षीरोदश्च तथा पयः ॥
घृतोदश्चैव मद्योदो दध्युदश्चैव सागरः ।
ह्रदाश्च सरितश्चैव तीर्थानि विविधानि च ॥
मधुमासे चतुर्दश्यां समायान्ति न संशयः ।
वैशाखस्य तृतीयायां समायान्ति सुमध्यमे ! ॥
स्नात्वा तत्र दिवं यान्ति यावदाभूतसंप्लवम् ।
जगन्माये ! जगद्वीजे ! जगत्पापप्रणाशिनि ! ॥
अमृतं देहि मे कुण्डे वाराणसि ! नमोऽस्तु ते ।
इत्यनेन तु मन्त्रेण अन्येनार्घ्यं निवेदयेत् ॥
तस्य दक्षिणदिग्भागे धनुःपञ्चप्रमाणतः ।
द्वाविंशतिधनुर्मानं कुण्डं मणिकर्णिकाह्वयम् ॥

मणिकर्णसमं तीर्थं न भूतं न भविष्यति।
सत्यं सत्यं पुनः सत्यं सत्यमेव सुनिश्चितम् ॥
मणिकर्णसमं तीर्थं नास्ति ब्रह्माण्डगोलके।
युगादिषु च सङ्क्रान्तौ उपरागे महेश्वरि ! ॥
स्नानं मध्यन्दिने कुर्य्यान्महापातकनाशनम्।
मणिकर्णे ! सुरश्रेष्ठे ! मणीश्वरि ! मणिप्रिये ! ॥
अयं हरकृतावासो मणिकर्णे ! नमोऽस्तु ते।
मन्त्रेणानेन स्नात्वा तु प्रणिपत्य विसर्जयेत् ॥
ऐशान्यां मणिशैलस्य मङ्गला नाम वै नदी।
नीर नीर वहन्तीव पापौघानि पुनीहि तौ ॥
मन्त्रेण स्नात्वा देवेशि ! प्रणिपत्य प्रसादयेत्।
मणीश्वरं ततो गत्वा चालयेत् काममुच्चरन् ॥
द्वितीयकेन स्पृष्ट्वा तु तृतीयेनाभिपूजयेत्।
कलाहस्तद्वयांशेन सिद्धक्षेत्रमिहोच्यते ॥
हंसोऽर्घ्यासनमारूढो रश्मिविन्दुसमासितः।
मन्त्रोऽयं देवदेवस्य ऋषिर्गर्ग उदाहृतः ॥
छन्दोऽनुष्टुप् भवो देव इष्टार्थे विनियोजयेत् ॥
उद्यत्किरीटशकलं विमलं स देवो विभ्रत्तिं वैयाघ्रतनुश्चतुर्भिः।
शूलञ्च यो वै स वरञ्च वज्रं रत्नं त्रिनेत्रं परमं स्तगस्थम् ॥
मध्ये देवं पूजयेत् कृत्तिवासं भीमं देवं तत्पुरस्तात् हरञ्च।
भवं देवं शक्रमाद्यं विसंज्ञं पश्चाद्देवं वामनं कालसंज्ञम् ॥
यजेच्छ्रुतीः पद्मपत्रेषु देवी वाराणसी कीर्त्तिस्तयोः पुरस्तात्।
श्रीकण्ठाद्यस्तद्वहिः संयजेद्वै ग्रहान् पश्चात् तत्पुरस्ताद्दिगीशान् ॥
वामेऽनन्तः पूजितः स्यात् पिनाकी दक्षिणे भागे कमला
सर्वतश्च।
सिद्धेशाख्यादग्रतश्च प्रपूज्याः स्वैः स्वैर्मन्त्रैः स्वीयकल्पोदितैश्च ॥

मणिनाथश्चादिलिङ्गं ब्रह्मपाषाणमव्ययम् ।
ऐशान्यां मङ्गला देवि ! एतन्मध्यतमं प्रिये ! ॥
क्षौमत्रयमिदं चैत्रं मणिपीठं सुरार्चिते ! ।
दक्षवक्त्रे च कामेशी हयग्रीवन्तु पश्चिमे ॥
उत्तरे कमलं लिङ्गं उत्तरायाः समुद्भवः ।
पूर्ववक्त्रे च विरजा उत्तरे कौलकोद्भवम् ॥
अन्यत्र वै कोटिद्वयं सर्वं वामोद्भवं भवेत् ।
रमणायाः समुद्भूतं कुण्डं पञ्चशतं शतम् ॥
सार्द्धकोटिस्तथा लिङ्गं त्रिशतञ्च कलौ युगे ।
भूम्यन्तरस्थं लक्षञ्च सार्द्धलक्षं जले प्रिये ! ॥
द्विलक्षं पर्वते चैव पञ्चलक्षं गुहासु च ।
भूमिपीठे सप्तलक्षं वृक्षमूले तु लक्षकम् ॥
कुण्डमध्यगतं लिङ्गं अर्द्धलक्षं विजानीहि ।
सन्ध्या सन्ध्यांशके चैव कुण्डं लौहित्यपावनम् ॥
नवेन्दुशाके देवेशि ! विदितं सर्वमेव तु ।
त्र्यंशे सन्ध्यांशके चैव यदा शूद्रो भवेन्नृपः ॥
तदा कामेश्वरी देवी स्फुटिता मध्यमांशके ।
अन्ते नैव शाकेश्वरी स्फुटिता मध्यमेऽशके ॥
अन्त्यांशे च शाके च देवी अव्यक्ता उर्वशी तदा ।
भूशाके माधवे व्यक्ते सुधांशे विरजा प्रिये ! ॥
यत्फलं राजसूयेन पूजनाद्वन्दनात् प्रिये ! ।
वायव्ये मानशैलस्य वराहो नाम पर्वतः ॥
तस्य पूर्वदक्षिणे च नरनारायणं सरः ॥
तत्र पीत्वा च स्नात्वा च विष्णुलोके महीयते ।
तस्य पश्चिमतीरे च लिङ्गं सोमेश्वरं परम् ॥
तीर्थं प्रभासनामानं मृतानां मुक्तिदं फलम् ।

सेवनात् कृतपिण्डानां पापजित् कामदं नृणाम् ॥
तत्र वैनायकं तीर्थं वायव्यें धनुरष्टकम् ।
सप्तशतधनुरायामं प्रभासं तीर्थमुत्तमम् ॥
वायव्ये तस्य देवेशि ! धनुरर्कप्रमाणतः ।
तीर्थं विन्दुसरः पुण्यं स्नानात् पातकनाशनम् ॥
मणिसोमाचलान्तेन सहस्रपञ्चकं धनुः ।
भूलिङ्गं च भवेत् कोटीज्यामुत्वं च सरस्वती ॥
धनुष्कोकिलकः शम्भु र्लंचकालिरुदाहृता ।
नाटकाचलपूर्वं तु मतङ्गो नाम पर्वतः ॥
अग्नौ हयाचलं यावत् शिवस्यान्तर्गृहं स्मृतम् ।
अन्तर्गृहस्मृता ये च यान्ति ब्रह्म सनातनम् ॥
अक्षयं सत्कृतं तत्र यत्कृतञ्च तदक्षयम् ।
मणिशैले स्थिता ये च ये मृतास्तेऽपुनर्भवाः ॥
तत्र दानं कुरुक्षेत्रसमं भवति नान्यथा ।
अश्वतीर्थेन्द्रमध्ये तु ब्रह्मावधिरुदाहृतः ॥
वराहस्य मुखे तोयं दृष्ट्वा मत्स्योदरी तदा ।
आषाढ़े वर्षणे विष्णो यदा मत्स्योदरं भवेत् ॥
तदा सर्वप्रयत्नेन स्नानं कुर्य्यान्मम प्रिये ! ।
शतजन्मकृतं पापं स्नानान्नश्यति निश्चितम् ॥
भाद्रे वा श्रावणे वापि तदार्द्धं लभेत् फलम् ।
कार्त्तिके दृश्यते किञ्चित् फलं दशगुणोत्तरम् ॥
हस्ताचलस्य पूर्वे तु किञ्चिदैशान्यगोचरे ।
भस्माचलं स्थिरं कृत्वा समीचेत् काममुच्चरन् ॥
कोलकाचरमे भागे नाक्रान्तं तत्र पातयेत् ।
तत्क्षेत्रस्योत्तरे भागे धनुरर्कप्रमाणतः ॥
उर्वशी सा समाख्याता सर्वकिल्बिषनाशिनी ।

माघे मासि सिते पक्षे द्वादश्याञ्च समाहितः ॥
स्नात्वाश्वमेधजं पुण्यं लभते सङ्क्रमेषु च ।
दिनक्षये च ग्रहणेन न स्नायाद्धि कदाचन ॥
नाशोऽपि ज्येष्ठपुत्रस्य धनस्य परमेश्वरि ! ।
तारं श्रवणशून्यञ्च वाराहं स शिखी स्थितः ॥
समार्णको वह्निजायाऽनन्तोऽयं परिकीर्त्तितः ।
पृथिव्यां यानि तीर्थानि आसमुद्रसरांसि च ॥
उर्वश्यन्तानि सर्वाणि पापं हर नमोऽस्तु ते ।
मन्त्रेण विधिवत् स्नात्वा उत्तराशामुखेन तु ॥
वारुणेन च मन्त्रेण दद्यादर्घ्यं विभूतये ।
पूर्वाशामज्जनं कृत्वा महालक्ष्मीर्विमुच्यते ॥
धनं धान्यं प्रजावृद्धिः कुवेराशाभिमज्जनात् ।
तस्याः पूर्वे चार्क्कधनुरायतांशं तथा परम् ॥
सूर्य्यतीर्थमिति ख्यातं देवानामपि दुर्लभम् ।
ऋषयः सिद्धगन्धर्वास्तीर्थानि च सरांसि च ॥
माहात्म्यमण्डलं तस्य सूर्य्यकुण्डस्य शङ्करि ! ।
भृग्वन्तं गगनं देवि ! भृगुः स्वर्गान्तिको मनुः ॥
स्नाने च पूजने चार्घ्यं स्तुतौ च विनियोजयेत् ।
चैत्रे माघे च मासि च सप्तम्यां रविवासरे ॥
स्नात्वा स्वर्गमवाप्नोति सूर्य्यलोकञ्च विन्दति ।
रक्तांशो ! विश्वसम्भूत ! महापातकनाशन ! ॥
महाभाग ! सूर्य्यात्मक ! पापं हर नमोऽस्तु ते ।
तत्पूर्वे तु पञ्चधनुः कामाख्यं नाम वै सरः ॥
तत्र स्नात्वा त्रयोदश्यां सर्वान् कामानवाप्नुयात् ।
धात्रीफलं मुखे कृत्वा यस्तु स्नानं समाचरेत् ॥
अपुत्रो लभते पुत्रं राजानं पृथिवीपतिम् ।

चैत्रे सितत्रयोदश्यां स्नात्वा राज्यञ्च विन्दति ॥
वक्ष्यमाणेन मन्त्रेण कामेनार्घ्यं निवेदयेत् ।
कामकुण्ड ! महाभाग ! स्वयं देवीभिः संस्कृत: ॥
प्रयच्छ कामान् सकलान् पापाच्च त्राहि सर्वत: ।
सूर्य्यतीर्थे चार्घ्यदानं य: करोति वराङ्गने ! ॥
शतमष्टोत्तरञ्चापि सहस्रमयुतं तथा ।
द्वादशकृत्तथाष्टौ वा अश्वमेधफलं लभेत् ॥
माघे वा फाल्गुने वापि स्वाहार्घ्यं सप्तमीदिने ।
स्नात्वा रव्युदये काले कुष्ठी पापाद्विमुच्यते ॥
अपुष्पिता च विंशाब्दात् या नारी परमेश्वरि ! ।
तत्राभ्यर्च्यार्घ्यदानेन सा नारी पुष्पिता भवेत् ॥
योऽर्घ्यन्तु मार्त्तपात्रेण आदित्यस्य च शङ्करि ! ।
सप्त जन्मनि दारिद्र्यं मृते सा चाभिजायते ॥
मृतापत्या च या नारी अह्नि संपूज्य भास्करम् ।
करवीरेण वार्केण तथा धात्रीफलेन च ॥
करवीरशतं दत्त्वा नापुत्रो जायते क्वचित् ।
अभावे करवीरस्य पत्राण्यपि निवेदयेत् ॥
रक्तं रुद्रजटञ्चैव रक्तञ्च करवीरकम् ।
तथा रक्ततया देवि ! शस्तं भास्करपूजने ॥
सर्वेषाञ्चैव पुष्पाणां श्रेष्ठञ्च करवीरकम् ।
एकञ्च करवीरञ्च रक्तपद्मसहस्रकम् ॥
प्रतिपुष्पे चाश्वमेधफलं सम्यक् प्रजायते ।
तस्मात् सर्वप्रयत्नेन करवीरेण पूजयेत् ॥
अभावे करवीरस्य त्रिवारं वाग्यत: स्मरेत् ।
उच्चरेत् करवीरेति न तथा कोटिजाप्यत: ॥
प्रीति: स्यात् करवीरस्य न तथा याति भास्कर: ।

संवत्सरस्य मध्ये तु वारैकं समसौव्रतम् ॥
सूर्य्यतीर्थे सकृत् कृत्वा पुनाति सप्तमं कुलम् ।
अपराह्णं परं कालं परेशानि ! विजानीहि ॥
न्यूनातिरिक्ते देवेशि ! न सिद्धिर्जायते भुवि ।
द्विपक्वं वर्जयेद् यस्माद् घृतञ्चैव कलायकम् ॥
कम्रीरु शृङ्गवेरञ्च लवणञ्च कषायकम् ।
अम्लञ्चैव तथा तिक्तं दूषितञ्च न भक्षयेत् ॥
शिलापात्रेण भोक्तव्यं रौप्यताम्रे कदाच न ।
मण्डलस्य दक्षभागे धनुःपंक्तिप्रमाणतः ॥
तीर्थं गङ्गासरो नाम तत्र स्नात्वा महत् फलम् ।
गङ्गातीरे नरः स्नात्वा पितृन् देवांश्च तर्पयेत् ॥
ब्रह्मलोकं समाप्नोति रविसङ्क्रमणे ग्रहे ।
विष्णुपादरजःसम्भूते ! गङ्गे ! त्रिपथगामिनि ! ॥
धर्मद्रवि ! सरित्श्रेष्ठे ! त्राहि मां सर्वपातकात् ।
तुलायां मकरे चैव शुक्लाष्टम्याञ्च भाविनि ! ॥
स्नानमात्रेण स नरो विष्णुलोके महीयते ।
तस्य दक्षिणदिग्भागे धनुरष्टप्रमाणतः ॥
आगस्त्यं परमं तीर्थं मृतानां भुक्तिमुक्तिदम् ।
यः श्रुत्वा मज्जयेन्मर्त्यः सर्वज्ञत्वमवाप्नुयात् ॥
स्वयं देवो महादेवो विष्णुस्तत्र च संस्थितः ।
कामाख्यायाश्च क्रीड़ार्थमागस्त्यं कुण्डमुत्तमम् ॥
सर्वपापहरं शुद्धं विष्णुब्रह्मादिभिर्युतम् ।
देवदानवविद्याध्रवन्दितं सर्वकामदम् ॥
नानारत्नादिभिश्छन्नं सोपानं सुमनोहरम् ।
अगस्त्येनोत्पादितं कुण्डं महादेव्याश्च तुष्टये ॥
माघे च कार्त्तिके चैव शुक्लपक्षे वरानने ! ।

दशम्यां स्नानमात्रेण पुष्करस्य फलं लभेत् ॥
शतजन्मकृतं पापं तत्क्षणादेव नश्यति ।
सहस्रजन्मजं पापं विषुवे च दिनक्षये ॥
पौषे च कर्कटे चैव कृष्णाष्टम्यां महेश्वरि ! ।
स्नानञ्च वर्जयेद्देवि ! भार्य्याहानि र्भवेद्यतः ॥
यथा वाराणसी पुण्या तथा पुण्या न संशयः ।
गुह्यतीर्थं परं देवि ! नात्र कार्य्या विचारणा ॥
एतद्गुह्यतमं क्षेत्रमेतद्‌ गुह्यतरं परम् ।
यत्र गत्वा नरः सद्यो मुच्यते सर्वपातकैः ॥
यत्र देवो महादेवो यत्र देवी सरस्वती ।
गङ्गादिसरितः सर्वाः समुद्राः सप्त एव हि ॥
नदाः शोणादयो यत्र तीर्थानि च सरांसि च ।
किंवा वामे परीतस्य कुण्डस्य परमेष्ठिनः ॥
न शक्यं विस्तराद्वक्तुं मया जलजलोचने ! ।
यथा चराचरं सर्वं त्रैलोक्यं त्रासयेत्प्रभु ॥
तथा त्रायस्व मां नित्यं तीर्थवर्य्य ! नमोऽस्तु ते ।
आग्नेये तस्य क्षेत्रस्य किञ्चित् पश्चिमगोचरे ॥
एकविंशद्धनुर्मानं वासवं नाम तीर्थकम् ।
वासवे परमे तीर्थे स्नात्वाभ्यर्च्य च वासवम् ॥
शक्रवीजेन देवेशि ! इष्टस्य सदनं व्रजेत् ।
वक्ष्यमाणेन मन्त्रेण धरण्यार्घ्यं निवेदयेत् ॥
वासवाख्यं महातीर्थं सर्वपापप्रणाशनम् ।
तवाम्भसि निमज्याथ यथोक्तफलदो भव ॥
तस्य पश्चिमतो देवि ! नातिदूरे व्यवस्थितः ।
धनुःसप्तप्रमाणेन रम्भातीर्थं महेश्वरि ! ॥
रम्भातीर्थे नरः स्नात्वा रूपवानभिजायते ।

सह भर्त्रा मृता भवति ज्ञानाचारी पतिव्रता ॥
रम्भालोकञ्च तदनु तदन्ते भवनं हरेः ।
याति नात्यत्र सन्देहः शेषे च गुरुवासरे ॥
ब्रह्मकर्मसमुद्भूते ! सर्वकामप्रदे ! शुभे ! ।
कामद्रवि ! नमस्तेऽस्तु त्राहि मां भवसागरात् ॥
स्नात्वानेन च रम्भायै मन्त्रेणार्घ्यं निवेदयेत् ।
क्षेत्रस्य पश्चिमे भागे धनुस्त्रिंशत्प्रमाणतः ॥
तत्रैव रुक्मिणीकुण्डं स्नात्वा ब्रह्मपुरं व्रजेत् ।
मुखस्य क्षालनं कृत्वा नारी वा पुरुषोऽपि वा ॥
रूपवान् परलोके तु जायते नात्र संशयः ।
स्नानं कन्दर्पबीजेन शृणु क्षालनमन्त्रकम् ॥
ब्रह्मविष्णुमहेशानैः क्षालितं वदनं त्वयि ।
रूपवानश्विनो याति रूपं सत्येन देहि मे ॥
वायव्ये तस्य क्षेत्रस्य धनुरष्टाससम्मितम् ।
पितॄणां परमं तीर्थं स्नानाद्याति परां गतिम् ॥
पितृतीर्थ ! महाभाग ! स्वयं देवाष्टसत्कृत ! ।
तृप्तिहेतो ! महाभाग ! अघोरान्मां पुनीहि च ॥
अत्र स्नात्वा च मन्त्रेण पितृमेधफलं लभेत् ।
आगस्त्यस्य तु दक्षे च गत्वा स्नात्वा च तर्प्य च ॥
धनुर्वेदप्रमाणञ्च मवाक्षागति वै सरः ।
तत्र गत्वा च सप्तम्यां पितॄणामनृणो भवेत् ॥
गयातीर्थं महातीर्थं पितॄणां नास्ति तत्समम् ।
पावनः सर्वतीर्थेषु स मां पुनातु पापतः ॥
अनेन स्नानं कृत्वा तु उत्तीर्य्य धौतवाससी ।
पिधाय तिलकं दद्यात् क्षेत्रं कुर्य्यात् प्रदक्षिणम् ॥
कृत्वा दशाश्वक्षेत्रे च पिण्डं दद्यात् समाहितः ।

तत्र देवि ! षोड़शके पितॄन् समर्चयेद्बुधः ॥
क्षीरेण मधुना चैव पादापनयनेन च ।
दक्षिणादिक्रमाच्चात्र एकैकैर्हस्तकं चतुः ॥
वेदीषोड़शकस्तत्र प्रतिवेदीं समर्चयेत् ।
गयाकूपे नरः स्नात्वा दृष्ट्वा देवमुमापतिम् ॥
आत्मानं तारयेत् सद्यो दश पूर्वान् दशापरान् ।
विष्णुर्ब्रह्माद्यरुद्रश्च अगस्त्यश्च शतक्रतुः ॥
गणेशश्चैव क्रौञ्चश्च कुमारश्च प्रजापतिः ।
च्यवनः काश्यपश्चैव पुलस्त्यश्च यथाक्रमात् ॥
अश्वक्रान्तस्य वृद्धैरवमागस्त्येऽमृतवासरे ।
अत्र मातुः पृथक् पिण्डमन्यत्र पतिना सह ॥
दशाश्वमेधे यः पिण्डं नाम्ना येषान्तु निर्वपेत् ।
नाकस्थाश्च दिवं यान्ति स्वर्गस्था मोक्षमाप्नुयुः ॥
येऽस्मत्कुले च पितरो लुप्तपिण्डोदकक्रियाः ।
ये चाप्यकृतचूड़ाश्च ये च गर्भाद्विनिःसृताः ॥
येषां दारा विक्रेयाश्च येऽग्निदग्धास्तथापरे ।
भूमौ दत्तेन तृप्यन्तु तृप्ता यान्ति परां गतिम् ॥
पिता मातामहश्चैव तथैव प्रपितामहः ।
माता पितामही चैव तथैव प्रपितामही ॥
यथा मातामहश्चैव प्रमातामह एव च ।
ये च सिंहव्याघ्रसर्पप्रहृता निहताश्च ये ॥
दंष्ट्रिभिः शृङ्गिभिर्वापि तेषां पिण्डं ददाम्यहम् ।
अग्निदग्धाश्च ये केचिन्नाग्निदग्धास्तथा परे ॥
विद्युच्चौरहता ये च तेषां पिण्डं ददाम्यहम् ।
पशुयोनिर्गता ये च पक्षिकीटसरीसृपाः ॥
अथवा वृक्षयोनिस्थास्तेषां पिण्डं ददाम्यहम् ।

असंख्यजनसंस्था ये ये नीता यमशासनम् ॥
तेषामुद्धरणार्थाय इमं पिण्डं ददाम्यहम्।
जात्यन्तरसहस्राणि भ्रमन्ति स्वेन कर्मणा ॥
मनुष्यान्तर्गतं येषां यातनाशतमाहृतम्।
अन्येषां यातनास्थानां प्रेतलोकनिवासिनाम् ॥
तेषामुद्धरणार्थाय इमं पिण्डं ददाम्यहम्।
ये बान्धवाबान्धवा वा येऽन्यजन्मनि बान्धवाः ॥
तेषान्तु तृप्तिमायान्तु पिण्डदानेन सर्वदा।
ये ये पितृकुले जाताः कुले मातुस्तथैव च ॥
गुरुश्वशुरबन्धूनां ये चान्ये बान्धवाः स्मृताः।
ये ये कुले लुप्तपिण्डाः पुत्रदारविवर्जिताः ॥
क्रियालोपगता ये च जात्यन्धाः पङ्गवस्तथा।
विरूपा वा सगर्भा ये ये च जाताः कुले मम।
तेषां पिण्डं मया दत्तमक्षय्यमुपतिष्ठताम् ॥
ये बान्धवा ये पितृवंशजाता मातुस्तथा ये भवनादिजाताः।
कुलद्वये ये मम दासभूता मृतास्तथैवामृतसेवकाश्च ॥
मित्राणि सख्यः परसख्यश्च वृक्षाः पुण्याश्च दुष्टाश्च कृतोपकाराः।
जन्मान्तरे ये मम दासभृत्यास्तेषामिमं पिण्डमहं ददामि ॥
सूर्य्यकुण्डस्य वायव्ये धनुर्दण्डान्तरे स्थितः।
देवो गदाधरस्तत्र प्रणिपत्य प्रदापयेत् ॥
साक्षिणः सन्तु मे देवा ब्राह्मणा वसवस्तथा।
मया गयां समासाद्य पितॄणां निष्कृतिः कृता ॥
आगतोऽहं गयां देव! पितृकार्य्ये गदाधर!।
त्वमेव साक्षी भगवाननृणोऽहं ऋणत्रयात् ॥
पितृपिण्डस्य मध्ये तु पिण्डं दद्याच्च षोडश।
वर्त्तुलं कारयेत् पिण्डं क्षीरधारासु पातयेत् ॥

गदाधरस्य वै वामे नातिदूरेण शङ्करि ! ।
तत्र मातृगया देवि ! दक्षिणेन सुतीर्थकम् ॥
तथा गदाधरं देवं मुक्तिदं पुरुषोत्तमम् ।
तं प्रणम्य प्रयत्नेन न भूयो जायते नरः ॥
मौनादित्यं महात्मानं कनकार्कं विशेषतः ।
दृष्ट्वा मौनेन विप्रर्षिः पितॄणामनुगो भवेत् ॥
ब्रह्माणं पूजयित्वा च ब्रह्मलोकमवाप्नुयात् ।
उर्वश्या दक्षिणे तीरे या शिला कनकप्रभा ॥
सा विज्ञेया च गायत्री पूजयेद्गन्धचन्दनैः ।
गायत्रीं प्रातरुत्थाय उपागम्य तु नामशः ॥
सन्ध्यां कृत्वा प्रयत्नेन सर्ववेदफलं लभेत् ।
सावित्रीञ्चैव मध्याह्ने दृष्ट्वा यज्ञफलं लभेत् ॥
दशाश्वमेधे धनदो देवदेवो जनार्दनः ।
तत्र पिण्डप्रदानेन तृप्तिर्भवति शाश्वती ॥
गयायां पितृरूपेण देवदेवो जनार्दनः ।
तं दृष्ट्वा पुण्डरीकाक्षं मुच्यते वै ऋणत्रयात् ॥
दृष्ट्वा पितामहं देवं सर्वपापैः प्रमुच्यते ।
मकरे वर्त्तमाने च ग्रहणे चन्द्रसूर्य्ययोः ॥
दुर्लभस्त्रिषु लोकेषु आगस्त्ये पिण्डपातनः ।
आत्मजो वा तथान्यो वा मया कूपेऽश्वमेधिके ॥
यन्नाम्ना पातयेत् पिण्डं तं नयेद् ब्रह्म शाश्वतम् ।
तद्ब्रह्मकल्पितं स्थानं विप्रा ब्रह्मप्रकल्पिताः ॥
पूजितैः पूजिताः सर्वे पितृभिः सह देवताः ।
तर्पयेत्तु गयाविप्रान् हव्यकव्यविधानतः ॥
स्नानं देहपरित्यागो गयायान्तु विधीयते ।
यः करोति महादानं वृषोत्सर्गं करोति यः ॥

दशाश्वमेधिके तीर्थे मुक्तिदे स च मानवः ।
चतुःषष्टिधनुर्मानं क्षेत्रमागस्त्यमीरितम् ॥
पञ्चपञ्चाशतं तीर्थमुक्तं तीर्थं सुमध्यमे ! ।
उर्वशी च तथा सूर्य्यः कामः पुत्रश्च वासवः ॥
आगस्त्यश्चाश्वमेधश्च तीर्थसारो गयाविलः ।
उद्वन्धनमृता ये च गलपाशमृताश्च ये ॥
पतिदुष्टा च या नारी क्रिया तेषां न विद्यते ।
नान्त्येष्टिर्न च दाहश्च नाशौचं तेषु विद्यते ॥
आगस्त्ये च गयायाञ्च क्रियां कुर्य्यात्त्रिरात्रकम् ।
अमायाञ्च समारभ्य कुर्य्याच्चैव त्रिरात्रकम् ॥
अन्यत्र च क्रियां तेषां यः करोति सुदुर्मतिः ।
विफला च क्रिया तेषां चरेच्चान्द्रायणं व्रतम् ॥
ततः शुद्धिमवाप्नोति अन्यथा पातकी भवेत् ।
अन्यतीर्थे कृतं पापं गयायान्तु विनश्यति ॥
गयायां यत् कृतं पापं रामक्षेत्रे विनश्यति ।
रामक्षेत्रे कृतं पापं मणिकूटे विनश्यति ॥
मणिकूटे कृतं पापं नीलशैले विनश्यति ।
नीलशैले कृतं पापमन्तर्गेहे विनश्यति ॥
अन्तर्गेहे कृतं पापं सोमतीर्थे विनश्यति ।
सोमतीर्थे कृतं पापं मङ्गलायां व्यपोहति ॥
मङ्गलायां कृतं पापं आगस्त्ये तु विनश्यति ।
आगस्त्ये यत् कृतं पापं मन्दरे तद्विनश्यति ॥
मन्दरे यत् कृतं पापं वज्रलेपे विनश्यति ।
वज्रलेपाच्च यत् पापं अश्वक्रान्ते विनश्यति ॥
अश्वक्रान्ते कृतं पापं उर्वश्यां तद्व्यपोहति ।
माहात्म्यश्रवणेनाथ संहिताश्रवणेन वै ।

दिनं नयेन्महेशानि ! रात्रौ विष्णुविचिन्तनम् ॥
कृत्वा वासन्तु तत्रैव नक्तं भोज्यं न वर्त्तयेत् ।
ततोऽन्यदिवसे स्नात्वा आगस्त्ये स्नानमाचरेत् ॥
भस्माचलं स्पृशन् धारा सा विज्ञेया सरस्वती ।
तत्र स्नात्वा महेशानि ! अग्निष्टोमफलं लभेत् ॥
विष्णोर्वक्षःस्थिते ! भद्रे ! मकरन्दप्रिये ! शुभे ! ।
जन्मजन्मार्जितं पापं हर मे परमेश्वरि ! ॥
स्नायादनेन मन्त्रेण कार्त्तिक्याञ्च विशेषतः ।
देवस्य पूर्वभागे तु वापी तिष्ठति शोभना ॥
तस्याः स्वच्छोदकं पीत्वा पुनर्जन्म न विद्यते ।
आग्नेये भस्मशैलस्य धनुरष्टप्रमाणतः ॥
पिशाचमोचनं नाम तीर्थं परमकं शुभे ! ।
पिशाचमोचने तीर्थे पूजयामास शूलिनम् ॥
इदं देवस्य तल्लिङ्गं कपर्दीश्वरसुत्तमम् ।
वायव्ये भस्मकूटस्य धनुर्मदनमानतः ॥
कपालमोचनं नाम तीर्थं भ्यस्तीर्थंसुत्तमम् ।
पूजनीयं प्रयत्नेन स्तोतव्यं विविधैः स्तवैः ॥
कपालं पतितं तस्य स्नानस्य मम सुन्दरि ! ।
तस्मिन् स्नातो वरारोहे ! ब्रह्महत्यां व्यपोहति ॥
कपालेश्वरमीशानमस्मिन् तीर्थे व्यवस्थितम् ।
तस्योत्तरे धनुःपञ्च कपिला नाम वै शिवे ! ॥
तत्र स्नात्वा वरारोहे ! मुच्यते भवबन्धनात् ।
कपिलाह्रदतीर्थेऽस्मिन् स्नात्वा संयतमानसः ॥
वृषध्वजं शिवं दृष्ट्वा सर्वयज्ञफलं लभेत् ।
पूर्वाशाभिमुखेनैव आरोहेद् भस्मकूटकम् ॥
वक्ष्यमाणेन मन्त्रेण पूजयित्वा प्रशस्यते ।

वृषाचल ! नमस्तेऽस्तु धर्ममार्गत्रिपिष्टप ! ॥
आरोहयामि शिखरं भस्मकूट ! नमोऽस्तु ते ॥
पश्चिमाभिमुखं यस्तु आरोहेत् पर्वतं यदि ।
दशजन्मकृतं पुण्यं तत्क्षणादेव नश्यति ॥
उत्तराभिमुखो यस्तु यश्च ऐशान्यसम्मुखः ।
धनं पुत्रं कलत्रञ्च सर्वं नश्यति तत्क्षणात् ॥
अन्यद्द्वारं प्रवक्ष्यामि गुह्याद् गुह्यतरं शुभम् ।
वृषध्वजस्य माहात्म्यं शृणु देवि ! वरानने ! ॥
संयुक्ता सोमवारेण अमावस्या भवेद् यदि ।
तदा भस्माचलं गत्वा देवमभ्यर्च्य यत्नतः ॥
कुलैकविंशमुद्धृत्य स गच्छेत् परमं पदम् ।
गन्धाद्यैः स्नापयेल्लिङ्गं कमलैः सुमनोहरैः ॥
पञ्चामृतेन तोयेन चन्दनेन विलेपयेत् ।
महात्मानं ततः कुर्य्यान्मासान्ते प्रतिपर्वणि ॥
विल्वपत्रेण सम्पूज्य रत्नतोयेन स्नापयेत् ।
प्रासादेन तु मन्त्रेण रुद्रपुष्पेण पूजयेत् ॥
बन्धूकेन जयन्तेन मालूरेण विशेषतः ।
ध्येयः प्रीतो देवदेवः पिनाकी पांशुभिर्दीप्यमानैस्तृतीयैः ।
लोलैः साक्षात् सर्वपापौघहर्त्ता विश्वद्रष्टा यश्चतुरो देवदेवः ॥
विभ्रद्वासश्चर्म वैयाघ्रकाण्डं भूत्या शुभ्रं शशिकान्तं वपुश्च ।
देव्या गात्रे नीलदेहो मुखञ्च स्पृशन् पाणिं पाणिना सुप्रसन्नः ॥
पत्रेषु पूजयेदेता देवताः परमेष्ठिनः ।
धाम धर्मं तथा सूक्ष्मं विष्णुं नारायणं हरम् ॥
विजयं विरजं विश्वं मध्यादि प्रतिपूजयेत् ।
शक्तीः सम्पूजयेच्चैव रामाद्याः प्रोक्तलक्षणाः ॥
बाह्ये सम्पूजयेत्तद्वत् श्रीकण्ठाद्याश्च तद्बहिः ।

पीठेशांश्च तथा बाह्ये पीठेशांश्चाग्रतोऽर्चयेत् ॥
त्रैयम्बकेण मन्त्रेण पूजयेत् कमलां विना।
नन्दीशं मुकुटञ्चैव दिक्पालान् पूजयेत् क्रमात् ॥
एवं सम्पूज्य देवेशं पूजाभिर्भक्तिमान्नरः।
प्रणम्य परमेशानं इदं स्तोत्रमुदाहरेत् ॥
ओं नमो विश्ववर्णाय हिरण्याय हिरण्यकर्णाय च।
हिरण्यकृतचूड़ाय हिरण्यपतये नमः ॥
ईशानवक्त्रसम्भूत ! हरिकेश ! नमोऽस्तु ते।
नमो बालार्कवर्णाय ज्वलद्रूपधराय च ॥
नमोऽशुद्धाय शुद्धाय सौभगाय च्यथाय च।
भवाङ्गोज्झितकेशाय मुक्तकेशाय वै नमः ॥
नमः षट्कर्मतुष्टाय त्रिकर्मनिरताय च।
वर्णाश्रमेण विधिवत् पृथक् कर्मप्रवर्त्तिने ॥
नमः श्रोत्रीय श्रोत्राय नमः कारकणाय च।
श्वेतपिङ्गलनेत्राय कृष्णवक्त्रे चणाय च ॥
धर्मकर्मार्थमोचाय सर्वपापहराय च।
नमस्त्रिशूलहस्ताय उमाकान्ताय वै नमः ॥
ईशानवक्त्रसम्भूत ! हरिकेश ! नमोऽस्तु ते।
प्रसीद पार्वतीकान्त ! उमानन्दाय वै नमः ॥
ततोऽनुज्ञां समादाय कृताञ्जलिपुटः करः।
प्रणम्य पूजयित्वा च इमं मन्त्रमुदीरयेत् ॥
उमानन्द ! नमस्तेऽस्तु पार्वतीप्रीतिवर्द्धन !।
निर्विघ्ना यातु मे सिद्धिर्यस्मात् पूजा कृताऽद्य मे ॥
जगन्नाथ ! प्रसादेन श्रीमत्कामेश्वरं शिवम्।
अर्चयाम्यद्य देवेश ! आज्ञया ते महेश्वरम् ॥
प्राच्यं तस्य समभ्यर्च्य विश्वक्सेनं जनार्दनम्।

देवस्य पश्चिमे भागे मातङ्गं नाम चैत्रकम् ॥
धनुर्द्वाविंशमानेन तत्र वासे न शोचति ।
तत्र यत् पातकं कृत्वा अन्यद् ब्रह्मवधे समम् ॥
तत्र तत्र सुकृतं किञ्चित् अग्निष्टोमफलं लभेत् ।
मातङ्गं पूजयेत्तत्र गङ्गाद्यैर्भक्तिमान्नरः ॥
मायावीजेन देवेशि ! भावेन सुसमाहितः ।
तत्रस्थो मन्दिरं पश्येद्दक्षिणाभिमुखेन तु ॥
स सर्वंकुलमुद्धृत्य ब्रह्मलोके महीयते ।
नमो मन्दरशैलाय विष्णुरूपाय वेधसे ॥
तान् दृष्टाथ च स्वर्गस्थो भवपापं व्यपोहतु ।
वीक्षेत् सन्ध्याचलं पश्चादिमं मन्त्रमुदीरयेत् ॥
युगकोटिसहस्राणि यत् पापं समुपार्जितम् ।
क्षपासिगजवक्त्रे च साक्षी भव मतङ्गज ! ।
ततोऽर्घ्यं भानवे दद्यात्तिलवारिकुशान्वितम् ॥
उत्थाय प्रणिपातेन दद्यादाचमनीयकम् ।
आदित्यस्य व्रताङ्गे तु अर्घ्यदाने विशेषतः ॥
उपविश्य ततो दद्यादन्यतोत्थाय दापयेत् ।
अधोमुखञ्चार्घ्यपात्रं दत्त्वार्घ्यान्ते विचक्षणः ॥
तत्र चण्डेश्वरं सूर्यं प्रणिपत्य विसर्जयेत् ।
दशाश्वमेधनैर्ऋत्ये दाक्षिण्ये मम सुन्दरि ! ॥
इषुक्षेपान्तरे यच्च संस्थितं कलिपर्वतम् ।
तत्रारोहणमात्रेण सुकृतञ्च विनश्यति ॥
दुःखितं लिप्यते गात्रे कलिः स्पृशति नान्यथा ।
कलिः स्पृशति यां धारां सा धारा मम वाहिनी ॥
सर्वं कलिमलं तीर्थं तथैनं परिवर्जयेत् ।
मन्दरस्य हि चैशान्यां धनुःषोड़शकं मितम् ॥

चक्रतीर्थं महातीर्थं सर्वपापप्रणाशनम् ।
ग्रहापदोषजञ्चैव पातकं यत् कृतं बहु ॥
कृष्णे शुक्ले चतुर्थ्याञ्च दृष्ट्वा सिंहे च चन्द्रकम् ।
तद्दोषात् पातकं यच्च सर्वं स्नानाद्विनश्यति ॥
अस्थीनि पातयेद् यस्तु सप्तरात्रौ मम प्रिये ! ।
चक्राङ्कितं भवेद्देवि ! नात्र कार्य्या विचारणा ॥
चक्रतीर्थे मृतं सर्वं धारणाद् योऽपि चन्दनम् ।
तत्फलं प्राप्य तेजस्वी मृते हरिपुरं व्रजेत् ॥
द्वारकायां समुद्भूत ! द्विजन्मभवसागरात् ।
तीर्थराज ! नमस्तेऽस्तु त्राहि मां भवबन्धनात् ॥
मन्त्रेणानेन स्नात्वा तु सवित्रेऽर्घ्यं निवेदयेत् ।
चक्रतीर्थे नरः स्नात्वा वेधसं यस्तु पूजयेत् ॥
दश पूर्वान् दश परान् आत्मानञ्चैव तारयेत् ।
चक्रतीर्थं स्पृशन् शैलं नन्दनं नाम पर्वतम् ॥
धनुर्द्विषष्टिमानञ्च पश्चिमेनैव सुन्दरि ! ।
जनार्दनञ्च देवेशं कलौ बौद्धस्वरूपिणम् ॥
तं दृष्ट्वा मुच्यते पापैर्महाघोरैः सुदारुणैः ।
कर्कशं पौण्ड्रवर्द्धञ्च या शिलाचक्र उद्यता ॥
मन्दरस्य च पाश्चात्ये शुभशैलस्य भाविनि ! ।
जनार्दनस्य चिह्नञ्च रूपञ्च परिकीर्त्तितम् ॥
उत्तरे तस्य शैलस्य ऐशान्यां विरजा तथा ।
दक्षिणे गजशैलस्य पश्चिमे शौभ्रलिङ्गकम् ॥
एतन्मध्यतमं क्षेत्रमागस्त्यं नाम वै गया ।
एवं शतमितं क्षेत्रमसम्भवादिकं स्मृतम् ॥
एतदाशां विजानीयादन्यल्लोहितमुच्यते ।
तत्र पिण्डप्रदानेन पितॄणां परमा गतिः ॥

जनार्दनस्य हस्ते च स्वाहापिण्डं समर्पयेत् ।
एष पिण्डो मया दत्तस्तव हस्ते जनार्दन ! ॥
परलोकगतं मह्यं त्वं हि दाता भविष्यसि ।
कलिशेषस्य पूर्वे तु धनुरष्टप्रमाणतः ॥
सा शिला प्रेतभावेन पितॄणां तरणाय च ।
तत्र पिण्डप्रदानेन न प्रेतो जायते क्वचित् ॥
चक्रतीर्थस्य चाग्नेये धनुर्द्वन्द्वप्रमाणतः ।
लिङ्गं लौलं परं तीर्थं तिलदुग्धैः प्रतर्पयेत् ॥
जनार्दनं ततो वीक्ष्य मुच्यते वै ऋणत्रयात् ।
कलिद्वापरयोः सन्धौ धनुरर्द्धप्रमाणतः ॥
शुक्रेण स्थापितं लिङ्गं शुक्रेशं नामतः श्रुतम् ।
देवं शुक्रेश्वरं दृष्ट्वा को न मुच्येत बन्धनात् ॥
गोलेश्वरं ततो दृष्ट्वा मुच्यते ब्रह्महत्यया ।
अङ्गारेशञ्च सिद्धेशं गयादित्यं गजं तथा ॥
मार्कण्डेयेश्वरं दृष्ट्वा पितॄणामनृणो भवेत् ।
गयागोलेश्वरं दृष्ट्वा स्नापयित्वा जनार्दनम् ॥
एतेन किं न पर्य्याप्तं नृणाञ्च शुद्धिकारणम् ।
ब्रह्मलोकं प्रयान्तीह पुरुषा एकविंशतिः ॥
पृथिव्यां यानि तीर्थानि आसमुद्रसरांसि च ।
चक्रतीर्थं गमिष्यन्ति वारमेकं दिने दिने ॥
पृथिव्याञ्च गया पुण्या गयायां कूपकं तथा ।
कूपादष्टगुणं देवि ! श्रेष्ठा मातृगया शुभे ! ॥
पुत्रो मातृगयां गत्वा अनृणो भवति क्षणात् ।
गयायां पिण्डदानेन पितॄणामनृणो भवेत् ॥
गयान्तं पिण्डदानञ्च गयान्तं तीर्थमेव च ।
पञ्चकान्तं कामरूपं पिच्छिलान्ता सरित् शुभे ! ॥

जनार्दनस्य हस्ते तु पिण्डं दद्यात् स्वकं नरः।
विरजे च तथा चाश्वे कर्णिवामे च सोमके॥
जीवत्पिण्डप्रदानेन अल्पायु र्जायते नरः।
यत्रागस्त्ये महाक्षेत्रे स्वकं पिण्डं ददेत्तु यः॥
मासद्वयाधिकं वर्षमायुषो वर्द्धते क्रमात्।
स्वहस्ते तु वृषोत्सर्गं यः करोत्यौर्द्धदेहिकम्॥
परलोकगते देवि! अक्षयं तदपि स्मृतम्।
पित्रोश्च जीवतोः पुत्रो न कुर्य्यादौर्द्धदेहिकम्॥
बहुपुत्रे चैकपुत्रे पुत्रे वा योगसेविते।
क्षयक्षणगते पुत्रे त्रिपुत्रे वा महेश्वरि!॥
चत्वारिंशत्परो देवि! स्वयमात्मक्रियाञ्चरेत्।
दानञ्चैव वृगोत्सर्गं कुर्य्यान्नैव दशाहिकम्॥
दम्पत्यो जींवतोः कुर्य्याद् वृषोत्सर्गद्वयं सदा।
एकत्र मण्डले कुण्डे वृषोत्सर्गं पृथक् चरेत्॥
मृते कुर्य्यादेकगुणं जीवितेऽष्टगुणं फलम्।
परगोत्रकृते चैव स्वल्पाल्पं फलमाप्नुयात्॥
उद्यतस्तु गयां गन्तुं श्राद्धं कृत्वा विधानतः।
कृत्वा स्वजनसम्भाषां ग्रामस्यापि प्रदक्षिणम्॥
ततो ग्रामान्तरं गत्वा श्राद्धशेषस्य भोजनात्।
कृत्वा प्रदक्षिणं गच्छेत् प्रतिग्रहविवर्जितः॥
गृहाद्वारत्रिमात्रञ्च आगस्त्यगमनं प्रति।
स्वर्गारोहणसोपानः पितॄणान्तु पदे पदे॥
दिवा च सर्वदा रात्रौ आगस्त्ये श्राद्धकृद्भवेत्।
अश्वतीर्थे कृतं श्राद्धं नीलकूटे च पञ्चके॥
रामाश्रमे सोमकूटे श्राद्धी स्वर्गं नयेत् पितॄन्।
आगस्त्ये मण्डलं कृत्वा दृष्ट्वा देवं जनार्द्दनम्॥

आरुह्य मन्दरं शैलं पुनाति सप्तमं कुलम्।
सांवत्सरं गयाश्राद्धं पार्वणं प्रतिपर्वणि।
निरामिषं कृतं श्राद्धं तथाच विषुवद्वये॥
सपिण्डाः पितरस्तस्य निराशाः सर्वदा गताः।
आमश्राद्धे आममांसं प्रदद्यादविचारतः॥
पितरोऽधोमुखगतास्तिष्ठन्ति न मम प्रिये!।
सामिषन्तु कृतं श्राद्धं यस्तु भुङ्क्ते निरामिषम्॥
तामिस्रनरकं गच्छेत् पितृभिः सह नान्यथा।
दीर्घतन्तुमयं कुर्य्याद् गृहीत्वा तत्र शङ्करि!॥
श्राद्धाचारं विना कुर्य्याद् व्रतमेवं मम प्रिये!।
निरामिषः कृती तेन कुर्य्यात् श्राद्धं निरामिषम्॥
भोक्ता निरामिषं भुङ्क्ते सामिषं न कदाचन।
सद्यो निमन्त्रयेत् श्राद्धे कर्म कुर्य्याद्विचक्षणः॥
शूद्रेण निन्दिते विप्रे श्राद्धयज्ञे सुरेषु च।
ब्राह्मणं भोजयेद् यस्तु भुङ्क्ते विष्ठाञ्च शङ्करि!॥
माहिषं वृहदाजञ्च मेषञ्च चामरं तथा।
गोधां कूर्मञ्च शाल्वञ्च शाशकं शौकरं तथा॥
वाराहञ्च तथा मेषं श्राद्धे देयानि सर्वशः।
अकलौ तु गवां मांसं सारमेयञ्च तत्त्ववित्॥
हीनेन्द्रियं छागलञ्च न कृष्णं तस्य वर्जयेत्।
कृष्णच्छागस्य मांसेन पितॄन् यस्तु प्रतर्पयेत्॥
निराशाः पितरो यान्ति शापं दत्त्वा सुदारुणम्।
हीनेन्द्रियं विना छागमांसै र्यस्तु प्रतर्पयेत्॥
महाभयकरं प्रोक्तं तस्मात्तत् परिवर्जयेत्।
माहिषं द्वादशाब्देन तृप्तिर्भवति शाश्वती॥
सांवत्सरन्तु आजेन च्छागैः पार्वति! षट् समाः।

चामरेण शतं वर्षं साहस्रं गोधया प्रिये ! ॥
षण्मासञ्च वरारोहे ! कूर्मेण मासमात्रकम् ।
वाराहेण तु षण्मासं शाशकेन नवैव तु ॥
द्वाविंशन्मासकेनैव क्षुद्रवाराहके तथा ।
शताब्दं चामरेणैव स्थूलमांसन्तु वर्जयेत् ॥
यत्र वर्ज्यं भवेत् पुंभिश्चतुर्भिः षड्भिरेव च ।
अतिस्थूलमिति प्रोक्तं तस्मात् तत् पूर्वसूरिभिः ॥
माहिषस्य च गव्यस्य वराहस्य मम प्रिये ! ।
मार्गस्य वृहच्छागस्य स्थूलस्यापि हि शस्यते ॥
खाङ्गं पाञ्चनखं भक्ष्यमभक्ष्यं खड्गसंयुतम् ।
चतुर्नखं वारिजातं वर्जयेच्च मम प्रिये ! ॥
गोधिकां स्वर्णखड्गञ्च चामरं कृष्णमेव च ।
वर्जयेत् कूर्मकं विद्वान् यदि चक्रेण चिह्नितम् ॥
सिंहतुण्डं रोहितञ्च राजीवं चित्रकं तथा ।
महाशल्कं प्रोष्ठिकञ्च मत्स्यञ्च पर्वतीयकम् ॥
वृहद्रोहितमत्स्यञ्च वृहत्प्रोष्ठिकमेव च ।
वृहच्छल्कञ्च चित्रञ्च श्राद्धे यत्नेन योजयेत् ॥
मत्स्यांश्च शल्कहीनांश्च सर्पाकारांश्च वर्जयेत् ।
शल्कहीनस्य मध्ये तु प्रदेयं काचकद्वयम् ॥
प्रेताकारादिकं यच्च विकृताकारमेव यत् ।
सर्पास्यान् पीवरांश्चैव रजनांश्च विवर्जयेत् ॥
जीवांशं शेलुकञ्चैव पद्मकं कुङ्कुमं तथा ।
स्वर्णकं ग्रन्थिवर्णञ्च श्राद्धे यत्नेन वर्जयेत् ॥
धूम्रञ्च पञ्चकदलं शर्कराकीटसंयुतम् ।
महिषस्य घृतं चीरमाज्यं श्राद्धे विवर्जयेत् ॥
नारिकेलञ्च तालञ्च खर्जूरं पीनकं तथा ।

तक्रं घृतं विना क्षीरं प्रयत्नेन विवर्जयेत् ॥
दीपं वर्जेद् रम्भ्रवर्त्त्या प्रत्यक्षं तैलमेव च ।
कुसुम्भं नालिकाशाकं मालतीकुसुमं तथा ॥
वृद्धिश्राद्धे पङ्कजञ्च करवीराणि वर्जयेत् ।
न प्रदद्यात्तु गाङ्गेयं द्रव्यं रक्तजलोद्भवम् ॥
विना वस्त्रेण यच्छ्राद्धं विना यज्ञोपवीतकम् ।
विना तिलेन देवेशि ! विना गव्येन निष्फलम् ॥
अभावे चैव वस्त्रस्य कुशमाल्यं निवेदयेत् ।
अभावे यज्ञसूत्रस्य सूत्रयुग्मन्तु विन्यसेत् ॥
शूद्रश्राद्धे च स्त्रीश्राद्धे यज्ञसूत्रं विवर्जयेत् ।
ताम्बूलेन विना श्राद्धं पर्णचूर्णेन शङ्करि ! ॥
अभावे जीवकं दद्यात् पायसं मधुसंयुतम् ।
एकजातीयपात्रे तु दद्यादन्नं समाहितः ॥
दैवतं प्रथमं दद्यात् पितृपात्रे निवेदयेत् ।
पितृशेषन्तु दैवे तु पुनरन्नं कदाचन ॥
निरग्नेरामश्राद्धे तु अन्नं न चालयेत् क्वचित् ।
वृद्धौ च चालयेदन्नं संक्रमे ग्रहणेषु च ॥
अष्टमुष्टिप्रमाणेन ब्राह्मणैनैकसंक्रमात् ।
अतोऽधिकञ्च न्यूनञ्च न दद्यात् श्राद्धकर्मणि ॥
यः श्राद्धं पद्मपत्रे च करोति सुमनोहरम् ।
वर्षाणान्तु शतं साग्रं तृप्तिर्भवति नान्यथा ॥
अश्वत्थस्य च्छदे देवि ! ब्रह्मपात्रे च शङ्करि ! ।
षण्मासं जायते तृप्तिरनन्ताश्वत्थपत्रके ॥
मासैकं ताम्रपात्रे च रुक्मपात्रे तु वत्सरम् ।
रौप्ये दशगुणं प्रोक्तं खड्गपात्रे शतोत्तरम् ॥
एकजातीयपात्रे तु स्मृताहे श्राद्धकर्मणि ।

पार्वति च तथा वृद्धौ पृथक्जातींश्च योजयेत् ॥
संवत्सरं भवेत्तावद् व्रीहींश्चैव नियोजयेत् ।
वर्षाद्भवति यो व्रीहिः प्रेतश्राद्धे विवर्जयेत् ॥
धान्यं वर्षासमुद्भूतं तिलं यावानकञ्च यत् ।
यज्ञादौ च तथा श्राद्धे द्विःस्विन्नं परिवर्जयेत् ॥
षष्टिधान्यं राजधान्यं बृहद्धान्यञ्च वल्लभम् ।
सोमधान्यं शिम्बधान्यं वङ्गानि रक्तशालिकम् ॥
केतकीं कलविङ्कञ्च धान्यं नारायणं तथा ।
माधवञ्च प्रदीपञ्च विष्णुधान्यञ्च वल्लभम् ॥
भोग्यधान्यमशोकञ्च नागाद्यं पञ्चकं तथा ।
धान्यानि श्राद्धयोग्यानि वेदेषु च नियोजयेत् ॥
गोधूमैश्च यवैश्चैव अपूपैश्च महेश्वरि ! ।
नीवारांश्च तथा श्राद्धे देवधान्यं तथा परम् ॥
वसन्ते रोपितं धान्यं यत्नेन च विवर्जयेत् ।
तदन्नभक्षणादेव पापं संक्रमते नृणाम् ॥
भक्षणे श्रावणान्नस्य दरिद्रश्चाभिजायते ।
भक्षणे सोमधान्यस्य व्रतं चान्द्रायणञ्चरेत् ॥
भक्षणे वृद्धधान्यस्य विभवो जायते किल ।
राजधान्यं शिम्बधान्यं भक्षणाद्विष्णुलोकभाक् ॥
रक्तशाल्योदनं भुक्त्वा विजयश्रीमवाप्नुयात् ।
नारायणं माधवस्य भोगञ्च मम सुन्दरि ! ॥
धान्यन्तु यावसं भुक्त्वा नरः ख्यातिमवाप्नुयात् ।
निमन्त्रितं ब्राह्मणञ्च यदि श्राद्धे विवर्जयेत् ॥
दारुणं नरकं गच्छेद् यावदाभूतसंप्लवम् ।
निमन्त्रितो यदि गृहे भुङ्क्ते विप्रः कथञ्चन ॥
स गच्छेत् कालसूत्रञ्च शौकरीं योनिमाविशेत् ।

निमन्त्रितो व्रतस्थश्च ब्रह्मचार्य्यथवा पुनः ॥
नातिक्रामेच्च तत् श्राद्धं न दोषो मधुभक्षणे ।
सद्योघृतं सदा धान्यं मांसं तैलं तथैव च ॥
व्रतस्थभक्षणे देवि ! न दोषः पितृयज्ञके ।
गयाश्राद्धे प्रेतपक्षे तथानुमरणे प्रिये ! ॥
ग्रहणे तीर्थश्राद्धे च न जिघ्रेत् पिण्डकं प्रिये ! ।
मुक्तितीर्थं विना विप्री नानुगच्छेत् स्वकं पतिम् ॥
पृथक् चितां नानुगच्छेन्मुक्तिमार्गेषु सर्वदा ।
क्रिया कार्य्या दशाहेन अन्यत्र तु निवारकम् ॥
उद्बन्धनमृतञ्चैव तथा जलगते शवे ।
पर्य्युषिते शवे चैव क्षयकुष्ठिशवे तथा ॥
ब्राह्मणी नानुगच्छेच्च मुक्तितीर्थाद्दृते प्रिये ! ।
बहुपुत्रा सगर्भा च तथा चैव रजस्वला ॥
पतिता कुलहा चैव असती न कदाचन ।
ततोऽनुगमनार्थञ्च एकाहं स्थापयेत् शवम् ॥
अनुगच्छेत् परेद्युश्च न दोषस्तत्र जायते ।
विदेशमरणे चैव भर्त्तुर्यद्वस्तु विद्यते ॥
तद्द्रव्यं हृदये कृत्वा चक्रादीनामनुव्रजेत् ।
भावावगुण्ठिता वाथ सती शूद्रा भवेत् क्वचित् ॥
तस्यानुमरणं कुर्य्याद् वैश्यस्य च विधिः स्मृतः ।
तृतीयायां मृतो भर्त्ता चतुर्थ्यामप्यनुव्रजेत् ॥
भर्त्तुरेव तिथौ तस्याः कुर्य्यात् संवत्सरे बुधः ।
एकत्र मरणे देवि ! पिण्डमेकत्र निर्वपेत् ॥
युगपत् कारयेत् श्राद्धं समाप्यैवं न तद्भवेत् ।
दम्पत्योश्चैव पिण्डञ्च वर्त्तुलं कारयेन्नरः ॥
वस्त्रेणावरणं कुर्य्यान्मधु क्षीरं निपातयेत् ।

न पिण्डेन सह क्षीरं शुष्काम्रं न कदाचन ॥
न घृतं माहिषाज्यञ्च धात्रिकं लकुचं तथा।
दाड़िमं वीजपूरञ्च ऊर्वारुकफलं तथा ॥
जम्बूफलञ्च पद्माक्षं कदलीं रामकं त्यजेत्।
कशेरुञ्च युगानञ्च कपिलाक्षीरमेव च ॥
तथा जम्बूफलं पक्कं श्राद्धे देयानि यत्नतः।
अपक्कं कीटदुष्टञ्च मूलकं करमर्दकम् ॥
विल्वञ्च तिन्दुकञ्चैव मधुकं मधुरीं तथा।
जम्बूफलञ्च पद्माक्षं जीवन्तीञ्च निवेदयेत् ॥
ब्राह्मणैः क्षत्रियै वैंश्यैः श्राद्धं सुवचसोदितम्।
कुलधर्ममनुज्ञाय दातव्यं मन्त्रपूर्वकम् ॥
त्रिभि वँर्णै वँरैः शूद्रै र्देयं विप्रानुशासनात्।
मन्त्रवर्जञ्च विधिवद् वह्निपाकविवर्जितः ॥
पुष्करादिषु तीर्थेषु पुण्येष्वायतनेषु च।
शिखरेषु गिरीन्द्राणां पुण्यदेशे तु शङ्करि ! ॥
सरित्सु पुण्यतोयेषु सरित्सु च नदेषु च।
सङ्गमेषु नदीनाञ्च सागरेषु च सप्तसु ॥
देवतायतने चैव गोष्ठे च धात्रीमूलके।
दिव्यपादपमूलेषु तुलसीमध्यगेषु च ॥
दशार्णेषु कुमार्य्येषु मगधेषु कुशेषु च।
विरजस्योत्तरे तीरे लौहित्यस्य च दक्षिणे ॥
दक्षिणे नर्मदायाश्च आगस्त्यस्य च दक्षिणे।
पूर्वेषु करतोयाया न देयं श्राद्धमुच्यते ॥
श्राद्धं देयं वदन्तीह मासि मासि उपक्षये।
पौर्णमासीषु श्राद्धञ्च कर्त्तव्यमक्षगोचरे ॥
नित्यश्राद्धं सदैवञ्च मनुष्यैः सह गीयते।

नैमित्तिकं सुरैः सार्द्धं नित्यं नैमित्तिकं तथा॥
काम्यानि यानि श्राद्धानि प्रतिसंवत्सरं द्विजैः।
वृद्धिश्राद्धञ्च कर्त्तव्यं कर्माकर्मादिकेषु च॥
तत्र स्नानं हि जानीहि मातृपूर्वन्तु शङ्करि!।
कन्यागते सवितरि दिनानि दश पञ्च च॥
पार्वणेन विधानेन श्राद्धं कुर्य्याद्विचक्षणः।
यो ददाति गुड़ैर्मिश्रान् तिलान् वा श्राद्धकर्मणि॥
मधुना मधुमिश्राणि चाक्षयं मनुनैव यत्।
कृत्तिकासु पितॄनार्च्य मुक्तिमाप्नोति मानवः॥
अपत्यकामो रोहिण्यां सौम्यतेजस्वितां लभेत्।
मघासु च प्रजां पुष्टिं सौभाग्यं फाल्गुनीषु च॥
नक्षत्रेष्वपि चान्येषु कर्त्तव्यं कामचारतः।
अपि नः पितरो यस्य मृताः शस्त्रेण वाहवे॥
तेन कार्य्यं चतुर्दश्यां तेषां तृप्तिमभीप्सता।
यदा पञ्चदशश्राद्धं कर्त्तव्यं काम्यभावतः॥
चतुर्दश्यां समेतञ्च षोड़षश्राद्धमिष्यते।
दशम्यादिकमारभ्य पञ्चम्यादिकमेव च॥
तदा वर्ज्यं चतुर्दश्यां तिथौ दैवान् समाचरेत्।
श्राद्धं कुर्य्यादमावस्यां मासि मासि तदा क्वचित्॥
सर्वान् कामानवाप्नोति मृते च स्वर्गमश्नुते।
नित्यश्राद्धे तर्पणे च सुरार्चा-नित्यपूजने॥
भोजने ब्राह्मणानाञ्च दक्षिणा न हि विद्यते।
श्राद्धाशक्तौ प्रेतपक्षे ब्राह्मणान् भोजयेत् प्रिये!॥
देवेभ्योऽन्नं जलं दद्यादेवञ्चापि निवेदयेत्।
पित्रोश्च जीवतो देवि! यज्ञादौ श्राद्धवासरे॥
भोजयेद्भक्ष्यभोज्यैश्च फलैश्च विविधैरपि।

अभोजिते हतो यज्ञः श्राद्धञ्चापि हतं भवेत् ॥
वृद्धौ श्राद्धे पार्वणे च नित्यश्राद्धं विवर्जयेत् ।
ब्राह्मणानां बहूनाञ्च भोजने च महेश्वरि ! ॥
राजसूयाश्वमेधाय यदिच्छेद् दुर्लभं पदम् ।
गयां गङ्गां गतो गत्वा कुर्य्यात् श्राद्धं विधानतः ॥
अप्यम्बुशाकमूलान्नैः शक्तुभिर्यावनीयकैः ।
तावत् पितृपुरी शून्या यावद्विष्णोः प्रबोधनम् ॥
प्रबोधे समतिक्रान्ते पितृा वा दैवतैः सह ।
निश्वस्य प्रतिगच्छन्ति शापं दत्त्वा सुदुष्करम् ॥
गयाश्राद्धं गयास्नानं तथा च तिलतर्पणम् ।
खड्गपात्रेण देवेशि ! जीवत्पित्रादि वर्जयेत् ॥
सोमवारे त्वमावास्यामौनं स्नानं विवर्जयेत् ।
यस्य माता मृता देवि ! तस्य मातृगया प्रिये ! ॥
यदि श्रेष्ठः पिता देवि ! पितृर्व्यमरणेऽपिवा ।
मातापित्रो र्जीवतोश्च न कदापि गयां व्रजेत् ॥
पितृपिण्डं प्रदद्यात्तु भोजयेच्च पितामहम् ।
प्रपितामहस्य पिण्डेऽपि एवं शास्त्रेषु निश्चितम् ॥
मृतेषु पिण्डं दातव्यं ब्राह्मणांश्चापि भोजयेत् ।
सपिण्डीकरणं नास्ति न च पार्वणमिष्यते ॥
दक्षिणापूरणं सिद्धं विवित्तं शुभलक्षणम् ।
शुचिं देशं विविक्तञ्च गोमयेनोपलेपयेत् ॥
पावक्ये भूमिभागे च पितॄणां नैव निर्वपः ।
शमनीयगृहे देवि ! पापागारं विवर्जयेत् ॥
भिक्षुको ब्रह्मचारी च भोजनार्थमुपस्थितः ।
उपविष्टेषु श्राद्धेषु कामभृदपि पूजयेत् ॥
सह क्रियां देशकालौ द्रव्यब्राह्मणसम्पदः ।

पञ्चैते पितरो घ्नन्ति तस्याङ्के हेतुविस्तरम् ॥
अपि वा योजयेद्देवं ब्राह्मणं वेदपारगम् ।
भूयोऽपि देवसन्तुष्ट्यै तत् कार्य्यं वा करोति यः ॥
न काम्यं तद् भवेत् श्राद्धं तन्त्रेणापि समापयेत् ।
वैश्वदेवस्य चारम्भे तत् श्राद्धञ्च विवर्जयेत् ॥
प्रासादीकरणे चैव यात्रायां गृहकर्मणि ।
न विद्यते श्यामपक्षे तन्त्रस्नानं विवर्जयेत् ॥

इति योगिनीतन्त्रे सर्वतन्त्रोत्तमे द्वाविंशतिसाहस्रे कामरूपाधिकारे द्वितीयभागे पञ्चमः पटलः ।

अथ षष्ठः पटलः ।

श्रीभगवानुवाच ।

द्वितीयेऽन्यदिने देवि! यत् कृतं शृणु पार्वति ! ।
चक्रतीर्थे नरः स्नात्वा भस्मकूट ! नमोऽस्तु ते ॥
लौहित्यदक्षिणं गत्वा वायव्ये कोलपर्वतः ।
तस्य पश्चिमदिग्भागे पाण्डुनाथो महाबली ॥
तस्य वायव्यभागे तु धनुर्द्वादशकं सरः ।
ब्रह्मकुण्डमिति ख्यातं सर्वपापप्रणाशनम् ॥
किं जप्यैः किं तपोभिश्च किं दानैः किं सुतैरपि ।
ब्रह्मकुण्डे नरः स्नात्वा सिद्धिं विन्दति तत्क्षणात् ॥
ईश्वरानुज्ञया पूर्वमुषितं ब्रह्मणा पुरा ।
स्नानार्थं सम्प्रधावन्ति तत्तीर्थं देवदानवाः ॥
ऋषयः सिद्धगन्धर्वास्तीर्थानि च सरांसि च ।
माहात्म्यमण्डलं तस्य ब्रह्मकुण्डस्य सुन्दरि ! ॥

तीरेण स्नात्वा विधिवद् दानं दद्याद् यथाविधि।
मणिकाञ्चनरत्नानि यथाविभवमात्मनः॥
सम्भवे सति यो मोहात् न स्नाति स नराधमः।
पच्यते नरके घोरे यावदिन्द्राश्चतुर्दश॥
तस्य दक्षिणदिग्भागे धनुःपञ्चप्रमाणतः।
लौहित्यं नाम तत्तीर्थं स्नानान्नश्यति पातकम्॥
स्नानेन तीर्थराजस्य तथा सर्वाघसंक्षयः।
तीर्थराजसरः पुण्यं सर्वतीर्थफलप्रदम्॥
भूतानि यानि तीर्थानि सरितश्च सरांसि च।
विशन्ति सर्वतीर्थानि सरितश्च सरांसि च॥
राजा समस्ततीर्थानां सागरः सरितां पतिः।
तस्मात् समस्ततीर्थेषु श्रेष्ठोऽसौ सर्वकामदः॥
तमोनाशं तथा ज्योतिर्भास्करे उदिते प्रिये!।
स्नानेन तीर्थराजस्य तथा सर्वाघसंक्षयः॥
तीर्थराजसमं तीर्थं न भूतं न भविष्यति।
अधिष्ठानं सदा यत्र प्रभो नारायणस्य वै॥
कः शक्नोति गुणान् वक्तुं तीर्थराजस्य मे प्रिये!।
तिस्रो नवत्यः कोट्यश्च यत्र तीर्थानि सन्ति वै॥
तस्मात् स्नानञ्च दानञ्च होमं जाप्यं सुरार्चनम्।
यत् किञ्चित् क्रियते पुण्यं चाक्षयं भवति प्रिये!॥
नमस्ते ब्रह्मपुत्राय नमः शान्तनुसूनवे।
त्रिजन्मजञ्च यत् पापं हर लौहित्य! सर्वदा॥
इत्यनेन तु मन्त्रेण स्नात्वा चार्घ्यं निवेदयेत्।
पूजयेत् परया भक्त्या मन्त्रेणानेन भाविनि!॥
तीर्थानां परमं श्रेष्ठं हंसं वामाक्षिसंयुतम्।
आसनं हृदयं वह्नेः प्रिये! ध्रुववपुः सरः॥

तस्य दक्षिणतो भागे नातिदूरे च संस्थितः।
कुलं धान्वन्तरं यावद् विष्णुकुण्डमिति श्रुतम्॥
विष्णुकुण्डे नरः स्नात्वा संवीक्षेत् पाण्डुशैनकम्।
गुरुचारुशिलारूपं अग्रे मञ्जुसमन्वितम्॥
पञ्चानामश्वमेधानां फलं प्राप्नोति मानुषः।
प्राणस्थः सर्वभूतानां योनिश्च सरितां पतिः॥
विष्णुकुण्ड! नमस्तेऽस्तु त्राहि मां मुच्यते प्रिये!।
स्नात्वानेन वरारोहे! एकादश्याञ्च फाल्गुने॥
सर्वपापविनिर्मुक्तः सर्वदुःखविवर्जितः।
वृन्दारकहयः श्रीमान् रूपयौवनगर्वितः॥
विमलेनार्कवर्णेन दिव्यगन्धर्वसेविना।
कुलैकविंशमुद्धृत्य विष्णुलोकञ्च गच्छति॥
तस्य दक्षिणकोष्ठायां किञ्चिन्नैऋत्यगोचरे।
एकादशधनुर्मानं शिवकुण्डमिति श्रुतम्॥
तत्राभिषेकमात्रेण रुद्रलोकं स गच्छति।
शिवकुण्डे चतुर्दश्यां मासि मासि मम प्रिये!॥
स्नात्वारुणोदये काले न प्रेतो जायते भुवि।
तीर्थानां परमं तीर्थं विष्णुस्नानसमुद्भवम्॥
सरित्पते! नमस्तेऽस्तु त्राहि मां त्वं शिवप्रियः।
स्नात्वा चानेन मन्त्रेण हंसेनार्घ्यं निवेदयेत्॥
ततो व्रजेत् पाण्डुशैलं गन्धतोयेन स्नापयेत्।
पूजयेत् कमलैः श्वेतैः करवीरैः सितैः शुभैः॥
विष्णवे पदमाभाष्य पाण्डुनाथाय सत् पदम्।
जवाद्यञ्च नतिः पश्चादुद्धरेत् जनकादिषु॥
चतुर्दशार्णो बालो यत् शिखान्तं समुदीरितम्।
नारदोऽस्य ऋषिश्छन्दो गायत्री देवता हरिः॥

विनियोगश्च सर्वार्थे काम्येषु च विशेषतः ।
श्वेतञ्च द्विभुजं विष्णुं चक्रशङ्खलसत्करम् ॥
वरदं देवगन्धर्वसेवितं कामदं सदा ।
ध्यानं कृत्वार्चयेद्धीमान् पात्रपूर्वादितः क्रमात् ॥
लक्ष्मीं सरस्वतीं गङ्गां यमुनां नर्मदां शिवाम् ।
बालाञ्च कमलाञ्चैव तथा सङ्कर्षणादिकम् ॥
दिक्पतींश्च ग्रहांश्चैव विश्वक्सेनं प्रपूजयेत् ।
लौहित्ये विधिवत् स्नात्वा पाण्डुनाथं प्रपूजयेत् ॥
सर्वपापविनिर्मुक्तो विष्णुलोके महीयते ।
मन्वन्तरगतं साग्रं जरामृत्युविवर्जितः ॥
पुण्यक्षयादिहागत्य कुले सर्वगुणान्विते ।
जायते प्रेतवन्नैव धार्मिको याति वैष्णवम् ॥
मन्त्रं जपमर्चयेच्च इष्टमन्त्रेण पूजयेत् ।
पाण्डुनाथ ! नमस्तेऽस्तु नमस्ते मोक्षकारक ! ॥
त्राहि मां सर्वलोकेश ! विष्णुरूप ! नमोऽस्तु ते ।
निर्मलाम्भोद सङ्काश ! नमस्ते पुरुषोत्तम ! ॥
नमस्ते पुण्डरीकाक्ष ! पाण्डुनाथ ! नमोऽस्तु ते ।
नमस्ते हेमगर्भाभ ! नमस्ते गरुड़ध्वज ! ॥
ब्रह्मरूप ! नमस्तेऽस्तु नारायण ! नमोऽस्तु ते ।
नमस्तेऽञ्जनसङ्काश ! नमस्ते भक्तवत्सल ! ॥
पाण्डुनाथ ! नमस्तेऽस्तु त्राहि त्राहि नमोऽस्तु ते ।
नमस्ते विबुधावास ! नमस्ते विबुधप्रिय ! ॥
नारायण ! नमस्तेऽस्तु त्राहि मां शरणागतम् ।
नमस्ते विबुधश्रेष्ठ ! नमस्ते कमलोद्भव ! ॥
चतुर्मुख ! जगद्धाम ! पाण्डुरूप ! नमोऽस्तु ते ।
नमस्ते नीलमेघाभ ! नमस्ते त्रिदशार्चित ! ॥

त्राहि विष्णो ! जगन्नाथ ! पाण्डुरूप ! नमोऽस्तु ते।
नरसिंह ! महावीर्य्य ! त्राहि मां दीप्तलोचन ! ॥
विष्णुरूप ! नमस्तेऽस्तु पाण्डुनाथ। नमोऽस्तु ते।
देवस्य नैर्ऋते भागे धनुःपञ्चप्रमाणतः ॥
अश्वत्थचिह्नितं क्षेत्रं धर्मक्षेत्रं विजानीहि।
संहितां प्रजपेत्तत्र गीतशास्त्रञ्च सञ्जपेत् ॥
चतुर्युगेन सञ्जप्यं मन्त्रेणैव च तत् फलम्।
लभते नात्र सन्देह एकावर्त्ते सहस्रकम् ॥
क्षेत्रस्यारोहणाद्देवि ! कुरुक्षेत्रफलं लभेत्।
देवस्य पूर्वभागे तु धनुस्तावत् प्रमाणतः ॥
स्वच्छाकृतिश्चारुशिला सा लक्ष्मीः परिकीर्त्तिता।
श्रीवीजेन समभ्यर्च्य मालतीकुसुमै र्यजेत् ॥
विष्णुकुण्डे ततः स्नात्वा लक्ष्मीं जप्त्वा विधानतः।
पौर्णमास्यां तुलार्के तु लक्ष्मीस्तस्य प्रसीदति ॥
तस्य दक्षिणदिग्भागे नातिदूरे च शङ्करि !।
धनुरष्टप्रमाणञ्च कोलक्षेत्रं विजानीहि ॥
अश्वत्थमूले देवेशं कृष्णचारुशिलामयम्।
कोलं दृष्ट्वार्चयेद्भक्त्या विष्णुलोकं स गच्छति ॥
ब्रह्मकूटस्य धनदे श्रीकुण्डं नाम वै सरः।
धनुर्युग्मप्रमाणेन तत्र स्नात्वा श्रियं लभेत् ॥
चैत्रे शुक्लदशम्याञ्च एकादश्यां सिते शिवे !।
मन्त्रेण स्नात्वा श्रीतीर्थे गतिमाप्नोत्यनुत्तमाम् ॥
श्रीवस्तु भगवच्छ्रेष्ठ आरोग्यविजयप्रदम्।
श्रियं देहि यशो देहि पापं हर नमोऽस्तु ते ॥
तस्याः पूर्वे च द्वाविंशद्धनुरेव प्रमाणतः।
तीर्थं कनखलं प्रोक्तं महापातकनाशनम् ॥

वैशाखस्य तृतीयायां शुक्लपक्षे विशेषतः ।
दक्षिणामूर्त्तिमन्त्रेण स्नात्वा स्वर्गे महीयते ॥
सरिच्छ्रेष्ठ ! महाभाग ! देवगन्धर्वसेवित ! ।
दशजन्मार्जितं पापं हर तीर्थ ! नमोऽस्तु ते ॥
तस्य दक्षिणभागे तु पर्वते च मनोहरे ।
धनुर्वेदप्रमाणञ्च चम्पकेशं समर्चयेत् ॥
कनखलं समुपस्पृश्य शुचिभावसमन्वितम् ।
मुच्यते सर्वपापैश्च ब्रह्मलोकं व्रजेद् यतः ॥
तस्य पूर्वे सप्तधनुः शुभे देवि ! प्रमाणतः ।
तीर्थं त्रैलोक्यविख्यातं ब्रह्मणः परमेष्ठिनः ॥
पुष्करं सर्वपापघ्नं मृतानां ब्रह्मलोकदम् ।
मनसा संस्मरेद् यस्तु पुष्करन्तु महेश्वरि ! ॥
मुच्यते पातकैः सर्वैः शक्रेण सह मोदते ।
तत्र देवाः सगन्धर्वाः सयक्षोरगराक्षसाः ॥
उपासते सिद्धसङ्घा ब्रह्माणं पद्मसम्भवम् ।
तत्र स्नात्वा भवेन्मुक्तो ब्रह्माणं परमेष्ठिनम् ॥
पूजयित्वा हि वरदं ब्रह्माणञ्च प्रपश्यति ।
तदाभिगम्य देवेशं पुरहूतमनिन्दितम् ॥
स्वरूपो जायते मर्त्यः सर्वान् कामान् समश्नुते ।
कमलास्य ! महाभाग ! नमस्ते च त्रिपुष्कर ! ॥
हुं हूं ह्रौं सरितां नाथ ! पापं मे हर पुष्कर ! ।
अनेन स्नानं कुर्य्यात्तु अनेनार्घ्यं निवेदयेत् ॥
पुष्करस्य च नैऋर्त्ये किञ्चिद्दामे मम प्रिये ! ।
अष्टाविंशद्धनुर्मानं तीर्थं वदरिकाश्रमम् ॥
तत्र गत्वार्चयेद्देवं नारायणमनामयम् ।
गोसहस्रफलं प्राप्य स्नात्वाभ्यर्च्य हरिं दिने ॥

नारायणस्याश्रमे तु यः कुर्य्याद्रोहिणीव्रतम्।
एकेन शतकोटीनां व्रतस्य फलमाप्नुयात्॥
तत्र लिङ्गं महेशस्य विभाण्डकमिति श्रुतम्।
प्रासादेन समभ्यर्च्य रुद्रत्वमधिगच्छति॥
पञ्चगोदावरं तीर्थं ब्रह्माद्यैः सेवितं परम्।
पूजयित्वा तत्र रुद्रं प्रसन्नं परमेश्वरम्॥
आराधयामास हरं पञ्चाक्षरपरायणम्।
पूजयित्वा नमस्कुर्य्याद् गोशतानां फलं लभेत्॥
पुष्करस्य च पूर्वे तु कुमारं नाम वै सरः।
कुमारतीर्थे यः स्नायाद् गाणपत्यञ्च विन्दति॥
कुमारतीर्थस्याग्नेये पञ्चाशद्धनुरायतम्।
नरसारख्यकं देवि सर्वदेवगणै र्वृतम्॥
कुमारेशपुरे वासो विष्णोः प्रियस्थिते रतः।
ओं ओं ईं क्रूं जगद्धाम! पापं हर कुमारक!॥
अनेन मज्जनं कृत्वा सुरेशार्घ्यं निवेदयेत्।
तत्र देवो महादेवः स्थाणुरित्यभिधीयते॥
तं दृष्ट्वा सर्वपापेभ्यो मुच्यते तत्क्षणान्नरः।
चम्पकेशस्य धनदे धनुर्द्विषष्टिमानतः
तद्वनं चम्पकं नाम सिद्धब्रह्मर्षिवन्दितम्॥
पुण्यमायतनं विष्णोस्तत्रास्ते पुरुषोत्तमः।
ब्रह्मकूटस्य धनदे शिलापञ्चसमध्यगम्॥
दुर्गाकूपं महाकूपं सर्वतोद्वारमेव हि।
दशाक्षरेण मन्त्रेण स्नात्वा कामानवाप्नुयात्॥
दुर्गाकूपे तथाष्टम्यां स्नात्वा काममनुं जपन्।
त्रिः कृत्वा पञ्चमं वाथ कृष्णविजयपुष्पकैः॥
पूजयित्वा परं देवं नरः श्रुतिधरो भवेत्॥

काकवन्ध्या तु या नारी मृतापत्या च या भवेत्।
सापि तद्गतिमाप्नोति शरत्काले विशेषतः॥
बन्धूकैः पूजयेत्तत्र देवीं कामेश्वरीं यदि।
विल्वपत्रेण देवेशि! शाश्वतीं सिद्धिमाप्नुयात्॥
साधयेदीप्सितान् कामान् तत्र सिद्धिञ्च विन्दति।
कौलश्च विष्णुशैलश्च शङ्करः परमेश्वरः॥
ईशश्च पारिजातश्च कुमारश्च गणेश्वरः।
नीलश्वेतोत्थभूभागे उत्तरे संस्थिताचलः॥
मध्ये विष्णुस्तथा स्थाणुरथ धर्मबलस्तथा।
कमलश्च शिखा चैव कपोतो मरुताचलः॥
आग्नेये चाचलो देवि! हस्तिकर्णौ विकर्णकः।
अमाचलो दक्षिणे तु मरुवकोऽथ प्रजेश्वरः।
द्युमन्तः कनकश्चैव वायव्यो नीललोहितः॥
मानशैलः कामाह्वयो वह्निरिन्द्रः शतक्रतुः।
लोहितः कमलश्चैव नैरृते निरृतिस्तथा॥
गन्धर्वो लक्षणश्चैव पिशाचो विहगाचलः।
पश्चिमे ब्रह्मयूपश्च हयमेधो गिरीश्वरः॥
उत्तरे उत्तरश्चैव तथा चोत्तरपाण्डुकः।
आदित्यो वायुकोणे तु वायु र्भल्लातकस्तथा॥
धनदश्च महीध्रश्च जनकश्च नलस्तथा।
ऐशान्यां मण्डलश्चैव अश्वक्रान्तः सचन्द्रकः॥
यमश्चित्रवहश्चैव ग्रहश्चैव यथाक्रमात्।
ततो गच्छेन्नीलशैलं मध्याह्ने परमेश्वरि!॥
अष्टम्याञ्च त्रयोदश्यां चतुर्दश्यामथापि वा।
विषुवे अयने वाथ रविसंक्रमणे तथा॥
पूर्वद्वारि यदा गच्छेत् प्राप्नुयाद्विपुलं धनम्।

उत्तरे मुक्तिकामस्तु राज्यकामस्तु पश्चिमे ॥
यदा दक्षिणमार्गेण आरोहेन्नीलकूटकम्।
हतराज्यो भवेद्राजा अन्येषां जायते क्षयः ॥
ऐशान्ये तु तदा गच्छेत् विपुलां श्रियमाप्नुयात्।
वायव्ये चाग्निनैर्ऋत्ये महाभयकरं भवेत् ॥
नीलं दशभुजं शान्तं मणिकुण्डलमण्डितम्।
नागहारोत्तरीयञ्च वृषभस्थं विचिन्तयेत् ॥
पूजयेद्वह्निबीजेन नमस्कृत्वा विधानतः।
मन्त्रेणारोहयेत् शैलं अश्वमेधफलं लभेत् ॥
पूर्वद्वारे गृहस्यैव आरोहेन्नीलपर्वतम्।
नीलश्चैव महाबाहो ! धर्मकामार्थमोक्षदः ॥
आरोहयामि शिखरं पापं हर प्रसीद मे।
दुर्गाकूपे तु पूर्वस्यां देवमाम्रातकेश्वरम् ॥
धनुस्त्रयान्तरे देवि ! पूजयेत् केशवादिना।
तस्य देवस्य याम्ये तु धनुरष्टान्तरे प्रिये ! ॥
गजाकारं कृष्णवर्णं पूजयेद्गणनायकम्।
तस्य पूर्वेणैव धनुः संस्थितश्च त्रिविक्रमः ॥
तं प्रणम्य नरो भक्त्या सर्वान् कामानवाप्नुयात्।
तस्यांशपञ्चकं यावद् धनुरेव प्रमाणतः ॥
चत्वारिंशद्धस्तमानं सौभाग्यं नाम वै सरः।
क्रीड़ापुष्करिणी सा तु कामाख्यायाः सुरेश्वरि ! ॥
शक्रेणोपासितः पूर्वं सह देवैः प्रजापतिः।
तस्य पश्चिमतीरे च स्नात्वा तत्र च मण्डलम् ॥
कृत्वा सम्यग्विधानञ्च उपवासं समाचरेत्।
पञ्चमेऽन्यदिने प्राप्ते जले स्नात्वा विधानतः ॥
क्रीड़ापुष्करिणीं गत्वा कामेशीं यस्तु पूजयेत्।

पितॄन् सन्तारयत्याशु देवीलोके प्रमोदते ॥
सौभाग्ये सरिदावर्त्ते विमले मानसप्रिये ।
नमोङ्कारी वषट् स्वाहा पापं हर नमोऽस्तु ते ॥
मन्त्रेण मज्जनं कृत्वा कामिनार्घ्यं निवेदयेत् ।
ऐशान्ये तस्य कुण्डस्य लौहित्यो नाम वै सरः ॥
ध्रुवेण स्नात्वा देवेशि ! मुच्यते भवबन्धनात् ।
अग्नौ कुण्डं कालहस्तं यामलं नाम वै सरः ॥
तत्र स्नात्वा च पार्श्वेन रूपवान् जायते भुवि ।
नैर्ऋत्ये पञ्चकं हस्तं सौभाग्ये परमेश्वरि ! ॥
गङ्गासरो विजानीयात् सर्वतीर्थोद्भवं जलम् ।
कोलाभ्यन्तर्गतं कुण्डं सौभाग्यं परिकीर्त्तितम् ॥
तिस्रः कोव्यर्द्धकोटी च दिवि भुव्यन्तरीक्षके ।
सौभाग्ये तानि सर्वाणि मन्दीभूते दिवाकरे ॥
तस्मात् समाचरेत् स्नानं कर्त्तव्यं मकरे रवौ ।
तुलाविषुवसङ्क्रान्त्यां यस्तु स्नानं समाचरेत् ॥
अभार्य्यो लभते भार्य्यां देवीलोके प्रमोदते ।
गोधिकाकाररूपेण व्यक्ताव्यक्तशिला च या ।
अनन्ताख्यं विजानीयात् कुण्डं तस्योपरि प्रिये ! ॥
अनन्तः पश्चिमे पार्श्वे पूर्वे कृष्णशिला च या ।
वराहं तं विजानीयात् सर्वतीर्थोद्भवं जलम् ॥
अभार्य्यो लभते भार्य्यां अपुत्रः पुत्रवान् भवेत् ॥
तुलायां वाथ कन्यायां शुक्लाष्टम्यां विशेषतः ।
स्नात्वा संवीक्षयेद्देवीमग्निष्टोमफलं लभेत् ॥
तर्पयेत् पितृदेवांश्च काम्यानन्यांश्च तर्पयेत् ।
सर्वतीर्थेषु देवेशि ! न कुर्य्यात् काम्यतर्पणम् ॥
अस्मिन् कुण्डे अश्वक्रान्ते आगस्त्ये च प्रयागके ।

वाराणसीह्रदे चैव भार्गवे मेरुपुष्करे ॥
गङ्गाह्रदे ब्रह्मसरे दुर्गाकूपे च भावयेत्।
पृथ्वीप्रदक्षिणे यच्च फलं प्रोक्तं महर्षिभिः ॥
तत् फलं प्राप्यते तस्य कुण्डस्यैव प्रदक्षिणे।
कुण्डस्याग्नेयभागे च तुलादूरे व्यवस्थितः ॥
कम्बलाख्यं शिवं दृष्ट्वा मुच्यते भवबन्धनात्।
स्मरेण भावयुक्तेन नत्यस्तेन प्रपूजयेत् ॥
नमो नमस्ते देवेश ! मन्त्रवत् स विभूषितः।
लक्ष्मीकान्त ! नमस्तेऽस्तु अनन्त ! पुरुषोत्तम ॥
देवदानवगन्धर्वपादपद्मार्चितः शुभः।
नमो वरदलिङ्गाय कमलाय नमो नमः ॥
कृत्वाकृतिं विष्णुरूपं नमस्कृत्वा मम प्रिये ! ।
स्तुत्वा प्रदक्षिणं कृत्वा ततो देवीगृहं व्रजेत् ॥
गत्वा शवासनं जप्त्वा वीचेत्तारेण शाङ्करि ! ।
पञ्चामृतेन तोयेन स्नापयेत् सुशुभे जलैः ॥
मूलमन्त्रेण तं देवं तेनपात्रेण मार्जयेत्।
कामतन्त्रं कुशोतेन लिक्षे दक्षे मम प्रिये ! ॥
कामे कामं लिखित्वा तु तत्र पूजां समाचरेत्।
देव्यङ्गे चित्रके पुष्टिमणौ खड्गे च शाङ्करि ॥
श्मशाने च महालिङ्गे प्रतिमायां जले तथा।
यन्त्रे तन्त्रे शालग्रामे मण्डलञ्च विसर्जयेत् ॥
महाहोमे मण्डलञ्च महापातकमाप्नुयात्।
न गृह्णाति च तत्पूजां पदं वघ्नो व्रजेत् पुरम् ॥
न च योन्यन्तरगतं श्मशानस्य च पूर्वतः।
महामण्डलकं देव्याः संस्थितस्तत्र पूजयेत् ॥
सप्ताशीतिधनुर्मानं रचोरक्तशिला च या।

अष्टहस्तं सपुलकं लिङ्गं लक्षार्द्धसंयुतम् ॥
चतुर्हस्तसमं क्षेत्रं पश्चिमे योनिमण्डलम् ।
बहुमात्रमितञ्चैव प्रस्तारे द्वादशाङ्गुलम् ॥
आपातालं जलं तत्र योनिमध्ये प्रतिष्ठितम् ।
उर्वशी यमुना धारा कावेरी च सरस्वती ॥
ब्रह्मकुण्डे समुद्भूतं मणिकूटे च निर्मलम् ।
याति नास्त्यत्र सन्देहो यो विष्णुं पूजयेद् हृदा ॥
म्नावित्वा मण्डलं देव्या व्यक्तं ब्रह्मसरः प्रिये ! ।
मासत्रयाधिके षष्टिवर्षे शुष्कवला भवेत् ॥
द्विमासं त्रिदिनं यावत् षण्मासे तु विपत्करम् ।
यदा कुल्ये शुष्कधारा वाह्ये विण्मूत्रमादिशेत् ॥
वर्षे वर्षे यदा शुष्कधारा भवति शङ्करि ! ।
वाह्ये भवति दुर्भिक्षं तत्र कश्चिन्न संशयः ॥
गर्भे शुष्के स्वामिहा च सर्वशुष्के च संशृणु ।
हतराज्यो भवेद्राजा परराष्ट्रसमागमः ॥
एवमेव भवेद्दोषस्तत्र शान्तिं समाचरेत् ।
लक्षद्वयं जुहुयाच्च करवीरं घृतान्वितम् ॥
पङ्कजं वाथवा रक्तं पायसं वाथ श्रीफलम् ।
त्रिमध्वाक्तेन देवेशि ! गोधामांसेन वा सुधीः ॥
शर्करा मधु मांसञ्च त्रिमधु परिकीर्त्तितम् ।
आवर्त्तितेन क्षीरेण आज्ययुक्तेन होमयेत् ॥
अनन्तस्य च पाश्चात्ये असि नाम स्थिता नदी ।
तत्पश्चिमे च या धारा वरुणा नाम सा नदी ॥
तस्याः स्वच्छोदकं पीत्वा न भूयो जायते क्वचित् ।
सिद्धेश्वरं कोटिलिङ्गं हेरुकं मुक्तिमण्डलम् ॥
श्रेयं धारा शमीक्षेत्रं देव्या अन्तर्गृहं श्रुतम् ।

लिङ्गस्थां पूजयेद्देवीं पुस्तके प्रतिमासु च ॥
स्थण्डिले पादुके चित्रे खड्गे वह्नौ जलेषु च।
लौहित्ये चैव गङ्गायां सागरे तीर्थसङ्गमे ॥
प्रतिपीठे विल्वमूले विल्वमुखे च शङ्करि !।
यत्र कालशिला चैव पीठं तन्मणिपूरकम् ॥
अन्तर्गृहं महापीठं मणिपीठं तदुच्यते।
शिलायां पर्वतस्याग्रे तथा पर्वतगह्वरे ॥
देवीं सम्पूजयेन्नित्यं भक्तिश्रद्धासमन्वितः।
वाराणस्यां यथा पूजा सम्पूर्णफलदायिनी ॥
ततस्तु द्विगुणा प्रोक्ता पुरुषोत्तमसन्निधौ।
सर्वक्षेत्रेषु तीर्थेषु पूजा कालशिलासमा ॥
कौमारेऽष्टगुणा प्रोक्ता चौहारे चैव तत्समा।
आर्य्यावर्त्ते मध्यदेशे ब्रह्मावर्त्ते तथैव च ॥
मणिपूरवत् फलदात्री श्रीहट्टे च महेश्वरि !।
ततश्चतुर्गुणा प्रोक्ता आगस्त्ये चाश्वमेधिका ॥
तस्माच्चतुर्गुणा प्रोक्ता जल्पीश्वरस्य सन्निधौ।
विराजते यत्र योनौ ततो दशगुणा स्मृता ॥
ततश्चतुर्गुणा प्रोक्ता एकाम्रे परमेश्वरी।
तस्मात् शतगुणं भद्रे ! मणिकूटे महेश्वरि ! ॥
तस्माद्दशगुणा चैव मणिशैले महेश्वरि !।
ततो दशगुणा प्रोक्ता अश्वतीर्थे जले स्थले ॥
तत्समा कामरूपे च सर्वत्रैव जले स्थले।
सर्वश्रेष्ठा यथा विष्णुर्लक्ष्मीः सर्वोत्तमा यथा।
देवीपूजा तथा शस्ता कामरूपे मम प्रिये ! ॥
देवीक्षेत्रं कामरूपं विद्यतेऽन्यत्र तत्समम्।
अन्यत्र विरला देवी कामरूपे गृहे गृहे ॥

कामाख्यायां महामायापूजां यः कृतवान् सकृत् ।
स चेह लभते कामान् परत्र शिवरूपताम् ॥
न तस्य सदृशोऽन्यत्तु कृतं किञ्च न विद्यते ।
वाञ्छितार्थमवाप्येह चिरायुरभिजायते ॥
स्नानकालेऽर्द्धरात्रौ च महापूजावसानके ।
न स्पृशेत्तु महामायां न गच्छेत् सिद्धिमानसः ॥
महाष्टम्यां निशाभागे तथा चैव दिनक्षये ।
युगादौ कार्त्तिके मासि कौमारे न विलोकयेत् ॥
राजानं वीक्षयेद्यस्तु शूद्रो रूपाढ्य एव च ।
विधवा ब्राह्मणी या च सदा स्नानेन वीक्षयेत् ॥
स्नानकाले च मध्याह्ने निर्माल्यस्य विसर्जने ।
न स्त्री देवीं स्पृशेज्जातु युवती च विशेषतः ॥
पौषाष्टम्यां तथा भद्रे ! नवम्याञ्च त्रयोदशीम् ।
त्रिदिनं कर्कटस्यादौ न व्रजेत् पार्वतीगृहम् ॥
स्पृष्ट्वा ददाति शापञ्च दृष्ट्वा चायुःक्षयो भवेत् ।
दीक्षितेनैव भावेन न चैवादीक्षितेन च ॥
रक्ताम्बरधरो भूत्वा रक्तचन्दनभूषितः ।
नागजैस्तिलकं कुर्य्यात् मृदुचर्मणि संविशेत् ॥
दीयते ज्ञानमत्यर्थं क्षीयते पाशबन्धनम् ।
ततो दीक्षेति देवेशि ! कथिता तत्त्वचिन्तकैः ॥
मनसा कर्मणा वाचा यत् पापं समुपार्जितम् ।
तेषां विशेषकरणी परमज्ञानदा यतः ॥
तस्मात् दीक्षेति लोकेऽस्मिन् गीयते शास्त्रकोविदैः ।
विज्ञानफलदा सैव द्वितीया लयकारिणी ॥
तृतीया मुक्तिदा चैव तस्माद्दीक्षेति गीयते ।
निरालम्बा निराधारा दीक्षासिद्धिविधानतः ॥

नित्ये नैमित्तिके काम्ये यस्य स्यादधिकारिता ।
सा धारा सा हि विज्ञेया मुक्तिदा तु निराश्रया ॥
दीक्षा फलवती तत्र कुण्डमण्डलपूर्विका ।
मनोव्यापारमात्रेण निर्वीर्य्या सम्मता तथा ॥
अपुत्रो मृतपुत्रश्च कुण्डश्च वामनस्तथा ।
कुनखो श्यावदन्तश्चाधिकाङ्गः स्त्रीजितस्तथा ।
आचार्य्योऽपि हि देवेशि ! एवमेवं विसर्जयेत् ॥
सुमूर्त्तिश्च कुलीनश्च ज्ञानाचारगुणान्वितः ।
तेन देया च दीक्षा स्यात् समायाचारवित्तथा ॥
पित्रोर्मन्त्रं न गृह्णीयात्तथा मातामहस्य च ।
स्वप्नलब्धञ्च स्त्रीदत्तं संस्कारेणैव शुध्यति ॥
स्वप्नलब्धे च कलसे गुरोः प्राणं निवेशयेत् ।
वटपत्रे कुङ्कुमेन लिखित्वा ग्रहणं तथा ।
ततः शुद्धिमवाप्नोति अन्यथा विफलं भवेत् ॥
अयने विषुवे चैव ग्रहणे चन्द्रसूर्य्ययोः ।
रवेः संक्रान्तिदिवसे युगाद्यायां सुरेश्वरि ! ॥
मन्वन्तरासु तिथिषु चतुर्दश्यष्टमीषु च ।
महापूजादिने वापि शिष्यशुद्धिदिनेषु वा ॥
गृह्णीयात् प्रयतो भूत्वा भक्तिश्रद्धासमन्वितः ।
देवीपूजाविधौ यस्तु मनुष्यो भक्तितत्परः ॥
स एव दीक्ष्यो नान्यस्तु सर्वशास्त्रार्थतत्परः ।
चैत्रे दुःखाय दीक्षा स्याद् वैशाखे सर्वसिद्धिदा ॥
ज्यैष्ठे मृत्युप्रदा सा स्याद् आषाढ़े बहुवत्सका ।
श्रावणे बहुहानिः स्याद् भाद्रे च दुःखदा मता ॥
आश्विने सर्वसिद्धैः सा कार्त्तिके ज्ञानवृद्धिदा ।
शुभजन्मार्गशीर्षे च पौषे ज्ञानविनाशिनी ॥

माघे च मेधावृद्धिः स्यात् फाल्गुने सर्वशस्यकृत् ।
ग्रहणे च महातीर्थे नास्ति कालस्य निश्चयः ॥
गयायां भास्करक्षेत्रे विरजे चन्द्रपर्वते ।
कोङ्कने च च मतङ्गे च तथा कन्याश्रमेषु च ॥
न गृह्णीयात्ततो दीक्षां तीर्थेष्वेतेषु पार्वति ! ।
कर्त्तव्यं दीक्षितैः शिष्यैर्गुरोः शासनमुत्तमम् ॥
देवता हृदये यत् स्याद् गुरुपूजापरायणः ।
पुरश्चरणचारी स्याद् विशुद्धात्मा जितेन्द्रियः ॥
मन्त्रयन्त्रपुराणानि भारतीश्च गयादिषु ।
प्राप्तमित्येवमानोऽपि गुरूणां ज्ञापितं सदा ॥
न स्त्रीहिंसा प्रकर्त्तव्या शिष्येणैव महेश्वरि ! ।
सयवं चक्रवाकञ्च क्रौञ्चं पारावतं तथा ॥
नीलशैलादिशैलञ्च सदा तस्य प्रियो भवेत् ।
इत्येवं दीक्षितेनैव कर्त्तव्यं दिवसं तथा ॥
रात्रौ भुक्त्वा तथा यत्नाद् ध्यात्वा सम्पूजयेद्बुधः ।
तस्यापि पूर्वदिवसं हविष्यं वा निरामिषम् ॥
भुक्त्वा परस्मिन् दिवसे हविष्यञ्च समाचरेत् ।
चरुं श्रपित्वा भागार्द्धं दैवतायै निवेदयेत् ॥
तदर्द्धं गुरवे दद्यात् पूर्णन्तु स्वयमेव हि ।
भुक्त्वा च गुरुणा सार्द्धं सर्वदीक्षास्वयं विधिः ॥
मन्त्रं दत्त्वा गुरुश्चैव उपवासी यदा भवेत् ।
मोहान्धकारनरके कृमि र्भवति नान्यथा ॥
दीक्षां कृत्वा यदा मन्त्री उपवासं चरेद्यदि ।
तस्य देवः सदा रुष्टः शापं दत्त्वा व्रजेत् पुरम् ॥

इति योगिनीतन्त्रे सर्वतन्त्रोत्तमे द्वाविंशतिसाहस्रे
द्वीतियभागे षष्ठः पटलः ॥

अथ सप्तमः पटलः ।

श्रीभगवानुवाच । शोभने निर्जने देशे निगूढ़े शुभमण्डले ।
पुष्पप्राकारसङ्कीर्णे गन्धपुष्पादिवासिते ॥
तृतीयवर्जिते देशे पशुदृष्टिविवर्जिते ।
फलिकादौ ततो मन्त्री मन्त्रं तत्र समुद्धरेत् ॥
विना मन्त्रसमुद्धारं स्वल्पाल्पफलदं मतम् ।
यन्त्रे समुद्धरेन्मन्त्रं ताम्बूलं वा प्रपूरितम् ॥
न भूमौ विलिखेन्मन्त्रं न तथा पुस्तके लिखेत् ।
न भूमौ पुस्तकं स्थाप्यं नाहरेड्डाकिनीं ततः ॥
भूकम्पे ग्रहणे चैव अक्षरं वाथ पुस्तकम् ।
भूमौ तिष्ठति देवेशि ! जन्मजन्मनि मूर्खता ॥
तदा भवति देवेशि ! तस्मात्तं परिवर्जयेत् ।
वंशे नैवोल्लिखेद्वर्णं तस्य हानि भवेद्ध्रुवम् ॥
ताम्रसूच्या हि विभवो जायते न क्षयो भवेत् ।
महालक्ष्मीप्रदश्चैव सुवर्णस्य शलाकया ॥
वृहन्नलस्य सूच्या वा मतिवृद्धिश्च जायते ।
तथा अग्निमये देवि ! पुत्रपौत्रधनागमः ॥
रौप्येण विपुला लक्ष्मीः कांस्येन मरणं भवेत् ।
अष्टाङ्गुलप्रमाणेन दशाङ्गुलमथापि वा ॥
चतुरङ्गुलसूच्या वा यो लिखेत् प्रस्थकं शुभे ! ।
तत्तदक्षरसंख्यानां स्वल्पायु र्याति वै दिने ॥
मानं वक्ष्ये पुस्तकस्य शृणु देवि ! समासतः ।
मासेनापि फलं विन्द्यादमाने श्री र्हता भवेत् ॥
हस्तमात्रमुष्टिमात्रमावाह्य द्वादशाङ्गुलम् ।
दशाङ्गुलं तथाष्टौ च अतो हीनं न कारयेत् ॥

वेधद्वयं मुष्टिहस्ते बाहुमात्रे चिरन्तनम् ।
समभागे महेशानि ! हस्तादौ रूपबन्धकम् ॥
अष्टाङ्गुलं परित्यज्य मध्ये वेधं न कारयेत् ।
प्रादेशादौ भवेद्राजा द्व्यङ्गुले वा समाचरेत् ॥
पुस्तकस्य च आद्यन्ते यस्तु वेधं प्रकल्पयेत् ।
भार्य्याहानि र्भवेदाशु धनानां वा क्षयो भवेत् ॥
भूर्जे वा तेजपत्रे वा तथा वा तालपत्रके ।
विना गुरुञ्च देवेशि ! पुस्तकं कारयेत् प्रिये ! ॥
सम्भवे स्वर्णपात्रे च ताम्रपात्रे च शङ्करि ! ।
अन्ये वृक्षत्वचि देवि ! तथा केतकिपत्रके ॥
मृत्ताम्रपात्रे रौप्ये वा वटपत्रे वरानने ! ।
अन्यपत्रे वसुदले लिखित्वा यः समभ्यसेत् ॥
स दुर्गतिमवाप्नोति धनहानि र्भवेद्ध्रुवम् ।
देवस्य लिखनं कृत्वा यः पठेद् ब्रह्महा भवेत् ॥
पुस्तकं वा गृहे स्थाप्य वज्रपातो भवेद्ध्रुवम् ।
दग्धरन्ध्रे भवेत् पीड़ा वर्त्तुलं शुभदं भवेत् ॥
चतुष्कोणे विघ्नवस्तु त्रिकोणे मरणं भवेत् ।
सत्येऽक्षरे स्थितः शम्भुः शूलपाणिस्त्रिलोचनः ॥
प्रजापतिर्द्वापरे च त्रेतायां सूर्य्य एव च ।
कृते युगे पिनाकी च कलौ लिप्यक्षरे हरिः ॥
आरम्भे च समाप्तौ च लिखितं प्रतिपूजयेत् ।
हरिञ्च गन्धपुष्पाद्यैर्वस्त्रैश्च सुमनोहरैः ॥
यावदक्षरसंख्यानं प्रतिपात्रे च शङ्करि ! ।
भवेद्युगसहस्राणि स्वर्गलोके वसेच्चिरम् ॥
वेतनञ्च न गृह्णीयात् लिखित्वा पुस्तकस्य च ।
यावदक्षरसंख्यानं तावच्च नरके वसेत् ॥

व्यञ्जनञ्चितिमारूढ़ो वामनेत्रेन्दुसंयुतम् ।
महावीजं विजानीयात् स जपेत् मुक्तिमाप्नुयात् ॥
प्रणवे प्रणवं वच्ये वषड़न्ते च ठद्वयम् ।
स्वयं वर्जेत् स्वरान्ते च नतिञ्चैव हृदात्मिकाम् ॥
आद्यमेव ग्रहस्थस्य प्रणवं सर्वमन्त्रके ।
आद्यन्तवर्णसंस्थस्य आत्मज्ञानविवृद्धये ॥
मन्त्रविद्याविभागे तु द्विविधं जायते प्रिये ! ।
मन्त्राः पुं देवताः प्रोक्ता विद्या स्त्रीदेवता स्मृता ॥
पुंमन्त्रा हुंफड़न्ताः स्यु र्द्विठान्ताः स्युः स्त्रियो मताः ।
नपुंसका नमोऽन्ताः स्युर्मनवश्च त्रिधा मताः ॥
एतच्छून्या भवेद्विद्या महाशब्देन कीर्त्तिता ।
परमेष्ठो ऋषिश्छन्दो गायत्र्याः समुदाहृतम् ॥
देवता त्रिपुराख्याता सर्वार्थे विनियोजयेत् ।
विधिना स्थापयेद्देवीं वारिणा प्रथमं प्रिये ! ॥
मुखप्रक्षालनं कृत्वा पुनः स्नानं समाचरेत् ।
दिनद्वयान्तरे देवि ! उत्थायाष्टदिनान्तरे ॥
तैलेनोद्वर्त्तनं कुर्य्यात् कषायेणातिरूक्षयेत् ।
पक्षान्ते चैव मासान्ते महास्नानं समाचरेत् ॥
मूलवीजेन देवेशि ! द्रव्यमन्त्रेण वा प्रिये ! ।
वैदिकेनाथ मन्त्रेण मायया वा समाचरेत् ॥
कलसैः स्नापयेत् पश्चादर्घ्यस्नानमनन्तरम् ।
अर्घ्यस्नानं ततः कृत्वा पुनः स्नानं करोति च ॥
देवीलोकच्युति र्भवति धनहानिश्च जायते ।
वारिणा प्रथमं स्नानं क्षीरेण तदनन्तरम् ॥
दध्ना घृतं पिण्डद्वयं शर्कराञ्च गुड़ं मधु ।
तिलक्षीरं दधितिलं मधुक्षीरेण स्नापयेत् ॥

उष्णोदकं फलञ्चैव तथा चैव कुशोदकम् ।
गन्धोदकञ्च रत्नानामुदकं पुष्पतोयकम् ॥
विल्वोदकं सप्तपत्रं रक्तपुष्पोदकं तथा ।
स्वर्णशङ्खोदकञ्चैव ताम्राधारमनन्तरम् ॥
घटोदकं कुशञ्चैव अर्घ्यं स्नानं समाचरेत् ।
पञ्चगव्येन यो देवीं तथा दुग्धकुशोदकैः ॥
स्नापयेद्विविधैर्मन्त्रैर्ब्रह्मस्नानं हि तत् स्मृतम् ।
कपिलापञ्चगव्येन तथा क्षीरयुतेन च ॥
स्नानं शतगुणं प्रोक्तं तथा इक्षुरसेन च ।
क्षीरेण स्नापयेद् यस्तु श्रद्धाभक्तिसमन्वितः ॥
कामाख्यां विधिवद्देवि ! इन्द्रलोके महीयते ।
घृताभ्यङ्गेन देवास्त्वघृतेन विधिवत् प्रिये ! ॥
दश पूर्वान् दश परान् आत्मानञ्च विशेषतः ।
भवार्णवात् समुद्धृत्य दुर्गालोके महीयते ॥
स्नापयेद्विधिवद् यस्तु दध्ना दूर्वाक्षतेन च ।
राजतेन विमानेन शिवलोके महीयते ॥
कामाख्यां स्नापयेद् यस्तु नवेनेक्षुरसेन च ।
गरुड़ेन विमानेन विष्णुना सह मोदते ॥
स्नापयित्वा नरो दुर्गां गन्धचन्दनवारिणा ।
चन्द्रांशुनिर्मलः श्रीमान् चन्द्रलोके महीयते ॥
सुगन्धपुष्पतोयेन स्नापयित्वा नरः क्वचित् ।
नागलोकं समासाद्य क्रीड़ते सह पन्नगैः ॥
स्नापयित्वा तु कामेशीं श्रद्धया हेमवारिणा ।
सौवर्णयानमारूढ़ो मोदते वसुभिः सह ॥
द्रोणपत्र-विल्वपत्र-करवीरोत्पलानि च ।
स्नानकाले प्रयोज्यानि देवीप्रीतिकराणि च ॥

एषामेकतमं स्नानं कृत्वा वै श्रद्धयान्वितः ।
भगवत्यै नरो भक्त्या विष्णुलोके महीयते ॥
स्नापयेद्यस्तु वै देवीं नरः कर्पूरवारिणा ।
स गच्छति परं स्थानं यत्र कामेश्वरी स्थिता ॥
पितॄनुद्दिश्य यो देवीं क्षीरेण मधुनाथवा ।
स्नापयेद्विधिवद्भक्त्या तस्य पुण्यफलं शृणु ॥
तृप्ता भवन्ति पितरस्तस्य वर्षशतद्वयम् ।
पश्चान्तस्य प्रत्येकं फलानाञ्च शतं शतम् ॥
शतञ्च वारिकुम्भानां महास्नाने नियोजयेत् ।
अपां कुम्भशतेनैव तैलस्यापि त्रिभिः पलैः ॥
महिष्ठन्तु महास्नानमेवमाहु र्मनीषिणः ।
मध्यमन्तु तदर्द्धेन स्नानं यत्र विधीयते ॥
तदर्द्धन्तु कनिष्ठं स्यादतो हीनं न कारयेत् ।
एवं यः कारयेत् स्नानं नरः कश्चित् कदाचन ॥
सप्तजन्मकृतात् पापात् तत्क्षणादेव हीयते ।
आयुर्बलं यशो वर्चः सौभाग्यं पुष्टिरेव च ॥
स्नापयित्वा तु कामाख्यां लभते नात्र संशयः ।
एवं यस्तु महास्नानं करोति भक्तिमान्नरः ॥
शरीरारोग्यमायुष्यं प्राप्नोति श्रियमुत्तमाम् ।
दशतोलिकमानेन द्रव्याणाञ्च पृथक् पृथक् ॥
चतुस्तोलिकया वाथ हीने स्नाने विधीयते ।
अष्टाङ्गुलं मुखं तस्य एकविंशाङ्गुलोदरम् ॥
अरत्निमात्रमुत्सेधं मणिकुम्भं तदुच्यते ।
गवाक्षमात्रे यत्रैषा सूर्य्यरश्मिस्तु लेखिका ॥
लेखिकाष्टौ भवेद्धूलो धूलिरष्टौ च सर्षपः ।
सर्षपाणां चतुष्केण रत्तिकेत्यभिधीयते ॥

रत्तिकानां विंशकन्तु पादकं परिकीर्त्तितम् ।
तोलिका च चतुष्पादैश्चतुस्तोलैः प्रसृतितः ॥
प्रसृतौ द्वे कर्षकञ्च द्वे कर्षे तु पलं भवेत् ।
पलार्द्धेन भवेन्मुक्तिर्द्वि मुक्तौ गुड़कं मतम् ॥
एवं स्नानं ततः कृत्वा गात्रं सम्मार्जयेत् सुधीः ।
चन्दनेन सुगन्धेन कारयंस्तिलकं सुधीः ॥
कटिसूत्रञ्च वस्त्रञ्च यज्ञसूत्रं निवेदयेत् ।
मयूरपिच्छसङ्काशां स्निग्धचारुसुकेशिकाम् ॥
महतीं रक्तविम्बौष्ठीं रक्तनेत्रां सुवस्त्रिताम् ।
यच्च वै लोहितं चास्या सुरक्तकज्जलप्रभम् ॥
त्रिपुरेशि ! समाख्यातं त्रैलोक्यनिलयं परम् ।
स्मृत्तिकाया महेशानि ! लक्ष्मीकामो विभावयेत् ।
करालं यत् वै वक्त्रं कृष्णं दक्षिणगोचरम् ॥
कामाख्येति च विख्यातं दिव्यदंष्ट्रासमन्वितम् ।
सर्वसिद्धिप्रदञ्चैव सर्वार्थस्य च साधकम् ॥
देवस्य दक्षिणेनैव पीतवक्त्रेन चिन्तयेत् ।
कौवेरीनिलयं यच्च वदनं श्यामलं शिवम् ॥
शतवीताङ्गविज्ञेयमद्भुतं भुवनेश्वरि ! ।
अव्यक्तं रुचिरं दिव्यं कुब्जिकावदनोत्तमम् ॥
नरकेशेन सम्भक्तं ध्येयं विजयकाङ्क्षिभिः ।
शुद्धस्फटिकसङ्काशं सर्वरत्नसमन्वितम् ॥
सर्वज्ञानमयं ज्ञेयं कालवागीश्वरीमुखम् ।
सदा रङ्गेन भृङ्गेन निपीतं मधुसञ्चयम् ॥
ईशानं वदनं देव्याश्चिन्त्यं सर्वज्ञतार्थिभिः ।
सूर्य्यकोटिसहस्रांशु यद्वक्त्रमूर्द्धजं प्रिये ! ॥
पीठकामेश्वरी तद्वत् विज्ञेयं परमं महत् ।

परं ज्योतिर्मुखं भद्रे ! नरकेशेन चुम्बितम् ॥
भवपाशविनाशाय केवलं तद्धि भावयेत् ।
त्रिपुरा देवता चास्य कामाख्यस्य गणाम्बिके ! ।
एता मण्डलसंस्थाश्च देव्यः शक्तिसमन्विताः ॥
सिंहचर्मोत्तरासङ्गा कामाख्या विपुलोदरा ।
वैयाघ्रचर्मवसना सर्वसिद्धिप्रदा शुभा ॥
परमानन्दसम्भूता साट्टहासा महोत्सवा ।
सुनन्दा लोचनप्रीता व्यक्ताष्टादशलोचना ॥
चारुमाणिक्यसम्पूर्णकुण्डलद्वयशोभिता ।
भयङ्करी महेशानी रौद्री सर्वार्थदायिनीम् ॥
मुकुटकोटिशुभ्रांशुकमलज्योतिरन्विता ।
नानामणिगणाकीर्णकण्ठभूषणधारिणी ॥
मृणालकोमलैः स्निग्धा युक्ता द्वादशबाहुभिः ।
अस्थिरत्नार्चितैर्दिव्यैः पद्मकर्दमनालिभिः ॥
कर्त्तरीशवदम्भोलिसूत्रचक्रांशुभास्वरैः ।
षड्भिश्च बाहुभिर्धत्ते दक्षिणैर्बाहुभिः शृणु ॥
कोदण्डमुण्डखट्वाङ्गमृणालनालनीरजम् ।
कपालं पुस्तिकां घण्टां मुण्डमालानिवीतिनी ॥
तुलाकोटिपराक्रान्ता पादपद्मचयाश्रिता ।
सिंहासनोर्द्ध्वसंसुप्ता शवासनकृताश्रया ॥
मणिप्रभाविधानेन शिवेन परमेष्ठिना ।
नरकेशेन संश्लिष्टा कामाख्या परमेश्वरी ॥
एवं ध्यानं न्यसेद्देवि ! मातृकां परमेश्वरीम् ।
स्वनामग्रहनच्चत्वं श्रीकण्ठन्यासपूर्वकम् ॥
कलान्यासं पीठन्यासं मन्त्रन्यासं समाचरेत् ।
दशधा यन्त्रे संस्थाप्य संस्कृत्य च यथाविधि ॥

अक्षतान् विकिरेत्तत्र पीठपूजां समाचरेत् ।
पूर्वादिक्रमयोगेन गणेशञ्च गणाधिपम् ॥
गणनाथं गणक्रीड़ं गदी स्वग्रास्वयो मनुः ।
मन्वन्तरेण दीर्घेण तारयुक्तेन चार्चयेत् ।
क्रीड़ासरों दक्षिणे तु मन्दरं वामनेत्रकम् ॥
रश्मिविन्दुसमायुक्तं लोहजङ्घन्तु पश्चिमे ।
नारसिंहेन वीजेन क्षेत्रेशं परिपूजयेत् ॥
उत्तरे भूतनाथञ्च मन्दरेण समन्वितम् ।
गौरीपुत्रञ्च वटुकं तथा समयपुत्रकम् ॥
ज्ञानपुत्रं समयपुत्रं पूर्वादिषु यथाक्रमात् ।
हंसेत्यनेन मन्त्रेण ध्यात्वा रक्तेन चार्चयेत् ॥
शान्तिकानां द्वारपालं तथा विन्दुकला परा ।
निवृत्तिश्च कला पश्चात् प्रतिष्ठा च कला ततः ।
मायावीजेन पूर्वादि तत्र वै हेतुकादिकम् ॥
हेतुकं त्रिपुरघ्नञ्च अग्निवेतालकं तथा ।
वायव्यादिक्रमेणैव कालञ्चैव करालकम् ॥
एकपादं तथा भीमं चतुर्णां गगनो मनुः ।
असिताङ्गादयश्चैव ब्राह्मग्रादिसिद्धिसंयुताः ॥
चर्चिकं दशकं पूज्यात् षट्कोणेषु भगादितः ।
षट्कोणाग्रे च मदनं रतिपुत्रीं स्वपार्श्वयोः ॥
पञ्चवाणांस्तथा चाग्रे ग्रहांश्चैव तु दिक्पतीन् ।
आसनं पूजयित्वा च उपर्य्युपरिभावतः ॥
ध्यात्वा चारोपयेद्देवीमिमं मन्त्रमुदाहरेत् ।
एह्येहि परमेशानि ! सान्निध्यमिह मण्डले ॥
कुरुष्व जगतां मातः ! संसारार्णवतारिणि ! ।
महापद्मवनान्तस्थे ! कारणानन्दविग्रहे ! ॥

शब्दब्रह्ममयि ! स्वच्छे ! कामेश्वरि ! प्रसीद मे ।
कामेश्यावाहनं कुर्य्यादिति मन्त्रेण शङ्करि ! ॥
नमो भवाय सर्वाय रुद्राय वरदाय च ।
पशूनां पतये चैव सर्वानन्दात्मने सदा ॥
त्रिजटाय त्रिशीर्षाय सदा त्रिशूलधारिणे ।
त्रिनेत्राय त्रिकालाय त्रिपुरघ्नाय वै नमः ॥
नमश्चण्डाय मुण्डाय विश्वदण्डधराय च ।
लोहिताय च धूम्राय नीलकण्ठाय वै नमः ॥
नमस्त्रिपुररूपाय विरूपाय नमो नमः ।
सूर्य्याय सूर्य्यपतये सिद्धिनाथाय वै नमः ॥
तस्मादरण्योत्तरतो नातिदूरे व्यवस्थितः ।
सर्वं श्वेतं कृष्णवर्णं गोधिकायाः शिला यतः ॥
पश्चिमे तु शिवस्तस्य पूर्वपूर्वं विजानीहि ।
गयातीर्थञ्च उदरे उत्तरे परिकीर्त्तितम् ॥
चतुर्वर्गप्रमाणेन शीर्षे चैव गराशिरः ।
शीर्षपार्श्वे रामगया रामपिण्डन्तु दक्षिणे ॥
पुच्छे तु मानसं तीर्थं दक्षिणे तु महानदी ।
तत्र स्नानं प्रकुर्वीत विधिपूर्वेण कर्मणा ॥
तस्योत्तरे इषुक्षेपयुगस्यैवान्तरे प्रिये ! ।
तीर्थं प्रेतशिलाख्यञ्च श्राद्धी स्वर्गं नयेत् पितॄन् ॥
महानद्यां कृते श्राद्धे अक्षय्यं फलमाप्नुयात् ।
तथाक्षयवटे श्राद्धी ब्रह्मलोकं नयेत् पितॄन् ॥
गयातीर्थे नरः स्नात्वा सर्वपापैः प्रमुच्यते ।
आत्मयोने ! महेशानि ! गयायान्तु तिलैर्विना ॥
पिण्डनिर्वपणं शेषमपि कुर्य्याच्च मानवः ।
पश्चिमे वासुदेवस्य धनुरष्टादशान्तरे ॥

दीर्घाकारं पञ्चकोणमुत्तरं मुनिसंस्कृतम्।
उत्तरे मानसे श्राद्धी न भूयो जायते नरः॥
दक्षिणे कोटिलिङ्गस्य चतुष्कोणश्च यः शिवः।
दक्षिणं मानसं तद्धि सर्वपापप्रणाशनम्॥
दक्षिणे मानसे श्राद्धी ब्रह्मलोकं नयेत् पितॄन्।
महानद्यां कृते श्राद्धे ब्रह्मलोकं नयेत् पितॄन्॥
श्राद्धी रामह्रदे देवि ब्रह्मलोकं नयेत् पितॄन्।
गयाशिरे पिण्डदानात् गयापुच्छे तथोत्तरे॥
त्रिदिनं पातयेत् पिण्डं कुलञ्चैव समुद्धरेत्।
काङ्क्षन्ति पितरः पुत्रान् नरकाद्भयभीरवः॥
गयां गच्छति यः कश्चित् सोऽस्मान् सन्तारयिष्यति।
पश्चिमे कामनाथस्य सप्तधन्वन्तरे स्थिता॥
दृष्ट्वा दीर्घेश्वरीं देवीं सर्वकामफलप्रदाम्।
षष्टिवर्षसहस्राणि देववद्भुवि मोदते॥
मायावीजेन देवेशि! अष्टम्यां प्रतिपूजयेत्।
सर्वविद्यामवाप्नोति राज्ञीनामग्रणीर्भवेत्॥
कल्पवृक्षं ततो गत्वा तिन्तिड़ीसंज्ञकं तरुम्।
प्रदक्षिणत्रयं कृत्वा मन्त्रेणानेन पूजयेत्॥
ॐ नमो व्यक्तरूपाय सर्वदेवस्तुताय च।
शिवाधिष्ठानरूपाय तिन्तिड़ीवृक्षरूपिणे॥
प्रशस्तः सर्वमन्त्रेषु काम्ये मोक्षे च दक्षिणे।
वामहस्तस्य संस्पर्शे मालाया ग्रहणे तथा॥
भूगतश्च परैः स्पृष्टश्छिन्ने संवत्सरान्तरे।
संस्कुर्य्यात् मालिकां देवि! ताम्रपात्रे निवेशयेत्॥
गायत्र्या प्रथमं प्रोक्ष्य पञ्चगव्यैरनन्तरम्।
पश्चात्तेनैव मन्त्रेण हुं सिद्धेर नम इत्युत॥

गन्धोदकेन तत्पश्चात् गन्धपुष्पैः पृथग्विधैः।
कुम्भत्रयेण संस्थाप्य रक्तपुष्पैः प्रपूजयेत् ॥
यवक्षीरबलिं दत्त्वा देवप्राणं निवेशयेत्।
तदानीय स्पृशेन्मालामन्तरीक्षेषु विन्यसेत् ॥
आनीय रात्रौ पीठे च स्थापयेन्मालिकां ततः।
गन्धचन्दनकं दत्त्वा तथा दूर्वाक्षतानि च ॥
पुनर्देवस्य पीठे च तद्रात्रौ च निवेशयेत्।
शतं साहस्रकञ्चैव अयुतं नियुतं तथा ॥
लक्षञ्चैव तथा कोटिं जपहोमस्य मानकम्।
प्रतिमाने चाष्टहस्तं सर्वपर्वणि सञ्जपेत् ॥
अथवा चाष्टभिर्बीजैस्त्रीणि तत्रापि योजयेत्।
माले ! माले ! महामाले ! सर्वत्रैव स्वरूपिणि ! ॥
चतुर्वर्गस्त्वयि न्यस्तस्तन्माले ! सिद्धिदा भव।
पुष्करी सखिवीजं त्वं सूक्ष्मं सूक्ष्मान्वितं तथा ॥
आकाशशशिसंयुक्तं सिद्धेश हृदयसंज्ञकम्।
एष पञ्चाक्षरो मन्त्रो मालायाः परिकीर्त्तितः ॥
ग्रहणे स्थापने चैव पूजने विनियोजयेत्।
जपादौ शिवं विन्यस्य जपान्ते तु स्तुतिं पठेत् ॥
बलिदानं ततः कुर्य्यात् दद्याद्विभवमात्मनः।
अनुलोमविलोमेन मूलमन्त्रेण पूजयेत् ॥
अम्बे ! अम्बिके ! मन्त्रेण तथा पौराणिकेन च।
जयकामेशि ! चामुण्डे ! जय भूतापहारिणि ! ॥
जय सर्वगते ! देवि ! कामेश्वरि ! नमोऽस्तु ते।
विश्वमूर्त्ते ! शुभे ! शुद्धे ! विरूपाक्षि ! त्रिलोचने ! ।
भीमरूपे ! शिवे ! विद्ये ! कामेश्वरि ! नमोऽस्तु ते ॥
मालाजये ! जये ! जम्भे ! भूताक्षि ! क्षुभितेऽक्षये ! ।

महामाये ! महेशानि ! कामेश्वरि ! नमोऽस्तु ते ॥
भीमाक्षि ! भीमदे ! देवि ! सर्वभूतक्षयङ्करि ! ।
करालि ! विकरालि ! च कामेश्वरि ! नमोऽस्तु ते ॥
कालि ! करालि ! विक्रान्ते ! कामेश्वरि ! हरप्रिये ! ।
सर्वशस्त्रभूते ! देवि ! कामेश्वरि ! नमोऽस्तु ते ॥
कामरूपप्रदीपा च नीलकूटनिवासिनी ।
निशुम्भशुम्भमथनि ! कामेश्वरि ! नमोऽस्तु ते॥
कामाख्ये ! कामरूपस्थे ! कामेश्वरि ! हरप्रिये ! ।
कामिनि ! देहि मे नित्यं कामेश्वरि ! नमोऽस्तु ते ॥
रुधिरासवपानाढ्यवक्त्रे ! त्रिभुवनेश्वरि ! ।
महिषासुरवधे देवि ! कामेश्वरि ! नमोऽस्तु ते ॥
छागतुष्टे ! महाभीमे ! कामाख्ये ! सुरवन्दिते ! ।
जय कामप्रदे ! तुष्टे ! कामेश्वरि ! नमोऽस्तु ते ॥
भ्रष्टराज्यो यदि राजा नवम्यां नियतः शुचिः ।
अष्टम्याञ्च चतुर्दश्यां उपवासी नरोत्तमः ॥
संवत्सरेण लभते राज्यं निष्कण्टकं पुनः ।
य इदं शृणुयाद्भक्त्या तव देवि ! समुद्भवम् ॥
सर्वपापविनिर्मुक्तः परं निर्वाणमृच्छति ।

कामेश्वरि ! देवि ! सुरासुरप्रभे !
प्रकाशिताम्भोजनियन्त्रिते ! नमः ।
सुरारिवक्षःस्थलपाटवोत्सुके !
त्रयीमये ! देवि ! च ते नमामि ॥

सितासिते ! रक्तपिशङ्गविग्रहे ! रूपाणि यस्याः प्रतिपादितानि ।
करे कपाले च विकल्पितानि शुभाशुभानामपि तां नमामि ॥

कामरूपसमुद्भूते ! कामपीठावतंसके ! ।
विश्वाधार ! महामाये ! कामेश्वरि ! नमोऽस्तु ते ॥

अव्यक्तविग्रहे ! भ्रान्ते ! सन्तते ! कामरूपिणि ! ।
कालगम्ये ! परे ! शान्ते ! कामेश्वरि ! नमोऽस्तु ते ॥
या सुषुम्नान्तरालस्था चिन्त्यते ज्योतीरूपिणी ।
प्रणतोऽस्मि परां वीरां कामेश्वरि ! नमोऽस्तु ते ॥
दंष्ट्राकरालवदने ! मुण्डमालोपशोभिते ! ।
सर्वतः सर्वगे ! देवि ! कामेश्वरि ! नमोऽस्तु ते ॥
स्नानकाले च प्रत्यूषे भोजने दन्तधावने ।
तथा विगतवस्त्रे च दर्शनं न तु संस्पृशेत् ॥
मधुमासे त्रयोदश्यां चतुर्दश्यां वृषस्य च ।
न स्त्रीदेवीं स्पृशेज्जातु तद्दिने दर्शनं त्यजेत् ॥
दर्शनं भयदं विन्द्यात् शापः पतति मूर्द्धनि ।
आशु ज्यैष्ठसिताष्टम्यां कुमारी नावलोकयेत् ॥
कुमारीभिः सुरूपादिः साधकोऽपि कदाचन ।
न रात्रौ संस्पृशेन्नारीं बलिं न स्पर्शयेत् क्वचित् ॥
लिङ्गस्थाञ्च महादेवीं कदाचिदपि न व्रजेत् ।
विप्राणां क्षीरवलयः शाल्यन्नं वाथ पायसम् ॥
घृतप्लुतं चर्व्यफलं पुष्पं तस्य घृतान्वितम् ।
दद्यात् क्षीरञ्च दुग्धान्नं भक्तान्नं वा निवेदयेत् ॥
शाल्यन्नं वाथ समधु कृशरं खण्डमोदकम् ।
राज्ञां हि पशवः शस्ता वैश्यानां व्रीहयस्तथा ॥
क्षौद्रं वृषलजातीनां सर्वेषां पशवोऽथवा ।
निवेदयेत् शोणतुण्डं मानुषं वा लुलापकम् ॥
वराहं वाथ च्छगलं चामरं वरुणं तथा ।
मेषञ्चाथ वराहञ्च गोधिकाञ्च निवेदयेत् ॥
चामराणाञ्च दशकं छागलेकं विशिष्यते ।
दशभिश्छगलैरेव कूर्म एकः प्रशस्यते ॥

कूर्मस्य च शतेनापि शशकैकं विशिष्यते ।
शशकस्य सहस्राणां वराहस्तु विशिष्यते ॥
द्वे सहस्रे वराहस्य माहिषं श्रेष्ठमुच्यते ।
द्वे सहस्रे लुलापस्य खड्गमेकं विशिष्यते ॥
खड्गिनान्तु सहस्रेण मानुषं चातुलं फलम् ।
द्वे सहस्रे मानुषस्य शोणतुण्डं प्रशस्यते ॥
द्वे शते शोणतुण्डस्य श्वेतग्रीवं प्रशस्यते ।
श्वेतग्रीवशतेनापि गोधिकापि वरं मतम् ॥
गोधिकानां शतं देवि ! नरस्य च कुमारकम् ।
पशूनाञ्चैव षण्मासात् परतश्च बलिर्भवेत् ॥
छगलं कृष्णं श्वेतं वा द्विवर्षात् परतो यदि ।
सञ्जाते गुग्गुलुशुद्धे शोणाख्यं जम्बूकं तथा ॥
तथा गन्धमृगञ्चैव छागञ्च पर्वतीयकम् ।
मूषकञ्च करालञ्च चुद्रमार्जारमेव च ॥
काकोलं कालविङ्कञ्च राजहंसञ्च शारिकम् ।
सूकं गृध्रञ्च काकोलं मयूरं चित्रकं तथा ॥
अश्वञ्च वेणुपृष्ठञ्च कृष्णपारावतं तथा ।
बृहत्कपोतकञ्चैव खञ्जरीटन्तथैव च ॥
वकञ्चैव बलाकञ्च प्रयत्नेन विवर्जयेत् ।
संहृते बलिदानेन स्त्रियन्तु न विचारयेत् ॥
मिथुने दीयमाने तु न दोषो जायते प्रिये ! ।
श्मशाने महिषं दद्याद्दैवकस्य च सन्निधौ ॥
स याति ब्रह्मलोकञ्च शिववद्भुवि मोदते ।
अन्तर्हृष्टमृतानाञ्च स याति ब्रह्म शाश्वतम् ॥
अद्यापि दृश्यते ब्रह्म यस्तु दक्षिणतः प्रिये ! ।
पतते नात्र सन्देहो ज्ञानदाता सदाशिवः ॥

तस्माद्दक्षिणकर्णेन भूमौ पतति वै नरः ।
महापातकयुक्तोऽपि युक्तो वाप्युपपातकैः ॥
श्मशाने बलिदाने तु मुक्तो गच्छेत् शिवालयम् ।
अकामो वा सकामो वा प्राणांस्त्यजति तत्र वै ॥
त्यक्तदेशोऽपि भजति स्वयमेव गणेश्वरः ।
परदेशार्जितं वाथ कृत्वा दत्त्वा बलिं नृपः ॥
महापातकिनं चौरं मूर्खं वा चैकवीरकम् ।
स्त्रीजितं वा ब्रह्मद्विषं प्रयत्नेन न योजयेत् ॥
मणिमुक्तासुवर्णानां देवि दत्तानि यानि च ।
न निर्माल्यं द्वादशाहं ताम्रपात्रं तथैव च ॥
पट्टी शाटौ च षण्मासं नैवेद्यं दत्तमात्रतः ।
मोदकं कृषरञ्चैव यामार्द्धेन महेश्वरि ! ॥
पट्टवस्त्रं त्रिमासाच्च यज्ञसूत्रमहः स्मृतम् ।
यावदुष्णं भवेदन्नं परमान्नं तथैव च ॥
मस्तकं रुधिरञ्चैव अर्द्धरात्रेण पार्वति ! ।
मुहूर्त्तं दधि दुग्धञ्च आज्यं यामेन शङ्करि ! ॥
करवीरमहोरात्रं विल्वपत्रं तथैव च ।
जवा बन्धूकमाल्यञ्च निर्माल्यं सार्द्धमासके ॥
माल्यं वै करवीरस्य पद्मस्य विल्वकस्य च ।
मासार्द्धेन महेशानि ! ताम्बूलं दत्तमात्रतः ॥
खर्जूरं पनसं द्राक्षा मातुलुङ्गञ्च शावकम् ।
कदली नागरङ्गञ्च तथा जम्बूफलानि च ॥
शालूकं मधुकञ्चैव प्रयत्नेन निवेदयेत् ।
फलं विल्वञ्च दाड़िम्बं जयन्तीं कर्कटीं तथा ॥
त्रपुरञ्चैव वार्त्ताकीं देवीप्रीतिकराणि च ।
न निर्माल्यञ्च दाड़िम्बं तथा विल्वफलं प्रिये ! ॥

सौगन्धिकञ्च कदलं प्रयत्नेन नियोजयेत् ।
कदलं वीजपूरञ्च दुग्धं पक्कं निवेदयेत् ॥
कन्दु पक्कं कशेरुञ्च जम्बु बालप्रियं भवेत् ।
आर्द्रकं लवणञ्चैव जीवकं पिप्पलीयकम् ॥
जातीकोषं तिन्दुकञ्च देव्याः प्रियतरं महत् ।
रामरम्भाफलं पुष्पं वदनं धूम्रतापितम् ॥
न योजयेन्महादेव्यै उत्पलस्य च वीजकम् ।
धान्यं श्रावणकं मर्त्यो द्विःखिन्नञ्च विवर्जयेत् ॥
नारिकेलं सुवर्णाभं नारिकेलञ्च वामकम् ।
निवेदयेन्महादेव्यै तोयं तस्य विशेषतः ॥
नारिकेलञ्च भाण्डीरं दैवे श्राद्धे विवर्जयेत् ।
वकुलस्य फलं पक्कं पद्मस्य च फलं तथा ॥
नियोजयेन्महादेव्यै चान्द्रायणफलं लभेत् ।
शृणु देवि ! प्रवक्ष्यामि पुष्पाध्यायं समासतः ॥
ऋतुकालोद्भवैः पुष्पै र्मल्लिकाजातिपुष्पकैः ।
सितरक्तैस्तथा पुष्पै र्नीलपद्मस्य पाण्डरैः ॥
किंशुकैस्तगरैश्चैव जवाकनकचम्पकैः ।
किंशुकैस्तगरैश्चैव वकुलैश्चैव मन्दरैः ॥
धुस्तूरकादियुक्तैश्च बन्धूकागस्त्यसम्भवैः ॥
मदनैः सिन्धुवारैश्च दूर्वाङ्कुरसुकोमलैः ।
करवीरस्य माघ्यस्य सहस्राणि ददाति यः ।
स कामान् प्राप्य चाभीष्टान् देवीलोके महीयते ॥
एकेन करवीरेण पद्मानां द्वे सहस्रके ।
नोत्सृज्य दद्यात् पुष्पाणि वनस्थानि कदाचन ॥
न शक्नुवन्ति वै देवाः समाकर्षितुमुद्यताः ।
एकैकं कुसुमं यत्ना रचन्ति दश वै यतः ॥

तथा यच्चाङ्गनाः पञ्च सर्वतः सुसमावृताः ।
तस्मादाहृत्य कुसुमं दद्याद्देवान् पितॄनपि ॥
कुर्य्यात् पुष्पगृहं तत्र कामाख्योपरि शङ्करि ! ।
इह कामानवाप्नोति दुर्गालोके महीयते ॥
करवीरेण जात्या च पूजयेद् यस्तु शङ्करि ! ।
अग्निष्टोमफलं लब्ध्वा सूर्य्यलोके महीयते ॥
पूजयित्वा नरो भक्त्या चण्डिकां पद्ममालया ।
ज्योतिष्टोमफलं प्राप्य सूर्य्यलोके महीयते ॥
सजातिवकपुष्पेण तथा रुद्रजटस्य च ।
राजपेयस्य यज्ञस्य फलं प्राप्नोति नान्यथा ॥
सर्वेषामेव पुष्पाणां प्रवरं नीलमुत्पलम् ।
नीलोत्पलसहस्रेण यस्तु मालां प्रयच्छति ॥
दुर्गायां विधिवद्देवि ! तस्य पुण्यफलं शृणु ।
वर्षकोटिसहस्राणि वर्षकोटिशतानि च ॥
देव्या अनुचरो भूत्वा रुद्रलोके महीयते ।
वक्रधान्योद्भवं यच्च सूक्ष्मधान्योद्भवं तथा ॥
राजधान्योद्भवञ्चैव रक्तधान्योद्भवं तथा ।
शस्तं तण्डुलमच्छुस सप्ताष्टनवसंख्यया ॥
दूर्वाङ्कुरसमेतञ्च भगवत्यै निवेदयेत् ।
अष्टम्यां वा नवम्यां वा सोऽश्वमेधफलं लभेत् ॥
गन्धानुलेपनं दत्त्वा ज्योतिष्टोमफलं लभेत् ।
कुङ्कुमेन विलिप्याघ्र्यं गोसहस्रफलं लभेत् ॥
चन्दनागुरुकर्पूरैः शुक्लपुष्पैः सकुङ्कुमैः ।
विलिप्तां पूजयेद्दुर्गां वह्निष्टोमफलं लभेत् ॥
निम्बपत्रञ्च माघ्यञ्च तमालामलकीदलम् ।
कह्लारं तुलसीञ्चैव पद्मञ्च श्रेष्ठपुष्पकम् ॥

एतत् पर्य्युषितं न स्याद् यच्चान्यत् कलिकात्मकम् ।
न दुष्येत् छिन्नभिन्नञ्च जातीपुष्पञ्च शङ्करि ! ॥
पद्मदूर्वाङ्कुरञ्चैव तुलसीदलमेव च ।
नाशु पर्य्युषितं न स्यात् कुसुमस्य च शङ्करि ! ॥
नार्चयेत् भिण्टिपुष्पेण पीतञ्च तगरं तथा ।
श्वेतोड्रेण च कृष्णेन विजयेन न चार्चयेत् ॥
त्रिलक्षं प्रजपेन्मन्त्रं पुरश्चरणसिद्धये ।
न्यासञ्च तर्पणञ्चैव होमं पङ्क्त्यष्टकञ्चरेत् ॥
जितेन्द्रियो महेशानि ! सोऽग्निष्टोमफलं लभेत् ।
शुक्लपक्षे नवम्यान्तु अष्टम्यां परमेश्वरीम् ॥
त्रिकालं पूजयेद्यस्तु चतुर्दश्यां मम प्रिये ! ।
स गच्छति परं स्थानं यत्र देवी व्यवस्थिता ॥
क्रीड़यित्वा चिरं कालं राजा भवति भूतले ।
स्नात्वोपवासनियमपूजाजागरमार्जनैः ॥
सर्वकालेषु सर्वेषु कामेशीं यस्तु पूजयेत् ।
विमानवरमारुह्य ध्वजमालाकुलं तथा ॥
ब्रह्मलोके नरो याति मोदते शाश्वतीः समाः ।
विविधे भक्तिभावेन तस्माद् विभवविस्तरैः ॥
पूजयेत् सततं दुर्गां महापुण्यफलेच्छया ।
अयने विषुवे चैव षड़शीतिमुखे प्रिये ! ॥
मासैश्चतुर्भिर्यत् पुण्यं विधिना पूज्य चण्डिकाम् ।
तत् फलं लभते देवी नवम्यां कार्त्तिकस्य च ॥
मासि चाश्वयुजे देवीं शुक्लपक्षे महेश्वरीम् ।
नवम्यां पूजयेद्यस्तु तस्य पुण्यफलं शृणु ॥
अश्वमेधसहस्रस्य वाजपेयशतस्य च ।
तत् फलं समवाप्नोति नात्र किञ्चित् प्रपद्यते ॥

हनूमतश्चोत्तरे च एकविंशधनुर्मितम् ।
मुक्तिमण्डपिकं नाम स्थानं परमदुर्लभम् ॥
संस्थितां प्रजपेत्तत्र परां गतिमवाप्नुयात् ।
ततः कृताञ्जलिर्मुद्रां कृत्वा देवीं प्रसादयेत् ॥
नमस्ते सर्वदेवेशि ! भक्तानां भयहारिणि ! ।
संसारसागरे मग्नं त्राहि मां परमेश्वरि ! ॥
एवं प्रसाद्य तां देवीं दण्डवत् प्रणिपत्य च ।
ततोऽर्चयेद्गुरुं भक्त्या पुष्पगन्धानुलेपनैः ॥
कुमारीं भोजयेत्तत्र जागरं कारयेन्निशि ।
माहात्म्यञ्च महादेव्या गीतिकाश्चापि कारयेत् ॥
ध्यायन् स्तुवन् परां देवीं प्रेरयेद्रजनीं बुधः ।
मासि मासि तथाष्टम्यां चतुर्दश्यां विशेषतः ॥
गोधूलिसमये देवि ! नयेत् कामेश्वरालयम् ।
रथे वा शिविकायां वा दृष्ट्वा तत्र कदाचन ॥
सर्वपापविनिर्मुक्तो देवीलोके महीयते ।
मुक्तिमण्डपिकां नीत्वा पूजयेद्यस्तु शङ्करीम् ॥
दशाश्वमेधे यत् पुण्यं लभते नात्र संशयः ।
न कुर्य्याद्दिवसे यात्रां न च रात्रौ महानिशि ॥
शरत्कालस्य सप्तम्यां नयेन्नगरदक्षिणे ।
सायंकाले महेशानि ! सर्वयज्ञफलं लभेत् ॥
अष्टम्यां पूजयित्वा च नवम्यां स्रोतसो जले ।
यश्चैव स्नापयेद्देवीं दिवसे च न दुष्यति ॥
ततः स्पृष्ट्वा रथे देवीं न शोको जायते भुवि ।
स्कन्धे देवीं वहेद्यस्तु अश्वमेधं पदे पदे ॥
तस्मात् प्रयत्नतो भूत्वा शिविकां कारयेद् बृहत् ।
एतस्मिन्नन्तरे देव्याः स्नानार्थं पर्वतं तथा ॥

पश्येत् कामेश्वरं देवं भूमिपीठे व्यवस्थितम् ।
तस्योत्तरे कामसरो भानुहस्तप्रमाणतः ॥
तत्र कामासनं जप्त्वा स्नात्वा कामानवाप्नुयात् ।
कामकुण्डे नरः स्नात्वा यः पश्येत् काममीश्वरम् ॥
न तस्य पुनरावृत्तीरुद्रलोके महीयते ।
चतुर्भुजं शूलहस्तं खट्वाङ्गञ्च वराभयम् ॥
पद्मस्थं पूजयेद्देवं सर्वपापप्रणाशनम् ।
दक्षिणामूर्त्तिमन्त्रेण पूरयेच्च प्रसादयेत् ॥

ओं नमः शिवाय तन्निशामयाय नमः शिवाय शिवार्चिताय तुभ्यं कृपापराय नमो मायागेहे नाश्रमाय नमोऽस्तु शेषाय महान्धकाय नमः। शरण्याय नमो गणाय नमोऽस्तु भीमगणानुगाय नमोऽस्तु नानाभुवनादिकर्त्रे।

स्नापयित्वा घृतक्षौद्रै र्गन्धैर्दीपैश्च पूजयेत् ॥
कनकैर्विल्वपत्रैश्च रक्तरुद्रजटैरपि ।
जयशब्दैः स्तवैश्चैव नानानैवेद्यवेदनैः ॥
चैत्रे मासि त्रयोदश्यां शुक्लायां काममीश्वरम् ।
ये पश्यन्ति सुरश्रेष्ठं ते यान्ति परमं पदम् ।
अष्टम्याञ्च निशाभागे नयेत् कामेश्वरीगृहम् ॥
तत्र सम्पूजयेद्देवं देव्या सह विशेषतः ।
अग्निष्टोमफलं तस्मात् लभते नात्र संशयः ॥
दर्शनात् फलमाप्नोति दृष्ट्वा कामेश्वरीं ततः ।
यद् यत् प्रार्थयते तत्र तत्तदेव न संशयः ॥
कम्बलस्य च यामे तु देवी यत्रास्ति सङ्गता ।
धनुरष्टान्तरे भद्रे ! यजेत् कोटीश्वरीं पराम् ॥
दृष्ट्वा च न स्पृशेद्देवीं पुत्रार्थी न कदाचन ।
सर्वपापविनिर्मुक्तो रुद्रलोके महीयते ॥

अथ अष्टमः पटलः ।

श्रीभगवानुवाच ।

ततोऽस्मिन् दिवसे देवि ! प्रायादाकाशवाहिनीम् ।
लोकचक्षुरिति ख्याता सर्वपापहरा शुभा ॥
देव्या दक्षिणतश्चैव इषुक्षेपद्वयान्तरे ।
त्रिधारा दृश्यते तत्र मध्यधारा सरस्वती ।
दक्षिणे वरुणा धारा उत्तरे यमुना स्मृता ।
यामुने च कृतस्नानो मुच्यते घोरकिल्बिषात् ॥
सरस्वत्यां कृतस्नानो विष्णुलोके महीयते ।
वरुणायां कृतस्नानो मुक्तिमाप्नोत्यनुत्तमाम् ॥
त्रिधारासङ्गमो यत्र अनन्तः परिदृश्यते ।
आकाशगङ्गा सा देवी महापातकनाशिनी ॥
नमो देवि ! सहस्राक्षि ! भवबन्धप्रणाशिनि ! ।
नीलशैलस्थिते ! भद्रे ! पापं मे हर जाह्नवि ! ॥
अनेन स्नानं कृत्वा तु शब्दबीजेन पूजयेत् ।
तस्याः कौबेरदिग्भागे नातिदूरे व्यवस्थितः ॥
शुक्लाकृतिश्चारुरूपो वासुदेवः प्रकीर्त्तितः ।
स्मरेण पूजयेल्लिङ्गं गन्धाद्यैः पायसैरपि ॥
द्वादश्यां कार्त्तिके मासि दृष्ट्वा मुक्तिञ्च विन्दति ।
रात्रौ जागरणादत्र मुच्यते सर्वपातकात् ॥
दक्षिणे चैव गङ्गायाश्चरधन्वन्तरे स्थितः ।
महाश्मशाने भगवान् क्रीड़ते स्त्रीगणैः सह ॥
तत्र देवाः सगन्धर्वा ऋषयः सहचारणाः ।
प्रसादनार्थं देवस्य नित्यमायान्ति चादृताः ।
तत्राराध्य महादेवं भावपूते गणेश्वरम् ।

प्राप्तवान् गाणपत्यं हि देवानामपि दुर्लभम् ॥
अद्यापि दृश्यते तत्र प्रत्यहं महदद्भुतम् ।
निक्षिप्य मानुषास्थीनि भस्मीभूय प्रजापतिः ॥
तत्र गत्वा महादेवं यः पूजयति मानवः ।
दिव्यलोकमवाप्नोति भिन्नदेहो न संशयः ॥
कार्त्तिके मासि शुक्लायां चतुर्दश्यां विशेषतः ।
सम्पूज्य तत्र देवेशं सर्वप्रीतं पितामहम् ॥
तावत् प्रीत्या तु सर्वांस्तान् रुद्रस्यानुचरो भवेत् ।
वंशश्च दृश्यते तत्र उत्तराङ्गं हरं स्मृतम् ॥
पश्चिमाङ्गं हेरुकञ्च विष्णुरूपिणमव्ययम् ।
भैरवी दक्षिणांशश्च त्रिपुरेत्यभिधीयते ॥
प्रासादेन तु मन्त्रेण पूजयेत् परमेश्वरम् ।
वाजिमेधस्य यज्ञस्य लभते फलमुत्तमम् ॥
कुलाद्येन त्रिकुण्डेन पूजयेद्भक्तिमान्नरः ।
महाविद्यामवाप्नोति मण्डलान्नात्र संशयः ॥
हेरुकं द्वादशार्णेन वासुदेवस्वरूपिणम् ।
सर्वलोकेश्वरो याति जातिश्रेष्ठोऽभिजायते ॥
रुधिरैर्मांसमद्यैश्च पूजयेत् परमेश्वरीम् ।
रजन्यां सम्प्रदद्यात्तु कूर्ममांसं कदाच न ॥
चामरं मद्गुरं मत्स्यं प्रयत्नेन विवर्जयेत् ।
चिञ्चां भुक्त्वा नीलशैवं श्मशानं वा प्रमादतः ॥
महाभयङ्करं विन्द्यात् स्पृष्ट्वा शापं प्रयच्छति ।
न स्पृशेत् सप्तरात्रञ्च स्नानं वामहृदि प्रिये ! ॥
चान्द्रायणत्रयं कृत्वा ततः शुद्धिर्भविष्यति ।
राजीवं रजनीञ्चैव शाकं चामरसम्भवम् ।
भुक्त्वा प्रमादतो देवि ! तदेवं द्रुतमाकिरेत् ॥

कर्कन्धूशर्करायुक्तं दण्डशाकं तथैव च ।
कूष्माण्डं पर्वतीयञ्च दूरतः परिवर्जयेत् ॥
अष्टम्याञ्च नवम्याञ्च त्रयोदश्यां विशेषतः ।
एकविंशतिसूत्रैश्च तथा त्रिगुणितेन च ॥
त्रिगुणेत्येकयोगेन पदे तु त्रिंशकं मतम् ।
कोषतः पट्टसूत्रस्य अभावे रक्तकं न्यसेत् ॥
अन्यत्र दर्शयेन्मालां न स्पृशेद्वामपाणिना ।
वानप्रस्थो यतिश्चैव ब्रह्मचारी तथा प्रिये ! ॥
विष्णुमन्त्रस्य जाप्ये तु समन्त्रस्यापि च प्रिये ! ।
वामहस्ते ततो धृत्वा सप्तवीजान्तरं प्रिये ! ॥
सञ्जपेद्दक्षिणेनैव प्रतिवीजं वरानने ! ।
गृहद्वारे समागम्य तिन्तिड़ीकाय वै नमः ॥
सहस्रान्मुच्यते पापात् जीर्णत्वच इवोरगः ।
कामेश्वरस्य पृष्ठे तु यावत् सिद्धेश्वरः स्थितः ॥
तदन्तर्गतखण्डे च छायारुद्रः प्रकीर्त्तितः ।
स्थानं देहिपरित्यागश्छाया चात्र विधीयते ॥
यः करोति वृषोत्सर्गं तस्मिन् चैत्रे वरानने ! ।
अग्निष्टोमशतं पुण्यं लभते नात्र संशयः ॥
माघे मासि महेशानि ! छायारुद्रे तिलैर्विना ।
पिण्डनिर्वपणं कृत्वा मातृणामनृणो भवेत् ॥
ततो विन्ध्याचलं गत्वा कृष्णा रक्ता च या शिला ।
विन्ध्येशी सा समाख्याता प्रयजेत् कमलादिना ॥
कामेश्वर्याश्च मन्त्रेण सा पूज्या परमेश्वरी ।
गवामयुतदानेन यत् फलं यत्र पार्वति ! ॥
तत् फलं लभते सत्यं विन्ध्येशीदर्शनेन च ।
तस्याः पूर्वोत्तरे देशे धनुश्चेपशताधिके ॥

आकाशगङ्गाचिह्ने तु या शिला सुरदीर्घिका।
दक्षिणेन च तस्याग्रे किञ्चिदुष्णे च संस्थिता॥
या ख्याता ललिता कान्ता ब्रह्महत्यापकाहिनी।
अश्वत्थं नन्दिरूपञ्च मूले कूर्माकृतिः शिला॥
नरः कदापि तं देवं न पश्यत्येव पातकात्।
योनित्रयगतं लिङ्गं चतुर्हस्तप्रमाणतः।
गतिप्रदीपिकाकारं कुण्डं सर्वाघनाशनम्॥
तत्र व्यासेश्वरं देवं दृष्ट्वा नयति पातकम्।
व्यासतीर्थे नरः स्नात्वा ललितां योऽभिपूजयेत्॥
अश्वमेधसहस्रस्य तत्फलं लभते महत्।
विंशद्धन्वन्तरे प्राच्यां वनदारुसुचिह्नितम्॥
पद्मपत्राकृतिं पत्रं निर्यासपरिचिह्नितम्।
तस्य मूलस्थिता देवी उच्चवारणरूपिणी॥
तस्याः सम्पूजनादेव ग्रहदोषैर्न लिप्यते।
वृक्षं तत्र स्थितं स्पृष्ट्वा वन्ध्या गर्भधरा भवेत्॥
छिन्नहस्तो लभेत् स्वर्णं काले युक्ताकरः पुमान्।
दाड़िमस्य च पूर्वे तु नातिदूरे प्रतिष्ठितम्॥
नवहस्तमितं रन्ध्रं तद्देवं भुवनेश्वरम्।
पूजयेत् कामवीजेन विजयी जायते नरः॥
तस्य वायव्यभागे तु अगस्त्यस्याश्रमे शुभे।
देवं गदाधरं तत्र पूजयेत् कुसुमादिना॥
नातिदूरे तु देवस्य या शिला श्वेतमुज्ज्वलम्।
जल्पीशं तं महालिङ्गं पूजयेत्तावदुच्चरन्॥
सौभाग्ये विधिवत् स्नात्वा जल्पीशं यस्तु पूजयेत्।
अग्निष्टोमफलं तस्य भविष्यति मम प्रिये!॥
पश्चिमे तस्य पातालभुवनाधिपचिह्नितम्।

एकविंशतिभूभागे स्थितस्तत्र सदाशिवः ॥
तं प्रणम्य नरो भक्त्या न भूयो जायते क्वचित् ।
तस्य देवस्य भूभागे पवित्रे कालहस्तके ॥
गोविन्दपर्वते रम्ये शुक्लवर्णेन या शिला ।
गोविन्दं तं विजानीयात् पूजयेद्धरिवासरे ॥
तस्य पूर्वे नवधनुर्या शिला शोणसन्निभा ।
शरणेशी समाख्याता महापातकनाशिनी ॥
शिवाचले च तुङ्गे च प्रकटाख्या परा शिवा ।
ताञ्च सम्पूज्य यत्नेन महतीं श्रियमाप्नुयात् ॥
विन्ध्याचलस्योत्तरे च इषुक्षेपनवान्तरे ।
महालक्ष्मीः स्थिता तत्र सितपुष्पेण पूजयेत् ॥
श्रीपर्वते महेशानि ! श्रीकुण्डे स्नानमाचरेत् ।
स्नात्वा कुण्डे भ्रुवे नाम पौर्णमास्यां तथाश्विने ॥
दृष्ट्वा सम्पूजयेद्भक्त्या धराणामीश्वरो भवेत् ।
गौतमस्याश्रमं गत्वा सम्पूज्य वृषभध्वजम् ॥
नरो न निरयं गच्छेत् पापस्य च क्षयो भवेत् ।
पश्चिमादुत्तरं तावत् यावद्दक्षिणमानसम् ॥
तदन्तर्गतक्षेत्रे नातिदूरे च शङ्करि ! ।
गत्वा तत्र समभ्यर्च्य ब्रह्मलोकमवाप्नुयात् ॥
तत्रैव सरस्तीरे हंसतीर्थमनुत्तमम् ।
द्वादशादित्यमभ्यर्च्य उत्तमां दीप्तिमाप्नुयात् ॥
रेवन्तं पूजयित्वाथ गतिमाप्नोत्यनुत्तमाम् ।
अभ्यर्च्येन्द्रं महैश्वर्य्यं गौरि ! सौभाग्यमाप्नुयात् ॥
सर्वान् कामानवाप्नोति सम्पूज्य पुरुषोत्तमम् ।
नारायणन्तु सम्पूज्य नराणामधिपो भवेत् ॥
दृष्ट्वा नत्वा नारसिंहं सङ्गमे विजयी भवेत् ।

वराहं पूजयित्वा तु भूमिराज्यमवाप्नुयात् ॥
सोमनाथं समभ्यर्च्य रुद्रलोके महीयते ।
पाण्डुकूटस्य या धारा सा धारा नर्मदा नदी ॥
तस्यां स्नात्वा चतुर्दश्यां वाजिमेधञ्च विन्दति ।
शिवविष्णौ मध्यगता या च योनि विनिःसृता ॥
महानदी सा विज्ञेया सर्वपातकनाशिनी ।
नितम्बधनयोर्मध्ये सा धारा परमेश्वरि ! ॥
मङ्गला नाम सा धारा सर्वमङ्गलकारिणी ।
विल्वश्रीपर्वतान्ते च या धारा सा सरस्वती ॥
तस्याः स्वच्छोदकं पीत्वा कवीनामग्रणीर्भवेत् ।
मतङ्गस्य च या धारा नर्मदा सा न संशयः ॥
कामकुण्डस्य या धारा कामगङ्गा समुच्यते ।
कामाख्यायाश्च या धारा सा गङ्गा परिकीर्त्तिता ॥
नन्दिकुण्डस्य या धारा सा ज्ञेया च मधुस्रवा ।
कामधेन्वाश्च या धारा सा विज्ञेया सुधर्मिणी ॥
पद्मशैलस्य या धारा सा गङ्गा उर्वशी स्मृता ।
नीलकुण्डस्य या धारा सुभद्रा परिकीर्त्तिता ॥
व्यासकुण्डस्य या धारा चन्द्रभागा च सा स्मृता ।
शक्रशैलस्य या धारा उर्वशी सा निगद्यते ॥
सोमकुण्डस्य या धारा नदी वैतरणी च सा ।
यमशैलस्य या धारा सा च गोदावरी स्मृता ॥
भण्डीशस्य च यां धारां स्नात्वा पीत्वा प्रणम्य च ।
अग्निष्टोमशतस्यापि लभते फलमुत्तमम् ॥
धर्मारण्यं ततो गत्वा स्नात्वा रामह्रदे प्रिये ! ।
कोटिलिङ्गं ततो वीचेत् प्रापयेदामरीं तनुम् ॥
कामस्यैवोत्तरे देशे त्रिंशद्धन्वन्तरे प्रिये ! ।

कोटिलिङ्गन्तु यः पश्येद्वाजपेयफलं लभेत् ॥
प्राणदण्डाय नित्याय नमस्ते लोहिताय च ।
नमः सहस्रशीर्षाय कोटिलिङ्ग ! नमोऽस्तु ते ॥
नमो गिरिपते ! नित्यं गिरिवृक्षप्रियाय च ।
नमो यज्ञाधिपतये कोटिलिङ्ग ! नमोऽस्तु ते ॥
इत्यनेन तु सम्पूज्य जवापुष्पैः प्रपूजयेत् ।
पायसञ्च बलिं दत्त्वा स्तुत्वा जप्त्वा विसर्जयेत् ॥
तस्य दक्षिणपार्श्वेन या शिला पार्श्वसङ्गता ।
वेतालं तं महादेवं वामे विष्णुद्विकर्णकम् ॥
पुष्पाञ्जलिं गृहीत्वा तु पठेन्मन्त्रमनन्यधीः ।
धर्मकामार्थमोक्षाय क्रूराय कथनाय च ॥
संख्याय सांख्यमुख्याय वेतालाय नमो नमः ।
कृष्णाजिनोत्तरीयाय पीतवस्त्रधराय च ॥
त्वमेव ब्रह्मा विश्वेश ! ब्रह्मरूप ! नमोऽस्तु ते ॥
तस्याग्रतो ब्रह्मयोनिं निर्गमे मन्त्रदुःसहम् ।
ब्रह्मयोनिं विशेद्यस्तु न पुन र्योनिमाविशेत् ॥
तिर्य्यग्योनिं न गच्छेत्तु ब्रह्मणः पदमाविशेत् ।
शिववल्लभदेशे तु मोक्षमार्गनिरोधके ॥
प्रसन्नो देवदेवेश ! त्राहि मां योनिसङ्कटात् ।
निःसृतो ब्रह्मयोनेः स गणेशं द्वारि पूजयेत् ॥
महाकायं शिलोत्कृष्टं मन्त्रेणानेन साधकः ।
नमो लम्बोदर ! श्रेष्ठ ! देवानामिष्टदायक ! ॥
अखिलाख्यं प्रभो ! नाथ ! नमस्ये योनिसङ्कटम् ।
ततो गच्छेन्मुक्तिमार्गं शक्रस्याभिमुखे यदि ॥
वामदक्षिणपार्श्वे द्वे युगे च सत्यसम्भवे ।
ऊर्द्ध्वं कृतयुगञ्चैव पार्श्वे त्रेता च द्वापरः ॥

बलिवक्त्रे स्थितं लिङ्गं गुप्ताख्यं भुवनेश्वरम् ।
तं प्रणम्य नरो भक्त्या प्राप्नुयादैश्वरं पदम् ॥
चतुर्युगं नमस्कृत्य स्पृष्ट्वा देवं कपर्दिनम् ।
न जायते पुनर्गर्भे युगदोषैर्न लिप्यते ॥
युगानामधिपः सोहि जगज्जातिस्वरूपधृक् ।
तद्युगे यत् कृतं पापं त्राहि त्वं परमेश्वर ! ॥
सम्भूतिभूतिपर्य्याप्त ! त्रेतायुग ! नरेश्वर ! ।
यद्युगे यत् कृतं पापं तद्व्यपोहतु भूमिजम् ॥
सत्यसाधन ! सत्याख्य ! नरनारायणात्मक ! ।
हेतुभूत ! कृतादीनां सत्यधर्म ! नमोऽस्तु ते ॥
विजयादौ याऽस्य चाज्ञा युगचक्र ! बलीश्वर !
नमामि सततं भक्त्या पापं हर नमोऽस्तु ते ॥
पञ्चाक्षरेण मन्त्रेण पूजयेच्च कपर्दिनम् ।
राजसूयाश्वमेधस्य तत् फलं प्राप्नुयान्नरः ॥
कामधेनुं ततो दृष्ट्वा सर्वान् कामानवाप्नुयात् ।
पूजयित्वा नमस्कृत्य ब्राह्मणान् भोजयेत्ततः ॥
सौरभेय्यै नमस्तुभ्यं कामगे ! कामचारिणि ! ।
धेनुरूपेण सा देवी मम पापं व्यपोहतु ॥
सन्दिष्टञ्च कुरुक्षेत्रे राहुग्रस्ते दिवाकरे ।
तुलापुरुषदानेन यत् फलं समुदाहृतम् ॥
तत् फलं समवाप्नोति कामधेनोश्च दर्शने ।
दक्षिणां गुरवे दद्यात् सवित्रेऽर्घ्यं निवेदयेत् ॥
शान्तिं कृत्वा ततो देवि ! आसन् कुर्य्यादनन्यधीः ।
उत्थाय सूर्य्यं संवीक्ष्य पठेन्मन्त्रद्वयं प्रिये ! ॥
नमोऽस्तु काल्यै गिरिजायै कामेश्वर्य्यै नमोऽस्तु ते ।
नमोऽस्तु देव्यै गिरिसम्भवायै नमः

समलीलाबलं सत्यमिदं सुरेश ! ।
अतीर्थे तीर्थनिष्ठेभ्यो व्यासादिभ्यो नमो नमः ।
गणेभ्यो रक्षकेभ्यश्च क्षत्रियेभ्यो नमो नमः ॥
पौण्ड्रविघ्न ! नमस्तेऽस्तु नमस्ते कामभैरव ! ।
नमस्ते दक्षिणामूर्त्ते ! दण्डपाणे ! नमोऽस्तु ते ॥
तीर्थं गत्वोपवासश्च श्रद्धा च जपकर्मणि ।
करिष्यतीति विश्वास एतत् सिद्धेस्तु लक्षणम् ॥
श्रीदेव्युवाच । यो नरः पापकर्माणि क्षेत्रेऽस्मिन् कुरुते सदा ।
सुरादिपातकं घोरं स किं मोक्षं गमिष्यति ॥
ईश्वर उवाच । पुण्यक्षेत्रे स्थितो यो वै पातकेषु रतः सदा ।
योनिं प्रविश्य मनुजो वर्षाणामयुतं वसेत् ॥
परे पुरे च तत्रैव ज्ञानं सम्पद्यते ततः ।
मोक्षं गमिष्यति सोऽपि गुह्यमेतन्मम प्रिये ! ॥
सुलभोऽन्यत्र लौहित्यः पञ्चस्थानेषु दुर्लभः ।
अगस्त्यस्य च तीर्थे च मणिकर्णे ह्रदे तथा ॥
अपुनर्भवे चन्द्रकुण्डे स्थानपञ्चकमीरितम् ।
अक्षतेन विशेषेण शतमार्गसहस्रकः ॥
क्षेत्रबाह्यस्थितैः शून्यैः कश्चिन्नास्ति विशेषकः ।
कालाख्यो रणभद्रश्च सौरभश्च महाबलः ॥
वेतालश्च विकटश्च एते पूर्वे स्थिता गणाः ।
एकजङ्घोऽनलश्चैव कर्दमालिप्तविग्रहः ॥
घण्टाकर्णस्तदूर्द्ध्वञ्च दक्षिणं पार्श्वमास्थिताः ।
वलनाशो भीषणश्च पश्चिमायां व्यवस्थितः ॥
पञ्चमो लोहिताक्षश्च नन्दनश्च तथा मतः ।
केशवश्चक्रपाणिश्च धनदश्चोत्तरा गणाः ॥

मधुरो मधुकश्चैव जयन्तश्च मधुप्रियः ।
अविशेषेण रक्षन्ति त्रयः कामेश्वरीस्थिताः ॥
गणेशः कालदण्डश्च विकर्णश्च कपिध्वजः ।
द्वारं रक्षति वै सर्वं मण्डपञ्च स्वयं हरः ॥
कन्दर्पो मकरन्दश्च प्रबलश्च गदाधरः ।
सोमश्च विपुलश्चैव अश्वतीर्थे स्थिता गणाः ।
शतसाहस्रयक्षिण्यो मुक्तिद्वारञ्च रक्षन्ति ॥
दशसाहस्रकैश्चैव अन्तर्गेहञ्च रक्षति ।
कुण्डतीर्थं ततो रक्षत्यष्टभि र्दशभिर्युतैः ॥
तीर्थे प्रासादकरणे धर्मारम्भे विशेषतः ।
व्रतयज्ञसमारम्भे विघ्नानि निवसन्ति वै ॥
तेषां सम्पूजयेदादौ बलिभिर्मोदकादिभिः ।
अन्यथा जायते विघ्नमिति जानीहि मे प्रिये ! ॥
अथापराणि विघ्नानि शरीरे निवसन्ति वै ।
मानसानि ज्ञानहराण्येतानि त्वं शृणु प्रिये ! ॥
कश्चिन्निवर्त्तको देवि ! कश्चित् प्रवर्त्तकस्तथा ।
सन्निकर्षं विदूरं वा सहस्रं लक्षमेव वा ॥
पापानुस्मरणञ्चैव आलस्येनापि दूषणम् ।
शोकमोहजराव्याधितारुण्यधननाशकम् ॥
कलहं भार्य्यया सार्द्धं दुर्भिक्षं गृहसङ्कटम् ।
नानाव्रतसमाकीर्णं धार्मिकोऽस्मीतिमानसः ॥
प्राप्तशोकन्तु धर्मस्य कारणे हीनपातकम् ।
वृक्षपत्रञ्च तुलसी धात्रीवृक्षफलं तथा ॥
शालग्रामशिलाखण्डं प्रतिमादारुजं तथा ।
मानुषं ब्राह्मणञ्चैव स्वयम्भूवर्त्तुलं शिवम् ॥
शङ्खशम्बूकभेदञ्च खड्गस्य मांससम्भवम् ।

दृष्ट्वा सर्वं भवेदेवं तीर्थजातं जलं तथा ॥
गङ्गायां वा नदीरूपं पुण्यक्षेत्रञ्च भूमिका ।
इत्येतानि च विघ्नानि संयान्ति च पुनः पुनः ॥
मन एवोत्तरेन्नित्यं मन एवात्र कारणम् ।
मन एव मनुष्याणां कारणं बन्धमोक्षयोः ॥
तन्निष्ठस्तत्परं जातं तन्मुख्यं दुःखकारणम् ।
चित्तमन्तर्गतं दुष्टं तीर्थस्नाने निषिध्यते ॥
पठेद् यः शृणुयाद्वापि भक्तिं मुक्तिमवाप्नुयात् ।
पुत्रार्थी लभते पुत्रं कीर्त्यर्थी कीर्त्तिमाप्नुयात् ॥
विद्यार्थी लभते विद्यां जयार्थी लभते जयम् ।
ब्रह्महत्यादिपापानां पापशुद्धिमवाप्नुयात् ॥
बन्ध्यापि लभते पुत्रं कन्या विन्दति सत्पतिम् ।
मोक्षार्थी लभते मोक्षं भोगार्थी भोगमाप्नुयात् ॥
काव्यार्थी च कवित्वञ्च निःसारः सारमाप्नुयात् ।
ज्ञानार्थी लभते ज्ञानं सर्वसंसारनाशनम् ।
इदं स्वास्त्ययनं धन्यं योगिनीनाम तन्त्रकम् ॥
नाकाले मरणं तस्य श्लोकमेकन्तु यः पठेत् ।
श्लोकार्द्धपठनादस्य दुष्टग्रहक्षयो भवेत् ॥

इति श्रीयोगिनीतन्त्रे सर्वतन्त्रोत्तमे द्वितीयभागे-
ऽष्टमः पटलः ।

अथ नवमः पटलः ।

श्रीभगवानुवाच ।

शृणु देवि ! प्रवक्ष्यामि निर्मलं भुवि दुर्लभम् ।

लिङ्गाष्टकशतं चक्रे हरिक्षेत्रसमं शुभम् ॥
विष्णुपुष्करकं क्षेत्रं शताष्टतीर्थसंयुतम् ।
हृष्टपुष्टजनाकीर्णं नरनारीसमन्वितम् ॥
विदुषां गणभूयिष्ठं धनधान्यादिसंयुतम् ।
गृहाणां पुरतो रम्यं भुवि चत्वरभूषितम् ॥
नानामणिगणाकीर्णं नानारत्नोपशोभितम् ।
नानातोरणसङ्कीर्णं वीथीभिः समलङ्कृतम् ॥
राजहंसीनिभैः शुभ्रैः प्रासादैरुपशोभितम् ।
सततञ्च जलैः धौतं सुराभाण्डमिवाशुचिं ॥

यदि वसति गुहायां पर्वताग्रे चिरं वा
यदि वसति त्रिखण्डे तस्य पार्श्वे च दूरे ।
यदि पठति पुराणं वेदसिद्धान्ततत्त्वम्
यदि हृदयमशुद्धं सर्वमेतद्विरुद्धम् ।

न तीर्थानि न दानानि न व्रतानि न चाश्रमाः ।
दुष्टाशयं दुष्टरति प्रनष्टव्याधि चेन्द्रियम् ॥
इन्द्रियाणि वशीकृत्य यत्र तत्र वसेन्नरः ।
तत्र तस्य कुरुक्षेत्रं प्रयागं पुष्करं गयाम् ॥
न लङ्घयेत् पानधर्मं देशधर्मं न लङ्घयेत् ।
यस्मिन् पीठे य आचारः स आचारो विधिः स्मृतः ॥
ओड्रे पुरुषोत्तमक्षेत्रे पीठे च वरवर्णिनि ! ।
अन्नं न दूषयेत् तत्र ब्राह्मणैन च त्यजता ॥
स्पृष्टास्पृष्टी योनिदोषः पानदोषो न गण्यते ।
विवाहव्यत्ययस्तत्र परिवित्ति न दूष्यति ॥
शयनञ्चैव ग्रेषे तु स्त्रीजनैः सह संस्थितिः ।
जालन्धरे शिलातीर्थे न दुष्येन्मत्स्यमांसकम् ॥
पादुकाया विशुद्धिश्च शुभ्रं तक्रञ्च गर्हितम् ।

पूर्णसन्ध्या स्वधर्मेण कालधर्मो न विद्यते ॥
सर्वश्रीयोगिनीपीठे धर्मं कैतवजं मतम्।
कामरूपे न सन्न्यासस्तथा दीर्घव्रतं प्रिये ! ॥
न त्यजेत् सामिषं देवि ! ब्रह्मचर्य्यमतं न च।
संसर्गपातकेनैव स्त्रीधर्मो धर्ममाश्रयेत् ॥
न शुक्रदर्शनं स्त्रीणां ताम्बूलाशा सदा भवेत्।
हंसपारावतं भक्ष्यं कूर्मं वाराहमेव च ॥
कामरूपे परित्यागाद्दुर्गतिस्तस्य सम्भवेत्।
हीनाचारस्तु सौसारे सर्वाशी सर्वविक्रयी ॥
तत्र नारी सदा तुष्टा तत्र राजा सुपुण्यवान्।
कोल्लपीठे जातिधर्मान् स्वजात्युक्तेन वर्त्तयेत् ॥
धर्माधर्मविचारेण स्वं रूपं स्वनिरूपकम्।
महेन्द्रे चैव योगी च ब्रह्मज्ञानी सुबुद्धिमान् ॥
श्रीहट्टे पानविपुलं न चान्नस्य परिक्रिया।
एतत् सर्वं समाख्यातं यत् पृष्टं सिद्धिदायकम् ॥
आशिष्यञ्च न दातव्यं देवब्राह्मणनिन्दके।
पिशुनाय न दातव्यं वेदभक्तिविवर्जिते ॥
दातव्यं भक्तियुक्ताय स्वधर्मनिरताय च।
विविधैः सुन्दरैः शुभ्रैः प्रासादैरुपशोभितम् ॥
रचितं शस्त्रसङ्घैश्च परिखाभिरलङ्कृतम्।
सितरक्तैस्तथा पीतैः कृष्णैश्चान्यैश्च वर्णकैः ॥
धूम्रैः समीरणै धूमैः पताकाभिरलङ्कृतम्।
नित्योत्सवं प्रमुदितं नानावादित्रनिस्वनम् ॥
वीणावेणुमृदङ्गेन चेपणोभिरलङ्कृतम्।
देवतायतनैर्दिव्यैः प्राकारोद्यानमण्डितैः ॥
पूज्या विचित्ररचितैः सर्वतः समलङ्कृताः।

स्त्रियस्तत्र प्रमुदिता दृश्यन्ते तनुमध्यमाः ॥
हारभारार्पितग्रीवाः पद्मपत्रायतेक्षणाः ।
पीनोन्नतकुचयुगाः पूर्णचन्द्रसमाननाः ॥
स्थिरालकाः सुकपोलाः काञ्चीनूपुरनादिताः ।
सुकल्पचारुजघनाः कर्णान्तायतलोचनाः ॥
नानाजलाशयैश्चान्यैः पद्मिनीशतमण्डितैः ।
सरांसि च मनोज्ञानि प्रसन्नसलिलानि च ॥
कुमुदैः पुण्डरीकैश्च तथा नीलोत्पलैः शुभैः ।
कदम्बैश्चक्रवाकैश्च तथैव जलकुक्कुटैः ॥
कारण्डवोत्करैर्हंसैस्तथान्यैर्जलचारिभिः ।
एवं नानाविधैर्वृक्षैः पूर्णं नानाविधैरवैः ॥
नानाजलाशयैश्चान्यैः शोभितं तत्समन्वितम् ।
आस्ते तत्र स्वयं देवो हयग्रीवो जनार्दनः ॥
पृथिव्यां यानि तीर्थानि सरितश्च सरांसि च ।
पुष्करिण्यस्तड़ागानि वाप्यः कुण्डाश्च सागराः ॥
तेभ्यः पूर्वं समाहृत्य जलानि च पृथक् पृथक् ।
सर्वलोकहितार्थाय रुद्रः सोमो गणैः सह ॥
तीर्थमपुनर्भवं नाम तस्मिन् क्षेत्रे वरानने ! ।
चकार कामिभिः सार्द्धं ततोऽपुनर्भवं स्मृतम् ॥
अस्मिंश्च विपुले क्षेत्रे माघे मासि मम प्रिये ! ।
यस्तत्र यात्रां कुरुते विपुले विजितेन्द्रियः ॥
विधिवत् सरसि स्नात्वा ततः श्रद्धासमन्वितः ।
देवानृषीन्मनुष्यांश्च पितॄन् सन्तर्पयेत्ततः ॥
तिलोदकेन विधिवन्नामगोत्रविधानतः ।
स्नात्वैवं विधिवत्तत्र सोऽश्वमेधफलं लभेत् ॥
ग्रहोपरागविषुवे संक्रान्त्यामयने तथा ।

युगादौ षड़शीत्याञ्च तथान्ये च शुभे तिथौ ॥
ये तत्र दानं विप्रेभ्यः प्रयच्छन्ति धनादिकम्।
अन्यतीर्थाच्छतगुणं फलन्तु प्राप्नुवन्ति वै ॥
पिण्डं तत्र प्रयच्छन्ति पितृभ्यः सरसस्तटे।
पितॄणामक्षयां तृप्तिं तत् करोति न संशयः ॥
धनुरष्टप्रमाणञ्च कुण्डमानं प्रकीर्त्तितम्।
वराहकाशयोर्मध्ये तत्तीर्थं सर्वकामदम् ॥
पुनर्न भवनं यस्मादपुनर्भवं तत् सरः।
तत्र स्नात्वा नरो याति भास्करस्यालयं प्रति ॥
न पुनर्जायते जन्तुर्यस्मात् त्वयि निमज्जनात्।
अनेन स्नानं कुर्य्यात्तु पश्येद्देवं त्रिलोचनम् ॥
गोकर्णञ्च विकर्णञ्च योगीशं सर्वकामदम्।
गोकर्णं वृषभाकारं विकर्णं पुरुषाकृतिम् ॥
अधस्ताच्चैव योगानां योगस्थानं ततः परम्।
उत्तरे च सरस्तीरे पर्वते भद्रकाशके ॥
या शिला पीण्ड्रवित्ता च मध्ये शोणच्युतिः प्रिये !।
पञ्चधन्वन्तरे यावद्दरवीथीति चेत्रकम् ॥
तस्याः शैवशिलायास्तु स्वभागे देवतात्रयम्।
सम्पाद्य विधिवद्भक्त्या गन्धैः पुष्पैः पृथग्विधैः ॥
चतुर्दश्याञ्च मिथुने मृते मोक्षमवाप्नुयात्।
त्रिशूलाभयहस्ताय यज्जटाभारधारिणे ॥
वृषध्वजाय देवाय गोकर्णाय नमो नमः।
मृगरूपाय देवाय चन्द्रहस्ताय विष्णवे ॥
गदाशारङ्गहस्ताय विकर्णाय नमो नमः।
महेशाय वृषस्थाय ज्ञानरूपाय ज्ञानिने ॥
धर्मज्ञाय स्वरूपाय योगीन्द्राय नमोऽस्तु ते।

अपुनर्भवपूर्वं तु नवधन्वन्तराय च ॥
सप्तधन्वन्तरं यावत् कुण्डं वाराणसीयकम् ।
तत्र स्नात्वा महेशानि ! स्मृते मोक्षमवाप्नुयात् ॥
चैत्रे कामत्रयोदश्यां मन्त्रेणानेन यत्नतः ।
सर्वपापविनिर्मुक्तः स गच्छेद् ब्रह्मणः पदम् ॥
सर्वतीर्थेषु यैः स्नानं कृतं वर्षशतैरपि ।
सकृद्वाराणसीकुण्डे स्नात्वा तत् फलमाप्नुयात् ॥
तस्य पूर्वधनुः पञ्च दैर्घ्यमानेन शङ्करि ! ।
मार्कण्डेयह्रदो नाम तत्र स्नात्वा व्रजेच्छिवम् ॥
उत्तरेण सरस्तीरे मार्कण्डेश्वरसंज्ञितम् ।
ये वा पश्यन्ति च स्नात्वा कुण्डे माहेश्वरं ततः ॥
आदित्यमर्चितं तत्र देवदेवं त्रिलोचनम् ।
सर्वपापविनिर्मुक्तो विमानवरमास्थितः ॥
उपगीयमानो गन्धर्वैः शिवलोकं व्रजन्ति वै ।
तिष्ठन्ति तत्र मुदिताः कल्पमेकं वरानने ! ॥
मार्कण्डेयो मुनिश्रेष्ठस्तपस्तेपे महामतिः ।
मार्कण्डेयह्रदो नाम विख्यातो मे ह्रदो वरः ॥
अनेन मज्जनं कृत्वा कुर्य्यान्मुण्डस्य मुण्डनम् ।
श्राद्धं कुर्य्यात् प्रयत्नेन उपवासं समाचरेत् ॥
ततः प्रभाते विमले नित्यं निर्वर्त्य साम्प्रतम् ।
गोकर्णस्य च देवस्य नातिदूरे महेश्वरि ! ॥
कुण्डं ब्रह्मसरो नाम एकविंशतिमानतः ।
तत्र स्नात्वा क्लमहरं न पुनर्भवमादिशेत् ॥
मुक्तये सर्वपापानां ब्रह्मणा निर्मितं पुरा ।
ब्रह्मकुण्ड ! महाभाग ! त्राहि मां भवसागरात् ॥
स्नात्वा चानेन मन्त्रेण सरसस्तस्य पश्चिमे ।

कृष्णाख्यशैलरूपश्च वराहो नाम नामतः ॥
तं प्रणम्य नरो भक्त्या विष्णुलोके प्रमोदते ।
पिशङ्गरोमाञ्चित तुङ्गकाय दंष्ट्राप्रभाग्रैश्च धराधराय ।
मनोज्ञनीलाचलमूर्त्तये च मुक्तिप्रदायाऽस्तु नमो नमस्ते ।
गोकर्णस्य तदैशान्यां इषुत्त्रेपत्रयान्तरे ।
मदने पर्वते रम्ये गत्वा पश्येच्च शङ्करम् ।
केदाराख्यं महादेवं सर्वदेवनमस्कृतम् ॥
तं लिङ्गमव्ययं दृष्ट्वा श्रद्धया सुसमाहितः ।
स्थापयित्वा तु तं भक्त्या गन्धैः पुष्पैर्मनोहरैः ॥
धूपैर्दीपैश्च नैवेद्यैर्नमस्कारैस्तथा स्तवैः ।
दण्डवत् प्रणिपातैश्च नृत्यगीतादिभिस्तथा ॥
सम्पूज्य तं विधानेन शिवलोकं व्रजेन्नरः ।
मदने सागरश्रेष्ठ! सुखसौभाग्यदायक ! ॥
आरोहयामि शिखरं पापं हर नमोऽस्तु ते ।
पूर्वाशाभिमुखो भूत्वा गत्वा कुर्य्यात् प्रदक्षिणम् ॥
क्षणेनैव समुद्धृत्य शिवलोकं स गच्छति ।
शिवं शुक्लवर्णं श्वेतवृषभारूढं पद्मासनस्थम् ॥
श्वेतनागयज्ञोपवीतिनं वरदाभयहस्तं सोमसूर्य्याग्निचक्षुषम् ।
जटामुकुटचन्द्रशेखरं शितभस्माङ्गलेपनम् ॥
अर्द्धनारीश्वरं पञ्चवक्त्रं त्रिनेत्रम् ।
तस्य वामे तत्पुरुषे अघोरमीशानम् ॥
सद्यः पश्चिमं डमरुखड्गादिधारिणम् ।
खड्गगोक्षीरयोर्वर्णं उत्तरं वामदेवकम् ॥
शङ्खचक्रधारिणं तप्तहेमाभवर्णम् ।
पूर्वं तत्पुरुषं देवं गदापद्मधरं परम् ॥
स्वच्छसिन्दूराभं दक्षिणमघोरं त्रिशूलम् ।

कपिलविटङ्कदंष्ट्रं नीलमेघाञ्जनोपमम् ॥
एवं केदाराख्यं शिवं ध्यात्वा शिवतन्त्रोक्तेन पूजयित्वा प्रतिपुष्पाञ्जलिं गृहीत्वा प्रतिमन्त्रेण पूजयेत् ।
नमश्चन्द्रार्द्धचूड़ाय नमः खट्वाङ्गधारिणे ।
नमोऽस्तु शूलहस्ताय केदाराय नमो नमः ॥
सर्वलोकेश्वरं देवं मोक्षकारणमव्ययम् ।
निष्कलं परमं देवं प्रणतोऽस्मि पुरातनम् ।
सर्वेषामेव गोप्तारं नमस्ये शम्भुमव्ययम् ॥
शब्दातीतं गुणातीतं नमस्ये शम्भुमव्ययम् ।
इति प्रसादनं कृत्वा केदारस्य च पश्चिमम् ॥
गत्वा ब्रह्मवटं वृक्षं नरः समवधारयेत् ।
केदारञ्च नमस्कृत्य कल्पवृक्षं ततः पुनः ॥
दशजन्मार्जितं पापं तत्क्षणादेव नश्यति ।
नमोऽव्यक्तस्वरूपाय महामलयवासिने ॥
महेन्द्रस्योपरिस्थाय न्यग्रोधाय नमो नमः ।
केदारस्य च कौवेरि इषुक्षेपत्रयान्तरे ॥
पौष्पके नगरे क्षेत्रे कमलाक्षहरं यजेत् ।
संसारसागरे मग्नं पापग्रस्तमचेतनम् ॥
त्राहि मां भवनेत्रघ्न ! त्रिपुरारे ! नमोऽस्तु ते ।
त्रिपुरारे ! नमस्तेऽस्तु कमलेश ! नमोऽस्तु ते ॥
दक्षिणे कल्पवृक्षस्य इषुक्षेपान्तरे प्रिये ! ।
कृतकोरगिरि र्योऽसौ स गिरिः पारिपात्रकः ॥
तस्यारोहणमात्रेण न पुन र्जायते भुवि ।
अष्टषष्टिस्तु शैलेऽस्मिन्मध्ये उन्नतको गिरिः ॥
मन्दराख्यन्तु तं शैलं गत्वा तत्र समाहितः ।
पूर्वभागे तु शैलस्य स्थितो मधुरिपु र्हरिः ॥

दर्शनात्तस्य देवस्य कुलानां तारयेच्छतम्।
केदारमुदकं पीत्वा कामधेनुं स्पृशेद्यदि॥
पूजयेत् केशवं भक्त्या न भूयो जायते क्वचित्।
अनुत्तमोत्तमं चैव शैलं मन्दारकं प्रिये!॥
ककुदेश्वरह्रदं दृष्ट्वा स याति परमां गतिम्।
ब्रह्मेश्वरश्च तत्रैव होममध्ये प्रतिष्ठितः॥
ब्रह्मेश्वरं नमस्कृत्य ब्रह्मज्ञानमवाप्नुयात्।
भावभूतेश्वरं दृष्ट्वा कृत्वा चैव प्रदक्षिणम्॥
मुच्यते पापसङ्घैश्च शिवलोके महीयते।
सम्पूजयेच्छिवं यस्तु मन्दारे चैत्रपर्वते॥
जन्मार्जितस्य पापस्य दर्शनाद्याति संचयम्।
प्रयागे सङ्गमे स्नात्वा यत् फलं लभते नरः।
तत् फलं लभते चाग्र्यं सहस्रगुणमेव हि॥
धर्मेश्वरस्य देवस्य कूपस्तिष्ठति चाग्रतः।
तत्र स्नानेन देवेशि! पिण्डनिर्वपणेन च॥
गोसहस्रफलं सम्यक् लभते च वरानने।
पारिपात्रस्योत्तरतो धनुर्विंशान्तरे प्रिये!॥
कपिलस्याश्रमे रम्ये सम्पश्येत् कपिलेश्वरम्।
तं सम्पूज्य नरो भक्त्या विष्णुलोके महीयते॥
पारिपात्रे स्थितं देवं सर्वाघभयनाशनम्।
न तेषां ये प्रपश्यन्ति भयं संसारसागरे॥
पिशाचमोचनं नाम तीर्थं तस्य च पूर्वतः।
धनुरेकादशान्ते च तत्रैव कालभैरवः॥
कृष्णं गौरं वृषाकारं पूर्वभागे गतं प्रिये!।
पिशाचमोचने तीर्थे पूजयामास शूलिनम्॥
इत्थं देवस्य तल्लिङ्गं कपर्दीश्वरमुत्तमम्।

पूजनीयं प्रयत्नेन स्तोतव्यं विविधैः स्तवैः ॥
व्याघ्रेश्वरस्य देवस्य दक्षिणे वरवर्णिनि ! ।
स्वयम्भूस्तत्र लिङ्गं वै देवानामपि दुर्लभम् ॥
पूर्वमुखन्तु तल्लिङ्गं श्रेष्ठस्थानमुदाहृतम् ।
कृत्तिवासेश्वरं प्राप्य संसारविगतज्वरः ॥
संसारभयनिर्मुक्ताः सर्वपापविवर्जिताः ।
सुखेन मुक्तिमायान्ति यथार्हन्ति यतस्तथा ॥
व्याघ्रेश्वरस्य चैशान्ये धनुर्दशप्रमाणतः ।
कृत्तिवासेश्वरं प्राप्तं लिङ्गयोनिप्रतिष्ठितम् ॥
कृत्तिवासेश्वरो देवो द्रष्टव्यश्च पुनः पुनः ।
यदीच्छेत्तारकं ज्ञानं शाश्वतं चामृतं पदम् ॥
एतत् सर्वञ्च कर्त्तव्यं यदीच्छेत् सुखमात्मनः ।
मदनाचलस्येशाने इषुक्षेपत्रयान्तरे ॥
वाणेश्वरन्तु विख्यातं सप्तपातालभेदकम् ।
वत्सहृतन्तु लिङ्गानां सर्वेषामुत्तमोत्तमम् ॥
तं प्रणम्य नरो भक्त्या वत्सराज्जायते नरः ।
तस्य देवस्य वायव्ये नानावर्णेन या शिला ॥
गरुड़ाख्यं महालिङ्गं पूजयेद्गरुड़ं विना ।
दर्शनात्तस्य देवस्य गोशतस्य फलं लभेत् ॥
नमस्ते पक्षिराजेन्द्र ! वासुदेवहिते रत ! ।
अनुज्ञां देहि पक्षीश ! त्वमस्य दर्शनं प्रति ॥
प्रणिपत्य पठेन्मन्त्रं पश्चिमस्यान्तरे महत् ।
विष्णोरायतनं प्राप्य तत्र शिवजलं शुभम् ॥
स्नात्वा च मुण्डनं कृत्वा ध्यात्वा विष्णुं क्षपेन्निशाम् ।
ततः प्रभाते देवेशि ! मणिकूटस्य उत्तरे ॥
वज्रभाख्या नदी पुण्या सर्वपापप्रमोचनी ।

तत्र स्नात्वा चतुर्दश्यां माघे वा फाल्गुनेऽथवा ॥
बल्लभायाश्च देवेशि ! महापातकनाशनम् ।
वल्लभायां नरः स्नात्वा नीलकण्ठस्य दर्शनात् ॥
न स्पृहन्तीह पापानि सप्तजन्मकृतान्यपि ।
तस्मिंस्तीर्थे नरः स्नात्वा दृष्ट्वा सादरमाधवम् ॥
यत्र तत्र स्थितो वापि संसारे न पुनर्विशेत् ।
संसारे पतितानाञ्च गङ्गा त्राणकरी भवेत् ॥
वराहविवरं दृष्ट्वा नरो गच्छेन् महानदीम् ।
अशोकामलसं याता कोलदण्डविनिःसृता ॥
नन्दिनी पङ्कजा चैव नदी मधुमती परा ।
मणिकूटे च संयाता तस्य तत्राधिकं फलम् ॥
नमोऽस्तु ते पुण्यजले ! नमः सागरगामिनि ! ।
नमस्ते पापविमले ! नमो देवि ! वराङ्गने ! ॥
अपुनर्भवजले स्नात्वा विशेन्नोकर्णमीश्वरम् ।
स्वर्गद्वारञ्च तत्रैव इमं मन्त्रमुदीरयेत् ॥
ब्रह्मा विष्णुस्तथा रुद्रः सर्वदेवै निरूपितः ।
स्वर्गद्वारं महापुण्यं समारोहेत् सुदुर्लभम् ॥
दशलक्षणयुक्ताय चतुष्पादाय चारवे ।
अर्घ्यं ददामि धर्माय स्वर्गद्वारनिवासिने ॥
गत्वा तत्र पञ्चहस्तं नमस्कुर्य्यादतन्द्रितः ।
ह्रदे वाराणसीये च मार्कण्डेयसरे तथा ॥
स्नात्वा कामहरं दृष्ट्वा कल्पवृक्षं नमेत्ततः ।
स्नात्वा पश्चाद्दुर्लभायां ततो हरिगृहं व्रजेत् ॥
यत्तत्र तीर्थं विधिवत् करोति नियतेन्द्रियः ।
कुलैकविंशमुद्धृत्य विष्णुलोकं स गच्छति ॥
मणिकूटस्य पूर्वे तु नातिदूरे महेश्वरि ! ।

विष्णुपुष्करकं नाम सर्वतीर्थोद्भवं जलम् ॥
तत्र स्नात्वा वरारोहे ! विपुलां लभते श्रियम् ।
पुष्कराकारमास्थाय स्थितोऽसौ वसुधातले ॥
मर्त्त्यलोकहितार्थाय पापं मे हर पुष्कर ! ।
स्नात्वा चानेन मन्त्रेण वारुणं तत्र सञ्जपेत् ॥
दद्यादर्घ्यञ्च विधिवदारोहेदपि कूटकम् ।
मणिकूटाचले विष्णुर्हयग्रीवस्वरूपधृक् ॥
शतबाहुप्रमाणञ्च अचलाष्टसहस्रकम् ।
मन्त्रेणारोहयेद्देवि ! पीतपुष्पेण पूजयेत् ॥
ततः स विष्णुदेहञ्च द्वारिकञ्च प्रसादयेत् ।
दण्डहस्त ! महाबाहो ! कालदैत्यनिसूदन ! ॥
द्वारपाल ! नमस्तेऽस्तु कवाटं देहि मे सदा ।
पीतञ्च द्विभुजं शान्तं मणिकुण्डलचर्चितम् ॥
चक्रं बाणधरं शुक्लं नमस्ते परिवेष्टितम् ।
सर्वलक्षणसम्पन्नं मणिशैलं त्रिलोचनम् ॥
ध्यात्वा तत्पीठके मन्त्रमारोहेत् शिखरं तदा ।
मणिकूट ! गिरिश्रेष्ठ ! पीतवर्ण ! त्रिलोचन ! ॥
त्वय्यद्यारोहणं कृत्वा द्रक्ष्यामि भवनं तथा ।
तं पूर्वाभिमुखेनैव उत्तराभिमुखेन वा ॥
आरोहेन्मणिशैलञ्च वर्जयेदन्यदिङ्मुखम् ।
गत्वा विन्ध्याचलं पश्चात् कृत्वा तत् त्रिः प्रदक्षिणम् ॥
प्रविश्य संयतो भूत्वा धौतवासा जितेन्द्रियः ।
मूलेन स्नापयेद्देवं सौगन्धिकजलैः शुभैः ॥
कर्पूरवासितैर्द्रव्यैः सुगन्धिकुसुमादिभिः ।
चन्दनागुरुपद्मानि यानि काम्यानि कानिचित् ॥
कृत्वानि कुण्डमालिख्य तज्जले स्नानमाचरेत् ।

सितामलजलैश्चैव तथा कोष्णोदकेन च ॥
उष्णेन वारिणा चैव क्रमात् पञ्चामृतेन च ।
त्रिसितेन त्रिगन्धेन त्रिजलैर्मम प्रिये ! ॥
प्रीत्यर्थं तस्य देवस्य स्नानं देवि ! समाचरेत् ।
त्रिसितं चन्दनं पद्ममुशीरं परिकीर्त्तितम् ॥
नित्यं मलयजं मर्त्त्यं त्रिगन्धं सुमनोहरम् ।
तीर्थोदकं गन्धतोयं कर्पूरस्योदकं तथा ॥
त्रिजलञ्च महेशानि ! स्नापयेदन्तरान्तरे ।
स्नापयित्वा यथोक्तेन तथा स्नानं समाचरेत् ॥
अर्द्धस्नानं ततः कुर्य्याद्विधिज्ञः परमेश्वरि ! ।
अष्टोत्तरसहस्रैस्तु सुवर्णघटितैर्युतैः ॥
तण्डुलैः स्नापनं कुर्य्यात् कर्पूरादिविमिश्रितम् ।
अशक्तस्तु शतं कुर्य्याद्दशधा सुरसुन्दरि ! ॥
ताम्रैर्वा राजतैर्वापि अथवा सति सम्भवे ।
मार्त्तिकैर्वा घटैः स्नानमशक्तस्तु समाचरेत् ॥
स्नानात् पूर्वं महेशानि ! तीर्थं यत् परिकीर्त्तितम् ।
जलमाहृत्य कुम्भे च कृत्वा पुण्यं विधानवित् ॥
गन्धं पुष्पं ततो दत्त्वा पुनर्मन्त्रं जपेत्ततः ।
अमृतीकरणं कुर्य्यान्मुद्रां तत्र च दर्शयेत् ॥
षडङ्गं विन्यसेत्तत्र अवगुण्ठ्य ततोऽर्च्चयेत् ।
महोत्सवं ततः कृत्वा स्नानार्थं देवदक्षिणे ॥
स्नापयेत् स्नानशेषे तु देवबुद्ध्या क्षिपेत्तनौ ।
उद्वर्त्तनं प्रतिदिनं कर्त्तव्यं त्रिदिनान्तरे ॥
दिनत्रयान्तरे वापि सर्वकाले विशेषतः ।
तिलोद्भवेन तैलेन सुगन्धेन मम प्रिये ! ॥
पलेन च पलार्द्धेन तदर्द्धेनापि यत्नतः ।

स्नेहैर्वा रजनीभिश्च तण्डुलोद्वर्त्तनादिभिः ॥
संस्थाप्य देवदेवेशं विल्वपत्रेण शङ्करि ! ।
संघृष्य गात्रं पत्रैर्वा अपामार्गस्य मूलकैः ॥
नलपुष्पस्य कूर्चैश्च न कूर्चैश्च महेश्वरि ! ।
कुशेन चामरेणाथ गोवालेन विशेषतः ॥
उशीरं कूर्चकं दत्त्वा सर्वपापैः प्रमुच्यते ।
दत्त्वा गोवालकं कूर्चं सर्वान् पापानपोहति ॥
दत्त्वा च चामरं कूर्चं श्रियमाप्नोत्यनुत्तमाम् ।
न वराहस्य रोमेण न वंशेन कदाचन ॥
गवयस्य तथाश्वस्य रोमन्तु परिवर्जयेत् ।
लिङ्गे वा प्रतिमायां वा शालग्रामे तथैव च ॥
न कूर्चयेत् प्रतिदिनं पञ्चाहे सप्तके तथा ।
मासान्ते वाथ पक्षान्ते कूर्चयेन्मम सुन्दरि ! ॥
अयने विषुवे चैव भौमवारे दिनक्षये ।
द्वादश्यां राहुग्रस्ते च तैलस्नानं न कारयेत् ॥
नैव तत् कूर्चयेद्देवि ! न वराङ्गे मुखे ततः ।
नासिकान्ते तथा गुह्ये लिङ्गे च पुलकेषु च ॥
वस्त्रेण मार्जयेद्देवि ! कार्पासेनाथ चन्दनैः ।
रक्तवस्त्रै भवेत् कुष्ठी पाण्डुव्याधिमवाप्नुयात् ॥
पटैश्च क्षोभमाप्नोति नीलैरक्तैः क्षयं व्रजेत् ।
परिधाप्य ततो वस्त्रं स्वर्गक्षयकरं तथा ॥
कटीवेष्टनकं दद्यात् नानारत्नादिभूषणम् ।
परिधानं पिधायैवं स्नानं यः कुरुते नरः ॥
पूजाकाले भोजने च स्नाने चैव विशेषतः ।
सोऽपि नाशमवाप्नोति धननाशं तथैव च ॥
मलयजेन गन्धेन गोपीचन्दनकेन वा ।

विल्वकाष्ठोद्भवेनाथ तुलसीकाष्ठकेन वा ॥
पद्मकेन तमालेन तथा रोचनयाथवा ।
पिधाय तिलकं श्रेष्ठमेषामेकतमेन च ॥
चतुःसमञ्चातिसमं द्विसमञ्च सुरेश्वरि ! ।
अत्रालिप्य ततो देहमयनेन विसर्जयेत् ॥
शीते रात्रौ पुनः स्नानेनानुलिप्य सुगन्धिभिः ।
ललाटे तु विशेषेण वराङ्गे न कदाचन ॥
चतुःसमञ्च त्रिसमं द्विसमञ्च सुरेश्वरि ! ।
पादे पृष्ठे तथा नेत्रे न दद्यादनुलेपनम् ॥
चतुर्लग्ने हता लक्ष्मी मुखलग्ने हताः स्त्रियः ।
दरिद्रः करलग्ने च पदलग्ने धनक्षयः ॥
लिङ्गस्य पुलकान्ते तु न दद्याच्चन्दनं प्रिये ! ।
पद्मपत्रे विल्वपत्रे करवीरदले तथा ॥
तत्र दद्याच्चन्दनञ्च लिङ्गे पुनश्च सम्भवे ।
नेत्राणि नाञ्जयेद्देवि ! कज्जलैश्च विशेषतः ॥
मालतीपत्रसम्भूतं तिलतैलेन आयसे ।
तापयेत् पातयेद्देवि ! कज्जलं तत् प्रकीर्त्तितम् ॥
नीराजनेन यः पूजां करोति वरवर्णिनि ! ।
अनुत्तं प्राप्नुयात् सोऽपि इह लोके परत्र च ॥
अथ शुद्धिजलं यस्तु नैव कुर्य्यात् सुरार्चिते ! ।
सोऽपि मूढो भवेद्रोगी क्षिप्रं वा नाशमाप्नुयात् ॥
लिङ्गे वा प्रतिमायां वा पूर्वमेव मम प्रिये ! ।
नीरैः सम्मार्जयेद्यन्त्रं कृत्वा चैव प्रदक्षिणम् ॥
संस्पृशेत् प्रतिमां भद्रे ! माञ्च लिङ्गस्वरूपिणम् ।
ओं नमो नारायणायेति ये वदन्ति मनीषिणः ॥
किं कार्य्यं बहुमात्रैर्वा न च विभ्रमकारकैः ।

ओँ नमो नारायणायेति मन्त्रः सर्वार्थसाधकः ॥
यजंस्तेनैव मन्त्रेण सूक्तेन पुरुषेण वा ।
द्वादशाक्षरबीजेन कृष्णबीजेन पूजयेत् ॥
व्यस्तेन च समस्तेन अनुलोमविलोमके ।
तत्रार्कचन्द्रवह्नीनां मण्डलानि विचिन्तयेत् ॥
ततो विचिन्त्य हृदयं ॐकारं ज्योतीरूपिणम् ।
कर्णिकायां समासीनं ज्योतीरूपस्वरूपिणम् ॥
अष्टाक्षरं ततो मन्त्रं प्रवदन्ति यथाक्रमम् ।
केशवादिपुरं कृत्वा द्वादशाक्षरकं न्यसेत् ॥
चतुर्भुजं महासत्त्वं सूर्यकोटिसमप्रभम् ।
चिन्तयित्वा ततो योगं ज्योतीरूपं सनातनम् ॥
तत आवाहयेन्मन्त्रं क्रमशोधितमानसः ।
मीनरूपो वराहश्च नरसिंहोऽथवा पुनः ॥
आयातु देवो वरदो मम नारायणोऽग्रतः ।
सुमेरोश्च पादपीठे पद्मकल्पितमासनम् ॥
सर्वसत्त्वहितार्थाय तिष्ठस्व मधुसूदन ! ।
त्रैलोक्यपतीनां पतये नमो देवदेवाय ।
अर्घ्योऽयं हृषीकेशाय इत्यर्घ्यं विष्णवे नमः ॥ इत्यर्घ्यम् ।
स्वपाद्यं पादयोर्देव ! पद्मनाभ ! सनातन ! ।
विष्णो ! कमलपत्राक्ष ! गृहाण मधुसूदन ! ॥ पाद्यम् ।
मधुपर्कं महादेव ! ब्रह्माद्यैः कल्पितं तव ।
मया निवेदितं भक्त्या गृहाण पुरुषोत्तम ! ॥ मधुपर्कम् ।
मन्दाकिन्यास्तु ते वारि जलपानं हराशुभम् ।
गृहाणाचमनीयं त्वं मया भक्त्या निवेदितम् ॥ आचमनीयम् ।
त्वमापः पृथिवी चैव ज्योतिस्त्वं वह्निरेव च ।
लोकसंवित्तिमात्रेण वारिणा स्नापयाम्यहम् ॥ स्नानम् ।

दरवस्त्रसमायुक्तो यज्ञवर्णविभूषिते ।
स्वर्णवर्णप्रभेदेन वाससी तव केशव ! ॥ इति वस्त्रम् ।
शरीरं ते लेपयामि चेष्टा स्वैव च केशव ! ।
मया निवेदितान् गन्धान् प्रतिगृह्य विलिप्यताम् ॥ विलेपनम् ।
ऋग्वेदादिषु मन्त्रेण शोधितं पद्मयोनिना ।
सावित्रीग्रन्थसंयुक्तमुपवीतञ्च न च्युतम् ॥ इति यज्ञोपवीतम् ।
सूर्य्यश्चन्द्रश्च विद्युच्च त्वमेवाग्निस्तथैव च ।
त्वमेव ज्योतिषां देव ! दीपोऽयं प्रतिगृह्यताम् ॥ इति दीपः ।
अन्नं पञ्चविधञ्चैव रसैः षड्भिः समन्वितम् ।
मया निवेदितं भक्त्या नैवेद्यं तव केशव ! ॥ इति नैवेद्यम् ।
पूर्वे दले न्यसेद्देवं याम्ये सङ्कर्षणं न्यसेत् ।
प्रद्युम्नं पश्चिमे चैव तथैशान्ये त्रिविक्रमम् ॥
तथा च वासुदेवस्य गरुड़ं पुरतो न्यसेत् ।
तथा महागदाञ्चैव न्यसेद्देवस्य दक्षिणे ॥
ततः सवेदं धनुषी न्यसेद्देवस्य वामतः ।
दक्षिणे वसुधां देवीं वाङ्मयं तत्र विन्यसेत् ॥
श्रियो दक्षिणतः स्थाप्या पुष्टिं सोत्तरतो न्यसेत् ।
वनमाल्यञ्च पुरतः श्रीवत्सकौस्तुभौ ततः ॥
विन्यसेत् हृदयादीनि विन्यसेच्च चतुर्दिशम् ।
ततोऽपि देवदेवस्य कोणे नैव तु विन्यसेत् ॥
पीठेशानं पूजयेत्तु तच्छक्तीरपि बाह्यतः ।
ग्रहांश्च दिक्पतींश्चैव दद्यात् पुष्पबलित्रयम् ॥
एवं सम्पूज्य देवेशं मण्डलस्थञ्च जनार्दनम् ।
लभेदभिमतान् कामान् नरो नास्य तु संशयः ॥
अनेनैव विधानेन मण्डपस्थं हयाननम् ।
पूजितं पश्यते यस्तु न विघ्नं विष्णुमव्ययम् ॥

सकृदप्यर्च्चितो येन विधिनानेन केशवः ।
जन्मसृत्युज्वरातीतः स विष्णोः पदमाप्नुयात् ॥
यः स्मरेत् सततं भक्त्या हयग्रीवमतन्द्रितः ।
अन्वहं तस्य हे सन्ध्ये स्वे तद्दीपः प्रकल्पितः ॥
ओंकारादिसमायुक्तं नमस्कारान्तदीपितम् ।
स्वनाम सर्वतत्त्वानां मन्त्र इत्यभिधीयते ॥
अनेनैव विधानेन मण्डपस्थं हयाननम् ।
पूजितं यस्तु देवेशि ! गन्धपुष्पं निवेदयेत् ॥
एवमस्य प्रकुर्वीत यथोद्दिष्टक्रमेण तु ।
मुद्रां ततो निबध्नीयाद् यथोक्तक्रमयोगतः ॥
जपञ्चैव प्रकुर्वीत मूलमन्त्रेण मन्त्रवित् ।
अष्टाविंशतिरष्टौ वा अष्टोत्तरशतं तथा ॥
काम्येषु चाधिकं कुर्य्याल्लक्षकोट्यधिकं प्रिये ! ।
पद्मं शङ्खं श्रीवत्सञ्च गदां गरुड़मेव च ॥
चक्रं शङ्खञ्च शारङ्गं अष्टौ मुद्राः प्रकीर्त्तिताः ।
अर्चनीयं न जानन्ति हरेर्मन्त्रान् यथोदितान् ॥
हिरण्यगर्भेतिमन्त्रेण पूजयेत् परमेश्वरम् ।
वक्ष्यमाणेन मन्त्रेण परमेशं समर्च्चयेत् ॥

ओं नमोऽस्त्वनन्ताय विशुद्धचेतसे नमः स्वरूपाय सहस्रबाहवे ।
सहस्ररश्मिप्रवराय वेधसे हयास्यरूपाय नमो नमस्ते ॥
विशालदेहाय विशुद्धकर्मणे समस्तविश्वार्त्तिहराय शम्भवे ।
नमोऽस्तु सूर्य्यानलतीव्रतेजसे हयास्यरूपाय नमो नमस्ते ॥

अनादिदेवाधिप ! शेखरप्रभो !
नमो विभो ! भूतपते ! महेश्वर ! ।
मरुत्पते ! सर्वपते ! जगत्पते !
रमापते ! भुवनपते ! सदा नमः ॥

जलेश ! नारायण ! विश्वशङ्कर !
क्षितीश ! विश्वेश्वर ! विश्वलोचन ! ।
शशाङ्कसूर्य्यायतविश्वमूर्त्तये
हयास्यरूपाय नमो नमस्ते ॥
श्वेताय पुष्पकसरोवरप्रदाय
विद्याक्षियुक्तसहकारिचतुर्भुजाय ।
लौहित्यनिर्मतिकृते लवणासकर्त्रे
तस्मै तुरङ्गवदनाय नमो नमस्ते ॥
शुक्लाय दीप्तमणिपर्वतमन्दिराय
पीताम्बरात्त्वसज्जनेषु च मुक्तिदाय ।
भक्तेषु वाञ्छितधनं ददते समस्तम्
सोऽभ्युद्धरेत् पितृगणञ्च हरे ! नमस्ते ॥
शुद्धाय सुताय मणिरञ्जिताय प्रलम्बबाहुकमलासनाय ।
ततो घनाशनपुरघातकाय हयास्यरूपाय नमो नमस्ते ॥
जयति वरद ! पार्श्वे पुस्तकव्यस्तहस्तो
विधृतसितसरक्तो मोक्षदानं बिभर्त्ति ।
शशधरशुभमूर्त्ति र्भुक्तिमुक्तिप्रदायी
प्रणतसुरनरेभ्यो वाजिवातो मुरारिः ॥
हुड़ासुर ! हयग्रीव ! मुरारे ! मधुसूदन ! ।
मणिकूटकृतावास ! कमलाक्ष ! नमोऽस्तु ते ॥
जन्मकोटिकृतं पापं कल्पकोटिशतानि च ।
हयस्य दर्शनादेव सर्वं नश्यति तत्क्षणात् ॥
समस्तोत्रं विशुद्धात्मा स्तुतिपाठं समाचरेत् ।
प्रदक्षिणत्रयं कुर्य्यात् पश्चाकारं नमेत्ततः ॥
दक्षिणादुत्तरं गत्वा देवस्य च महेश्वरि ! ।
कृत्वाञ्जलिं ततो भक्त्या भ्रमयित्वा नमेत्ततः ॥

प्रत्येकं प्रणमेद्देवि ! दण्डवत् प्रणिपातयेत् ।
यो नो नमेद्भ्रमित्वा च अपराधी भवेत्तदा ॥
अवज्ञाञ्जलिलोकानां नमस्कारं करोति यः ।
मोहान्धकारनरके पच्यते नात्र संशयः ॥
पत्रान्तरे च प्रणमेन्मूर्ध्नां न च क्षितिं स्पृशेत् ।
शपन्ति देवतास्तस्य विफलं परिकीर्त्तितम् ॥
प्रणामो देवदेवेस्य यावत्यो मूर्त्तिकाः प्रिये ! ।
शरीरे वा महेशानि ! तस्य पुण्यफलं शृणु ॥
यावन्तो रेणवस्तस्य यावत्कालञ्च सन्ति वै ।
तावद्वर्षसहस्राणि ब्रह्मलोके महीयते ॥
देव्युवाच । ब्रूहि मे देवदेवेश ! मम कान्त ! जगत्पते ! ।
मणिकूटे त्वयं विष्णुः स्थापितः केन वै पुरा ॥
भगवानुवाच । शृणु देवि ! महाभागे ! आगमं वेदसन्निभम् ।
कथयामि पुरावृत्तं प्रतिमायाश्च सम्भवम् ॥
प्रवृत्ते च महायज्ञे प्रासादे देवनिर्मिते ।
चिन्तयार्त्तो महीपालः प्रतिमार्थमहर्निशम् ॥
नवोदकेन देवेशं सर्वं त्वां लोकभावनम् ।
स्वर्गस्थित्यन्तकर्त्तारं पश्यामि पुरुषोत्तमम् ॥
चिन्तादुःखमयो राजा दिवारात्रं न शेरते ।
न भुङ्क्ते विविधान् भोगान् न स्नानं न प्रसाधनम् ॥
शैलशृङ्गस्थितावापि प्रशस्ता या महीतले ।
विष्णोः प्रतिमयोग्ये याः सर्वलक्षणलक्षिताः ॥
एतैरेव प्रमाणन्तु दयितं यत् सुरार्चनम् ।
तत् केन वा करिष्यामि चाज्ञापयतु मे प्रभुः ॥
कुशानास्तीर्य्य सुप्त्वा च इन्द्रद्युम्नो महाबलः ।
हरिध्यानपरो भूत्वा सुस्वाप नियतेन्द्रियः ॥

सुप्तस्य तस्य नृपते र्वासुदेवो जगद्गुरुः ।
आत्मानं दर्शयामास सुप्तस्तस्मै च चक्रभृत् ॥
ददर्श स तु विष्णुं च देवदेवं जगद्गुरुम् ।
आत्मानं दर्शयामास तस्मै सुप्ताय चक्रभृत् ॥
शङ्खचक्रधरं देवं गदापद्मोग्रपाणिकम् ।
युगान्तादित्यवर्णाभं नीलवैदूर्य्यसन्निभम् ॥
सुवर्णपृष्ठमासीनं षोड़शार्द्धभुजं शुभम् ।
क्रतुनानेन दानेन धिया भक्त्या प्रशस्तया ॥
तुष्टोऽस्मि ते महीपाल ! कथं त्वमनुशोचसि ! ।
यदत्र प्रतिमां राजन् ! जगत्पूज्यां सनातनीम् ॥
स्नापयिष्यसि हे धीर ! तदुपायं ब्रवीमि ते ।
सागरस्य जलस्यान्ते नानाद्रुमविभूषिते ॥
वेलाभिर्हन्यमानस्तु न चासौ कल्पते द्रुमः ।
हस्ते च परशुं कृत्वा ऊर्मिमन्तं ततो व्रजेत् ॥
एकाकी विहरन् राजन् ! सत्यं पश्यसि पादपम् ।
इति क्वचित् समालोच्य च्छेदयन्नविशङ्कितः ॥
पश्चिमायतनं वृक्षं प्रातरद्भुतदर्शनम् ।
छित्वा परशुना वृक्षं तदा भूपाल ! चानय ॥
कुरु तत् प्रतिमां दिव्यां जहि चिन्तां विमोहिनीम् ।
एवमुक्त्वा महाबाहुः प्रयातोऽदर्शनं हरिः ॥
स चापि स्वप्नमालोच्य परं विस्मयमागतः ।
तां दिशं समुदीक्ष्यैव स्थितस्तद्गतमानसः ॥
व्याहरन् वैष्णवं मन्त्रमुक्तञ्चैव तदात्मकम् ।
प्रभातायां रजन्यान्तु सततानन्यमानसः ॥
स स्नात्वा सागरे रम्ये यथासम्यग्विधानतः ।
तं ददर्श महावृक्षं यथा तेजस्विनं द्रुमम् ॥

मोहात्मकं दुरारोहं पुण्यं विफलमेव च।
महोच्छ्रायं महाकायं प्रसुप्तञ्च जलान्तिके॥
नीलरत्नाग्रवर्णाभं नामजातिविवर्जितम्।
नरराजस्तथा विष्णोर्द्रुमं दृष्ट्वा पदाम्वितम्॥
परशुना शातयामास निशातनतयैव हि।
सप्तधा द्रुमराजः स निपपात महीतले॥
ओड्रदेशे मूलभागे कल्पयामास वै विभुः।
तदूर्द्ध खण्डं काश्मीरे कबन्धाकारमेव च॥
आदित्यं तं विजानीयाद्रामेण स्थापितं पुरा।
शेषादित्यं तदूर्द्धाङ्गं शुक्रेण स्थापितं प्रिये!॥
शिलारूपं महेशानि! स्थापितं गुरुणा ततः।
भागद्वयं कामरूपे भागैकं मलयागिरौ॥
मणिकूटे ततोऽर्द्धञ्च स्थापितं वरुणेन हि।
प्राच्यां नन्दीशमैशान्ये मत्स्याचो नाम माधवः॥
शिलामयो दारुमयः कुवेरेणैव स्थापितः।
महावराहनामा च योऽष्टादशभुजै र्युतः॥
हयास्यो मणिकूटे च माधवाख्यो व्यवस्थितः।
सम्भवं कथितं देवि! प्रापणं शृणु पार्वति!॥
इङ्गुदीफलविल्वानि वदरामलकानि च।
खर्जूरं पनसञ्चैव तथा तालफलानि च॥
दाड़िमं कदलीञ्चैव प्रयत्नेन नियोजयेत्।
लकुचं मधुकं युक्तं तथा पूगफलानि च॥
वीजपूरञ्च मधुरं कर्कन्धूञ्च निवेदयेत्।
मूलकस्य च शाकञ्च गाजरस्य तथैव च॥
यस्य फलं विशालञ्च तस्य शाकं प्ररोहकम्।
वास्तूकस्य च शाकञ्च पालङ्कस्य मम प्रिये!॥

प्रदेयानि प्रियाण्यन्यानि च वा तिन्तिड़ीफलम् ।
कूष्माण्डं पर्वतीयञ्च तथा चारणसम्भवम् ॥
कदलं बीजपूरञ्च रामकं पौण्ड्रकं तथा ।
अकालपनसञ्चैव तथान्यदपि वर्जयेत् ॥
ब्रीहीनाञ्च प्रवक्ष्यामि उपयोगानि शङ्करि ! ।
एकचित्तं समाधाय प्रापणं शृणु शङ्करि ! ॥
सोमधान्यं वृहद्धान्यं रक्तशालिकमेव च ।
राजधान्यं षष्टिकञ्च देववल्लभकं तथा ॥
चणकं कोद्रवञ्चैव वर्जयेन्मम सुन्दरि ! ।
क्षारञ्च कृष्णजीरञ्च वर्णञ्च मार्त्तिकोद्भवम् ॥
लवणं प्राचीसम्भूतं तथोत्तरसमुद्भवम् ।
पशूनाञ्च प्रवक्ष्यामि वन्यानां ग्रामवासिनाम् ॥
यानि यान्युपयोग्यानि गव्यं देवि ! पयोऽमृतम् ।
मार्गं मात्स्यं तथाच्छागं शारभं शाशकन्तथा ॥
एतैस्तु प्रापणं दद्याद्विष्णोश्चैव प्रियावहम् ।
माहिषं वर्जयेन्मांसं क्षीरं दधि घृतन्ततः ॥
पक्षिणाञ्च प्रवक्ष्यामि ये प्रयोज्या मम प्रिये ! ।
हारितञ्च मयूरञ्च नारकं वर्त्तकन्तथा ॥
कपिलश्चैव चाषश्च काककुक्कुटको किरी ।
वन्यकुक्कुटकञ्चैव शरारिश्च कपोतकः ॥
विल्वकः कुलिकश्चैव रक्तपुच्छश्च टिट्टिभः ।
कृष्णमत्स्याशनश्चैव पक्षिणां तु विशिष्यते ॥
अभक्ष्यञ्चैव मांसञ्च यद्वा पञ्चनखस्य च ।
चित्रमत्स्यं रोहितञ्च मद्गुरं कविकं तथा ।
महाशल्कञ्च राजीवं दद्यात् सिंहतुण्डकं तथा ।
मत्स्यान्येतानि देयानि विभालीश्च विवर्जयेत् ॥

जालपादांश्च शकुलान् मासं वाराहकं तथा ।
कौसुम्भशाकं पिण्याकं रक्तपादांश्च केशरान् ॥
शोभाञ्जनं रक्तशेलुं केमुकं तिन्दुकं तथा ।
पूतिकं कानकञ्चैव वर्जयेत् साधकोत्तमः ॥
यथोक्तं साधयेन्मन्त्रं योगी ध्यानपरायणः ।
अभक्ष्यं वर्जयेत् सर्वं देवताध्यानसाधने ॥
हविष्याशी शुचि र्भूत्वा मन्त्रतन्त्रविशारदः ।
अहर्निशं जपेद्विद्यां तद्गतेनान्तरात्मना ॥
स भवेत् कालिकापुत्रः सर्वत्र निर्भयो भवेत् ।
रहस्यं परमं देवि ! तव स्नेहात् प्रकाशितम् ॥

इति योगिनीतन्त्रे सर्वतन्त्रोत्तमे द्वाविंशतिसाहस्रे द्वितीयभागे नवमः पटलः ।

समाप्तोऽयं ग्रन्थः ।

हस्तेर